तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि मानुशोचयतः सर्वः स्वकृतं विंदते ऽवशः
२१
संसृतिः सुखदुःखे इति यावदज्ञानं न निवर्त्तत इत्यर्थः एवमुक्तप्रकारेण नैते त्वत
नयाः अहं तु नान्यैः [illegible] तितवान् तथापि अज्ञानदृष्ट्या स्वतनयान्मया व्यापादितानपि
मानुश[illegible] सांत्वयति तस्मादिति अज्ञाभ्याः [illegible] यत इति २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं [illegible] णादिहंतुः तद्वधस्यचमायस्थि [illegible] त्याह यावदिति

अस्वदृक् देहाद्यभिमानी तदभिमानी तस्य देहस्य हननमात्मनि अभिमन्यमान इत्यर्थः २२

यावद्धतोस्मि हंतास्मीत्यात्मानं मन्यतेस्वदृक् तावत्तदभिमान्यज्ञो

बाध्यबाधकतामियात् २२ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् २३

श्यालः कंसः स्वस्रोरिति स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनगुणद्वारा मिथुनलक्ष

णया स्वसृतत्ससोरभिधानं लिंगसमवायन्यायेन प्राणभृतत्रपदधातीतिवत् देवकी

वसुदेवयोः प्रत्येकं पादमग्रहीदित्यर्थः श्यालशब्देन वा कथंचिद्वसुदेवाभिधानं २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मसौहृदंप्रियवादादिनादर्शयन् २४ स्वपरभेददर्शनेकिंभवतितदाह शोकहर्षे

मोचयामासनिगडाद्विस्रब्धःकन्यकागिरा देवकींवसुदेवंचदर्शय न्नात्मसौहृ
दं २४ भ्रातुःसमनुतप्तस्यक्षांतरोषाचदेवकी व्यसृजद्वसुदेवश्चप्रहस्यतमुवाच
ह २५ एवमेतन्महाभागयथावदसिदेहिनां अज्ञानप्रभवाहंधीःस्वपरेतिभिदा
यतः २६ शोकहर्षभयद्वेषलोभमोहमदान्विताः मिथोघ्नंतंनपश्यंतिभावैर्भावं
पृथग्दृशः २७

ति भावैरेवनिमित्तभूतैर्मिथोभावान्घ्नंतंभावमी... पृथ... शस्तेनपश्यंतिकिंत्वहं
मेवहंताहंतस्यैतिमन्य...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कि[illegible]ति २८ २९ नातिकोविदाः [illegible]र्गतानिदशादि

कंसएवंप्रसन्नाभ्यांविशुद्धंप्रतिभाषितः देवकीवसुदेवाभ्यामनुज्ञातोविशद्गृहं
२८ ॥श्रीशुकउवाच॥ तस्यांरात्र्यांव्यतीतायांकंसआहूयमंत्रिणः तेभ्यआचष्टतत्स
र्वंयदुक्तंयोगनिद्रया २९ आकर्ण्यभर्त्तुर्गदितंतमूचुर्देवशत्रवः देवान्प्रतिकृता
मर्षादैतेयानातिकोविदाः ३० एवंचेत्तर्हिभोजेंद्रपुरग्रामव्रजादिषु अनिर्दशान्नि
र्दशांश्चहनिष्यामोद्यवैशिशून् ३१ किमुद्यमैःकरिष्यंतिदेवाःसमरभीरवः नित्य
मुद्विग्नमनसोज्याघोषैर्धनुषस्तव ३२

नानियेषांतान्अन्यांश्च ३१ ३२ श्रीकृष्णप॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा-द-प.
४१

रवो

अस्यतः बाणानाक्षिपतः सतः उत्सृज्य रणं त्यक्त्वा ३३ ३४ अन्यासक्तान्विमूढांश्चेति
नहंसि नहि नास्ति ३५ क्षेमे निर्भयदेशे शूरैः संयुगादन्यत्र विकत्थैः प्रौढिवादो येषां नं

अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः जिजीविषवउत्सृज्य पलायनपरा ययुः
केचित्प्रांजलयो दीनान्यस्तशस्त्रा दिवौकसः मुक्तकच्छशिखाः केचिद्भीताः स्मइ
तिवादिनः ३४ नत्वं विस्मृत शस्त्रास्त्रान्विरथान्भयसंवृतान् हंसन्यासक्तवि
मुखान् भग्नचापानयुध्यतः ३५ किं क्षेमे शूरैर्विबुधैरसंयुगविकत्थनैः रहोजु
षा किं हरिणा शंभुना वा वनौकसा ३६

नैः ननु हरेर्बिभेमि शंभोश्चेति [illegible] तत्राहुः रहोजुषेति सर्व
स्य [illegible] नक्वचिदपि बहिरदृष्टेनेत्य [illegible] गुरुप [illegible] लायनवनमोको ४१
यस्य तेन शंभु[illegible] ३६

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

य[illegible]नकिंचिदपिकर्त्तुंसमर्थास्तथा[illegible]ऽप्याहुः तथापीति

किमिंद्रेणाल्पवीर्येणब्रह्मणावातपस्यता तथापिदेवाःसापत्न्यान्नोपेक्ष्याइतिम
न्महे ततस्तन्मूलखनने नियुंक्ष्वास्माननुव्रतान् ३७ यथामयोंगेसमुपेक्षितोन्नामि
र्नशक्यतेरूढपदश्चिकित्सितुं यथेंद्रियग्रामउपेक्षितस्तथारिपुर्महा[illegible]नू बद्धब
लोनचाल्यते ३८ मूलंविष्णुर्हिदेवानांयत्रधर्मःसनातनः तस्यचब्रह्मगोविप्रास्त
पोयज्ञाःसदक्षिणाः ३९ तस्मात्सर्वात्मनाराजन्ब्राह्मणान्ब्रह्मवादिनः तपस्वि
नोयज्ञशीलान्गाश्चहन्मोहविर्दुघाः ४० विप्रागावश्चदेवाश्चतपःसत्यंदमःशमः
श्रद्धादयातितिक्षाचक्रतवश्चहरेस्तनूः ४१ ३७ रूढपदःबद्धमूलः देवानांमूलंविष्णुः
सचयत्रधर्मस्तत्रास्तेधर्मस्यमूलंवेदादयइति ३९ ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०स०
५५

किंचविप्रादयोहरेरेवतनवोयस्मात्तस्मादयमेवोपायइत्याहुः अयमिति ४१ ४२

सहिसर्वसुराध्यक्षोह्यसुरद्विड्गुहाशयः तन्मूलादेवताःसर्वाःसेश्वराःसच
तुर्मुखाः अयंवैतद्वधोपायोयदृषीणांविहिंसनं ४२ शुकउवाच एवंदुर्मंत्रिभिः
कंसःसहसंमंत्र्यदुर्मतिः ब्रह्महिंसांहितंमेनेकालपाशावृतोसुरः ४३ संदिश्य
साधुलोकस्यकदनेकदनप्रियान् कामरूपधरान्दिक्षुदानवान्गृहमाविशत्
४४ तेवैरजःप्रकृतयस्तमसामूढचेतसः सतांविद्वेषमाचेरुरारादागतमृत्यवः

५५

४५ [illegible] मागतोमृत्युर्येषांते ४५ [illegible] गोप [illegible] नोनमः नमोनमः ॥७॥ राम
५८

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतं... सुमात्रहेतुः किंतु बहुनर्थ... यमिति ४६ इतिद
शमेटीकायांचतुर्थोध्यायः ४ पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवं गत्वाथ

आयुः श्रियं यशो धर्मं लोकानाशिष एव च हंति श्रेयांसि सर्वाणि पुंसो महद
तिक्रमः ४६ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्थोध्यायः ४ ॥ श्रीशुक
उवाच ॥ नंदस्त्वात्मज उत्पन्ने जाताल्हादो महामनाः आहूय विप्रान् वेदज्ञान्
स्नातः शुचिरलं... ः १ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै कारया
मास विधिवत् पितृदेवार्चनं तथा २

मथुरां प्राप वसुदेवाग ... मोत्सवं १ महामनानंदार

चित्तः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियुतेद्वेलक्षेसप्ततिलपर्वतांश्चप्रादात् कथंभूतान् रत्नौघैः रत्नसमूहैः शातकौंभांव रैः सुवर्णरसाकैरंबरैश्चावृतान् ३ द्रव्याणां हिरण्यादीनां मध्येकेषांचिद्दानैरेवशुद्धि र्यथातथात्रदानादियुक्तजातकर्मादिसंस्कारैरेवगर्भाणांशुद्धिरितिदर्शयितुंप्रतिनि २

धेनूनांनियुतेप्रादाद्विप्रेभ्यः समलंकृते तिलाद्रीन्सप्तरत्नौघ ... शातकौंभांबरा वृतान् ३ कालेनस्नानशौचाभ्यांसंस्कारैस्तपसेज्यया शुध्यंतिदानैःसंतुष्ट्याद्रव्या ण्यात्मात्मविद्यया ४

यतानिशोधकानिदृष्टांतत्वेना ... हरतिकालेनातिकालेनभूम्या दि स्नानेनदेहादिशौचेनमेध्यालिप्तादिसंस्कारैर्गर्भादितपसाइंद्रियादिइज्ययाब्राह्म ण ... णि संतुष्ट्यामनः आत्मा आत्म ... लक्षणपरमात्मने०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौम[illegible]स्तिवाचकाविप्रादयोबभूवुः [illegible]कः प्रोक्तामागधा
वंशशंसकाः बंदिनस्तु[illegible]लप्रज्ञाः प्रस्तावसदृशोक्तयः ५ संमृष्टानिसंसिक्तानिच

सौमंगल्यगिरोविप्राः सूतमागधबंधिनः गाय
काश्चजगुर्नेदुर्मैर्योडुंडुभयोमुहुः ५ व्रजः संमृष्ट
संसिक्तद्वाराजिरगृहांतरः चित्रध्वजपताकास्रक्
चैलपल्लवतोरणैः ६

द्वाराणिअजिराणिअंगणानिगृहांतराणिगृहमध्यानिचयस्मिन्
सतथा चित्रध्वजेषुपताकानांस्रजश्चचैलपल्लवतोरणानिचतैर्भूषितः ६ श्री०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिद्रातैलरूषिताल्लिप्ताः विचित्राधातवश्चबर्हस्रजश्चवस्त्राणिकांचनमालाश्चा
लंकारत्तयाविद्यंत्तेयेषांतेनथाभूतागवादयोबभूवुरित्यर्थः १८ आकल्पाअलंका

गावोवृषावत्सतराहरिद्रातैलरूषिताः विचित्रधातुबर्हस्रग्वस्त्रकांचनमालि
नः ७ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः गोपाः समाययूराजन्नानोपाय
नपाणयः ८ गोप्यश्चाकर्ण्यमुदितायशोदायाःसुतोद्भवं आत्मानंभूषयांचक्रु
र्वस्त्राकल्पांजनादिभिः ९ नवकुंकुमकिंजल्कमुखपंकजभूतयः बलिभिस्त्व
रितंजग्मुः पृथुश्रोण्यश्चलत्कुचाः १०

राः [illegible] कुमकिंजल्कैर्मुखपंकजेषु [illegible] १०ः श्रीरामकृष्ण

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं[illegible]तानिमणिमयानिकुंडलानि[illegible]पु[illegible]निकंठेषुयासांता
श्वाशिखाभ्यश्च्युतानि[illegible]माल्यवर्षाणियासांताः नंदालयंव्रजंतीः व्रजंत्यः पथिविरेजुः

गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथिशिखाच्युतमाल्यवर्षाः नंदा
लयंसवलयाव्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ११ ताआशिषःप्रयुं
जानाश्चिरंपाहीतिबालके हरिद्राचूर्णतैलाद्भिः सिंचंत्योजनमुज्जगुः १२ अवाद्यंत
विचित्राणिवादित्राणिमहोत्सवे कृष्णेविश्वेश्वरेनंतेनंदस्यव्रजमागते १३ गोपाः
परस्परंहृष्टादधिक्षीरघृतांबुभिः आसिंचंतोविलिंपंतोनवनीतैश्चचिक्षिपुः १४

सवलयाः कंकणभूषिताः व्यालोलैः कुंडलादिभिः शोभायासांताः ११ जनंसिंचंत्यः
अजनमुज्जगुरितिवा १२ १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेभ्यः प्रादात् १५ यथोचितमन्यानपिअपूजयत् १६ १७ हरेर्निवासेनयेआत्मनिशु
नंदोमहामनास्तेभ्योवासोलंकारगोधनं सूतमागधबंधिभ्योयेऽन्येविद्यो
पजीविनः १५ तैस्तैः कामैरदीनात्मायथोचितमपूजयत् विष्णोराराधना
र्थायस्वपुत्रस्योदयायच १६ रोहिणीचमहाभागानंदगोपाभिनंदिता व्य
चरद्दिव्यवासस्त्रक्कंठाभरणभूषिता १७ ततआरभ्यनंदस्यव्रजः सर्वसम
द्धिमान् हरेर्निवासात्मगुणेरमाक्रीडमभून्नृप १८ गोपान्गोकुलरक्षायां
निरूप्यमथुरांगतः [illegible]नंदः कंसस्यवार्षिक्यंकरंदातुंकुरूद्वह १९ श्रीगोपाल
णां[illegible]ाक्रीडविहारस्थान १८ वार्षिक्यं[illegible]दरं १९ श्रीनंदसूनवेह्लं॰

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

...तदवमोचनंतस्यवसानिस्थानिं... ...फ्लमि २० २१ २२ २३

वसुदेवउपश्रुत्यभ्रातरंनंदमागतं ज्ञात्वादत्तकरंराज्ञेययौतदवमोचनं २० तंदृ
ष्ट्वासहसोत्थायदेहः प्राणमिवागतं प्रीतःप्रियतमंदोर्भ्यांसस्वजेप्रेमविह्वलः २१
पूजितःसुखमासीनः पृष्ट्वानामयमादृतः प्रसक्तधीःस्वात्मजयोरिदमाहविशां
पते २२ दिष्ट्याभ्रातःप्रवयसइदानीमप्रजस्यते प्रजाशायानिवृत्तस्यप्रजाय
त्समपद्यत २३ दिष्ट्यासंसारचक्रेस्मिन्वर्त्तमानःपुनर्भवः उपलब्धोभवानद्य
दुर्लभंप्रियदर्शनं २४

पुनर्भवःपुनर्जातिइवनत्रहेतुगर्भविशेषणंसंसारचक्रेवर्त्तमानइति २४ नमोनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्लभत्वमेवाह नैकत्रेति प्रियश्चासौसंवासश्चप्रियसंवासः हेप्रियेतिवास्त्रोतस
ओघेननीयमानानांप्लवंतीतिप्लवाः तृणकाष्ठादयस्तेषांयथाएकत्रस्थितिर्नास्ति

नैकत्रप्रियसंवासःसुहृदांचित्रकर्मणां ओघेनव्यूह्यमानानांप्लवानांस्त्रोत
सोयथा २५ कच्चित्पशव्यंनिरुजंभूर्यंबुतृणवीरुधं बृहद्वनंतदधुनायत्रा
स्सेत्वंसुहृद्वृतः २६ भ्रातर्ममसुतःकच्चिन्मात्रासहभवद्व्रजे तातंभवंतंम
त्वानोभवद्भ्यामुपलालितः २७

तद्वत् २५ क्वचिद तिपशव्यादिरुपेतास्मिन्वने
निर्द्दोषगोपयोदध्यादि[illegible]भृतगोपिकास्तन्यादिनापुत्रक्षेमविवक्षयाएछतिपस
क[illegible]नयोरित्युक्तत्वात् २६ भव[illegible]मु[illegible]सतकच्चिद्वर्त्ततइतिशेषः
२७

५०

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

पु[illegible]गानाह पुंसइतिसुहृदोबंधून[illegible]नु[illegible]वितः संपादितोयास्त्रिवर्गः सहिपुंसोविहितः युक्तः शास्त्रेणवाप्रोक्तः नत्स्वमात्रपर्यवसितः कुतस्तेषुक्लिश्यमा

पुंसास्त्रिवर्गोविहितःसुहृदोह्यनुभावितः नतेषुक्लिश्यमाने
षुत्रिवर्गोर्थायकल्पते २८॥नंद उवाच॥ अहोतेदेवकीपुत्राः
कंसेनबहवोहताः एकावशिष्टावरजाकन्यासापिदिवंगता

२९

नेषुसुखायनभवतीत्यर्थः २८ नंदोवसुदेवंसांत्वयन्नाह अहोइति २९ श्रीकृष्णपर०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अदृष्टएवनिष्ठासमाप्तिर्यस्यसः यद्दैवपुत्रादिसुखप्रदं अदृष्टंहीयतेनदैवंतेपुत्रा
दयोनभवंतीत्यर्थः अदृष्टपरमः तथाअदृष्टमेवपरमंयस्यसः यद्यपिपुत्रादयोवि
युक्तास्तथापितानदृष्टमेवपुनः संगमयतीत्यर्थः एवमदृष्टमात्मनस्तत्वंअव्य

नूनंत्वदृष्टनिष्ठोयमदृष्टपरमोजनः अदृष्टमात्मनस्तत्वंयोवेद
नसमुह्यति ३०

योवेदसनमुह्यतितस्मादिदानींत्वयानदुः
भिचारिकारणंसुखदुःख [illegible]
खंभावनीयंमृतानामिव [illegible] वियुक्तानामपिचकालांतरेदर्शनयोगयोः संभवात् अ
स्म [illegible] पिकालांतरेतद्वियोगेसत्यपीतिनंद [illegible] यै [illegible] गेष्वाभाविसूचिका ३० श्री राम ५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तांबु [illegible] सोडुः खंस्यत्क्वानंदमाह करोवैइति [illegible] सुंमथ्यात्ति: ३२ इतिदशमेटीका

वसुदेव उवाच ॥ करोवैवार्षिकोदत्तोराज्ञेदृष्टावयंचवः नेहस्थेयंबहुतिथंसंत्युत्पाता
श्चगोकुले ३१ ॥श्रीशुकउवाच॥ इतिनंदादयोगोपाःप्रोक्तास्तेशौरिणाययुः अनोभि
रनडुधुक्तैस्तमनुज्ञाप्यगोकुलं ३२ इतिश्रीभा० म० ० वसुदेवसंगमोनामपंचमोध्या
यः॥ ५ ॥शुकउवाच॥ नंदःपथिवचःशौरेर्नमृषेतिविचिंतयन् हरिंजगामशरणमु
त्पातागमशंकितः १ कंसेनप्रहिताघोरापूतनाबालघातिनी शिशूंश्चचारनिघ्नंती
पुरग्रामव्रजादिषु २

यापंचमोध्यायाः॥ ५ षष्ठेसख्युगिरानंदोव्रजंगछन्नुतां
पथि दृष्ट्वातुराक्षसींतस्याम्सुंशुलाथविस्मितः १ कृष्णविषयेशंकमानंराजानंप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिभविषयेप्रवृत्तासैवमरिष्यतीतिसूचयन्नाह नयत्रेतियत्रश्रीकृष्णस्यश्रवणा
दीनिनसंतितत्रैवतासांशक्तिः साक्षात्तस्मिन्नेवसनिकाशंकेतिभावः २ योषित्वा

नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु कुर्वंतिसात्वतांभर्त्तुर्यातु
धान्यश्चतत्रहि ३ साखेचर्येकदोपेत्यपूतनानंदगोकुलं योषित्वा
माययात्मानंप्राविशत्कामचारिणी ४ श्रीकृष्णपरमात्मनेनमः

वेषतोवरांनारीमिवआत्मानंविधायनतुनिर्लज्जा निर्विशंकाचसतीकथंपरसद्मनि
प्रविष्टाअतआह कामचारिणीतिनहिकामचारिणीकिंचिदंचित्रमित्यर्थः ४ ७ राम

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

तांवा[illegible]रुं आगतां अतिरूपवतींस्त्रियामिव[illegible]ः [illegible]सं[illegible]सुत्तरंस्लोकेनान्वयः
श्रीसाम्यार्था निविशेष[illegible]नि केशबंधव्यतिषक्तमल्लिकां धम्मिल्लसंसक्तमल्लिकाकुसु
मां बृहतानितंबेनस्तनाभ्यांचउ‍भपतआक्रांतमिवक्लृष्टंक्लशंमध्यममुदरंयस्याः तांसुवा

तांकेशबंधव्यतिषक्तमल्लिकांबृहन्नितंबस्तनक्लृष्टमध्यमां सुवास
संकंपितकर्णभूषणात्विषोल्लसत्कुंतलभूषिताननां ५ श्रीकृष्ण

ससंरमणीयेवाससीयस्यास्तांकंपितयोः कर्णभूषणयोस्त्विषाउल्लसद्भिः कुंतलैर्मंडि
तमाननंयस्यास्तां ५ ६

वल्गुस्मितापांगविसर्गवीक्षितैः वल्गु रम्यं स्मितं येषु ते तथाभूता अपांगविसर्गा येषु ते वीक्षितैर्व्रजौकसां मनोहरंतीं अतो गोपा स्तनमनस्त्वेन तां न निवारितवंत इत्युक्तं भव

वल्गुस्मितापांगविसर्गवीक्षितैर्मनोहरंतीं वनितां व्रजौकसां अमंसतांभोजकरेणरूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिं ६ नमो नमो नमः

ति गोप्यश्च श्रियमिव मत्वा तूष्णीं आसन् अतः केनाप्यनिवारितासतिप्रविवेशेति भावः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाल[illegible]नऽसदंतकं बालं ददर्श असतां मंत[illegible]णं भविभोत्कित्राह भति
छन्ननिजोरुतेजसं ब[illegible]नायेन प्रतिछन्नं निरोहितं निजं उरुतेजो येन तं कमिव

बालग्रहस्तत्र विचिन्वती शिशून् यदृच्छ्या नंदगृहे ऽसदंतकं बालं प्रतिछन्ननिजोरु
तेजसं ददर्श तल्पेऽग्निमिवाहितं भासि ७ विबुध्य तां बालकमारिकाग्रहं चराचरा
त्मास निमीलितेक्षणः अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जु

धीः ८

भासि भस्मन्याहितमग्निमिवेति ७ चराचरात्मत्वादेव तां विबुध्य निमीलिते
क्षण आस स्वयमनंतं दुष्टानामंतकं साऽङ्कमारोपयत् बालं मत्वा यथोरगं सुप्तमबुद्धि
श्चासौ रज्जुधीश्च स अज्ञानतो रज्जुबुध्या गृह्णातियथा तद्वदिति ८

ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयशोदारोहिण्योतांकथंनन्यवारयेतांतत्राहतामिति वामंवस्तुजननन्याश्ववचोधि
तंयस्यास्तांवरस्त्रियंचसहसैवअंतरागृहमध्येवीक्ष्य अंतस्तैक्ष्ण्येबहिर्मार्दवेच
दृष्टांतः कोशपरिछ्छदासिवत् मृदुभित्रचर्ममयः कोशः परिछ्छदः आवरणंयस्य

तांतीक्ष्णचित्तामतिवामचेष्टितांवीक्ष्यांतराकोशपरिछ्छदासिवत
वरस्त्रियंतत्प्रभयाचधर्षितेनिरीक्षमाणेजननी[illegible]तिष्ठतां १

असेःखड्गस्यतद्वत्त[illegible]भयाचधर्षितेअभिभूतेअहमस्यजननीयंवेतिमोहितेच
सत्योः[illegible]ौनिरीक्ष्यमाणेएवकेवलमतिष्ठतांन[illegible]ति[illegible]रितंरुर्यो २ श्रीरामकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तास्मि[illegible]उर्जरवीर्यविषंयास्मिन्तंस्तनंश्रीकृ[illegible]मंक[illegible]हायतस्मैशिशवेददौ अ
थअनंतरमेवप्रपीड्यदेवलंविषमपथ्यमितिमत्वेवतस्याः प्राणैःसहापिबत् १०

तास्मिनस्तनंउर्जरवीर्यमुल्वणंघोरांकमादायशिशोर्ददावथ गाढंकराभ्यांभगवान्प्र
पीड्यतत्प्राणैःसमंरोषसमन्वितोपिबत् १० सामुंचमुंचालमितिप्रभाषिणीनि
ष्पीड्यमानाखिलजीवकर्मणि विवृत्यनेत्रेचरणौभुजौमुहुर्निः स्विन्नगात्राक्षिपतीरुरोद
ह ११ तस्याःस्वनेनातिगभीररंहसासाद्रिर्महीद्यौश्चचालसग्रहा रसादिशश्चप्र
तिनेदिरेजनाःपेतुःक्षितौवज्रनिपातशंकया १२

चरणौभुजौचमुहुर्मुहुःक्षिपंतीतिनिः
स्विन्नानिस्वेदयुक्तानिगात्राणियस्याःसा ११ रसाःरसातलानिच १२ कृष्णायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
५२

आदायसुरंवं निष्वस्य निजरूपं आस्थितामरणसमयेकपदमयुक्तमितीवरत्त्रोवज्रा

निशाचरीत्थंव्यथितस्तनाव्यसुर्व्यादायकेशांश्चरणौभुजावपि प्रसार्यगो
ष्ठेनिजरूपमास्थितावज्राहतोरत्रइवापतन्नृप १३ पतमानोपितद्देहस्त्रि
गव्यूत्यंतरद्रुमान् चूर्णयामासराजेंद्र महदासीत्तदद्भुतं १४ श्रीनंदसूनवे

हतः १३ पतन्नपितस्[illegible]देहः षट्क्रोशमध्यवर्त्तिनोद्रुमांश्चूर्णीचकार १४ श्रीराम

राम
५२

ईषामात्र[...]उग्रदंष्ट्रास्यं ईषालांगलदंडः तत्प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तत् तथाभूतमास्यं यस्मि
न् तत्तस्याः कलेवरं वी[...]क्ष्य गोप्यश्चसंतत्रसुः संत्रासहेतुत्वेन पुनरष्टाभिः पदैः विशिन
ष्टि गिरिकंदरवत् नासिका यस्मिंस्तत् गिरेः च्युतौ स्थूलोपलौ ताविव स्तनौ यस्मिन्तत्

ईषामात्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकं गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्द्ध
जं १५ अंधकूपगभीरास्यं पुलिनारोहभीषणं बद्धसेतुभुजोर्वंघ्रिशून्यतो
यहृदोदरं १६

रौद्रं घोरं प्रकीर्णा अरुणा मूर्द्धजा यस्मिन्तत् १५
अंधकूपवद्गंभीरे अक्षि[...]णी यस्मिन्तत् पुलिनवदारोहौ जघनं ताभ्यां भीषणं ब
द्धाः सेतवः इव भुजौ ऊरू अंघ्री च यस्मिन्तत् शून्यतोयहृदवदुदरं यस्मिन् १६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वमेवतस्याः शब्देनभीताः पुनर्दर्शनेनातितत्रसुरित्याह पूर्वंत्विति तस्याः

संतत्रसुः स्मतद्वीक्ष्यगोपागोप्यः कलेवरं पूर्वंतुतन्निःस्वनितभिन्नहृ-
त्कर्णमस्तकाः १७ बालंचतस्याउरसिक्रीडंतमकुतोभयं गोप्यस्तू-
र्णंसमभ्येत्यजगृहुर्जातसंभ्रमाः १८ यशोदारोहिणीभ्यांताः समं
बालस्यसर्वतः रक्षांविदधिरेसम्यक्गोपुच्छभ्रामणादिभिः १९
गोमूत्रेणस्नापयित्वापुनर्गोरजसार्भकं रक्षांचक्रुश्चशकृताद्वाद
शांगेषुनामभिः

निःस्वनिःसंशब्दः तेननिर्भिन्नानिहृत्कर्णमस्तकानियेषांते १७ १९ द्वादशांगेषुललाटादि
षुकेशवादिद्वादशनामभिः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनाचान्ता एव प्रथममतिसंभ्रमेणैव रक्षां कृतवन्तः ... पुनस्तात्पर्येण बीजन्यासमकुर्वतेत्याह संस्पृष्टसलिलाः आचान्ताः आत्मनि प्रथमम् अंगेषु करयोश्च पृथक् अजाद्येकादशबीजानां मध्ये करमुद्धौ त्रीणि करयोः संधिषु चत्वारि चत्वारि तथा

गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक् न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत २१ अव्यादजोंघ्रिमणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं २२

अंघ्र्यादावेकैकस्मिन्नंगेषु अजाद्येकैकबीजन्यस्य बालस्याप्यंगेषु तथैवाकुर्वत २७ अंघ्रि अंघ्री जानुनी भुजं भुजौ कं शिरः २२

जानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्क०
५५

तथा दिक्षु रक्षामकुर्वन्नित्याह चक्र्यग्रत इति चक्रसहितो हरिस्तवाग्रतोस्तु सहगदो ग
दासहितो हरिस्तव पश्चादस्तु बस्सार्ङ्गपो धनुर्धरो मधुहा असि धरोऽजनश्चतावास्तां

चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वसार्ङ्गयो धनुरसीमधुहाजश्च कोणेषु शंखउ
रुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समंतात् २३ इंद्रियाणि हृषीकेशः प्रा
णान्नारायणोवतु श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु २४ पृश्निगर्भस्तु ते बुद्धि
मात्मानं भगवान् परः क्रीडंतं पातु गोविंदः शयानं पातु माधवः २५ शंखधर उरुगाय

श्चत कोणे पाश्चितौ अधस्तात् २३ एवं बाह्यरक्षां कृ[illegible]मकुर्वन्नित्याह इंद्रियाणी
ति २४ आत्मानमहंकारं २५

राम
५५

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६ २७ २८ २९ सन्यवेशयत् शाययामास

व्रजंतमव्याद्वैकुंठआसीनंत्वांश्रियःपतिः भुंजानंयज्ञभुक्पातुसर्वग्रहभयंकरः
२६ डाकिन्योयातुधान्यश्चकूष्मांडायेर्भकग्रहाः भूतप्रेतपिशाचाश्चयक्षरक्षो
विनायकाः२७ कोटरारेवतीज्येष्ठापूतनामातृकादयः उन्मादायेह्यपस्मारादेह
प्राणेंद्रियद्रुहः २८ स्वप्नदृष्टामहोत्पातावृद्धबालग्रहाश्चये सर्वेनश्यंतुतेविष्णो
र्नामग्रहणभीरवः २९ इतिप्रणयबद्धाभिर्गोपीभिःकृतरक्षणं पाययित्वास्तनंमा
तासंन्यवेशयदात्मजं ३० तावन्नंदादयोगोपामथुरायाव्रजंगताः विलोक्यपूत
नादेहंबभूवुरतिविस्मिताः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विस्मयमेवाह नूनमिति बतविस्मयेसांप्रतंसऋषिस्तपः प्रभाववान् योगेशोज्ञा
नीवासम्यगासयतः सएवदृष्टइति ३२ विस्मयांतरमाह दह्यमानस्येति कृष्णेननि

नूनंबतर्षिःसंजातोयोगेशोवासमासस‌ः सएवदृष्टोल्पुत्पातोयदाहानक
दुंदुभिः ३२ कलेवरंपरशुभिश्छित्वानत्तेव्रजौकसः दूरोक्षिप्यावयवशोन्यद
हन्काष्ठवेष्टितं ३३ दह्यमानस्यदेहस्यधूमश्चागरुसौरभः उत्थितःकृष्ण
निर्भुक्तसपद्याहतपाप्मनः ३४ पूतनालोकबालघ्नीराक्षसीरुधिराशना
जिघांसयापिहरयेस्तनंदत्वापसद्गतिं ३५

*पूतनेति ३५

र्भुक्तः अतएवसपद्याहतःपाप्मायस्य ३४ प्रसंगतो[illegible]मु[illegible]नेनभक्तिवैभवमाह

श्रद्धया[illegible]न भक्त्या प्रेम्णा रक्ताः स्निग्धास्तन्मातरस्तद्वत्साहरणलीलाभिः

किंपुनःश्रद्धयाभक्त्याकृष्णायपरमात्मने यच्छन्प्रियतमंकिंनुरक्तास्तन्मातरोय
था ३६ पद्भ्यांभक्तहृदिस्थाभ्यांवंद्याभ्यांलोकवंदितैः अंगंयस्याःसमाक्रम्यभग
वानपिबत्स्तनं ३७ यातुधान्यपिसास्वर्गमवापजननीगतिं कृष्णभुक्तस्तनक्षी
राःकिमुगावोनुमातरः ३८ पयांसियासामपिबत्पुत्रस्नेहस्नुतान्यलं भगवा
न्देवकीपुत्रःकैवल्याद्यखिलप्रदः ३९ तासामविरतंकृष्णेकुर्वतीनांसुतेक्षणं न
पुनःकल्पतेराजन्संसारोऽज्ञानसंभवः ४० कटधूमस्यसौरभ्यमवघ्रायव्रजौ
कसः किमिदंकुतएवेतिवदंतोव्रजमाययुः ४१

येणबहुवचनेनगोगोपिकास्तद्
मातरोऽभवन्निति ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२ एतत्पूतनामोक्षणं आर्भकं अर्भकचरितं किंनत्पूतनामोक्षंइति अत्तुंदैत्यकु
लानीशः पूतनायाः शिशुछलात् [illegible] स्तन्यापोशनतः [illegible] प्राणैः

तेतत्रवर्णितंगोपैः पूतनागमनादिकं श्रुत्वातन्निधनंस्वस्तिशिरोश्वासन्सुवि
स्मिताः ४२ नंदःस्वपुत्रमादायप्रेत्यागतउदारधीः मूर्ध्न्युपाघ्रायपरमांमुदं
लेभेकुरूद्वह ४३ यएतत्पूतनामोक्षंकृष्णस्यार्भकमद्भुतं श्रणुयाछ्रद्धयाम
र्त्योगोविंदेलभतेरतिं ४४ इतिश्रीभागवतेमहापुराणे दशमस्कंधे पूतनामोक्षणं
नामषष्ठोध्यायः ६ श्रीकृष्णपरमात्मनेनमोनमः श्रीरामचंद्रायनमः ॥६॥

प्राणाहुतिमकल्पयत् ४४ इतिश्रीदशमे टीकायां [illegible] ध्यायः ६ श्रीकृष्णपरमात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्क्षिपन् शकटं व्योम्नि तृणावर्त्तमधः क्षिपन् दृ[illegible] कृष्णः क्रीडति
सप्तमे १ कृष्णार्भकसुधासिंधुसंप्लुवानंदनिर्भरः भूयस्तदेवसंपृष्टुं राजान्यदपि
नंदति येनयेनेति येनयेनमस्याद्यवतारेणापियानिकर्माणिकरोतितानिनः

राजोवाच। येनयेनावतारेण भगवान् हरिरीश्वरः करोतिकर्णरम्याणि मनोज्ञानि
चनः प्रभो १ यः शृण्वतोपैस्यरतिर्वितृष्णासत्वंचशुद्ध्यत्यचिरेणपुंसः भक्तिर्हरौतत्पुरुषेचसख्यं तदेवहारं वदमन्यसेचेत् २

कर्णसुखावहानिमनःप्रीतिकराणितिचभवत्येव १ तथापियत्शृण्वतः पुंसः पुरुषमात्रस्य अरतिर्मनोग्लानिः तन्मूलभूताविविधातृष्णाच अपगच्छतितथासत्वशुद्धिहरिभक्तिहरिदाससख्या
निचभवंतितनदेवहारंहरेश्चरितंमनोहरंवावद अनुग्रहंयदिकरोषि।

भ.स्क.
५८

भत्स्यौत्सुक्येनपुनर्विशिनष्टि अथेति अनुरुंधतोऽनुकुर्वतः २ उत्थानंशिशोरंगप
रिवर्त्तनंतत्रकरणीयेकौतुकाप्लवेउत्सवाभिषेकेनयातास्मिन्नेवदिनेजन्मर्क्षस्या

अथान्यदपिकृष्णस्यतोकाचरितमद्भुतं मानुषंलोकमासाद्यत
ज्जातिमनुरुंधतः २ श्रीशुकउवाच कदाचिदौत्थानिककौतुकाप्लु
वेजन्मर्क्षयोगेसमवेतयोषितां वादित्रगीतद्विजमंत्रवाचकैश्च
कारसूनोरभिषेचनंसती ४

पियोगेअतिमहोत्सवेसमवेतयोषितांमिलितपुरंध्रीणांमध्येवादित्रादिभिःशो
भितमभिषेचनंयशोदाचकार ४

भ.स्क.
५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्नादिभिः सुपूजितैर्विप्रैः कृतमंगलं संजातनिद्रे [illegible] स्यतं अशीशयत्

नो

नंदस्यपत्नीकृतमज्जनादिकंविप्रैःकृतस्वस्त्ययनंसुपूजितैः अन्नाद्य
वासःस्रगभीष्टधेनुभिःसंजातनिद्राक्षमशीशयच्छनैः ५ औत्था
निकौत्सुक्यमनामनस्विनीसमागतान्पूजयतीव्रजौकसः नैवाशृ
णोद्वैरुदितंसुतस्यसारुदन्स्तनार्थीचरणावुदक्षिपत् ६ अधःश
यानस्यशिशोरनोल्पकप्रवालमृद्वंघ्रिहतंव्यवर्त्तत विध्वस्तनानार
सकुप्यभाजनंव्यस्तचक्राक्षविभिन्नकूबरं ७

शायितवतीशकटस्याध
स्तात्प्रेंखे ५ उदक्षिपत् ऊर्ध्वंचालितवान् ६ तदधः शयानस्यशिशोरल्पकस्यासौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॰स॰ ५९

भवालवन्मउस्थयोंघ्रिस्तेनहतंशकटंव्यवर्त्ततविपरीतमपतत् कथंविध्वस्तानिना
नारसवंतिकुप्यभाजनानिस्वर्णरजतातिरिक्तकांस्यादिमयानियथाभवंतितथा

॥॥ श्लो॰ दृष्ट्वायशोदाप्रमुखाव्रजस्त्रियऔत्थानिकेकर्मणियाःसमा
गताः नंदादयश्चाद्भुतदर्शनाकुलाःकथंस्वयंवैशकटंविपर्यगात् ८

चक्रेच अक्षश्चचक्राक्षाः व्यत्यस्ताः चक्राक्षायस्मिन् विभिन्नः कूबरोयुगंधरोयस्य
तच्चयथाभवतितथाव्यवर्त्ततइति ७ अद्भुतदर्शनेनआकुलाश्च बभूवुः तदेवाह कथ
मितिविपर्यगात् विपरीतमपतदिति ८

राम ५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९ नश्रद्दधिरेविश्वासंनजग्मुः उतअपिबालस्यनसं[illegible]नीसूनेवबालाः किंतुजानं
तिशति १० ११ रक्षोघ्नैः सूक्तैः कृत्वाभगवत्प्रभावानभिज्ञाविप्रचेष्टितं विडंबयन्त्य

ऊचुरव्यवसितमतीन्गोपान्गोपीश्चबालकाः रुदतानेनपादेनक्षिप्तमेतन्नसंश
यः ९ ननेश्रद्दधिरेगोपाबालभाषितमित्युत अप्रमेयंबलंतस्यबालकस्यनतेवि
दुः १० रुदंतंसुतमादाययशोदाग्रहशंकिता कृतस्वस्त्ययनंविप्रैः सूक्तैस्तनमपा
ययत् पूर्ववत्स्थापितंगोपैर्बलिभिः सपरिच्छदं विप्राकृत्वार्चयांचक्रुर्दध्यक्षतकु
शांबुभिः ११
ह पूर्ववदित्यादिनाबलिभिः श कैः यद्वाअष्टदिक्षुबलिसहितंसपरि
करंयथापूर्वंस्थापितंविप्राः दध्यादिभि[illegible]र्चयामासुः कृत्वाग्रहादिहोमंविधाय १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असूयागुणेषुदोषाविष्करणंईर्ष्याअक्षांतिस्तेषामाशिषः कृतास्तैःप्रयुक्ताः १३ इति
एवमभिप्रेत्यसामर्ग्यजुर्भिरुपाकृतैः संस्कृतैः पवित्राओषधयोयेषुजलेषुतैःकृ

येसूयान्तरंमेर्ष्याहिंसामानविवर्जिताः नतेषांसत्यशीलानामाशिषोविफलाः
कृताः १३ इतिबालकमादायसामर्ग्यजुरुपाकृतैः जलैःपवित्रौषधिभिरभिषिच्य
द्विजोत्तमैः १४ वाचयित्वास्वस्त्ययनंनंदगोपःसमाहितः हुत्वाचाग्निंद्विजातिभ्यः
प्रादादन्नंमहागुणं १५ गावःसर्वगुणोपेतावासःस्रक्रुक्ममालिनीः आत्मजाभ्यु
दयार्थायप्रादात्तेचान्वयुंजत १६
त्वाद्विजोत्तमैः कृत्वाभिराभिषिच्य अभिषेकंकारयित्वा
१४ हुत्वाहावयित्वा १५ गावःगाश्चप्रादात् अन्वयुं
जत आशिषोयुयुजुः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताःतथैवबभूवुरित्यर्थः १७ उत्क्षिप्यमृदुपादेनशकटं[illegible]लीलया तृणावर्त्तपदा
पीड्यभुव्यपातयदर्भकः आरोहमुत्संगं १८ तृणावर्त्तात्स्वमत्सुपरिहारायकृष्णेन

विप्रामंत्रविदोयुक्तास्तैर्याःप्रोक्तास्तथाशिषः तानिष्फलाभ
विष्यंतिनकदाचिदपिस्फुटं १७ एकदारोहमारूढंलालयंती
सुतंसती गरिमाणंशिशोर्वोढुंनसेहेगिरिकूटवत् १८ भूमौ
निधायतंगोपीविस्मिताभारपीडिता महापुरुषमादध्यौजग
तामासकर्मसु १९

वात्मनउत्संगादुत्तारायकृतभारमजानन्ती उत्पातशंकयाम
हापुरुषमादध्यौ श्रीकृष्णोदरवर्तिनांजगतांभारेणपीडिताविस्मितासती यद्वा
जगतांमध्येकर्मसुआस बभूव ननुजगद्गुरुंतंवेदेत्यर्थः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० ईरयन्निनादयन्नित्यर्थः २१ यतः यत्रन्यस्तवतीतस्मिन्स्थानेनापश्यत् २२ २३

दैत्योनाम्नातृणावर्त्तःकंसभृत्यःप्रणोदितः चक्रवातस्वरूपेणजहारासीनम
र्भकं २० गोकुलंसर्वमावृण्वन्मुष्णंश्चक्षूंषिरेणुभिः ईरयन्सुमहाघोरशब्देनप्र
दिशोदश २१ मुहूर्त्तमभवद्गोष्ठंरजसातमसावृतं सुतंयशोदानापश्यत्तस्मिन्न्य
स्तवतीयतः २२ नापश्यत्कश्चनात्मानंपरंचापिविमोहितः तृणावर्त्तनिसृष्टा
भिः शर्कराभिरुपद्रुतः २३ इतिखरपवनचक्रपांसुवर्षेसुतपदवीमबलाविल
क्ष्यमाता अतिकरुणमनुस्मरंत्यशोचद्भुविपतितामृतवत्सकायथागौः २४

खरपवनचक्रात्पांसुवर्षेस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपारतः पांसुवर्षस्य वेगो यस्मिन् तथाभूते पथने स[illegible]स्य रुदितमनुनिशम्य
गोप्योरुरुदुः २५ वात्याचक्रवातः तद्रूपधरः कृष्णं हरन् शांतरयः कथंचिन्नभोग

रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः रुरुदुरनुपलभ्य
नंदसूनुं पवन उपारतपांसुवर्षवेगे २५ तृणावर्त्तः शांतरयो वात्यारूपधरो हरन्
कृष्णं नभोगतो गंतुं नाशक्नोदतिभारभृत् २६ तमश्मानं मन्यमान आत्मनो गु
रुमत्तया गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं २७ गलग्रहणनिश्चेष्टो दैत्यो
निर्गतलोचनः अव्यक्तरावो न्यपतत्सह बालो व्यसुर्व्रजे २८ तः ततः परं गंतुं ना
शक्नोदित्यर्थः २६ गुरुमत्तयातिगौरवेण तं तथा अश्मानं पर्वतप्रायं मन्यमानस्तेनै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वात्मनोगलेगृहीतत्वात् तंस्प्रष्टुमिच्छन्नपिनाशक्तोदित्यर्थः २७ २८ २९ तस्योर
सिलंबमानंकृष्णमारायमात्रेप्रतिलभ्यसमर्प्पविस्मिताश्च बभूवुरितिविहाय

तमंतरिक्षात्पतितंशिलायांविशीर्णसर्वावयवंकरालं पुरंयथारुद्रशरेणविद्धं
स्त्रियोरुदंत्योददृशुः समेताः २९ आदायमात्रेप्रतिलभ्यविस्मिताःकृष्णंचतस्यो
रसिलंबमानं तंस्वस्तिमंतंपुरुषादनीतंविहायसामृत्युमुखात्प्रमुक्तं ३० गो
प्यश्चगोपांकिलनंदमुख्यालब्ध्वापुनःप्रापुरतीवमोदं ३१ श्रीकृष्णपरमात्मने॰

सागगनमार्गेणपुरुषादेननीतंतथापिमृत्युमुखात्[illegible]पु[illegible]र्लब्ध्वामोदंप्रापुरिति
३० ३१

परस्परं हर्षकथामाह अहो बतेति निवृत्तिं गमितो[illegible]तिः कोत्र विस्मयः यु
ज्यत एवैतदिति तेष्वेव केचिदाहुः हिंस्र इति ३२ नंभ स्माभिः चीर्णं कृतं पूर्वं वा

अहो बतास्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोभ्यगात्पुनः हिंस्रः स्वपापे
न विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते ३२ किन्नस्तपश्चीर्णमधोक्ष
जार्चनं पूर्तेष्टदत्तमुत भूतसौहृदं यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधु
न्प्रणयन्नुपस्थितः ३३ श्रीशुक ॥ ० ॥ दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने वसु
देववचो भूयो मानयामास विस्मितः ३४

पाकूपादिनिर्माणं इष्टं पंचयज्ञाग्निहो
त्रादि दत्तं दानं यत् यस्मात्तपआदेः प्रीणयन् हर्षयन् ३३ ३४ ॥ ॥ ॥७॥

३५ त्पणावर्त्तागमेहष्टगौरवाशंकिनीं प्रसूं बोधयन्दर्शयामासज्जृंभमाणोमुखेज
गत् पीतप्रायस्यपीतप्रायः स्तनोयेनतस्य ३६ नगान्गिरीन्तदुहितृनदीः ३७

एकदार्भकमादायस्वांकमारोप्यभामिनी प्रस्नुतंपाययामासस्तनंस्ने
हपरिप्लुता ३५ पीतप्रायस्यजननीसातस्यरुचिरास्मितं मुखंलालय
तीराजन्जृंभतोददृशेइदं ३६ खंरोदसीज्योतिरनीकमाशाः सूर्येंदुवह्नि
श्वसनांबुधींश्च द्वीपान्नगांस्तद्दुहितृर्वनानिभूतानियानिस्थिरजंगमा
नि ३७ सावीक्ष्यविश्वंसहसाराजन्संजातवेपथुः संमील्यमृगशावा
क्षीनेत्रेआसीत्सुविस्मिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतीदशमेटीकायांसप्तमोध्यायः ७ अष्टमेनामकर्म[illegible]लीलाकुतूहले मृद्भक्ष
णादियोगेचविश्वरूपंनिरूप्यते १ विश्वरूपादिबालस्यनिशाम्याशंकिनः पितुः ना

इतिश्रीभागवतेमाहापुराणेदशमस्कंधेतृणावर्तमोक्षोनामसप्तमोध्या॥यः॥ ७ श्री
शुकउवाच गर्गः पुरोहितोराजन्यदूनांसुमहातपाः व्रजंजगामनंदस्यवसु
देवप्रचोदितः १ तंदृष्ट्वापरमप्रीतः प्रत्युत्थायकृतांजलिः आनर्चाधोक्षजधियाप्रणि
पातपुरःसरं २ सूपविष्टंकृतातिथ्यंगिरासूनृतयामुनिं नंदयित्वाब्रवीद्ब्रह्मन्पूर्ण
स्यकरवामकिं ३

मकृद्गर्गवाक्येननिजंतत्त्वमसूसुचत् २ ३ श्रीकृष्णपरमात्मनेनमोनमः ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.स्क.
१४

पूर्णश्चेत्कथंधनिनांगृहमागतस्तत्राह महद्विचलनमिति महतांस्वाश्रमादन्यत्र
नं विचलनंनस्वार्थंकिंतुगृहिणांमंगलाय ननुनर्हितएवमहद्दर्शनार्थंकिमितिनाग

महद्विचलनंनृणांगृहिणांदीनचेतसां निः
श्रेयसायभगवन्कल्पतेनान्यथाक्वचित्
४

छंतितत्राह दीनचेतसांकृपणानांक्षणमपिगृहं[illegible]तुम[illegible]शक्नुवतामित्यर्थः ४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयाबालयोर्नामकरणादिकरणीयमितिविवक्षुःतस्य[illegible]ति[illegible]यमाह ज्योतिषामय

नमिति यदतींद्रियज्ञानसाधनंतत्प्रतिपादकंज्योतिःशास्त्रमित्यर्थः तस्याः[illegible]साङ्ख्य

ताप्रणीतं येनान्योपिपुमान्परावरंपरंकारणंपूर्वजन्मकृतंकर्मअवरंकार्यमस्मि

ज्योतिषामयनंसाक्षाद्यत्तज्ज्ञानमतींद्रियं प्र
णीतंभवतायेनपुमान्वेदपरावरं ५ श्री०

न्जन्मनिभाविफलंतद्वेद उक्तंचजातके यदुपचितमन्यजन्मनिशुभाशुभंतस्यकर्म

णः प्राप्तिंव्यंजयतिशास्त्रमेतत्तमसिद्रव्याणिदीपइवेति ५ श्रीरामकृष्णजयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि वक्षितमाहत्वंहीति दैवज्ञोमंत्रविद्भवत्वं अतोनामकरणादिसंस्कारान् कर्त्तुमर्ह
सीत्यर्थः नचैतद्गुरुणाकरणीयमितिचेत्तत्राहनृणामिति ६ अस्मुत्साहितंनंदंप्र
तिगुप्तमे तत्कार्यमित्यस्मिप्रायेणप्रत्याचक्षाणइवाह यदूनामितिभवतुतथा

हि

त्वंब्रह्मविदांश्रेष्ठः संस्कारान्कर्त्तुमर्हसि बालयोरनयोर्नृणांजन्म
नाब्राह्मणोगुरुः ६ ॥ गर्ग उवाच ॥ यदूनामहमाचार्यः ख्यातश्च भुवि
सर्वदा सुतंमयासंस्कृतंतेमन्यतेदेवकीसुतं ७

पित्वमत्रागतइतिकाविद्या
दितिचेत्तदेवाह ख्यातश्चेतिननः किमतआहसुतं [illegible] कंसोमन्येतकल्पयेदित्य
यु·७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चि

ननुयउकुमारइतिकथंज्ञानातुतत्रवसुदेवस्यसुत[illegible]देवक्यांजातइति कुतोज्ञा
नीयात्तत्राह पाप मतिरित्यादि ८ किंमयाहतयामंदेत्यादिदेवकीकन्यावचः श्रुत्वा
देवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हतीतिनित्यंसंचिंतयन्सामान्येनक्वचिदस्ती

कंसः पापमतिः सत्यंतवचानकदुंदुभेः देवक्याअष्टमोगर्भो
नस्त्रीभवितुमर्हति ८ इतिसंचिंतयन्श्रुत्वादेवक्यादारिका
वचः अपिहंतागताशंकस्तर्हितन्नोनयोभवेत् १ श्रीराम

[illegible]

तिज्ञात्वायुवयोश्चसत्यंसंचिंतयन्त्वद्गृहेभवेदितिसंभाव्यमत्संस्कारलिंगेनच
आगतशंकः आगताशंकायस्यसः अपियर्हिहंताहनिष्यतितर्हितत्तदानींमहान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजातिसंस्कारं द्विजातीनामवश्यंकर्त्तव्यंसंस्कारमात्रंकेवलंस्वस्तिवाचनपूर्वकं
कुर्व्विति १० ११ यदूनामपृथग्भावात् कुतश्चिद्धेतोर्विप्रतिपद्यमानानांयदूनाम

नंदउवाच॥ अलक्षितोस्मिन्रहसिमामकैरपिगोव्रजे कुरुद्विजातिसंस्कारंस्वस्ति
वाचनपूर्वकं १०॥शुकउवाच॥ एवंसंप्रार्थितोविप्रःस्वचिकीर्षितमेवतत् चकार
नामकरणंगूढोरहसिबालयोः ११ अयंहिरोहिणीपुत्रोरमयन्सुहृदोगुणैः आ
ख्यास्यतेरामइतिबलाधिक्याद्बलंविदुः १२ यदूनामपृथक्भावात्संकर्षणमु
शंत्युत १३

पृथग्भावाद्भावोभावनंतस्मात् अन्योन्याशिक्षयासर्वैकमस्यकरणा
दित्यर्थः सम्यक्कर्षतिएकीकरोतीतिसंकर्षणमप्युशंतिमन्यंतेवक्ष्यंतीत्यर्थः
गर्भसंकर्षणंतुनप्रकाशयंति १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्य तव पुत्रस्य अतः कृष्ण इत्येकं नाम भविष्यति [illegible] मितिसामान्योक्त्याक्ऋषिरयं जन्मांतरगतं नाम कथयतीति नंदो मन्यते स्म अत एवं वासुदेव इति संप्रचक्षतेत्युक्तं

आसन्वर्णास्त्रयो ह्यस्य गृह्णतोनुयुगं तनूः शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः १३ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते १४ बहूनि संति नामानि रूपाणि च सुतस्य ते गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः १५

ति १४ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोवर्द्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि नो वेद जना अपि न विदुरिति १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
६७

१६ जातकफलमाह एषइति आधास्यत्‌आधास्यति अनेनरक्ष्यमाणाःसमेधिताश्च

एषवःश्रेयआधास्यद्गोपगोकुलनंदनः अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ १६
पुरानेनव्रजपतेसाधवोदस्युपीडिताः अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः
१७ यएतस्मिन्महाभागाःप्रीतिंकुर्वंतिमानवाः नारयोभिभवंत्येतान्विष्णुपक्षानि
वासुराः १८ तस्मान्नंदात्मजोयंतेनारायणसमोगुणैः श्रियाकीर्त्यानुभावेनगोपा
यस्वसमाहितः १९ इत्यात्मानंसमादिश्यगर्गेचस्वगृहंगते नंदःप्रमुदितोमेनेआ
त्मानंपूर्णमाशिषां २०

दस्यून्विजिग्युरिति १७ १९ [illegible]तिचा[illegible]तं[illegible]तिसमादिश्यआत्मा
नंहृष्यंवाआशिषांआशीर्भिः २० [illegible]हृष्यं

राम
६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बालक्रीडाचमत्कारैः कृष्णोरामेणसंयुतः परमानंद[illegible]न्व्रजेनंदयशोदयोः पूर्ण
त्वमेवदर्शयन्नाह कालेनेति २० अनुकृष्यपुनःपुनराकृष्यसरीसृपंतौअतिश
येनचलंतौ कथंघोषाः कटिपादभूषणकिंकिण्यस्तेषांघोषेणरुचिरंयथातथा

कालेनव्रजताल्पेनगोकुलेरामकेशवौ जानुभ्यांसहपाणिभ्यांरिंगमाणौ
विजह्रतुः २१ तावंघ्रियुग्ममनुकृष्यसरीसृपंतौघोषप्रघोषरुचिरंव्रजक
र्दमेषु तन्नादहृष्टमनसावनुसृत्यलोकंमुग्धप्रभीतवदुपेयतुरंतिमात्रोः २२

तेषांनादेनहृष्टंमनोययोस्तौ लोकंततस्ततोगच्छंतंजनंअनुसृत्यक्वचित्तुरागेणपदा
निअनुगम्यमुग्धवत् प्रभीतवन्मात्रोरंतिसमीपेउपेयतुः उपजग्मतुः २२ कृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा च तन्मातरौ दोर्भ्यामुपगुह्य प्रमोदं पयतुः कथंभूते घृणया स्नुपयास्नुवंत्यौ पयः
पूर्ण पयोधरे ययोस्तौ पंकेनांगरागेण च रुचिरौ कथंभूतं मुखं निरीक्ष्य मुग्धं मंदस्मितं

तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरा ॥
गरुचिरावुपगुह्य दोर्भ्यां दत्वा स्तनं प्रपिबतोः स्म
मुखं निरीक्ष्य मुग्धस्मितात्पदशनं ययतुः प्रमोदं २२

यस्मिन् अल्पादशना अश्व यस्मिन् तच्च तत् २२ श्री[illegible]परमात्मने नमो नमः ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यर्हिअंगनानांदर्शनीयाकुमारलीलाययोः तथा ... जयो तदांतर्व्रजेव्रजमध्ये
तदबलाः व्रजांगनास्तौप्रेक्ष्यंत्यः प्रेक्षमाणाः विस्मृतगृहकृत्याहसंत्योजग्हषुः तं

यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजेतदबलाः प्रगृहीतपुच्छैः
वत्सैरितस्ततउभावनुकृष्यमाणौप्रेक्ष्यंतउज्झितगृहाजर्हृषुर्ह
संत्यः २४

घाबभूवुः कथंभूतौ ताभ्यांप्रगृहीतानिपुच्छानियेषांतैर्वत्सैरितस्ततः अनुकृष्यमाणौ २४

अतिचपलौ शृंग्यादिभ्यो निषेद्धुं गृहोचितानि कर्माणि च कर्तुं यत्र यदा तज्जनन्यौ न

शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं गृ
त्यानि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोनवस्थां २५ काले
नाल्पेन राजर्षे रामः कृष्णश्च गोकुले अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा
२६ ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः सहरामो व्रजस्त्रीणां चिक्रीडेज
नयन्मुदं २७ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं शृण्वंत्याः किलतन्मा
तुरितिहोचुः समागताः २८

शेकातेतदाऽलंमनसोऽनवस्थामापतुरितिसहसोरर्थसं॰ परा॰ कमस्त्वादर्शिता २५ २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णचापलचौर्याणि सहैवाखिलसम्मतः प्रजल्पंत्यः समागत्य गोप्यो गोप्यै मुदं ददुः
असमये अदोहकाले क्रोशे संजातहासः स्तेयं चौर्यं [illegible] तेन तु दत्तं तत्रापि स्वादु
नेतरत् दधि च पयस्य आत्ति किंच भोक्ष्यन् मर्कान् मर्कटान् प्रति विभज्य ददाति तेषां

वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्ते
ययोगैः मर्कान्भोक्ष्यन्विभजति सचेन्नात्ति भांडं भिनत्ति द्रव्यालाभे सगृहकुपि
तो यात्युपक्रोश्य तोकान् २९

मध्ये चेत्सत्वेन कोपि नात्ति चे तर्हि भांडं भिनत्ति क्वचिद्द्रव्यस्या
लाभे सति सगृहं धस्यामीति कुपितो याति यद्वा सगृहात् गृहिणस्तेभ्यः कुपितस्तेषां तो
कान् पर्यंकादिषु सुप्तानुपक्रोश्य रोदयित्वा यातीति कल्पितैः स्तेययोगैरित्युक्तं तत्प्रपं

भा॰ टी॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्ताग्राह्येइति तुंगाशिक्यस्य भांडेषु अंतर्निहितेदध्यादौ वयुनं ज्ञानं यस्य सः छि
द्रं रचयति तद्वित् छिद्ररचनादिवित् ध्वांतयुक्तेगृहे स्वांगमेवार्थप्रदीपं रचयति

हस्ताग्राह्येरचयतिविधिंपीठकोलूखलाद्यैश्छिद्रंह्यंत
र्निहितवयुनःशिक्यभांडेषुतद्वित् ध्वांतागारेधृतम
णिगणंस्वांगमर्थप्रदीपंकालेगोप्योयर्हिगृहकृत्येषु
सुव्यग्रचित्ताः ३०

विशेषतो धृतमणिगणं यर्हि यस्मि[illegible]ले ३० श्रीकृष्णपरमात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेरेचौरइत्याक्रुष्टः सन्नुशतिजल्पति त्वमेव चोरः अ[illegible]त्कमीत्यादीनि धार्ष्ट्यानि
प्रगल्भानिउशतिहे कमनीये यशोदे यद्वाउशतिवास्तोस[illegible]र्विते ग्रहेमेहनादीनिपुरी
षोत्सर्गादीनिकुरुते एवंस्तेयोपायैः विरचिताकृतिः कर्मयेनसः त्वत्समीपे सुतीव्र

एवंधार्ष्ट्यान्युशतिकुरुते मेहनादीनिवास्तौस्तेयोपायैर्विरचितकृतिः सुप्रतीको
यथास्ते इत्थंस्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्थाप्रहसितमु
खीनत्युपालब्धुमैच्छत् ३१

कः साधुरिवास्ते सभयेन यनेयास्मिन् तत्र श्रीयुक्तंमुखंच
तदालोकिनीभिः व्याख्यानार्थाप्रख्यापितकर्मफलात्पालब्धुं आसिमुनैच्छत् ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदाचिदपराधांतरे उपालंभं तद्दातुमहदाश्चर्यं अभूदिति कथयन्नाह एकदेति
३२ उपालभ्य निर्भर्त्सनभयेन संभ्रांते प्रेक्षणे चपल निरीक्षणे अक्षि[illegible]णीयस्य तं

एकदाक्रीडमानास्तेरामाद्यागोपदारकाः कृष्णोमृदंभक्षितवानितिमात्रेन्यवेद
यन् ३३ सागृहीत्वाकरेकृष्णमुपालभ्यहितैषिणी यशोदाभयसंभ्रांतप्रेक्षणाक्ष
मभाषत ३४ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः वदंतितावकाह्येते
कुमारास्तेग्रजोप्ययं ३५ नाहंभक्षितवानंबसर्वेमिथ्याभिशंसिनः यदिसत्यगि
रस्तर्हिसमक्षंपश्यमेमुखं ३६

३४ अदांतात्मन् चपलगा[illegible] रहः एकांते ३५ नाहंभक्षित
वानितिनहिबाल्यंकिंचिन्मयाभक्ष्यतेमकुत्रावारा[illegible]कर्तव्यमस्तीतिभावः समक्षं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यादेहिमुखंप्रसारयेतिव्यादत्तप्रसारितवान् ३७ तत्र[illegible]स्मिन्मुखेविश्वंददृशेददर्श
तत्रपंचयतिजगतजंगमंस्थास्नुस्थावरंखंअं[illegible]ककुभः साद्रिद्वीपाब्धिभूगोलं
पर्वतद्वीपसमुद्रसहितंभूगोलंभूर्लोकंवायुःप्रवहः अग्निर्वैद्युतः इंदुश्चतारकाः

यद्येवंतर्हिव्यादेहीत्युक्तःसभगवान्हरिः व्यादत्ताव्याहतैश्वर्यःक्रीडामनुजबाल
कः ३७ सातत्रददृशेविश्वंजगत्स्थास्नुचखंदिशः साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नीं
दुतारकं ३८ ज्योतिश्चक्रंजलंतेजोनभ[illegible]स्वा[illegible]न्वियदेवच वैकारिकाणींद्रियाणि
मनोमात्रागुणास्त्रयः ३९

श्चतत्सहितं ३८ ज्योतिश्चक्रंस्व लोकंवैकारिकाणिदेवाः
मनइतिवैकारिकशब्देनगृहीतमपिदेववैलक्षण्यात्पुनरुक्तंइंद्रियाणिचतैजसानि
मात्राःतामसाःशब्दादयः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमेतद्विचित्रं विश्वं सहएकदेवबीस्य विचित्रतामाह जीवश्च गुणक्षोभकः काल श्चपरिणामहेतुः स्वभावश्चजन्महेतुः कर्मचतत्संस्कारः आशयश्चएतैर्लिंगानांच

एतद्विचित्रंसहजीवकालस्वभावकर्माशयलिंगभेदं
सूनोस्तनौवीक्ष्यविदारितास्येव्रजंसहात्मानमवाप
शंकां ४०

राचरशरीराणांभेदोयस्मिन् तत् तत्रव्रजंचसहात्मानंस्वसहितंकचिद्वीस्य सूनोस्तनौ अस्येविदारिते आस्येशंकामवाप ४० श्रीविष्णुपरमात्मनेनमः ७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामाह किंस्वप्न इति परितो विलोक्याह नायंस्वप्नस्तर्हि किं[illegible]देवस्य हरेर्माया तथाचेदन्ये
नपश्यंति तर्हि किंवामदीय एव कश्चिद्बुद्धिमोहः विपर्यासि[illegible] दर्पणे मुखवत् एवं तर्हि अ
यं कृष्णोपि कथमंतः प्रतीयते अंतर्बहिश्चैकरूपेण च कथं जगत्प्रतीयते तथासति बिं

किंस्वप्न एतदुत देवमाया किंवा मदीयो बत बुद्धिमोहः अथो
अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ४१

बप्रतिबिंबयोरिव परस्परं वैपरीत्येन प्रतीतिः स्यादित्याशंक्यान्यथा वितर्कयति अ
थो इति अथवा ममामुष्यार्भकस्यापि सतो यः कश्चनाचिंत्य आत्मयोगः स्वीयमैश्वर्यं
औत्पत्तिकः स्वाभाविकः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरमंपक्षमाश्रित्यायमीश्वरइतिनिश्चित्याह अथोइति चेतश्चित्तंचित्तादिभिर्नवित
र्कगोचरंजगध्दाश्रयंयदधिष्ठानंयेनकरणाधिष्ठात्रा यतोबुद्धिवृत्त्यभिव्यक्ता

अथोयथावन्नवितर्कगोचरंचेतोमनःकर्मवचोभिरंजसा
यदाश्रयंयेनयतःप्रतीयतेसुदुर्विभाव्यंप्रणतास्मितत्पदं
४२

त् नन्विदमवितर्क्यंभवतुनत्पदंकीदृक्अतआहसुदुर्विभाव्यमितिइदमत्यंतम
चिंत्यमित्यर्थः ४२ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंप्रपंचप्रतीलोन्नीतंनतंपुनर्जीवसंसृतिहेतुमायाश्र[illegible]त्वेनोन्नयंत्याह अहमिति
यशोदानामाहं असौममपतिः अमुष्यव्रजेश्वरस्याखिलवित्ताधिष्ठात्री अहंसती

अहंममासौपतिरेषमेसुतोव्रजेश्वरस्याखिलवित्तपासती गोप्यश्च
गोपाःसहगोधनाश्चयेन्मायेययेत्थंकुमतिःसमेगतिः ४२ इत्थंविदि
ततत्वायांगोपिकायांसईश्वरः वैष्णवींव्यतनोन्मायांपुत्रस्नेहमयींवि
भुः ४३

जायाएषकृष्णोमेसुतः गोप्यादयश्चमदीयाइत्थंकुमतिर्यन्माययासएषमेशर
णमिति ४२ वैष्णवींस्वीयां ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
७४

प्ररूढेनस्नेहेनकलिलंव्याप्तंहृदयंयस्याःसापुरेवासीत् ४५ मायाबलोद्रेकमाहत्रय्ये
तित्रय्याकर्मकांडरूपयाइंद्रादिरूपेणउपनिषद्भिर्ब्रह्मेतिसांख्यैःपुरुषइतियोगैःप

सद्योनष्टस्मृतिर्गोपीसारोप्यारोहमात्मजं प्ररूढस्नेहकलिलहृदयासीत्
यथापुरा ४५ त्रय्याचोपनिषद्भिश्चसांख्ययोगैश्चसात्वतैः उपगीयमा
नमाहात्म्यंहरिंसामान्यतात्मजं ४६ ॥राजोवाच॥ नंदःकिमकरोद्ब्रह्मन्श्रेय
एवंमहोदयं यशोदाचमहाभागापपौयस्याःस्तनंहरिः ४७

रमात्मेतिसात्वतैर्भगवानिति उपगीयमानंमाहात्म्यंयस्यतं ४६ अतिविस्मयेन
पृच्छतिनंदइतिमहोदयंमहानुदयउद्भवोयस्यतत् ४७ श्रीकृष्णपरमात्मनेनमः ७४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयोःप्रसन्नोवतीर्णस्तौपितरौअपियन्नान्वविंदेतांनभ्रा[illegible] कृष्णस्योदारं महत्‌अ
र्भकेहितंबाललीलांयच्चकवयोगायंतितयोःविंदत्सा[illegible]किप्रयोःकरोदिति ४८ ब्रह्म

पित्तरौनान्वविंदेतांकृष्णोदारार्भकेहितं गायंतेद्यापिकवयोयल्लो
कशमलापहं ४८ श्रीशुकउवाच द्रोणोवसूनांप्रवरोधरयासहभा
र्यया करिष्यमाणआदेशान्ब्रह्मणस्तमुवाचह ४९ जातयोर्नौमहा
देवेभुविविश्वेश्वरेहरौ भक्तिःस्यात्परमालोकेययांजोदुर्गतिंतरेत्

५०

णआदेशान्‌गोपालौदिदृक्षणान्‌ ४९ ५० श्रीकृष्णपरमात्मनेनमः ७ ७

सएवेहद्रोणोजज्ञेसचनंदइतिख्यातः साचधरायशोदाऽभवत् ५१ गोपगोपीनामपिवि
स्तुस्वभावादस्त्येव भक्तिः तयोःपुनर्नितरामिति स्वलीलयापुत्र भावानुकारिण्या ५२

अस्त्वित्युक्तः सभगवान्व्रजेद्रोणोमहायशाः जज्ञेनंदइतिख्यातोयशो
दासाधराभवत् ५१ ततोभक्तिर्भगवति पुत्रीभूतेजनार्दने दंपत्योर्नि
तरामासीद्गोपगोपीषुभारत ५२ कृष्णोब्रह्मणआदेशंसत्यंकर्तुंव्रजेवि
भुः सहरामोवसंश्चक्रेतेषांप्रीतिंस्वलीलया ५३ इतिश्रीभागवतेमहापु
राणेद्वादशसहस्रसंहितायांवैय्याःदशम॰ विश्व रूपदर्शनेअष्टमोध्यायः

५३ इतिश्रीभागवते ॰ द॰ ॥ ०॥अष्टमोध्यायः॥ ८॥ श्रीकृ[illegible]र्पणमस्तु श्रीरामश्री ७५

नवमेपयस्यग्निसिक्तेगतागोप्यथतत्कृतं विलोक्यभांडं[illegible]गादिकृष्णंदाम्नाबबंधतं
१ तन्नूदराश्रितंविश्वंदृष्ट्वाविस्मितचेतसः बंधनघ्नंगु[illegible]पूर्वापूर्णतामन्वदर्शयि

शुकउवाच॥ एकदागृहदासीषुयशोदानंदगेहिनी कर्मांतरनियुक्तासुनिर्ममंथस्व
यंदधि १ यानियानीहगीतानितद्बालचरितानिच दधिनिर्मंथनेकालेस्मरंतीता
न्यगायत २ क्षौमंवासः पृथुकटितटेबिभ्रतीसूत्रनद्धंपुत्रस्नेहस्नुतकुचयुगंजा
तकंपंचसुभ्रूः रज्ज्वाकर्षश्रमभुजचलत्कंकणौकुंडलेचस्विन्नंवक्त्रंकबरविगल
न्मालतीनिर्ममंथ ३

नू २ स्वयंदधिनिर्ममंथ १ तदा चागायतेतिचकारान्वयः २
सूत्रनद्धंकांचीबद्धंरज्ज्वोराकर्षणेनश्रमोययोस्तयोर्भुजयोश्चलंतौकंकणौचकबरा
द्विगलंत्योमालत्यःयस्यासा ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰
७६

अधिश्रितेचुल्लीमारोपितेउत्सिच्यमानेअ(ा)तितापेनोद्रिच्यमाने ५ इषदशमनाशि

॥ तांस्तन्यकामआसाद्यमथ्नंतींजननींहरिः गृहीत्वादधिमंथानंन्यषेध
त्प्रीतिमावहन् ४ तमंकमारूढमपाययत्स्तनंस्नेहस्नुतंसस्मितमीक्षती
मुखं अतृप्तमुत्सृज्यजवेनसाययावुत्सिच्यमानेपयसित्वधिश्रिते ५ सं॰
जातकोपःस्फुरितारुणाधरंसंदश्यदद्भिर्दधिमंथभाजनं भित्वामृषाश्रुर्दृ
षदश्मनारहोजघासहैय्यंगवमंतरंगतः ६

लापुत्रेणअंतरंगरहमध्यंगतः रहः एकांतेनवनीतंअभ[illegible]यत ६ श्रीकृष्णपरमा॰ ७६

CC-0. In Public Domain.KaviKulguru Kalidas Sanskrit University Ramtek Collection

सुप्तंतंसुतंसदधिमंथनस्थानंप्रविश्यभिन्नंसंदृश्यदृष्ट्वा उलूखलांघ्रेःपरिवर्तित
स्योलूखलस्योपरिशिक्येशिक्येचौर्येणविशंकितंचंचल[illegible]क्षणंयस्यतंसुतं ६ तप
उत्तार्यगोपीसुप्तंतंपयःपुनःप्रविश्यसंदृश्यचदध्यमत्रकं भग्नंविलोक्यस्वसुतस्य
कर्मतज्जहासतंचापिन तत्रपश्यती ७ उलूखलांघ्रेरुपरिव्यवस्थितंमर्कायकामंदद
तंशिक्यस्थितं हैयंगवंचौर्यविशंकितेक्षणंनिरीक्ष्यपश्चात्सुतमागमच्छनैः ८ ताम
त्तयष्टिंप्रसमीक्ष्यसत्वरस्ततोवरुह्यापससारभीतवत् गोप्यन्वधावन्नयमापयोगि
नांक्षमंप्रवेष्टुंतपसेरितंमनः ९ साएकाग्रेणईरितंतदाकारतांनीतंअतएवक्षमं
योग्यंप्रवेष्टुंयोगिनांमनोपियंनापितंअथवाअन्वधावत्केवलंनत्वापयतोयोगिनांम
नोपियंप्रवेष्टुंनक्षममिति ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्वंचमानाएवंकृष्णमनुगच्छंतीबृहतश्चलंत्योःश्रोण्योर्भारेणाक्रांतास्तब्धागतिर्य
स्याःसाविस्रंसितात्केशबंधाच्युतैःप्रसूनैरनुगतिरनुगमनंयस्याःसायद्वाजवेनक
पितात्केशबंधात्पुरःपतितानिप्रसूनानिअनुपश्चाद्गतिर्यस्याःसापरामृशत्धृतव

अन्वंचमानाजननीबृहच्चलछ्रोणीभराक्रांतगतिःसुमध्यमा जवेनविस्रंसितके
शबंधनच्युतप्रसूनानुगतिःपरामृशत् १० कृतागसंतंप्ररुदंतमक्षिणीकषंतमंज
न्मषिणीस्वपाणिना उद्वीक्ष्यमाणंभयविह्वलेक्षणंहस्तेगृहीत्वाभिषयंत्यवागुर
त् ११

ती १० अंजन्मषिणीअंजंतीसर्वतःप्रसरंतीमषीययोःते[illegible]क्षि णीस्वपाणिनाकषंतं
संमर्दयंतंभीषयंतीहस्वच्छांदसःभीषयंतीभयमुत्पादयंतीअवागुरत्अभर्त्सय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इयेषऐच्छत् अतद्वीर्यकोविदातत्प्रभावानभिज्ञा १२ अ[illegible]कोविदत्वमाह नचांतरिति
पंचभिः बंधनंहिबहिःपरिवृतेनदाम्नाअंतरावृतस्यभ[illegible]वतिनैतद्देतैस्त्रीत्याह नचांत
तयापूर्वापरविभागवतोवस्तुनः पूर्वतोदामधृत्वापरितःपरिवेष्टनेनभवति श्रीकृष्ण

७ त्यक्त्वायष्टिंसुतंभीतंविज्ञायार्भकवत्सला इयेषकिलतंबद्धुंदाम्नातद्वीर्यकोविदा १२ नचांतर्नबहिर्यस्यनपूर्वंनापिचापरं पूर्वापरंबहिश्चांतर्जगतोयोजगच्चयः १३

रितिकिंचव्यापकेनव्याप्यस्यब[illegible]धोभवतितच्चविपरीतमित्याहपूर्वापरमितिकिंचतद्व्यतिरिक्तस्यचाभावान्नबंधइत्याहजगच्चयइति १३ श्रीकृष्णपरमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंमर्त्यलिंगमधोक्षजंआत्मजंमत्वाबबंधेति १४ द्व्यंगुलोनंद्वाभ्यामंगुलाभ्यामूनम
पूर्णं १५ स्मितं कुर्वंतीनांमध्येस्वयमपिहसंतीविस्मयमाप १६ नचैवंस्वातंत्र्यभंग

तंमत्वात्मजमव्यक्तंमर्त्यलिंगमधोक्षजं गोपिकोलूखलेदाम्नाबबंधप्राकृ
तंयथा १४ तद्दामबध्यमानस्यस्वार्भकस्यकृतागसः द्व्यंगुलोनमभूत्तेन
संदधेन्यच्चगोपिका १५ यदासीत्तदपि न्यूनंतेनान्यदपिसंदधे तदपिद्व्यंगु
लन्यूनंयद्यदाददत्बंधनं १६ एवंस्वगेहदामानियशोदासंदधत्यपि गोपी
नांसुस्मयंतीनांस्मयंतीविस्मिताभवत् १७

इत्याह एवंसंदर्शितेति सेश्वरमिदंविश्वंयस्यवशेपरधीनमित्यर्थः १७ श्रीकृष्णा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवत्प्रसादमन्येपिभक्तालभंते इदंत्वतिविचित्रमितिसरो[illegible]चितमाह नेमामितिविरिं
च्यः पुत्रोपिभवः स्वात्मापि श्रीर्जायापि २० फलितमाह नायमिति देहिनांदेह

स्वमातुः स्विन्नगात्रायाविस्रस्तकबरस्रजः दृष्ट्वापरिश्रमंकृष्णः कृपयासीत्स्व
बंधने १८ एवंसंदर्शिताह्यंगहरिणाभक्तवश्यता स्ववशेनापिकृष्णेनयस्ये
दंसेश्वरंवशे १९ नेमंविरिंचोनभवोनश्रीरप्यंगसंश्रया प्रसादंलेभिरेगोपी
यत्तत्प्रापविमुक्तिदात् २० नायंसुखापोभगवान्देहिनांगोपिकासुतः ज्ञा
निनांचात्मभूतानांयथाभक्तिमतामिह २१

भिमानिनांतापसादीनांज्ञानिनां निवृत्ताभिमानानामपीति २१ श्रीकृष्णपरमात्म०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तैर्बंधस्याप्यन्यमोचकत्वमाह कृष्णास्त्विति २२ २३ इति दशमे टीकायां नवमोध्या
यः॥९॥ दशमे पानयद्दिंगन्नंतरायमलार्ज्जुनौ तत्रस्ताभ्यांचदेवाभ्यांकृष्णः स्तुतइ

कृष्णस्तुगृहकृत्येषुव्यग्रायांमातरिप्रभुः अद्राक्षीदर्ज्जुनौपूर्वंगुह्यकौ
धनदात्मजौ २२ पुरानारदशापेनवृक्षतांप्रापितौमदात् नलकूवरमणि
ग्रीवाविति ख्यातौश्रियान्वितौ २३ इतिश्रीभागवते महा॰ दशमस्कंधेगोपीप्र
सादेनामनवमोध्यायः॥९॥ ७ ॥राजोवाच॥ कथ्यतांभगवन्नेतत्तयोःशापस्य
कारणं यत्तद्विगर्हितंकर्मयेनवादेवर्षेस्तमः १ तीर्यंते १ यद्विगर्हितंकर्म
येनवादेवर्षेर्भागवतोत्तमस्यापितमः क्रोधस्तदेतत्क[illegible]गमिति १ श्रीकृष्णपर॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ ३ गंगायामंतर्मध्येकथंभूते अंभोजानांवनानितेषांराजयस्ताविद्यंतेयस्मिन्तस्मि
न् ४ अपश्यतदृष्ट्वाचक्षीवाणौमत्तौसमबुध्यत ५ कु[illegible]रस्यतआह तंदृष्ट्वेति ६

श्रीशुकउवाच॥ रुद्रस्यानुचरौभूत्वासुदृप्तौधनदात्मजौ कैलासोपवनेरम्येमं
दाकिन्यांमदोत्कटौ १ वारुणींमदिरांपीत्वामदाघूर्णितलोचनौ स्त्रीज
नैरनुगायद्भिश्चेरतुः पुष्पितेवने २ अंतःप्रविश्यगंगायामंभोजवनराजिनि
चिक्रीडतुर्युवतिभिर्गजाविवकरेणुभिः ४ यदृच्छयाचदेवर्षिर्भगवांस्तत्रकौ
रव अपश्यन्नारदोदेवौक्षीवाणौसमबुध्यत ५ तंदृष्ट्वाव्रीडितादेव्योविव
स्त्राः शापशंकिताः वासांसिपर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ ६ श्रीकृष्ण

श्रीकृष्णपरमात्मनेनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुग्रहार्थायअनुग्रहस्श्चमदनाशः अर्थश्च श्रीकृष्णदर्शनंतदर्थमिदंवक्ष्यमाणंन
ह्यन्यदित्यादि ७ जोष्यान्प्रियान्विषयान्जुषतः सेवमानस्यपुंसः [illegible]
श्रीमदादन्यआभिजात्यादिः सत्कुलविद्यादिजनितोमदः अन्योवारजोगुणःरजः

तोहृष्टामदिरामत्तौश्रीमदांधौसुरात्मजौ तयोरनुग्रहार्थायशापंदास्यन्निदंजगौ
७ ॥नारदउवाच॥ नह्यन्योजुषतोजोष्यान्बुद्धिभ्रंशोरजोगुणः श्रीमदादाभिजात्या
दिर्यत्रस्त्रीद्यूतमासवः ८ हन्यंतेपशवोयत्रनिर्दयैरजितात्मभिः मन्यमानैरिमं
देहमजराममृत्युनश्वरं ९ कार्यःहास्यहर्षादिरूपोनाहितथाबुद्धिभ्रंशःबु
द्धिभ्रंशयतीतितथाकिंतुश्रीमदएवेतितदाहयत्रेत्यादिचतुर्भिः यत्रश्रीमदे ८
इमंनश्वरंदेहंअजराममृत्युअजरस्श्चमृत्युश्चययोर्मन्यमा[illegible]ः ९ श्रीकृष्णपरमात्मने०

तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरदेव भूदेव संज्ञितमपि श्वादिभिर्भक्षितं विट्संज्ञितं दग्धं भस्मसंज्ञितं अन्यदा कृ
मिसंज्ञितं तत्कृते न तदर्थं यो भूतध्रुक् द्रोग्धा यतो भूतद्रोहान्निरयो भवति स किं स्वा

देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितं भूतध्रुक् तत्कृते स्वार्थं किं वेद निर
यो यतः १० देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव वा। मातुः पितुर्वा बलिनः
क्रेतुरग्नेः शुनोपि वा ११ एवं साधारणं देहमव्यक्तप्रभवाप्ययं को विद्वा
नात्मसात्कृत्वा हंति जंतूनृतेऽसतः १२

र्थं वेद न वेदेत्यर्थः १० निषेक्तुः पितुः
मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे ११ अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवस्त
स्मिन्नेवाप्ययो यस्य तं आत्मसात् कृत्वा आत्मेति मत्वा असतो मूढाद् ऋते १२ श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं श्रीमदविचेष्टितमुक्त्वा तत्प्रतीकारं निश्चिनोति असतइति परं श्रेष्ठं दारिद्र्यमेव केवलमिति वा कुतइत्यत आह आत्मौपम्येनेति ततोनुकुर्वतीति भावः १३ सदृष्टांत माह यथेति मुखम्लान्यादिलिंगैः सर्वेषां जीवानां सुखदुःखे समेइतिज्ञानवानि

असतः श्रीमदांधस्य दारिद्र्यं परमंजनं आत्मौपम्येन भूतानि दरिद्रः परमीक्षते १३ यथा कंटकविद्धांगो जंतोर्नेच्छति तां व्यथां जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः १४ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः १५

त्यर्थः १४ किंच दारिद्र्यं मो — क्षमपि साधयतीत्याह दरिद्रइति श्लोकचतुष्टयेन निरहंस्तंभो निर्गतः अहंकाररूपः स्तंभो यस्मात्सः १५ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युज्यंतेसर्वतःएवसंगच्छंतेतर्षंतृष्णां १६ ननुसाधूनामपिधनिकःप्रियःस्यान्नदरिद्रः

निःस्वंक्षुत्क्षामदेहस्यदरिद्रस्यान्नकांक्षिणः इंद्रियाण्यनुशुष्यंतिहिंसापि
विनिवर्त्तते १६ दरिद्रस्यैवयुज्यंतेसाधवःसमदर्शिनः सद्भिःक्षिणोतितंत
र्षंततआराद्विशुध्यति १७ साधूनांसमचित्तानांमुकुंदचरणैषिणां उ
पेक्ष्यैःकिंधनस्तंभैरसद्भिरसदाश्रयैः १८ तदहंमत्तयोर्माध्व्यावारुण्या
श्रीमदांधयोः तमोमदंहरिष्यामिस्त्रैणयोरजितात्मनोः १९ यदिमौलो
कपालस्यपुत्रौभूत्वातमःप्लुतौ नविवाससमात्मानंविजानीतःसुदुर्मदौ
२०

तिनत्राहसाधूनामिति १७ धनेनस्तंभोगर्वोयेषांतैः १८ तमोमदंअज्ञानकृतंमदं १९
तमःप्लुतौतमोव्याप्तौ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शपतिअनो[illegible]र्हतरति अनुगृण्हाति स्यात्तांनैवमित्यादिनामत्प्रसादेनस्मृतिःस्या

अतोर्हतःस्थावरतांस्यातांनैवंयथापुनः स्मृतिःस्यान्मत्प्रसादेनतत्रापि
मदनुग्रहात् २० वासुदेवस्यसान्निध्यंलब्ध्वादिव्यशरच्छते वृत्तेस्वर्लोक
तांभूयोलब्धभ[illegible]क्तीभविष्यथः २१ ॥शुकउवाच॥ एवमुक्त्वासदेवर्षिर्गतो
नारायणाश्रमं नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ २२ ऋषेर्भा
गवतमुख्यस्यसत्यंकर्तुंवचोहरिः जगामशनकैस्तत्रयत्रास्तांयमला
र्जुनौ २३

त् २० स्वर्लोकतांदेवत्वंपुनर्लब्ध्वामेनुग्रहाल्लब्धभक्ती[illegible]विष्ययइति २१ प्रस्तुत
माहऋषेरिति २२ २३ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमितिसत्संकर्त्तव्यंतत्राह देवर्षेरिति यद्यंतः तततः २३ यमयोर्यमलयोःसह
जातयोः आत्मनः कृष्णस्यतन्मध्येप्रवेशमात्रेण २५ अनुअंचतीत्यन्वक् तत्रहेतुः

देवर्षिर्मेप्रियतमोपद्दिमौनेधेदात्मजौ तत्तथासाधयिष्यामियद्गीतंतन्महात्मना
२४ इत्यंतरेणार्जुनयोः कृष्णस्तुयमयोर्ययौ आत्मनिर्वेशमात्रेणतिर्य्यग्गतमुलू
खलं २५ बालेननिष्कर्षयतान्वगुलूखलंतद्दामोदरेणतरसोत्कलितांघ्रिबंधौ निः
पेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौकृतचंडशब्दौ २६ श्रीकृष्ण

दामोदरेणेतिउत्कलितउत्पाटितः अंघ्रिबंधोययोस्तौपरमस्यश्रीकृष्णस्यविक्र
मितंविक्रमस्तेनातिवेपः कंपोयेषुतेस्कंधप्रवालविटपाययोस्तौ २६ श्रीरामः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ककुभः प्रतिसर्वतः स्फुरंतौ विसर्पद्भिः यद्वा दिशः प्रकाशयंतावितिकुजयोर्विशेषणं स्व
रूपयोः स्थितो ग्निर्यथा मूर्तिमानुपैति तद्वद्योपेत्य विरजसौ निर्मदौ २७ गोपालं मां युवा
देवो किमिति प्रणतावितिचेत्तत्राहतुः हे कृष्ण कृष्ण महायोगिन् अचिंत्यप्रभावस्त्वं न

तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः कृ
ष्णं प्रणम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूचतुः स्म २७
कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्रा
ह्मणा विदुः २८

बालः किंतु परः पुरुषः यत आद्यः कारणभूतः तत्रापि न निमित्तमात्रं किं
तूपादानमपि त्वमेवेत्याशयेन तुष्टुवतुः व्यक्ताव्यक्तमिति स्थूलसूक्ष्ममिदं ते रूपं विदुः
२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियंतापित्वमेवेत्यूचतुः त्वमेकइतिदेहः असवः प्राणाः आत्माअहंकारः इंद्रियाणिच
तेषामीश्वरः नन्वस्यकालोनिमित्तंप्रकृतिरुपादानंप्रकृतेर्जातोमहान्विश्वात्मतयाप

त्वमेकः सर्वभूतानांदेहास्वात्मेंद्रियेश्वरः त्वमेवकालोभगवान्विष्णुरव्ययईश्वरः २९
त्वं महान्प्रकृतिः सूक्ष्मारजःसत्वतमोमयी त्वमेवपुरुषोध्यक्षः सर्वक्षेत्रविकारवि
त् ३०

रिणमतेपुरुषः कर्तानियंताचकिमत्राहमतआहतुः त्वमेवकालइत्यादिनासार्द्धेन
यतोभगवानीश्वरोविष्णुस्त्वमतः कालोनामतवलीलाप्रकृतिः शक्तिः पुरुषोंशः महा
न्कार्यं अतस्त्वमेवसर्वमित्यर्थः २९ ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वहमेवचेत्सर्वंतर्हिघटादिज्ञानेमह्यानंकिंनभवतिचेत्सर्वोपिब्रह्मवित्स्यात् अ
तआहतुः गृह्यमाणैरिति दृश्यत्वेनवर्त्तमानैर्बुध्यहंकारेंद्रियादिभिः दृशात्वंनगृह्य
सइतिभावः ननुतर्हिजीवोजानातुनैवेत्याहतुः कोन्विहेति जीवाद्युत्पत्तेःप्रागेव

गृह्यमाणैस्त्वमग्राह्योविकारैःप्राकृतैर्गुणैः कोन्विहार्हतिविज्ञातुंप्राक्
सिद्धंगुणसंवृतः ३१ तस्मैतुभ्यंभगवतेवासुदेवायवेधसे आत्मद्यो
तगुणछन्नमहिम्नेब्रह्मणेनमः ३२

स्वप्रकाशतयासिद्धत्वांकोवाज्ञानातिगु
णसंवृतः देहाद्यावृतः ३१ अतोदुर्ज्ञेयत्वात्केवलंप्रणमतः तस्मैतुभ्यमिति आ
त्मनः स्वस्मात्द्योतःप्रकाशोयेषांतैर्गुणैश्छन्नोमहिमायस्यअभ्रैरिवरविःतस्मै
३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहोऽहमीश्वरइतिकुतोज्ञानंतत्राहतुःयस्येति ३२ भवायोद्भवायविभवायविगतो

यस्यावताराज्ञायंतेशरीरेष्वशरीरिणः तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३३
सभवान्सर्वलोकस्यभवायविभवायच अवतीर्णोंशभागेनसांप्रतंपतिराशि
षां ३४ नमःपरमकल्याणनमःपरममंगल वासुदेवायशांताययदूनांपतयेन
मः ३५ अनुजानीहिनौभूमंस्तवानुचरकिंकरौ दर्शनंनौभगवतऋषेरासीदनु
ग्रहात् ३६

भवोयस्मिन्तस्मैकैवल्यायेत्यर्थः ३४ ३५ नौआवांअनुचरःकुबेरोनार
दोवानस्यकिंकरौभगवतस्तवदर्शनं ३६ श्रीकृष्णपरमात्मनेनमः रामरामश्री१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रगतयोरावयोः पूर्वस्वभावोमाभूत् किंतुवाणीगुणानुकथनइत्यादि नः अस्मदो
र्द्वयोश्चेति द्विवचनस्थाने बहुवचनं अस्मत्संगिनां सर्वेषामपीतिवाबहुवचनंतव

वाणीगुणानुकथने श्रवणौकथायां हस्तौचकर्मसु मनस्तवपादयोर्नः
स्मृत्यां शिरस्तवनिवासजगत्प्रणामे दृष्टिः सतांदर्शनेस्तुभवत्तनू
नां ३७ ॥ शुक उ॰ ॥ इत्थंसंकीर्तितस्ताभ्यांभगवान्गोकुलेश्वरः दाम्ना
म चोलूखलेबद्धः प्रहस्याहगुह्यकौ ३८

निवासभूतंयज्जगत्तस्यप्रणामे
त्वन्निवासभूतमितिबहुमानेनजगतः प्रणामेशिरोस्त्वित्यर्थः भवत्तनूनां भवतोमू स्तुम
र्तीनां ३७ संकीर्तितः संस्तुतः ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाग्भिर्नर्दंष्यस्योऽनुषतोऽप्योष्यानिसादिभिः श्रीविष्णंशरूपोऽनुग्रहः कृतइति ३९ युक्त
मेवैतदित्याहसाधूनांस्वधर्मवर्त्तिनांसमचित्तानांभात्मविदांसुतरांमत्कृतात्मनाम्

श्रीभगवानुवाच॥ त्वातंममपुरैवैतद्दृष्षिणाकरुणात्मना यच्छ्रीमदांधयोर्वाग्भि
र्विभ्रंशोनुग्रहःकृतः ३९ साधूनांसमचित्तानांसुतरांमत्कृतात्मनां दर्शनान्नो
भवेद्बंधः पुंसोक्ष्णोः सवितुर्यथा ४०

यथार्पितचित्तानांतेषांकृपातिरेकात्सु
तरामित्युक्तं सवितुर्दर्शनात् [illegible] दृक्ष्णोर्यथाबंधोनभवेत्तद्वत् ४० श्रीकृष्णपर०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
८६

भाधान्यादेकस्य संबोधनं हे नलकूवरयुवां तत्तस्मात्सादनं स्वनिकेतं मत्परमौ संतौ गछतं युवयोरपेक्षितो मयि प्रेमा जातएव अभवः नभवो यस्मिन् सः बद्धोलूख

॥४१ तद्गछतं मत्परमौ नलकूबरसादनं संतौ जो मयि भावो वामीप्सितः परमो भवः ४१ ॥ शुक उवाच ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः बद्धोलूखलमा मंत्र्य जग्मतुर्दिशमुत्तरां ४२ इति श्री भागवते महापुराणे दशमस्कंधे नारदकोपो नाम दशमोध्यायः १० ॥

लंबद्धमुलूखलं यस्मिन्नतं ४१ ४२ इति श्री भा० शा० टीकायां दशमोध्याय ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशोसमागत्यवृंदावनमथार्भकैः वत्सान्पालयतांनेनहतोवत्सबकासुरो १
निर्घातोवज्रपातइतिभयेनशंकिताः तद्दृश्यंप्रत्यक्षतःपुरतोदृश्यमपिपतन

शुकउवाच॥ गोपानंदादयःश्रुत्वाद्रुमयोःपततोरवं तत्राजग्मुःकुरुश्रेष्ठनिर्घात
भयशंकिताः १ भूम्यांनिपतितौतत्रददृशुर्यमलार्जुनौ बभ्रमुस्तदविज्ञा
यलक्ष्यंपतनकारणं २ उलूखलंविकर्षंतंदाम्नाबद्धंचबालकं कस्येदंकुत
आश्चर्यमुत्पातइतिकातराः ३

कारणमविज्ञायबभ्रमुः २ लक्ष्यकारण
दर्शयति उलूखलमिति भ्रमकारणमाहकस्येदंराक्षसादेः कर्मकु तोवाकार
णात्आश्चर्यंउत्पातइतिकातराः भीतांसंतोबभ्रमुरित्यर्थः ३ श्रीगोपालकृष्णाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.द.स.
८५

मध्यगेनवृक्षयोर्मध्यगतेनकेवलमेतावत्वृक्षाभ्यांनिर्गतौदिव्यौपुरुषावप्यव
क्षमहिदृष्टवंतोवयमिति ४ केवलंतार्किकानजगदहुरेव अन्येतुसंदेहयुक्तचित्ता

बालाउचुरनेनेतितिर्य्यग्गत्तमुलूखलं विकर्षतामध्यगेनपुरुषाव
प्यवृक्षमहि ४ नतेतदुक्तंजगदहुर्नघटेतेतिनस्यतत् बालस्योत्पाट
नंतर्वोः केचित्संदिग्धचेतसः ५ उलूखलंविकर्षतंदाम्नाबद्धंस्वमा
त्मजं विलोक्यनंदःप्रहसन्हृदनोविमुमोचह ६

बभ्रुवुरिति ५ भगवन्मायाविमोहितस्यनंदस्य चरितमाह उलूखलमिति ६

८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्यंतेमामितिनिशंकमानोतीवबाल्यमनुकरोतिस्मतदाह गोपीभिरितिस्तोभितःक
रतालादिनाप्रोत्साहितः ७ इदमानयेत्याज्ञप्तः आनेतुमसमर्थइवबिभर्त्तिकेवलं

गोपीभिःस्तोभितोनृत्यद्भगवान्बालवत्क्वचित् उद्गायतिक्वचिन्मुग्धस्तद्व
शोदारुयंत्रवत् ७ बिभर्त्तिक्वचिदाज्ञप्तःपीठकोन्मानपादुकं बाहुक्षे
पंचकुरुतेस्वानांचप्रीतिमावहन् ८ दर्शयंस्तद्विदांलोकआत्मनोभृत्य
वश्यतां व्रजस्योवाहवैहर्षंभगवान्बालचेष्टितैः ९

पीठादिबाहुक्षेपंकरचाल
नंचतद्विदांचेत्तिविकारस्यान्वयः ८ तदैश्वर्यंविदंतियेतेषां एवंव्रजस्यहर्षमुवाहेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०स

क्रीणीहिभोः फलानीतिश्रुत्वासत्वरमच्युतः फलार्थीधान्यमादाययथौसर्वफलप्रदः
१० फलविक्रयिणस्तस्यच्युतधान्यकरद्वयं फलैरपूरयद्रत्नैःफलभांडमपूरिच ११
सरित्तीरगतंकृष्णंभग्नार्जुनमथाह्वयत् जन्मर्क्षमथभवतोविप्रेभ्योदेहिगाःशुचिः
१२ पश्यपश्यवयस्यांस्तेमातृमृष्टान्स्वलंकृतान् त्वंचस्नातःकृताहारोविरह
स्वस्वलंकृतः १३ नोपेयातांयदाहूतौक्रीडासंगेनपुत्रकौ यशोदांप्रेषयामास
रोहिणीपुत्रवत्सला १४ इत्थंयशोदातमशेषशेखरं मत्वासुतंस्नेहनिबद्धधीर्नृप
हस्तेगृहीत्वासहराममच्युतंनीत्वास्ववाटंकृतवत्यथोदयं १५ क्रीडंतंसासुतंबा
लैरतिवेलंसहाग्रजं यशोदाजोहवीत्कृष्णंपुत्रस्नेहस्नुतस्तनी १६ कृष्णकृष्णा
रविंदाक्षतातएहिस्तनंपिब अलंविहारैःक्षुत्क्षांतःक्रीडाश्रांतोसिपुत्रक १७

४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ १९ रे तुं वृंदावनं गंतुमतः कृष्णेन यंत्रिताः स्वतंत्रा इव नंदाद्या मंत्रमेतममं
त्रयन् व्रजकार्यं गोकुलस्य हितं कृत्सं २० २१ २२ २३ श्रीकृष्णपरमात्मने ०

हे रामागच्छ तातास्तु सानुजः कुलनंदन प्रातरेव कृताहारस्तद्भवान् भोक्तुमर्हसि
१८ प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः एह्यावयोः प्रियं धेहि स्वगृहा
न्यात बालकाः ॥१९॥ शुक उ० ॥ गोपवृद्धा महोत्पातान् अनुभूय बृहद्वने नंदादयः
समागम्य व्रजकार्यममंत्रयन् २० तत्रोपनंदनामाह गोपो ज्ञानवयोधिकः दे
शकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः २१ उत्थातव्यमितोस्माभिर्गोकुलस्य हि
तैषिभिः आयांत्यत्र महोत्पाता बालानां नाशहेतवः २२ श्रीकृष्णपरमात्मने ०

श्रीरामचंद्राय नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२३ विपदं वीनां पक्षिणां स्थानं वियत् नभः विगतप्रतिष्ठं वा २४ अन्यतमो वा कश्चिद्बालः
तत्रापि अच्युतेनैव रक्ष णमासीत् २५ अरिष्टः अनर्थः इतः स्थानात्पशव्यं पशुभ्यो

॥ मुक्तः कथं विद्राक्षस्या बालघ्नवालकोप्यसौ हरेरनुग्रहान्नूनमनश्चोपरिनापतत्
२३ चक्रवातेन नीतोयं दैत्येन विपदं वियत् शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः
२४ य न्म्रियेत द्रुमयोरंतरं प्राप्य बालकः असावन्यतमो वापि तदप्यच्युतरक्षणं
२५ यावदौत्पातिकोरिष्टो व्रजं नाभिभवेदितः तावद्बालानुपादाय यास्यामोन्यत्र
सानुगाः

हितं नवानि काननान्यवांतराणि विद्यंते यास्मिन् तत् २६ श्रीकृष्णपरमात्मने

वनं वृंदावनं नाम पशव्यं नवकाननं ॥ गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं ॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ एकधियः विप्रतिपत्तिरहिताः व्रजान् शकटव्यूहान् रूढाः शकटादिष्वारोपिताः

तत्त्राद्यैवयास्यामः शकटान्युंक्तमाचिरं गोधनान्यग्रतोयांतुभवतांयदिरोच
ते २८ तछ्रुत्वैकधियोगोपाः साधुसाध्वितिवादिनः व्रजान्स्वान्स्वान्समायुज्य
ययूरूढपरिछदाः २९ वृद्धान्बालान्स्त्रियोराजन्सर्वोपकरणानिच अनःस्वारो
प्यगोपालायत्ताआत्तशरासनाः ३० गोधनानिपुरस्कृत्यशृंगाण्यापूर्यसर्वतः
तूर्यघोषेणमहतायपुः सहपुरोहिताः ३१ गोप्योरूढरथानूत्नकुचकुंकुमकां
तयः कृष्णलीलाजगुः प्रीता निष्ककंठ्यंसुवाससः ३२

परिछदायैस्ते २९ यत्ता उद्य
तप्रयत्नाः ३० ३० नूत्नैः कुचगतैः कुंकुमैः कांतिर्यासां ताः नूत्नेषु कुचेषु यत्कुंकुमं ते
न कांतिर्यासामितिवा ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३३ ब्रजावासंगोकुलवसतिस्थानं ३४ ३५ स्वकालेनतद्योग्यकालेन ३६ कौमारलीलां
निरूपयतिअविदूरइत्यादिना ३७ ३८ [illegible]

तथायशोदारोहिण्यावेकंशकटमास्थिते रेजतुःकृष्णरामभ्यांतत्कथाश्रवणोन्मुखे
३३ वृंदावनंसंप्रविश्यसर्वकालसुखावहं तत्रचक्रुर्व्रजावासंशकटैरर्द्धचंद्रवत् ३४
वृंदावनंगोवर्द्धनंयमुनापुलिनानिच वीक्ष्यासीदुत्तमाप्रीतीराममाधवयोर्नृप
३५ एवंव्रजौकसांप्रीतिंयछंतौबालचेष्टितैः चारयामासतुर्वत्सान्नानाक्रीडाप
रिछदौ ३७ ४ कलवाक्यैःस्वकालेनवत्सपालौबभूवतुः ३६ अविदूरेव्रजभुवःस
हगोपालदारकैः ४ क्वचिद्वादयतोवेणुंक्षेपणैःक्षिपतःक्वचित् क्वचित्पादैःकिंकि
णीभिःक्वचित्कृत्रिमगोवृषैः ३८

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेपणैः बिल्वामलकादिभिः किंकिणीयुक्तैः पादैः क्षिपतः ताडयतः वत्सपाला एवद्वि
त्राः कंबलादिपिहिताः वृषरूपमनुकुर्वंतिते सहस्वयमपि तथैव वृषायमाणोन
र्दंतौतरनुकारिशब्दान्कुर्वंतौयुयुधातरस्पर्धः रुतैःशब्दैर्जंतून्हंसमयूरादीन् ३९
वृषायमाणो नर्दंतौयुयुधातेपरस्परं अनुकृत्यरुतैर्जंतून्श्चेरतुःप्राकृतौयथा ३९
कदाचिद्यमुनातीरेवत्सांश्चारयतोःस्वकैः वयस्यैःकृष्णबलयोर्जिघांसुर्दैत्यआ
गमत् ४० तंवत्सरूपिणंवीक्ष्यवत्सयूथगतंहरिः दर्शयन्बलदेवायशनैर्मुग्ध
इवासदत् ४१
४० मुग्धवत्अज्ञानान्निकआसदत्समीपमागमत् अपरपादाभ्यांस
लांगूलंयथाभवतितथागृहीत्वा सर्वेषांलोकानामेकोमुख्योपालको ४१ श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहीत्वापरपादाभ्यांसहलांगूलमच्युतः भ्रामयित्वाकपित्थाग्रेप्राहिणोद्गतजीवि
तं ४२ सकपित्थैर्महाकायःपात्यमानैःपपातह तंवीक्ष्यविस्मिताबालाःशशंसुःसा
धुसाध्विति ४३ देवाश्चपरिसंतुष्टाबभूवुःपुष्पवर्षिणः वत्सासुरंहतंश्रुत्वाव्रजेगो
प्यश्चविस्मिताः४४ तौवत्सपालकौभूत्वासर्वलोकैकपालकौ सप्रातराशौगोवत्सां
श्चारयंतौविचेरतुः ४५ स्वंस्वंवत्सकुलंसर्वेपाययिष्यंतएकदा गत्वाजलाशया
भ्या रा पाययित्वापपुर्जलं ४६ तेतत्रददृशुर्बालामहासत्वमवस्थितं तत्रसुर्वज्र
निर्भिन्नंगिरेःशृंगमिवच्युतं ४७ सवैबकोनाममहासुरोबकरूपधृक् आग
त्यसहसाकृष्णंतीक्ष्णतुंडोऽग्रसद्बली ४८ कृष्णंमहाबककग्रस्तंदृष्ट्वारामादयोऽर्भ
काः बभूवुरिंद्रियाणीवविनाप्राणैर्विचेतसः ४९ ४२ अभ्याशंसमीपं ४६ रामआदि

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५० तुंडयोः चंच्वोः वीरणवद्ग्रंथितृणविशेषवत् ५१ समीडिरे तुष्टुवुः आनकैः शंखैः

तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं जगद्गुरोः चच्छर्द सद्यो तिरुषाक्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ५० तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसां ५१ तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादिभिः समीडिरे चानकशंखसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ५२ मुक्तं बकास्यादुपलभ्य बालका रामादयः प्राणमिवेंद्रियो गुणः स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ५३

अन्यैश्च संस्तवैः सह ५२ स्थानमागतप्राणमिव लब्ध्वा तं ५३

मणीयएकोह्यस्यअति प्रियेणप्रीत्याद्यत्तांसार्द्रं प्रेत्यागतमिवलोकांनरादागतमिव
तृषितान्यत्यक्षानिअमृतंपिबंतीवईक्षणानियेषांते ५४ अहोबतेत्यादिश्लोकत्रय

श्रुत्वानद्विस्मितागोपागोप्यश्चातिप्रियाद्दृताः प्रत्यागतमिवौत्सुक्यादैक्षंतत्तृषि
तेक्षणाः ५४ अहोबतास्यबालस्यबहवोमृत्यवोःभवन् अप्यासीद्विप्रियंतेषांकृत
पूर्वंयतोभयं ५५ अथाप्यभिभवंत्येनंनैवतेघोरदर्शनाः जिघांसयैनमासाद्य
नश्यंत्यग्नौपतंगवत् ५६ अहोब्रह्मविदांवाचोनासत्याःसंतिकर्हिचित् गर्गोय
दाहभगवानन्वभाविनसैवतत् ५७ स्यइतिनंदादयऊचुरित्यनेनान्वयः अपिएवमपि
तेनतेषामेवानिष्टमासीत् य[…]त्तैः पूर्वमन्येषांभयंकृतं ५५ अथघोरदर्शनाअपि
नाभिभवंतिनधर्षयंति ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्गोयदाह तस्मान्नंदात्मजो ऽयं तेनारायणसमोगुणैः इत्यं दिवत्सयूथगतं हलावत्सं
दंभासुरं हरिः मुनियूथगतं चाहन्नयण्यं दंभिनां बकं ५७ ५८ इति दशमे टीकायां ए का
इतिनंदादयोगोपाः कृष्णरामकथांमुदा कुर्वंतोरममाणाश्चनाविंदन्भववेदनां
५८ एवंविहारैः कौमारैः कौमारं जहतुर्व्रजे निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः
५९ इतिश्रीभागवते माहापुराणे दशमस्कंधे वत्सबकवधोनामैकादशोध्यायः ११
शुक उवाच॥ क्वचिद्वनाशायमनोदधद्व्रजात्प्रातः समुत्थायवयस्यवत्सपान् प्र
बोधयन्शृंगरवेणचारुणाविनिर्गतोवत्सपुरःसरोहरिः १ दशोध्यायः ११ ७
द्वादशेतुमहासर्प्पवपुर्धरमघासुरं वत्सपालगिलं क्रुद्धोगलेहन्निति वर्ण्यते मह।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बकगतक्रीडाकेवलस्पनकौतुकं इतिचाघासुरसुखेससखः प्राविशद्धरिः २ क्वचि
त्कदाचिद्वनाशायवनेएवप्रथमंभोजनंकर्त्तुं १ तेनैवशृंगरवेण श्रीकृष्णेनच पृथु

तेनैवसाकंपृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः स्वान्स्वान्सह
स्रोपरिसंख्ययान्वितान्वत्सान्पुरस्कृत्यविनिर्ययुर्मुदा २ कृष्णवत्सैरसंख्यातैर्यू
थीकृत्यस्ववत्सकान् चारयंतोर्भलीलाभिर्विजहुस्तत्रतत्रह ३ फलप्रवालस्त
वकसुमनःपिछधातुभिः काचगुंजामणिस्वर्णभू षिताअप्यभूषयन् ४ श्रीकृ

काबालाः स्निग्धाः स्नेहयुक्ताः शिकुशिक्यं रम्याशिग्वेत्रादयोयेषांते २ सहस्राधि
कसंख्यायुक्तान्वत्सान् ३ [illegible]चादिभिः पूर्वंमात्राभि र्भूषिताअपिफलादिभिरात्मा ८३
नमभूषयन्नित्यर्थः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुष्णंत श्चोरयंतः ५ यदिदू रंगतः कृष्णोभवनि तर्हीति ६ ध्मांतःवादयंतः

मुष्णंतोन्योन्यशिक्यादीन्ज्ञातानाराच्चचिक्षिपुः तत्रत्याश्चपुनर्दूराद्धसंतश्चपु
नर्ददुः ५ यदिदूरंगतः कृष्णोवनशोभेक्षणायतं अहंपूर्वमहंपूर्वमितिसंस्पृश्य
रेमिरे ६ केचिद्वेणून्वादयंतोध्मांतःशृंगाणिकेचन केचिद्भृंगैः प्रगायंतःकूजं
तःकोकिलैःपरे ७ विछायाभिःप्रधावंतोगछंतः साधुहंसकैः बकैरुपविशंत
श्चनृत्यंतश्चकलापिभिः ८ विकर्षतःकीशबालानारोहंतश्चतैर्द्रुमान् विकुर्वं
तश्चतैःसाकंप्लवंतश्चपलाशिषु ९ साकंभेकैर्विलंघंतःसरितस्स्रवसंप्लुताः॥

शृंगैः ७ सहविछायाभिःपक्षिछायाभिःकलापिभिर्मयूरैः ८ कीशबालान्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षशाखासुलंबमानानिवानरलांगूलानि आकर्षंतः लांगूलमसुंचंतः तैः सहद्रुमा
नारोहंतः विकुर्वंतः दंतदर्शन भ्रूविजृंभादिभिस्तैः सहविकारानूकुर्वंतः पलाशि
षुवृक्षेषुप्लवंतःशाखायाःशाखांतरमुद्गच्छंतः ९ प्रतिछायाःप्रतिबिंबानितानति

॥ ७ ॥ विहसंतःप्रतिछायाःशपंतश्चप्रतिस्वनान् १० इत्थंसतांब्रह्मसुखानु
भूत्यादास्यंगतानांपरदैवतेन मायाश्रितानांनरदारकेणसाकंविजह्रुःकृतपुण्य
पुंजाः ॥ ११

विस्मितः श्लोकद्वयेनाभिनंदति इत्थमिति सतांविदुषांब्रह्मचतत्सुखंचानु
भूतिश्चलयास्वप्रकाशपरमसुखेनेत्यर्थः भक्तानांपरंदैवतेनआत्मप्रदेनुनाथेन
मायाश्रितानांतुनरदारकतयाप्रतीयमानेनसहविजह्रुः कृतानांपुंजाराशयोयेषांते

पुण्यानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ यस्तद्पांसुर्बहुजन्मकष्टलब्धस्तामृप्रियैर्योगिभिरप्यलभ्यः ॥ स तत्पद्विषयः स्वयंस्थितः किंवर्ण्यतेदिष्टमहोव्रजौकसां ॥१२॥

ब्रह्मविदांनस्तुभवएवभक्तानां मतिगौरवेणैवभजनं एतेतुतेनसहसख्येनविजन्दु
अहोभाग्यमितिभावः ११ बहुजन्मभिः कष्टेणधत आत्मामनोयैस्तैरपि १२ सुख
क्रीडन वीक्षणेनाक्षमायस्यसः कथंभूतः यस्य अंतः अंतरंछिद्रंपीतामृतैरपि

अथाघनामाभ्यपतन्महासुरस्तेषांसुखक्रीडनवीक्षणाक्षमः नित्यंयदंतर्निज
जीवितेप्सुभिःपीतामृतैरप्यमरैःप्रतीक्ष्यते १३
नतोमृत्युर्पीतैरमरैःप्रतीक्ष्यते
कथंमरिष्यतिकदावेति यद्वा कथंभूतंसुखक्रीडनंयत् अंतर्हृदयेअमरैःप्रतीक्ष्य
तेविचिंत्यतेपीतामृतैरपिपुनर्निजजीवितेप्सुभिः अयंभावः नामृतपानमात्रेणजी
वनंसफलंभवति किंतुभगवल्लीलानुस्मरणेनेतितदेवानिस्समनार्थिंसलरति १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
२५

कृष्णप्रमुखानर्भकान्दृष्ट्वासइतिव्यवस्यन्निश्चित्याजगरंवपुर्धृत्वातेषांग्रसनाशयाप
थिव्यशेतेतित्ततीयेनान्वयः कंसेनानुशिष्टः प्रहितः बकीपूतना कथंव्यवस्यत्तदा
ह अयंत्वितिसार्द्धेन ममतयोर्द्वयोःसोदरयोः स्थानेएनंकृष्णंसबलंससैन्यंवस

दृष्ट्वार्भकान्कृष्णमुखानघासुरः कंसानुशिष्टःसबकीबकानुजः अयंतुमेसोदर
नाशकृत्तयोर्द्वयोरथैनंसबलंहनिष्ये १४ एतेयदामत्सुहृदोस्तिलापः कृतास्तदा
नष्टसमाव्रजौकसः प्राणेगतेवर्ष्मसुकानुचिंताप्रजासवः प्राणभृतोहियेते १५

तत्पालसहितंहनिष्यामि १४ ननुतथापिव्रजस्थास्त्ववशिष्येरन्नेत्याह एतइति
तिलापः कृताः तिलोदकतया [illegible]ल्पिताः वर्ष्मसुदेहेषु प्रजाएवासवोयेषांतेतथा २५
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सयोजनायामंयोजनप्रमाणे[illegible]दैर्घ्येणयुक्तंचतन्महाद्रिपीवरंच व्यात्तंप्रसारितंगु
हातुल्यमाननंयस्मिन्तत[illegible]द्भुतमितियदुक्तंएतद्दर्शयितुंविशिनष्टि धरायाम
धरोष्ठोयस्यसः जलदेषूत्तरोष्ठोयस्यसः दर्याविवआननस्यांतोसृक्किणीयस्यसः

इतिव्यवस्याजगरंबृहद्वपुः सयोजनायाममहाद्रिपीवरं धृत्वाद्भुतंव्यात्तगुहाननंतं
प प्राथिव्यशोत्तग्रसनाशयाखलः धराधरोष्ठोजलदोत्तरोष्ठोदर्याननांतोगिरिशृंग
दंष्ट्रः ध्वांतांतरास्योविततादवजिह्वः परुषानिलश्वासदवेक्षणोष्णः १७ गिरेःशृं

गाणीवदंष्ट्रायस्यसः ध्वांतवदंतरास्यंयस्यसः विततादवजिह्वायस्यसः परुषानि
लवच्छ्वासोयस्यस[illegible] दववदीक्षणयोरुष्णोदाहकदृष्टिरित्यर्थः परुषानिलश्वासो
दवेक्षणोष्णस्तया १७

स्म

वस्तुतोऽजगरमेवव्यात्ततुंडंदृष्ट्वावृंदावनस्यश्रीः संपदेषेतिभ्रांत्यामत्वाविपरीतंव्यात्ताज
गरतुंडंसादृश्येनोत्प्रेक्षितवंतः १८ उत्प्रेक्षामेवप्रश्नोत्तराभ्यामाह अहोइतिसत्वकूटंस
त्याभासमिदंनवा तत्राप्यस्मत्संग्रसनायव्यात्तंतद्व्यालतुंडंतद्वदाचरतिवानवा १९

दृष्ट्वांतंतादृशंसर्वेमत्वावृंदावनश्रियं व्यात्ताजगरतुंडेनह्युत्प्रेक्ष्यंतेस्मलीलया १८ अ
होमित्राणिगदतसत्वकूटंपुरःस्थितं अस्मत्संग्रसनव्यात्तव्यालतुंडायतेनवा १९
सत्यमर्ककरारक्तमुत्तराहनुवद्धनं अधराहनुवद्रोधस्तत्प्रतिछाययारुणं २० ७

निश्चितंतथैवेत्याहसत्यमिति अर्ककैरारक्तंघनमुत्तरोष्ठवत्पश्यत तस्यघन
स्यप्रतिछाययाअरुणंरोधः [illegible]लंअधरोष्ठवत्पश्यतेतिसर्वत्रान्वेति २० श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृक्किभ्यामोष्ठप्रांताभ्यांप्रतिस[्प]र्द्धेते तुल्यतयावर्त्तेते नगोदरे गिरिद्र्यौ एतास्तुंगश्रृं
गालयोस्तिस्पर्द्धंष्ट्राभिःस्प[र्]धमाना २१ आस्तृतायाममार्गःविस्तृतोदैर्घ्यवान्मार्गःप्र
तिगर्ज्जतिप्रतिस्पर्द्धते एषांशृंगाणामंतर्गतंमध्यगतमंधकारं एतत् अंतराननं

व प्रतिस्पर्धेतेसृक्किभ्यांसव्यासव्येनगोदरे तुंगश्रृंगालयोप्येतास्तदंष्ट्राभिस्त्वपश्यत २१
आस्तृतायाममार्गोयंरसुनांप्रतिगर्ज्जति एषामंतर्गतंध्वांतमेतदप्यंतराननं २२
दावोष्णखरवातोयंश्वासङ्घातिपश्यत तद्दग्धसत्वदुर्गंधोप्यंतरामिषगंधवत् २३

आननस्यमध्यंप्रतिगर्ज्जति २२ दावेनोष्णःखरोवातोयं तेनदावाग्निनादग्धानां
सत्वानांयोदुर्गंधः सएवसर्पान्तर्गतामिषगंधवज्जाति २३ श्रीकृष्णपरमात्मनेनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पू॰
९

एवंसत्यमेवाजगरम न्यथोत्प्रेक्ष्यनिर्भयायपुः किंग्रसिताग्रसिष्यति अनेनश्रीकृ
ष्णेनहंत्रेतिबकारेरुशात्कमनीयंमुखं २४ अमरषावस्तुतः सर्प्पवपुरसुरएवमघाय

अस्मान्किमत्रग्रसितानिविष्टानयंतथाचेद्वकवद्विनंक्ष्यति क्षणादनेनेनेतिब
कार्प्युशन्मुखंवीक्ष्योद्धसंतः करताडनैर्ययुः २४ इत्थंमिथोतथ्यमतज्ज्ञभाषितं
श्रुत्वाविचिंत्येत्यमृषामृषायते रक्षोविदित्वाखिलभूतहृत्स्थितः स्वानांनिरोद्धुंभ
गवान्मनोदधे २५
तेस्वानांसर्प्पसादृश्यगोचरत्व मप्रतीयन्तइति तान्निरोद्धुंवारयि
तुंयावन्मनोदधेतावत्प्रविष्टाःसुत्तरेणान्वयः २५ श्रीकृष्णपरमात्मनेनमः नमो॰

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावत्पविष्टारएवपरंकेवलंनतु [illegible]मगीर्णाः गिलिताः जीर्णाइतिपाठेपिसएवार्थः कथं
भूतेनहतयोःस्वकयोरंतं स्मरतीतितथातेन अतएववकारेः श्रीकृष्णस्यप्रवेशंप्र

तावत्पविष्टास्त्वसुरोदरांतरंपरंनगीर्णाः शिशवः सवत्साः प्रतीक्षमाणेनबकारिवे
शनंहतस्वकांतस्मरणेनरक्षसा २६ तान्वीक्ष्यकृष्णःसकलाभयप्रदोह्यनन्यनाथान्
स्वकरादवच्युतान् दीनांश्चमृत्योर्जठराग्निघासान् घृणार्दितोदिष्टकृतेनविस्मितः
२७ कृत्यंकिमत्रास्यखलस्यजीवनंनवाअमीषांचसतांविनाशनं द्वयंकथंस्यादिति
संविचिंत्यतत्ज्ञात्वाविशत्तुंडमशेषदृग्घरिः २८

तीक्ष्यमाणेन २६ स्वकरादवच्युता
न्विनिःसृतान् विस्मितःसन् २७ कृत्यंकिमत्रेत्यादिविचिंत्यतत्रोपायंज्ञात्वास्वयमप्य
विशदित्यन्वयः कथंविचिंत्यअस्यजीवनंअमीषांचविहिंसनमितिद्वयंवैनिश्चितंकथंन

घनछद्मामेघांतरिताः कौणपाः कुणपाशिनोराक्षसाः कोणपोनामनिकृतिस्तदीया
रतिवा २९ चूर्णीकर्त्तुमिछोः तस्यगलेआदावेवतरसावबधेअवर्द्धत ३० निरुद्धोमु

तदाघनछद्मादेवाभयाद्धाहेतिचुकुशुः जहृषुर्येचकंसाद्याः कौणपास्तद्बांधवाः
२९ तच्छ्रुत्वाभगवान्कृष्णस्त्वव्ययःसार्भवत्सकं चूर्णीचिकीर्षोरात्मानंतरसावव
धेगले ३० ततोतिकायस्यनिरुद्धमार्गिणोह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः पूर्णो
ऽतरंगेपवनोनिरुद्धोमूर्धन्विनिर्भिद्यविनिर्गतोबहिः ३१ श्रीकृष्णपरमात्मनेनमः

खादीनांमार्गभृतःकंठोयस्यास्तितस्यउद्गीर्णदृष्टेर्बहिर्निर्गतिलोचनस्यअंतरंगेदेह
मध्येपूर्णःपरिभ्रतःमूर्धन्मू[illegible]नंब्रह्मरंध्रंनिर्भिद्यबहिर्गतइति ३१ श्रीरामजय

घ्राणेषुइंद्रियेषुस्वयाःम्तव[illegible]स्पाहस्त्रैव ३२ अहिदेहेस्थितंशुद्धसत्वमयंज्योतिर्नि

तेनैवसर्वेषुबहिर्गतेषुघ्राणेषुवत्सानूसुहृदःपरेतान् दृष्ट्वास्वयोत्थाप्यतदन्वितः
पुन र्वक्त्रान्मुकुंदोभगवान्विनिर्ययौ ३२ पीनाहिभोगेस्थितमद्भुतंमहज्ज्योतिःस्व
धाम्नाज्वलयद्दिशोदश प्रतीक्ष्यखेवस्थितमीशनिर्गमं विशवेतस्मिन्मिषतां
दिवौकसां ३३ ततोतिहृष्टाःस्वकृतोऽकृतार्हणंपुष्पैःसुराअप्सरसश्चनर्त्तनैः
गीतैःसुगावाद्यधराश्चवाद्यकैस्तवैश्चविप्राजयनिस्वनैर्गणाः ३४ श्रीकृष्ण ७

गेस्यखेवस्थितं नास्मिन्नीशेविवेश ३३ स्वकृतःस्वकार्येकृतःश्रीकृष्णस्यार्हणमकृत
पूजामकुर्वन् सुगाःसुष्ठुगायंतीतिगंधर्वादयः ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्व

किंच तेषांयान्यद्भुतस्तोत्रादीनीतेषांनेकोत्सवा अनेकोत्सवायेमंगलैर्नालानूस्वधा
म्नः अंतिसमीपेश्रुत्वाअजोब्रह्माअचिरादागतः ईशस्यश्रीकृष्णस्यमहिमानंदृष्ट्वा महि

तदद्भुतस्तोत्रसुवाद्यगीतिकाजयाद्यनेकोत्सवमंगलस्वना
न् श्रुत्वास्वधाम्नोंऽत्यजआगतोऽचिरात् दृष्ट्वामहीशस्यजगा
मविस्मयं ३५ राजन्नाजगरंचर्मश्शुष्कंवृंदावनेद्भुतं व्रजौक
सांबहुतिथंबभूवाक्रीडगह्वरं ३६ श्रीकृष्णपरमात्मनेनमः

विस्मयंप्रापेति ३५ बहुतिथं बहुकालंआक्रीडगह्वरंक्रीडागृहंमहाबिलं ३६ श्रीकृष्ण

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यश्चातिचित्रंवृत्तमित्याह [illegible]तदिति कौमारंपंचमाब्दांतंपौगंडं दशमावधि कैशो
रमापंचदशाद्यौवनंतुततःपरं हरेःकौमारजंपंचमाब्दकृतंकर्मतदैवदृष्ट्वापौगंडके
षष्ठेब्देबालाअघेवतद्वृत्तमिस्यूचुः किंतत्कर्मम्रत्योःसकाशादात्मनामहेश्चमोक्षणं

एतत्कौमारजंकर्महरेरात्माहिमोक्षणं मृत्योःपौगंडकेबालादृष्ट्वोचुर्विस्मिताव्रजे
३७ नैतद्विचित्रंमनुजार्भमायिनःपरावराणांपरमस्यवेधसः अघोपियत्स्पर्श
नधौतपातकःप्रापात्मसाम्यंत्वसतांसुदुर्लभं ३८ आत्मनांप्रसिद्धान्मृत्योःअहेस्तु
संसारलक्षणात् अघासुरस्यज्योतिषःश्रीकृष्णेप्रवेशमपितदादृष्टंकथितवंतइत्य
र्थः ३७ नैतद्विचित्रमिति किंतदित्यपेक्षायामाह आत्मसाम्यंस्वसमानरूपतां ३८

अघोपीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यांगंमूर्त्तिस्तस्यप्रतिमाप्रकृतिः तत्रापिकेवलंमनोमयी सापिबलादंतराहितास
तीभागवतींगतिंददौप्रह्लादादिभ्यः सएवसाक्षात्स्वयमंतर्गतः किंपुनः नित्याश्वासा

सकृद्यदंगप्रतिमांतराहितामनोमयीभागवतींददौगतिं सएवनित्यात्मसुखानुभू
तिर्व्युदस्तमायः परमोंगकिंपुनः ३९॥ सूत उवाच॥ इत्थंद्विजायादवदेवदत्तःश्रुत्वास्वरा
तुश्चरितंविचित्रं पप्रछभूयोपितदेवपुण्यंवैयासकिंयन्निगृहीतचेताः ४०॥ राजोवाच॥
ब्रह्मन्कालांतरकृतंतत्कालीनंकथंभवेत् यत्कौमारेहरिकृतंजगुःपौगंडकेर्भकाः

वात्मसुखानुभूतिश्चतयाऽश्रितोव्युदस्तामायायेनसः ३९. येनश्रवणेननिगृहीतंवशी
कृतंचेतोयस्यसः ४० कालां[illegible]कौमारेकृतंपौगंडकेकथंज्ञातोचुरित्यर्थः ४१ श्रीराम १००

४२ ४३ तेनयःस्मारितोनंतः तैं[illegible]हृतान्यखिलेंद्रियाणियस्यसः तथाभूतोपिकथंचि
ल्लब्धबहिर्दृष्टिःहेभागवतोत्तमशौनक ४५ इतीश्रीभागवतेमहापुराणे॥०टी० ॥ द०

तद्ब्रूहिमेमहायोगिन्परंकौतूहलंगुरो नूनमेतद्धरेरेवमायाभवतिनान्य
या ४२ वयंधन्यतमालोकेगुरोपिक्षत्रबंधवः यत्पिबामोमुहुस्त्वत्तःपुण्यं
कृष्णकथामृतं ४३ ॥ सूतउवाच ॥ इत्थंस्मपृष्टःसतुबादरायणिस्तत्स्मारिता
नंतहृताखिलेंद्रियः कृच्छ्रात्पुनर्लब्धबहिर्दृशिःशनैःप्रत्याहतंभागवतोत्त
मोत्तमं ४४ इतीश्रीभागवतेमहापुराणेदशमस्कंधेद्वादशोध्यायः॥१२॥ ७

॥१२॥ त्रयोदशेहरद्वत्सावत्सान्पालांश्चमायया तदानत्सर्वरूपेद्दंकृष्णःपूर्ववदाचर
न १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰ १०१

नूतनयसिनव्यवकरोषि १ तथाहि सारभृतांसारग्राहिणामयंनिसर्गः स्वभावः को
सोअच्युतस्यवार्त्ताप्रति क्षणंसाधुनव्यवद्भव तीतियत्सः विदानांस्त्रैणानांस्त्रियाः

श्रीशुकउवाच साधुपृष्टंमहाभागत्वयाभागवतोत्तम यन्नूतनयसीशस्यशृण्व
न्नपिकथांमुहुः १ सतामयंसारभृतांनिसर्गोयदर्थवाणीश्रुतिचेतसामपि प्रति
क्षणंनव्यवदच्युतस्ययात्स्त्रियाविदानामिवसाधुवार्त्ता २ शृणुष्वावहितोराज
न्नपिगुह्यंवदामिते ब्रूयुः स्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ३ तथाघवदना
न्मृत्सो रक्षित्वावत्सपालकान् सरित्पुलिनमानीय भगवानिदमब्रवीत् ४

कामिन्यावार्त्ताइवकथंभूत[illegible]तामपिसतांयाअच्युतवार्त्तैवअर्थोयेषांतानिवाणी
श्रुतिचेतांसिपेषांतथाभूतानामपि ४

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection.

भोजनविधानायपुलिनंस्तोऽि अहोइति स्वीयानांकेलीनांसंपदोविद्यंतेयस्मिन्
नत्तम्रदुलाअछावालुकायस्मिंस्तत्तु किंचस्फुटहिकसत्सरः सरोजबाहुल्येनोप

अहोतिरम्यंपुलिनंवयस्याः स्वकेलिसंपन्म्रदुलाछवालुकं स्फुटत्सरोगंध
हृतालिपत्रिकध्वनिप्रातिध्वानलसतद्रुमाकुलं ५ अत्रभोक्तव्यमस्माभि
र्दिवारूढंक्षुधार्दिताः वत्सासमीपेपःपीत्वाचरंतु शनकैस्तृणं ६ तथेति
पाययित्वार्भावत्सानारुध्यशाड्वले मुक्ताशिक्यानिबुभुजुः समंभगवतामु
दा ७

चारत्तः सरएवाविकसदित्युक्तःतस्य गंधः तेनहृताः आकृष्टाः अलयः पात्रिणश्च
येतेषांउदकेध्वनयस्तेषांप्रातिध्वानाः तैर्लसंतोद्रुमास्तैराकुलंव्याप्तं ५ दिवारूढंवेला
तीतेनेत्यर्थः ६ आरुध्यसंरुध्यशाड्वलेहरितत्तृणदेशे ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदातेविरेजुःकृष्णस्यविष्वक्परितःपुरुराजिमंडलैर्बहुभिः पंक्तिमंडलैः सहनैरंतर्येणोप
विष्टाः श्रीकृष्णाभिमुखान्याननानियेषांतेफुल्लदृशः विकासितनयनाः कमलकर्णि

कृष्णस्यविष्वक्पुरुराजिमंडलैरभ्याननाःफुल्लदृशोव्रजार्भकाः सहोपविष्टा
विपिनेविरेजुश्छदायथांभोरुहकर्णिकायाः ८ केचित्पुष्पैर्दलैःकेचित्पल्लवैरं
कुरैःफलैः शिग्भिस्त्वग्भिर्दृषद्भिश्चबुभुजुःकृतभाजनाः ९ सर्वेमिथोदर्श
यंतःस्वस्वभोज्यरुचिंपृथक् हसंतोहासयंतश्चाभ्यवजह्रुःसहेश्वराः १०

कायाःपरितःपत्राणियथाते ८ पुष्पैस्तद्दलैःअन्यैश्चपत्रैः कृतानिभाजनानियैस्ते
९ रुचिंस्वादुविशेषंअभ्यवजह्रुःबुभुजिरेसहेश्वराःश्रीकृष्णसहिताः १० श्रीकृष्ण

मस्त

यत्रसुगपिनेषुबुभुजेबालानामिवकेलिर्यसासःतदाह उदरस्थेरवयोर्मध्येवेणुंबिभ्रद
धदितिसर्वत्रसंबध्यतेवामः...कक्षपाण्योर्विशेषणंस्निग्धंदध्योदनकवलं तउवि
तानिबिल्वादिफलानिअंगुलीसंधिषुकर्णिकेवसर्वाभिमुखोमध्येतिष्ठन्स्वस्यपरि

बिभ्रद्वेणुंजठरपटयोःशृंगवेत्रेचकक्षेवामेपाणौमसृणकवलंतत्फलान्यंगुली
षु तिष्ठन्मध्येस्वपरिसुहृदोहासयन्नर्मभिःस्वैः स्वर्गेलोकेमिषतिबुभुजेयज्ञ
भुग्बालकेलिः ॥ भारतैवंवत्सपेषुभुंजानेष्वच्युतात्मसु वत्सास्त्वंतर्वनेदू
रंविविशुस्तृणलोभिताः १२

तउपविष्टान्सुहृदः स्वैर्नर्मभिःपरिहासवाक्यैःस्व
र्गेस्वर्गवासिनिजनेमिषतिआश्चर्येणपश्यतिसतिलोकेजनानांमध्येबुभुजे ॥ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पू॰
१०

भीभयंभयहेतुभ्योभयंअस्यअपास्य यद्वा अस्यविश्वस्याभियोभयंयः श्रीकृष्णः

तान्दृष्ट्वाभयसंत्रस्तानूचेकृष्णोऽस्यभीभयं मित्राण्याशान्माविर
मतेहानेष्येवत्सकानहं १३ इत्युक्त्वाद्रिदरीकुंजगह्वरेष्वात्मवत्सका
न् विचिन्वन्भगवान्कृष्णः सपाणिकवलोययौ १४ श्रीरामचंद्र

आशाद्भोजनात्आस्मिन्मादेस्वराधिक्यमार्षं १३ अद्रिषुतद्दरीषु कुंजेषुलतादि
पिहितोदरविवरेषुसंकटस्थानेषु १४ श्रीकृष्णंपरमात्मनंनमः ॥ श्रीगोपालकृ

गह्वरेषु

भा॰
१०३

अंभोजन्मनः पद्माज्ज निर्यस्य [illegible] ब्रह्मा [illegible] तरेतस्मिन्नवसरे गतः आगतः तच्छिद्रं इंद्या
घ्नोवा अन्यदपि महित्वं महिमानं दृष्टुं तस्य वत्सानितः स्थानाद्वत्सपांश्चान्यत्र नी

श्रीशुक उवाच ॥ अंभोजन्मजनिस्तदंतर उतो मायार्भकस्येशितुर्द्रष्टुं मंजु महित्व
मन्यदपि तद्वत्सानितो वत्सपान् नीत्वान्यत्र कुरूद्वहांतरदधात्खे ऽवस्थितो यः पु
रा दृष्ट्वाघासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयं १५ ततो वत्सान दृष्ट्वैत्य पुलि
नेपि च वत्सपान् उभावपि वने कृष्णो विचिकाय समंततः १६ क्वाप्यदृष्ट्वांत
र्विपिने वत्सान्पालांश्च विश्ववित् सर्वं विधिकृतं कृष्णः सहसावजगाम ह १७

त्वा स्वयं तिरोबभूव प्रभवतः श्रीकृष्णस्य १५ उभावपि वत्सान् वत्सपालांश्च विचि
काय अन्वीक्षितवान् १६ विधिकृतं ब्रह्मणा कृतं १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उभयायितंवत्सतत्पालरूपेणवर्त्तमानमित्यर्थः अयंभावः यदितूष्णीमासेतर्हितन्मातॄणां
विषादःस्यात् यदिचतानेवानयिष्यामितर्हिब्रह्मणोमोहोनस्यादितितदुभयप्रीतयेत
थाचकारेति १८ तदेवदर्शयति यावदिति वत्सपानांवत्सकानांचाल्पकंवपुः प्रमा

ततःकृष्णोमुदंकर्त्तुंतन्मातॄणांचकस्यच उभयायितमात्मानंचक्रेविश्वकृदीश्वरः
१८ यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकंयावद्यष्टिविषाणवेणुदलशि
ग्यावद्विभूषांबरं यावच्छीलगुणाभिधाकृतिवयोयावद्विहारादिकंसर्वंविष्णुमयं
गिरोंगवदजःसर्वस्वरूपोबभौ १९ योऽयंयष्ट्या यावद्वत्सपा
णमनतिक्रम्यएवमुपर्य्यपि
द्विपुरुलावत्सवरूपोजः कृष्णोबभाविस्यर्थः उत्तरत्राप्येवंसर्वंविष्णुमयंजगदितिप्रसि
द्वायागीःतस्याअंगवत् स [illegible] णप्रसस्क्षायथातथाबभूवेत्यर्थः १९ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसर्वात्मासन्व्रजंप्राविशत् [illegible]स्वयं[illegible] [illegible]वप्रयोजक आत्मस्वरूपान् गोवत्सानि
ति कर्मापिस्वयमेवेत्युक्त आत्मरूपैर्वत्सपैः प्रतिवार्य प्रयोज्यकर्तापिस्वयमेवआ

स्वयमात्मात्मगोवत्सान्प्रतिवार्यात्मवत्सपैः क्रीडन्नात्मविहारैश्च
सर्वात्माप्राविशद्व्रजं २० तत्तद्वत्सान्पृथग्नीत्वातत्तद्गोष्ठेनिवेश्यसः
तत्तदात्माभवद्राजंस्तत्तत्सद्मप्रविष्टवान् २१

त्मविहारैःक्रीडन्निति क्रियापिकारकाण्यपिस्वयमेवेत्यर्थः २० तत्तदात्मातत्तद्गोपबा
लरूपोऽभवत् ततस्तत्तत्सद्मप्रविष्टः २१ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पू॰
१०

गोपिकामोहमाह तन्मातरइति तन्मातरोवेणुरवेणत्वरया उत्थिताः स्वस्वःसुतान्म
त्वापरंब्रह्मैव दोर्भिरुत्थाप्योद्धृत्यपयःसुधासवं पयएवसुधावत्स्वादुआसववन्माद

तन्मातरोवेणुरवत्वरोत्थिताउद्धृत्यदोर्भिःपरिरभ्यनिर्भरं स्नेहस्नुतस्तन्यप
यःसुधासवंमत्वापरंब्रह्मसुतानपाय्यन् २२ ततोतृपोन्मर्द्द नमज्जलेप
नालंकाररक्षातिलकाशनादिभिः संलालितःस्वाचरितैःप्रहर्षयन् सायंगतो
यामयमेनमाधवः

कंपायर्यौमासुरिस्यर्थः २२ एवं यामयमेन तत्तत्कालक्रीडानियमेनसा
यंगतःप्राप्तःस्वाचरितैः ... प्रहर्षयन् ततस्ताभिरुन्मर्द्दनादिभि ... तम
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा

श्रीधर अथचित्सुखी [illegible] ज्ञः [illegible] गिरोंगवत् अंगावयवस
कलवर्णरूपेण भातीत्यर्थः तद्यथाशंकु [illegible] र्वाणि पर्णा [illegible] निसंतृण्णान्येवमोंकारेण
सर्वावाक्संतृर्णोंकारएवेदंसर्वमितिश्रुतेः अ [illegible] थवासर्वंविष्णुमयंकृत्वाऽज्ञः श्रीकृष्णः

गावस्ततोगोष्ठमुपेत्यसत्वरंहुंकारघोषैःपरिहूतसंगतान् स्व
कान्स्वकान्वत्सतरानपाययन्मुहुर्लिहंत्यःस्रवदौधसंपयः २४

सर्वस्वरूपोब्रह्मोकथंगिरोंगवत् यथासकलशब्दजातंमात्रात्रयेणव्याप्यॐकारो
भाति तदुच्चारणव्यतिरिकेणवेदाध्ययनादेरसंभवात् [illegible] तस्यगिरोंगत्वंतद्वत् वर्ण
सम्हृहवत्स इतिचित्सुखीगवांमोहनमाहगावइति परिहूताआहूताश्चतेसंगताश्चतान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावत्तु वैषम्यं कृष्णस्यापि दुर्निवारमासीदित्याह गोगो[illegible]नामिति गवां गोपीनां चास्मि
न् कृष्णे तोउपलालनादिरूपा पुरोवदेवासीत् किंतु स्नेहाधिकां विना स्नेहाधिक्यात्वि
दानीं विशेष इत्यर्थः आसु गोगोपीषु हरेस्तोकताच्च बालभावनापि पूर्ववदेवासीत् अ

गोगोपीनां मातृतास्मिन्सर्वा स्नेहर्धिकां विना पुरोवदासु चापि हरेस्तोकता मायया वि
ना २५ व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहं शनैर्निःसीमवद्वधे यथा कृष्णे त्वपूर्व

वत् थ

तु मायया विना ममेयं माताहमस्याः पुत्र इति मोहं विनेत्यर्थः २५ स्नेहर्धिमे
वदर्शयति व्रजौकसामिति यथा कृष्णे यु[illegible] दिने [illegible] [illegible]प्यापि स्नेहाधिक्यं पूर्वमा
सीत् इदानीं स्वतोकेष्वपि तथ[illegible] [illegible]वत्सरं निःसीमं यथा भवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमात्माश्रीकृष्णःवत्सपा[illegible]षिणात्मानमात्मनापा
लयन्क्रीडितवानित्यर्थः २७ एतावत्पर्यं[illegible]पन्न हृदएवासीत्संवत्सरांतेतु
कथंचित्ज्ञातवानितिदर्शयन्नाह एकदेति पंचषासु पंचसु वा षट्सु वा रात्रिषुहाय

इत्थमात्मात्मनात्मानंवत्सपालमिषेणसः पालयन्वत्सपोवर्षंचिक्रीडेवनगोष्ठयोः २७
एकदाचारयन्वत्सान्सरामोवनमाविशत् पंचषासुत्रियामासुहायनापूरणीव्रजः २८
ततोविदूराच्चरतोगावोवत्सानुपव्रजं गोवर्द्धनाद्रिशिरसिचरंसोददृशुस्तृणं २९

नस्यापूरणीषुपूरकतयाऽवशिष्टास्वित्यर्थः २८ ततोदू[illegible] एवगोवर्द्धनशिखरेचरं
त्योवागोव्रजसमीपेचरतोवत्सान्ददृशुः २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दैवसगोव्रजःगवांकलापः यतस्तत्स्नेहवशः तेषांवत्स[illegible]स्नेहेनाकृष्टः अतएवन
स्मृतआत्मायेनसःजवेनव्रपव्रजमगात् कथंभूतः अ[illegible]त्मपदुर्गमार्गः अतिक्रां
तआत्मपान्गोपालान्यःसोत्यात्मपः तथाद्दुर्गोदुर्गमोमार्गोयस्यसचसचतथायु

तहुं

दृष्ट्वाथतत्स्नेहवशो[illegible]तात्मासगोव्रजो[illegible]त्मपदुर्गमार्गः द्विपात्ककुद्ग्री
वउदास्यपुच्छोगाद्धुंकृतैरास्नुपयाजवेन ३७

[illegible]काभ्यांपद्भ्यांधावन् द्विपादिवप्रतीय
मानः ककुदिआकुंचितग्रीवायस्यसः [illegible]स्य[illegible]मितान्यास्यानिपुच्छानिच
येनसः आस्नुपपः स[illegible]वंपिपं[illegible]रस्यापिपाठेसएवार्थः
गोव्रज[illegible]कं ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रविशेषस्तोधेनूनां... नाह स... [illegible] ...सवत्सपः पुनः प्रसक्ता
अपि ३० रामेणदृष्टंवत्सेषुगवांस्नेहातिश[illegible]यमुत्का[illegible]पा[illegible]मपिदर्शयितुमाह गो

समेत्यगावोधोवत्सान्वत्सवत्सोप्यपा[illegible]यन् गिलंत्यइवचांगानिलिहंत्यः
स्वौधसंपयः ३१ गोपास्तद्रोधनायास[illegible]मौघ्यलज्जोरुमन्युना दुर्गाध्वकृ
छ्रतोभ्येत्यगोवत्सैर्ददृशुः सुतान् ३२

पाशति तासांगवांरोधनेयआयासः तस्यमौघ्येनमोघ[illegible]नलज्जयासहोरुमन्युना
दुर्गमार्गजनितक्लेशेनचाभ्येत्यगोवत्सैः सहसुतान् दद[illegible]ः ३२ श्रीकृष्णपरमात्मने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चतेषामीक्षणेनोद्गतोपः प्रेमरसस्तस्मिन्नाप्लुताः नि[...]ता आशयायेषांतेलज्जाम
न्युकृष्ट्रेस्तानपिताडयितुमागताः संतो [...] पगतमन्यवः [...]सुतजातोऽनुरागोयेषांते
मूर्धनिघ्राणैरवघ्राणैः परमांमुदमापुः ३३ कृष्णान्ततोपगताः निवृत्ताः तेषांसुताना

तदीक्षणोत्प्रेमरसाप्लुताशयाजातानुराग[...]गतमन्यवो[...]र्भकान् उदूह्यदोर्भिः प
रिरभ्यमूर्धनिघ्राणैरवापुः परमांमुदंते ३३ ततः प्रवयसोगोपास्तोकाश्लेषसुनि
र्वृताः कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः ३४ व्रजस्यरामः प्रेमर्धेर्वीक्ष्यौत्कंठ्य
मनुक्षणं मुक्तस्तनेष्वपत्येष्वप्यहेतुविद[...]चिंतयत् ३५

[...]मुस्मसास्तत्कृच्छ्रंत्यश्रूणिये
षांते ३४ प्रेमर्धेरौत्कंठ्यमाप[...] [...]स्यहेतुमज्ञानन्नचिंतयत्
३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिंतामेवाहकिमेतदि[illegible]मि[illegible]वासुदे[illegible] [illegible]स्य तोकेष्वपिव्रजस्यप्रे
मवर्धते किमेतदद्भुतमितिकिंच सात्मन[illegible]मस्मा[illegible] स्व[illegible]नस्य ममतेषुप्रेमकार

किमेतदद्भुतमिववासुदेवे ऽखिलात्मनि व्रजस्यसात्मनः स्तोकेष्वपूर्वंप्रे
मवर्धते ३६ केयंवाकुतआयातादैवीवानार्य्युतासुरी प्रायोमायास्तुमे
भर्तुर्न्योर्नेमेपिविमोहिनी ३७

णंकिमितिभावः ३६ केयंमायादेवानांवानरा
णांवाऽसुराणांवाकुतोवाकस्मात्प्रयुक्ता तत्रान्यमायान[illegible]भवति यतोमेंमोहोवर्त्त
तेअतः प्रायशोमत्स्वामिनः श्रीकृष्णस्यैवमायेयमस्ति[illegible]तसंभावयति ३७ श्रीराम

मा[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.द.प.
१०

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वसानस्वीनपिवपु[illegible]सानेभ्र नि[illegible]नैवापश्यत् ३८ एवं
कृष्णरूपान्सामान्यतोज्ञात्वाकृष्णंद्रष्टुंकृष्णोपदरानवि[illegible]यतोज्ञातवानित्याह नै
तद्गति अयमर्थः पाल्यमानास्तावद्वत्साःकृष्णीणामंशाः पालाश्चदेवानामंशाइतिताव

इतिसंचिंत्यदाशार्हो वत्सान्सवयस्यानपि सर्वानाचष्टवैकुंठं चक्षुषावयुनेन
सः ३८ नैतेसुरेशाऋषयोनचैतेत्वमेवभासीशभिदाश्रयेपि सर्वंपृथक्त्वं नि
गमात्कथंवदेत्युक्तेनवृत्तंप्रभुणाबलोवैत् ३९

दहंवेदिमि इदानींतुनतथा किंतु
अस्मिन्भिदाश्रयेपित्वमेवभासि अतस्त्वंसर्वंपृथग्वि[illegible]पकथंवृत्तमितिवदेत्युक्ते
नप्रभुणावक्त्रा निगमात्संक्षेपतएवोक्तंवृत्तंबलोवैत् विदितवानित्यर्थः ३९ श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः किंवृत्तमित्यपेक्षायामाह तावदिति वर्षे जाते आत्म[illegible]मानेन त्रुट्यनेहसा त्रुटिमा
त्रेण कालेन सकलं सानुचरं हरिं ददर्श ४० दृष्ट्वा च व्यतर्क[illegible]दित्याह यावंत इति द्वाभ्यां

तावदेत्यात्मभूरात्ममानेन त्रुट्यनेहसा पुरोवदाब्दंक्रीडंतं ददृशे सकलं ह
रिं ४० यावंतो गोकुले बालाः सवत्साः सर्व एव हि [illegible]मायाशये शयाना मे ना
द्यापि पुनरुत्थिताः ४१ इत एते ऽत्र कुत्रत्या मन्मायामोहितेतरे तावंत एव
तत्राब्दं क्रीडंतो विष्णुना समं ४२

मे मायाशये मायाक[illegible] मन्मा[illegible] [illegible]त्याः ४२ श्रीकृष्णपरमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिवितर्कयन्नमुह्य[illegible] एवा[illegible]भेदेषु चिरंध्यात्वासआत्म
भूरितिपाद: ४३।४४ तनुमायाश्रयस्यवृत्तीमा[illegible]स्यत[illegible]आह तम्यामिति महात्मा
यिनिभगवतिअन्यमायायाआवरणविक्षेपकत्वाभावेदृष्टांतद्वयमाहतम्यांतमि

एवमेतेषुभेदेषुचिरंध्यात्वासआत्मभूः सत्याःकेकतरेनेतिज्ञातुंनेष्टेकथंचन ४३
एवंसंमोहयन्विष्णुंविमोहंविश्वमोहनं स्वयैवमायया[illegible]जोपिस्वयमेवविमोहितः
तम्यांतमोवन्नैहारंखद्योतार्चिरिवाहनि महतीतरमायैश्यंनिहंत्यात्मनियुंजतः
४४

त्वायांरात्र्यांनैहारंहिमकणप्रभवंतमस्व तद्भिन्नार्थोप[illegible]र्ज्जनस्यापितमसोनैहार
मितिविशेषणंछांदसं तत्तमोयथापृथगावरणंनक[illegible]किंतुतत्रैवलीयतेयथाच
खद्योतार्चिरहनिपृथक्प्रकाशंनकरोति एवंमहतिपुरुषेयुंजतःपुंसस्तरानीचामा

पातत्रनकिंचित्करोति किंतुआत्मनिस्वास्मिन्नेवऐश्वर्यं [illegible]र्थ्यंनिहंतीति ४५ अन्य
दप्याश्चर्यमाह तावदिति वत्सपालाःवत्साःपालाश्च[illegible]र्वेयष्टिविषाणादयश्च

तावत्सर्वेवत्सपालाःपश्यतोऽजस्यतत्क्षणात् स्पदृश्यंतघनश्यामाःपीतकौ
शेयवाससः ४६ चतुर्भुजाःशंखचक्रगदाराजीवपाणयः किरीटिनःकुंडलि
नोहारिणोवनमालिनः ४७ श्रीवत्सांगदोरत्नकंबुकंकणपाणयः नूपुरैःक
टकैर्भाताःकटिसूत्रांगुलीयकैः ४८

[illegible] ४९ [illegible]वत्स[illegible]मायुक्तान्यंगदानिदोः
षुयेषां रत्नमयानि[illegible]विधाय[illegible]येषांतेचतेच ४८ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथापिभूरिबहुजन[illegible]व्यंतपु[illegible]विशदस्मितयुक्तैः सदा
रुणगुणेनचवर्त्तमानायेऽपांगास्तैर्वीक्षितैः स्वकार्य[illegible]मनोरथानांरजःसत्वाभ्यां

आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः कोमलैःसर्वगात्रेषुभूरिपुण्यव
दर्पितैः ४९ चंद्रिकाविशदस्मेरैःसारुणापांगवीक्षितैः स्वकार्थानामिवरजः
सत्वाभ्यांस्रष्टृपालकाः ५० आत्मादिस्तंबपर्यंतैर्मूर्त्तैर्मद्भिश्चराचरैः नृत्य
गीताद्यनेकार्हैःपृथक्पृथगुपासिताः ५१

स्रष्टृपालकाइवव्यदृश्यंत सत्वव
द्विशदास्मितेनपालकाइवरजोवदरुणगुणेनचस्रष्टारइव तादृक्कटाक्षैर्द्योतमाना
इत्यर्थः ५० आत्माब्रह्मातदादिस्तंबपर्यंतैरनेकार्हैरनेक[illegible]णैः ५१ श्रीकृष्णपरमात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पु०
११२

अजाद्याभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिः म[illegible]दादिभिरिति महत्सूत्रयोः
पृथक्कृ(वि)विक्षयाचतुर्विंशतितत्त्वैर्जगत्कारणैः ५२ का[illegible]दिभिश्चतत्सहकारिभिः

अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः चतुर्विंशतिभिस्तत्त्वैः
परीतामहदादिभिः ५२ कालस्वभावसंस्कारकामकर्मगुणादिभिः
स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः ५३ श्रीगोपालकृष्ण

तत्र स्वभावः परिणामहेतुः संस्कारो (वासनो) द्दोध[illegible] [illegible]गादिभिः भगवन्महिम्नाति
रस्कृतत्वा[illegible] ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वेषांमूर्तिमत्स्वेपि ... ह स ... सत्य ... रूपाश्चअनंताश्चआनंद
रूपाश्चतत्रापितदेकमात्राविजातीयसंभेद ... पिचैकरसाःसदैकरूपाम्
र्त्तयोयेषांते यद्वासत्यज्ञानादिमात्रैकरसंयद्ब्रह्मतदेवमूर्त्तयोयेषामितिअतएवो

सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः अस्पृष्टभूरिमाहात्म्याअपित्युपनिषदृ
शां ५४ एवंसकृद्ददर्शाजः परंब्रह्मात्मनोखिलान् ... त्यभासासर्वमिदंविभा
तिसचराचरं ५५

पनिषत् आत्मज्ञानंसै ... वदृक्चक्षुर्येषांतेषामपिहिनिश्चितं अस्पृ
ष्टभूरिमाहात्म्याः नस्पृष्टंस्पर्शयोग्यंभूरिमाहात्म्यंयेषांतेतथाभूताः संतोब्धदृश्यं
तेति ५४ एवंसकृत् एकदैवददर्श परंब्रह्मणोविशेषं ... यस्यैति ५५ श्रीराधाकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पू॰
११२

अतिकुतुकेनाश्चर्येण उद्वृत्य इद्धश्चौः परावृत्य हंस दृष्ट्वेनि[illegible]नितिवा कुतुकशब्देनतीश्र
यार्थ्छां रसोलुक यद्वाउद्वृत्य उत्तिष्ठेदः अतिकुतुकेन उद्वृत्यः विलोक्यं विपर्यस्तंच
स्मिन्निति यावत् पाठांतरेतु अतिकुतुकेनोद्वृत्तः क्षुभितः नेषांधाम्नातेजसास्तब्ध

ततोतिकुतुकोद्वृ[illegible]स्तिमितेकादशेंद्रियः त
दाम्नाभूदजस्तूष्णीं पूर्दव्यंतीवपुत्रिका ५६

सर्वेंद्रियोब्रह्मात्तूष्णीं निश्चलोभूत् अत्र दृष्टांतः [illegible]वजाधिष्ठात्रीकाचिद्देवता
तस्याअंतिसमीपे[illegible]तुर्मु[illegible]५६ श्रीरामकृष्णपरमात्मने॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृमि

एवंमोहमग्नमजसु [illegible] मह इति ति [illegible] रीस [illegible] स्याई शेबलणिकिमिति
मुह्यतिसतिपश्चात्त इष्टुमप्यनी शेसतिप [illegible] माजः [illegible] सपदि अजाजवनिकांमा
यारूपां [illegible] निरस्का रिणीययाञ्जुतंदर्शितंतांचछादतांतिरोधत्तअपसारितवानि
[illegible] स्यर्थः अथवायंलोकाभि [illegible] मानीममेश्वर्यंद्रष्टुमयोग्यइतितस्योप

इतीरेशेनकर्म्येनिजमहिमानिस्वप्रमिमितिकेप [illegible] त्राजातो [illegible] न्निरसनमुखब्रह्मकमितो
अ [illegible] नीशेपिद्रष्टुंकिमिदमितिवामुह्यतिसतिचछादाजोमात्वासपदिपरमोज़ाजवनि

का ५७

रिमायांप्रसारितवानितिधकमुह्यतिसतिअतत्कर्म्येतकर्गो [illegible] तोनिजः असाधारणोमहि
मायस्यतस्मिन्मितिमोहेहेतुरुक्तः दर्शनायोग्यत्वायक [illegible] गेविशेषणानिस्वप्रमितिके
स्वप्रकाशंचतत्कंसुखंचतस्मिन्अतएवाजातःप्रकृतेःपात्रपरस्मिन्‌अतएव अतन्निरसनमु

स्वप्रमिति

स्वनब्रह्मकेः श्रुतिहिरोगमिमिति इतं यस्मिन्नस्मिन्तस्य स्योप ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.द.पु.
११५

अर्वाक्बहिः प्रतिलब्धान्यक्षाणियेनसः परेतवन्मृतो[...]दिकथंचित्पुनरुत्तिष्ठतिन
थाहृष्टीः नेत्राणि ५८ जनानामाजीव्यैर्द्रुमैराकीर्णं स[...]प्रियंसंततानिआसमं
तात्प्रियाणियस्मिन्तत् ५९ तदाहयत्रेति नैसर्गदुर्वै[...]ः स्वाभाविकाश्च [...]तीकार्य

ततोर्वाक्प्रतिलब्धाक्षः कः परेतवदुत्थितः कृष्णादुन्मील्यवैदृष्टीराचष्टेदंसहात्म
ना ५८ सप[...]श्चेवाभितः पश्यन्दिशोपश्यत्पुरः स्थितं वृंदावनंजनानाजीव्यद्रुमा
कीर्णंसमाप्रियं ५९ यत्रनैसर्गदुर्वैराः सहासन्नृमृगादयः मित्राणीवाजितावा
सद्रुतरुट्तर्षकादिकं ६०

वैरवंतोपिनराः सि[...]हा[...]पि[...]णीवयत्रसहैवासन् अ
जितास्यावासेनद्रु[...]पितादृ[...]तक[...]ः क्रो[...]का[...]रनोपसमात्तथाभूतंवृंदा
वनमपश्यदिति ६०

११५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रच परमेष्ठीब्र[illegible] पूर्ववद्[illegible] [illegible] चष्ठ [illegible] कथंभूतं पशुपवंशशि
शुत्वनाघ्रमुद्वहत् नाघ्रमित्यत्र हेतुः अद्वयनि[illegible] यं चवत्सान्विचिन्वत् ए

तत्रोद्वहत्पशुपवंशशिशुत्वनाघ्रब्रह्माद्वयं परमनंतमगाधबोधं
वत्सान्सखीनिवपुरापरितोविचिन्वदेकं सपाणि कवलं परमेष्ठ्य
चष्ट ६१

कंच सखीन् अगाधबोधं च विचिन्वत् अनंतं च परितो विचिन्वत् परं च शिशुत्वमु
द्वहत् ब्रह्मचसपाणि कवलमिति नाघ्रमेवोद्वहदि[illegible]र्थः ६१ श्रीकृष्णपरमात्म॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection`

मा०द०
११५

द्वि

निजधोरणतः स्ववाहनात्त्वरेण वेगेनावतीर्य दंडवन्नत्वा [illegible]चतुर्णां मुकुंदनाम्नः अंघ्रे
युग्मं स्पृष्ट्वा मुदश्रुसुजलैः आनंदाश्रुरूपैः सुजलैः अभिषे[illegible]मकरोदिति ६२ चिरस्य चि

दृष्ट्वा त्वरेण निजधोरणतोवतीर्य पृथ्व्यां वपुः कनकदंडमिवानिपात्य स्पृष्ट्वा चतु
र्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैः कृताभिषेकं ६२ उत्थायोत्थाय कृष्ण
स्य चिरस्य पदयोः पतन् आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ६३ शनै
रथोत्थाय विस्मेरोत्पललोचने मुकुंदमुखे दृष्टी विनम्रकंधरः कृतांजलिः प्रश्रयवान्
समाहितः सवेपथुर्गद्गदया ईलितेलया ६४ [illegible]पादयोः प[illegible]नास्ते ६३ सवेपथुः स
कंपः अनन्तरं एवं गद्गद[illegible]रणमेतत् [illegible]जस्तोत् ६४ श्रीकृष्ण

द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्रीभागवते [illegible]पुराणेदशमस्कंधे [illegible]कायां [illegible]दशोध्याय :॥ १३॥ चतुर्दशेतु
तंदृष्ट्वापूर्वांगंतुकनिश्चयं अनीशः कर्त्तुमस्तौ [illegible]बल्हावि मोहितः १ स्व

इतिश्रीभागवतेमाहापुराणेदशमस्कंधेत्रयोदशोध्यायः॥१३॥ ब्रह्मो
वाच॥ नौमीड्यतेभ्रवपुषेतडिदंबराय गुंजावतंसपरिपिछ्लस
स्व न्मुखाय वन्यस्रजेकवलवेत्रविषाणवेणुलक्ष्मश्रियेमृदुपदेपशु
पांगजाय १

कृतापराधेनभियासकंपतया भगवन्महिमानमनवगाहमानोयथा
दृष्टस्वरूपमेवकीर्त्तयन्नाह नौमीति हेईड्यस्तुत्यतेतुभ्यं नौमिद्वितीयार्थेचतुर्थी अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा-दश
११६

धवानोमीत्युक्ताप्रकरणागतस्यप्रस्तुतस्यभगवतः[illegible]मूर्त्तेज्ञातेप्रयोजनापेक्षा
यामेवंप्रत्तोभगवानेवप्रयोजनमितितादर्थ्येचतुर्थी यद्वातुभ्यंत्वामेवप्र
सादयितुंत्वामेवस्तौमीत्यर्थः अभ्रवद्वपुर्यस्यतस्मैतडिद्वदंबरंयस्यतस्मैगुं
जा[illegible]भिर्वतंसोकर्णभूषणेपरिपिछंचबर्हापीडंतैर्उसन्मुखंयस्यतस्मैवन्याःस्र
जोयस्यतस्मैकवलादिभिर्लक्ष्मभिः श्रीःशोभायस्यतस्मै मृदुपादौयस्यतस्मै
पशुपस्यांगजाय १

११६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुनैर्मात्यप्रातिशयकिंस्वरूपानुवादमात्रमित्यत आह अस्यापीति भोदे
वअस्यापिसुलभत्वेनप्रकाशितस्यापिनववपुषो [illegible]स्यमहिमानंअवसि
तुंकोपिकःब्रह्माअहमपिनेशेनशक्नोमि यद्वाकश्चिदपिनेशेनसमर्थआसीत् महि

अस्यापिदेववपुषोमदनुग्रहस्यस्वेच्छामयस्यनतुभूतमयस्यकोपि ने
शेमहित्ववसितुमनसांतरेणसाक्षात्तवैवकिमुतात्मसुखानुभूतेः २

सुलभत्वायविशेषणद्वयं मदनुग्रहस्यममानुग्रहोयस्मात्तन्मदनुग्रहंतस्यकिं
च स्वेच्छामयस्य स्वीयानांभक्तानांयथाभवतः तर्हिकिमितिज्ञातुंनशक्यते

यथेच्छार्थोतेतथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पु०
११२

अतआह नैभूतमयस्यअचिंत्यसुद्धैत्वात्मकस्ययदास्येवंतदाकथंपुनःसाक्षा
त्तवकेवलस्यात्मसुखानुभूतेरेवस्वसुखानुभवमात्रस्यावतारिणोगुणातीतस्य
महिमानंअंतरेणनिरुद्धेनापिमनसाकोवा[illegible]तुंसमर्थोभवेत् अथवाभूतमयस्या
पितुविराड्रूपस्यतवत्वन्नियम्यस्यवपुषः महिममहिमानअवसितुंकोपिनेशेतदासा
क्षात्तवैवासाधारणस्यनियम्यनियंत्र [illegible] भेदरहितस्यवक्तलक्षणस्य [illegible]
[illegible] महिममहिमानमवसितुंकोपिनेशइतिवि[illegible]स्तुवक्तव्यमित्यर्थः २

११२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हिअज्ञाःकथंसंसारंतरेयुरतआह ज्ञानइति हेअजितउदपास्यईषदप्यकृत्वा
सद्भिर्मुखरितांस्वतएवनित्यंप्रकटितांभवदीयांवार्तांस्वस्वस्थानएवस्थिताः

॥ज्ञानेप्रयास मुदपास्यनमंतएवजीवंतिसन्मुखरितांभवदीयवा
र्तां स्थानेस्थिताःश्रुतिगतांतनुवाङ्मनोभिर्येप्रायशोजितजितोप्य
सिनैस्त्रिलोक्यां॥ ३

तत्संनिधिमात्रेणस्वतएवश्रुतिगतांश्रवणप्राप्तांतनुवाङ्मनोभिर्नमंतःसत्कुर्वं
तोयेजीवंतिकेवलंयद्यपिनान्यत्कुर्वंतितैःप्रायशस्त्रिलोक्यामन्यैरजितोपित्वंजि
तःप्राप्तोसीतिकिंज्ञानश्रमेणेत्यर्थः ३

भा॰दृपू॰
१९८

भक्तिं विना ज्ञानं तु नैव सिध्येदित्याह श्रेयः स्रुतिमिति श्रेयसामभ्युदयापवर्गल
क्षणानां स्रुतिः स्रवणं यस्याः सरस इव निर्झराणां तां ते तव भक्तिं उदस्य सत्का
श्रेयसां मार्गभूतामिति वा तेषां क्लेशलः क्लेश एवावशिष्यते अयं भावः यथा अल्प

श्रेयः स्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये तेषामसौ
क्लेशल एवावशिष्यते नान्यद्यथा स्थूलतुषावघातिनां ४ श्रीकृष्ण॥१४॥ ॥१०

प्रमाणं धान्यं परित्यज्य अंतः कणहीनान् स्थूलधान्याभासान् तुषानेवावघ्नंति ते
षां न किंचित्फलं एवं भक्तिं तुच्छीकृत्य ये केवलबोधाय प्रयतंते तेषामपीति ४ नाम

१९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्त्यैव ज्ञानं नान्य[illegible]त्र सदाचारं प्रमाणयन्ति पु[illegible]हे भूमन् इह लोके पूर्वं योगिनोपि
संतः योगैर्ज्ञानमप्राप्य पश्चात्त्वदर्पितेहाः त्वय्यर्पिता लौकिक्यपीहा चेष्टा यैस्ते नि
जकर्मलब्धया त्वदर्पितैर्निजैः कर्म्मभिर्लब्धया त्वय्यर्पिता ईहा निजानि कर्म्माणि

पुरेह भूमन् बहवोपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया।
विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेंजोच्युत ते गतिं परां।

५

च तैर्लब्धया ये स्वेकं पदं वा कथयोपनीतया कथया त्वत्समीपं प्रापितया भक्त्यैव विबु
ध्य आत्मानं ज्ञात्वा अंजः सुखेनैव ते परां गतिं प्राप्ताः ५ श्रीकृष्णपरमात्मने नमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भयोर

एवंतावत्सगुणनिर्गुणयोरपिज्ञानंदुर्घटमितितत्कथाश्रवणादिनैवतत्प्राप्तिर्नान्यथे
त्युक्तं इदानींपद्यद्वयेनुभयोरविशेषेणदुर्ज्ञेयत्वमुक्तंतथापिगुणातीतस्यज्ञानंकथंचि

तथापिभूमन्महिमागुणस्यतेविबोद्धुमर्हत्यमलांतरात्मभिः
अविक्रियात्स्वानुभवादरूपतोह्यनन्यबोध्यात्मतयानचान्य
था ६

चिद्भवेत् नतुसगुणस्यतव अवि षयानंतगुणत्वादितिस्तौतिश्लोकद्वयेन तथा
पीति हेभूमन् अपरिछिन्नअगुणस्यतेमहिमाअमलैरंतरात्मभिः प्रसाहृतेंद्रियैः
विबोद्धुं बोधगोचरीभवितुं अर्हति योग्योभवति ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणस्यतेमहिमहिमानंअमलैरंतरैंद्रियैरपितथायाद्दकूवस्तुतस्तेन
रूपेणविबोद्धुंकिमर्हतिनार्हत्येवेत्यर्थः कथंतर्हिवित्तदाहस्वानुभवादित्या
दिनाउक्तार्थमेवैतत् ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवाविबोद्धुंज्ञातुमर्हतिअर्हतेशक्यतइत्यर्थः यद्वामहिमेतिमहिमानंकश्चि

द्बोधुमर्हतीत्यर्थः कथंस्वानुभवात् आत्माकारांतःकरणसाक्षात्कारात् नन्वं

तःकरणमपिसविकारमेवविषयीकरोतिकथमात्माकारतातस्येत्यतआह

अविक्रियादितिविक्रियाविशेषाकारः तद्रहितात् विशेषपरित्यागएवात्माका

रतेत्यर्थः नन्वंतःकरणसाक्षात्कारविषयत्वेनात्मत्वप्रसंगःस्यादतआह अ

रूपतइति रूपंविषयः अविषयात्वृत्तिविषयत्वमेवात्मनोनफलविषयत्व

त्यर्थः बुद्धितत्स्थचिदाभासौद्वावपिव्याप्नुतोघटं तत्राज्ञानंधियानश्येदाभासे

नघटःस्फुरेत् इत्यनात्मसु आत्मनितुब्रह्मण्यज्ञानंनाशायवृत्तिव्याप्तिरिहेष्य

ते स्वयंस्फुरणरू...त्वान्नाभासस्तत्रयुज्यते अ...भासवर्तीतोंतरंगालक्ष्मीरपिअ

कथंतर्हिस्फूर्तिः अनन्यबोध्यात्मतयास्वप्रकाशतेनैवनतुमथारदत...वहेनेत्यर्थः मनोनापंद्रोषइ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणात्मनःगुणान[illegible]त्मनःगुणाधिष्ठातुस्तेतव[illegible]र्गुणान्विमातुंएतावंतइतिगण
यितुमपिकेईशिरे समर्थाबभूवुः इतस्तद्विशेष[illegible]वार्ताकथंभूतस्यतवअस्यविश्व
स्य [illegible] हितायपालनायबहुधाबहुगुणाविकारेणावतीर्णस्यननुकाले निपुणैःकि

गुणात्मनस्तेपिगुणान्विमातुंहितावतीर्णस्यकईशिरेस्य कालेनयैर्वा
विमिताःसुकल्पैर्भूपांसवःखेमिहिकाद्युभासः ७

मशक्यमतआह कालेनेति
वाशब्दोवितर्के सुकल्पैरतिनिपुणैर्बहुजन्मनाकालेनभूपरमाणवोविमिताविशेषेए
गणिताभवेयुः तथाखेमिहिकाःहिमकणाअपितथा द्युभासःदिविनक्षत्रादिकिरणप
रमाणवोपि ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्भक्तिरेव संगच्छतरस्याह तत्तेनुकंपामिति सुसमीक्षमाणः तवकृपाकदा भविष्य
तीति बहुमन्यमानः स्वार्जितं च कर्मफलमनासक्तः सन् भुंजान एव नातीव तप्यत्रादि

तत्तेनुकंपां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकं हृद्वाग्वपुर्भि
र्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ८

नाक्लिश्यन्नेवं यो जीवेत स मुक्तौ दायभाग्भवति भक्तस्य जीवनव्यतिरेकेण दायप्र
व ाप्ताविमुक्तौ नान्यद[illegible]पेक्ष्यत इति भावः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंस्तुत्वाभगव समापयितुंस्वापराधंनिवे यति परयेति हेईशमेऽनार्यंदौर्ज
न्यंपश्यपयदहंमायिनामपिमायिनिविमोहकेत्वय्यपि स्वमायांप्रसार्य्यआत्मेश्वर्य

से

पश्येशमेनार्यमनंतआद्येपरात्मनित्वय्यपिमायिमायिनि मायांवि
त क्षितुमात्मवैभवंत्वहंकियानैछमिवार्चिरिग्नौ १ श्रीराम

मीक्षितुमैछंअभिलषितवान् अहोएवंकर्त्तुंत्वय्यहंकियान्नकिंचित्यथाग्नेरुद्ग
ताज्वालाअग्नौनकिंचित्तद्वदिति १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजोभुवः रजसो जातस्य अतः अजानतः अत एवाज्ञावलेपांधतमोंधचक्षुषः अ
जोजगत्कर्ताहमिति मदेन गाढतमोरूपेणांधीभूतनेत्रस्यातः त्वत्तः पृथगीश

अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः अजा
वलेपांधतमोंधचक्षुष एषोनुकंप्यो मयि नाथवानिति १० श्रीकृष्ण

श्रृण्वतांगदतांशश्वदर्च्चतांत्वाभिवंदतां नृणांसंवदतामंतर्हृदिभास्यमलात्मनां हृदिस्थोप्यतिदूरस्थःकर्मविक्षिप्तचेतसां आत्मशक्तिभिरग्राह्योप्यंत्युपेतगुणात्मनां ४८

स्यापिभायादित्यतआह हृदिस्थोपीति कर्मभिर्विक्षिप्तंचेतोयेषांतेषामात्मशक्तिभि रहंकरादिभिरग्राह्यः व्यवहितोपिउपेतगुणःप्राप्तश्रवणकीर्त्तनादिसंस्कारः आत्मा अंतःकरणंयेषांतेषामंतिसमीपेअव्यवहितस्त्वमित्यर्थः ४८ श्रीकृष्णपरमात्मने०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेवप्रपंचयन्नमस्यति नमोस्त्वितिनितेतुभ्यंनमोस्तु अध्यात्मविदांनिवृत्तदेहाद्यहंकाराणां
परमात्मनेपरमात्मत्वेनप्रकाशमानायमोक्षप्रदायेत्यर्थः आत्मनेदेहाद्यभिमानिनेजी
वायपरत्वेनाप्रकाशमानत्वात्स्वात्मनःसकाशात्विभक्तःसमार्पितोमृत्युःसंसारोयेन
तस्मैकुतएतत्तत्राह सकारणंमहदादिकार्यं अकारणंप्रकृतिस्त उभयलिंगमुपाधिं

नमोस्तुतेध्यात्मविदांपरात्मनेत्यनात्मनेस्वात्मविभक्तमृत्यवे सकारणकारणलिंगमी
युषेस्वमाययासंवृतरुद्धदृष्टये ४ नियम्यतयार्ईयुषेप्राप्तवते अतएवोभयानि
यंतुःस्वस्मात्सकाशादुभयवस्थायजीवायाविभक्तमस्यवइत्यर्थः नियंतृत्वनियम्यत्वेका
रणंवदन्नाहहेस्वमाययासंवृतेतिअलुप्तेश्वर्यत्वान्नियंत्रेतुभ्यंनमः किंचरुद्धदृष्टयेमाया
वित्वादेवान्येषांरुद्धाआवृताहृष्टिर्येनतस्मैयद्वास्वमाययास्वस्यासंवृताअन्येषांचरुद्धाहृ

ष्टिर्येनतस्मैरत्येकंपदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सएवंभूतः परमेश्वरस्त्वंनोऽस्मान्स्वभृत्यान्शाधिअनु शाधिअनुशिक्षय ५० ५१ स्व
स्मिन्नादरमस्त्यधिकंब्राह्मणेषुमंदमिवालक्ष्यलोकसंग्रहपरोभगवान्मत्तोब्राह्मणेषु

सत्वंशाधिस्वभृत्यान्नः किंदेवकरवामते एतदंतोनृणांक्लेशोयद्भवानक्षिगोचरः
५० श्रीशुकउवाच नत्युक्तमित्युपाकर्ण्यभगवान्प्रणतार्त्तिहा गृहीत्वापाणि
नापाणिंप्रहसंस्तमुवाचह ५१ श्रीभगवानुवाच॥ ब्रह्मंस्तेनुग्रहार्थायसंप्राप्तान्वि
द्ध्यमून्मुनीन् संचरंतियथालोकान्पुनंतःपादरेणुभिः ५२ श्रीगोपालकृष्णायन

श्रद्धातिरेकंकुर्वित्येवंतमनुशास्ति ब्रह्मन्नितिसप्तभिःमयात्मदर्शिस्थेन ५१ ५२ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवादिभ्योपिब्राह्मणाःश्रेष्ठाइत्याहदेवाइतितेशनैःपुनंत्येतेतुसद्यःकिंचदेवादीनियत्पुनं
तितदप्यर्हत्तममामीक्षया ५३ ममकलापरिकलनमुपास्तिस्तयायुतः ५४ किंचब्राह्म

देवाःक्षेत्राणितीर्थानिदर्शनस्पर्शनार्चनैः शनैःपुनंतिकालेनतदप्यर्हत्तमेक्षया
५३ ब्राह्मणोजन्मनाश्रेयान्सर्वेषांप्राणिनामिह तपसाविद्ययातुष्ट्याकिंतुमत्क
लयायुतः ५४ नब्राह्मणान्मेदयितंरूपमेतच्चतुर्भुजं सर्ववेदमयोविप्रःसर्वदेव
मयोह्यहं ५५

ण्णाराधनमेवममप्रेष्टमित्याह नेतिहेतुमाहसर्ववेदमयोविप्रइति
प्रमाणाधीनत्वात्प्रमेयस्यवेदमयोविप्रोदेवमयादस्माद्रूपात्प्रेष्ठइत्यर्थः ५५ रामजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्योन्योपमर्देनतमसस्त्रैविध्यात्त्रिलिंगः त्रिलिंगत्वमाह वैकारिकइतिअहंकारः
३ विकारात्मनइंद्रियमूलरूपाः षोडशेतिइंद्रियदेवानामभेदविवक्षया कंचनेति

श्रीशुकउवाच॥ शिवःशक्तियुतःशश्वत्त्रिलिंगोगुणसंवृतः वैकारिक
स्तैजसश्चतामसश्चेत्यहंत्रिधा ३ ततोविकाराअभवन्षोडशामीषु
कंचन उपाधावद्विभूतीनांसर्वासामश्नुतेगतिं ४ श्रीगोपालकृष्ण

यत्किंचिद्विकारोपाधिकंभजनुपाध्यनुरूपाणांविभूतीनांसर्वासामश्नुतेगतिं ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰
३०

उपद्रष्टासससाक्षीसन्नुयतः सर्वदृक्सर्वंपश्यति अतःप्रकृतेःपरइतिअत्रेदंतत्त्वंवस्तु
नोगुणसंबंधरूपद्वयमिहेष्यते तद्धर्मायोगयोगाभ्यांबिंबवत्प्रतिबिंबवत् गु
णाःसत्वादयः शांतघोरमूढाःस्वभावतः ब्रह्मविष्णुशिवानांचगुणनियंतृस्वरू

हरिर्हिनिर्गुणःसाक्षात्पुरुषःप्रकृतेःपरः ससर्वदृगुपद्रष्टातंभजन्निर्गुणो
भवेत् ५

पिणां नातिभेदोभवेद्भेदोगुणधर्मैरिहांशतः सत्वस्यशांतत्वान्नोजातुविष्णोर्वि
क्षेपमूढत्वे रजस्तमोगुणाभ्यांतुभवेतांब्रह्मरुद्रयोः गुणोपमर्दतोभूयस्तदंशा
नांचाभिन्नता अतःसमयसत्वस्यविष्णोर्मोक्षकरीमतिः अंशतोभूतिहेतुश्च

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंशात्स्तारतम्येनब्रह्मरुद्रादिसेविनां विभूतपोभवंस्येवशनैर्मोक्षोप्यनंशातः
इदमेवाभिप्रेत्यतत्रतत्रोच्यतेश्रेयांसितत्रखलुसत्वतनोर्नृणांस्युरिति तथास
त्वंयस्यप्रियामूर्तिरिति तथासत्वंततीर्थसाधनमितितथात्रयाणामेकभावा

निवृत्तेष्वश्वमेधेषुराजायुष्मात्पितामहः शृण्वन्भगवतोधर्मान
पृच्छदिदमच्युतं ६ सआहभगवांस्तस्मैप्रीतःशुश्रूषवेप्रभुः नृ
णांनिःश्रेयसार्थायियोवतीर्णोयदोःकुले ७

नांयोनपश्यतिवैभिदामि
ति तथानतेमय्यच्युतेयेचभिदामण्वपिचक्षतइत्यादिएवंचसतिनकिंचिदसमं
जसंतत्तदज्ञानांतुकलहोमोहमात्रमिति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्याहमनुगृण्हामीत्ययमित्यर्थः योविषयान्परिजिहीर्षुरपिकथंविह्वियमानेषु
सज्जतेक्लिश्यतिचतस्यविषयापहारएवानुग्रहइतियथाश्रुतत्वेध्रुवादीनामैश्व
र्यविरोधात् अथवाप्रथमंविभक्तीःकामनारूपादत्ताशनैर्विषयभोगावसाने नु

श्रीभगवानुवाच ॥ यस्याहमनुगृण्हामिहरिष्येतद्धनंशनैः ततोधनंत्यजं
त्यस्यस्वजनादुःखदुःखितं

तस्यनिर्वेदमुत्पाद्यह रिष्यामीपरमानुग्रहंकर्त्तुमि
ति तदुक्तंभगवतैवनमप्यावेशितधियांकामः कामायकल्पतइति दुःखदुःखि
तमिति दुःखादुःखादनुपुनर्दुःखितमिवप्रतीयमानमित्यर्थः ८ श्रीकृष्णपर०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपुनर्बंधनामायग्रहेणधनेहयाप्रवृत्तोपिमदनुग्रहेणयदानिःफलोद्यमोनिर्विण्ण
स्यात्तदामदनुग्रहमितिममसाधारणमनुग्रहं ९ तमेवाहतद्ब्रह्मेति १० अतोप्

सयथावित्तयोयोगोनिर्विण्णःस्याद्धनेहया मत्परैःकृतमैत्रस्यकरिष्येमदनुग्र
हं ९ तद्ब्रह्मपरमंसूक्ष्मंचिन्मात्रंसदनंतकं अतोमांसुदुरासाध्यंहित्वान्यंभ
जतेजनः १० ततस्तआशुतोषेभ्योलब्धराज्यश्रियोद्धताः मत्ताःप्रमत्तावरदा
न्विस्मरंत्यवजानते ११॥ऋषिरुवाच॥ शापप्रसादयोरीशाब्रह्मविष्णुशिवादयः
सद्यःशापप्रसादोंगशिवोब्रह्मानचाच्युतः १२ स्मादपिमोक्षमरोचयत् अन्या
सक्तोजनइत्यर्थः १३ एतदेवेतिहासेनस्पष्टयितुमाह शापप्रसादयोरितिब्रह्माचे
त्यन्वयः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
३०२

१२ शाकुनेपुत्रः १४ १५ सुसंकटमापकैलासोत्पादनंपुरपादनंच १६ स्वग

अत्रैवोदाहरंतीममितिहासंपुरातनं वृकासुरायगिरिशोवरंदत्वापकंसं
टं १३ वृकोनामासुरःपुत्रः शाकुनेःपथिनारदं दृष्ट्वाशुतोषंपप्रच्छदेवेषुत्रि
षुदुर्मतिः १४ सआहदेवंगिरिशमुपाधावाशुसिध्यति योल्पाभ्यांगुणदोषा
भ्यामाशुतुष्यतिकुप्यति १५ दशास्यबाणयोस्तुष्टःस्तुवतोर्बंदिनोरिव ऐश्व
र्यमतुलंदत्वाततआपसुसंकटं १६ इत्यादिष्टस्तमसुरउपाधावत्स्वगात्रतः
केदारआत्मक्रव्येणजुह्वानोग्निमुखंहरं १७

त्रतउपाधावत्कथमात्मक्रव्येणस्वमांशेनजुह्वानरति १७ ॥८७॥ ८॥

३०२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवस्थनूछेत्तुमुद्यतः १८ मूर्त्तिमानग्निरिवदीप्यमानः वयंअधुनात्मनायथा
कंचितदुःखेनमर्त्तुकामंवारयामः तद्वदितिसचक्रउपरक्तताकृतिः परिपूर्णदेहो
देवोपिलब्धिमप्राप्यनिर्वेदात्समस्मेहानि शिरोवृक्षस्थलत्वधितिनात्मनीर्थंक्लि
न्नमूर्द्धजं १८ तदामहाकारुणिकःसधूर्जटिर्यथावयंचाग्निरिवोत्थितोन
लात् निर्गत्यदोर्भ्यांभुजयोर्न्यवारयत्तत्स्पर्शनाद्भयउपरक्तताकृतिः १९
तमाहत्वांगालमलंवृणीष्वमेयथाभिकामंवितरामित्तेवरं प्रीयेयतोये
नत्वणांप्रपद्यतामहंत्वयात्माप्यशामर्यतेत्वया २० भवत् न्यवारयत् एव
य माहत्वंत्तोयेनापिभजनतांप्रीतःस्यांयत्त्वयात्तुदेहेवृथापीड्यतइति २० श्रीकृष्णपर०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१ दातुमनर्हमपि दत्तवान्सर्पायक्षीरमिव २२ उपसृष्टः अनुगतः सन्नुदगात्

देवं सर्वं स पापीयान्वरं भूतभयावहं यस्ययस्य करं शीर्ष्णि धास्ये स म्रियतामिति
२१ तच्छ्रुत्वा भगवान्रुद्रो दुर्मना इव भारत ओमिति प्रहसंस्तस्मै ददेहेरमृतं य
था २२ इत्युक्तः सोऽसुरो नूनं गौरीहरणलालसः स तद्वरपरीक्षार्थं शंभोर्मूर्ध्नि कि
लासुरः २३ स्वहस्तं धातुमारेभे सोबिभ्यत्स्वकृताच्छिवः तेनोपसृष्टः संत्रस्तः प
राधावत्सवेपथुः २४ यावदंतं दिवो भूमेः काष्ठानामुदगादुदक् २४ अजानंतः
प्रतिविधिं तूष्णीमासन्सुरेश्वराः २५ ततो वैकुंठमगमद्भास्वरं तमसः परं २५ श्री

अन्वधावत् उदक् उत्तरतः २३ २४ वैकुंठं श्वेतद्वीपं २५ श्रीबलिबंधनायनमः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६ तंवृकासुरंतथाव्यसनंताहृक्‌व्यसनंयस्यतं वृजिनार्द्दनः दुःखहंता दूरतए
वदृष्ट्वामेखलादिभिरुपलक्षितः प्रत्युदियात् सन्मुखमागतः २७ व्यक्तंनिश्चि

यत्रनारायणःसाक्षान्न्यासीनांपरमागतिः शांतानांन्यस्तदंडानांयतोनावर्त्त
तेगतः २६ तंतथाव्यसनंदृष्ट्वाभगवान्‌वृजिनार्दनः दूरात्प्रत्युदियाद्भूत्वाब
टुकोयोगमायया २७ मेखलाजिनदंडाक्षैस्तेजसाग्निरिवज्वलन् अभिवाद
यामासचतंकुशपाणिंविनीतवत् २८ ॥श्रीभगवानुवाच॥ शाकुनेयभवान्
व्यक्तंश्रांतःकिंदूरमागतः क्षणंविश्रम्यतांपुंसः आत्मायंसर्वकामधुक् २९

तंकिंकिमर्थंआत्मादेहः सर्वपुरुषार्थहेतुः अतोमापीडयेति २८ २९ श्रीकृष्ण

पं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायशःपुंभिःधूर्तैर्भवान्स्वार्थान्समीहतेसाधयितुमिच्छति अथवाजनःपुंभिः

यदिनःश्रवणायालंयुष्मदध्यवसितंविभो भवेत्तांप्रायशःपुंभिर्धूर्तैःस्वार्था
न्समीहते ३० शुकउवाच एवंभगवताऽऽपृष्टोवचसामृतवर्षिणा। गतक्लं
मोऽभवत्तस्मैयथापूर्वमनुष्ठितं ३१॥श्रीभगवानु०॥एवंचेत्तर्हितद्वाक्यंनवयं
श्रद्दधीमहि योदक्षशापात्पैशाच्यंप्राप्तःप्रेतपिशाचराट् ३२ यदिवस्तत्र
विस्रंभोकैथंविद्वानवर्षभ तदेनंजल्पसद्वाचंनयद्भक्तान्संपुनः॥३३॥
र्दानवेंद्र जगद्गुरौ तर्ह्यंगाशुस्वशिरसिहस्तंन्यस्यप्रतीयतां ३३ यद्यसत्यंव

सहायैःस्वकार्याणिसाधयति अतस्तत्कथ्यतामिति ३० ३२ पैशाच्यंपिशाचानामि
वृत्तिं ३३ यद्यथावक्तावदिष्यति ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रैर्धर्ममर्मकैः सुपेशलैरनिरम्यैर्भिन्नधीर्भर्त्सितमूर्तिः २५ २६ २८ किमुवक्तव्यं

इत्थंभगवतस्तैश्चित्रैर्वचोभिः ससुपेशलैः भिन्नधीर्विस्मितः शीर्षिस्वहस्तं
कुमतिर्व्यधात् २५ अथापतच्छिन्नशिरावज्राहतइवक्षणात् यथाशब्देन
मः शब्दः साधुशब्दोभवद्दिवि २६ मुमुचुः पुष्पवर्षाणिहतेपापेवृकासुरे दे
वर्षिपितृगंधर्वामोचितः संकटाच्छिवः २७ मुक्तंगिरीशमभ्याहभगवान्पु
रुषोत्तमः अहोदेवमहादेवपापोयंस्वेनपा ᳚ प्मना २८ अहंकोनुमहत्स्वीश
जंतुर्वैकृतकिल्बिषः क्षेमीस्यात्किमुविश्वेशेकृतागस्कोजगद्गुरौ २९ श्रीराम

विश्वेशेत्वयिकृतागाः कृतापराधइति ३

जपः

अव्याकृतशक्त्युदन्वतः वाङ्मनसोगोचरशक्तिसमुद्रस्य गिरित्रमोक्षंशिवमोच
नरूपंचरित्रंसंस्मरतिपि र्नानारूपसंसारैः ४० शक्तसंकटमालोक्ययत्कृपापूर्ण
तस्वंबुजः गिरि
य एवमव्याकृतशक्त्युदन्वतःपरस्यसाक्षात्परमात्मनोहरेः गि
रित्रमोक्षंकथयेच्छृणोतिवाविमुच्यतेसंसरतिभिस्तथारिभिः ४० इतिश्रीभा
गवतेमहापुराणेद० स्कं० दस नामाशीतितमोध्यायः ॥८८॥ श्रीशुकउवाच ॥
सरस्वत्यास्तटेराजनृषयःसत्रमासत वितर्कःसमभूत्तेषांत्रिष्वधीशेषु
कोमहान् १
तद्दंबुजः गिरित्रंचित्रवाक्यात्तु मोचयामासकेशवः इतिअर्थः ॥
नवाशीतितमेदेवःकोमहानितिसंशये परीक्ष्यविष्णोरुत्कर्षंमुनिभ्योवर्णयद्गु
रुः १ इतिहासांतरमाह सरस्वत्याइति १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२३ स्वयोन्यास्वस्यैवरूपांतरेणाभिव्यक्तिस्थानेनस्वकार्येणेत्यर्थः तेनयथाक

तस्यजिज्ञासयानेवैभृगुंब्रह्मसुतंनृप तद्दृष्टैप्रेषयामासुःसोभ्यगाद्ब्रह्मणः
सभां २ नतस्मैप्रह्वणंस्तोत्रंचक्रेसत्त्वपरीक्षया तस्मैचुक्रोधभगवान्प्र
ज्वलन्स्वेनतेजसा ३ सआत्मन्युत्थितंमन्युमात्मजायात्मनाप्रभुः अशीश
मद्यथावह्निंस्वयोन्यावारिणाप्रभुः ४ ततःकैलासमगत्सतंदेवोमहेश्वरः
परिरब्धुंसमारेभेउत्थायभ्रातरंमुदा ५ नैछत्त्वमस्युत्पथगइतिदेवश्चुकोपह
शूलमुद्यम्यतंहंतुमारेभेतिग्मलोचनः ६

स्विद्वह्निंशामयातितथास्वकार्येणनिमित्तेनक्रोधंशामयामासइत्यर्थः ४५ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ १० तीर्थकारिणातीर्थत्वनिमित्तेन ११ तस्यमंद्रयागंभीरयागिरानिर्वृत्तस्त
ष्णीषभूवेतिशेषः ॥ पतित्वापादयोर्देवीसांत्वयामासतंगिरा अथोजगाम
वैकुंठंयत्रदेवोजनार्दनः ७ शयानंश्रियउत्संगेपदावक्षस्यताडयत् ततउ
त्थायभगवान्सहलक्ष्म्यासतांगतिः ८ स्वतल्पादवरुह्याशुननामशिरसा
मुनिं आहतेस्वागतंब्रह्मन्निषीदात्रासनेक्षणं ९ अजानतामागतान्वःक्षं
तुमर्हथनःप्रभो ९ अतीवकोमलौतातचरणौतेमहामुने इत्युक्त्वाविप्रचरणौ
मर्दयन्स्वेनपाणिना १० पुनीहिसहलोकंमांलोकपालांश्चमद्गतान् १० पादो
दकेनभगवंस्तीर्थानांतीर्थकारिणा अथाहंभगवल्लक्ष्म्याआसमेकांतभाज
नं ११ वत्स्यत्युरसिमेभूतिर्भवत्पादहतांहसः १२ ॥ श्रीशुकउवाच ॥ श्रीरामचंद्र

श्री ३०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१४ विस्मिता अपराधातिरेकेपि निर्विकारत्वेन भूयांसं श्रद्दधुः सहत्तमं निश्चि
तवंतः १५ यतः यस्मिन्वैराग्यं च चतुर्विधमिति पादेन चातुर्विध्यमेवं द्रष्टव्यं वि
षयांस्त्यक्तुमशक्नुवतोपि समानेच्छात्यागो नामाद्यं वैराग्यं ततो विषयाणां मध्ये

एवं ब्रुवति वैकुंठे भृगुस्तं मंद्रया गिरा। निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कंठाश्रुलोच
नः १३ पुनः स सत्रमाव्रज्य मुनीनां ब्रह्मवादिनां स्वानुभूतमशेषेण राजन्भृगु
रवर्णयत् १४ तं निशम्याथ मुनयो विस्मिता मुक्तसंशयाः भूयांसं श्रद्दधुर्विष्णु
यतः शांतिर्यतोभयं १५ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितं ऐश्वर्यं चा
ष्टधा यस्माद्यशश्चात्ममलापहं १६

लवणादिष्वातिरेकेणापि वर्त्तिर्द्वितीयं तथात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वपिमनसिरागशैथिल्येनबाह्येंद्रियैरेवविषयसेवनंतृतीयं तत्राप्यौदासिन्यं
चतुर्थंतथाहुः वैराग्यमाद्यंयतमानसंज्ञंकचिद्विरागोव्यतिरेकसंज्ञः एकें

मुनीनांन्यस्तदंडानांशांतानांसमचेतसां अकिंचनानांसाधूनांयमा
हुःपरमांगतिं १७ सत्वंयस्यप्रियामूर्तिर्ब्राह्मणास्त्विष्टदेवताः भजं
त्यनाशिषःशांतायंवानिपुणबुद्धयः १८

द्रियाख्यंत्वहृदिरागमोक्षंतस्याप्यभावस्तुवशीकृताख्यमिति १६ १७ १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नस्यभगवतएवयद्यपित्रिविधाभाक्तयः तत्रूत्तासुसत्वमेवतीर्थसाधनंपुरु

त्रिविधाक्तयस्तस्यराक्षसाअसुरासुराः गुणिन्यामाय
या स्पष्टाःसत्वंतत्तीर्थसाधनं १९॥ सुकउवाच॥ इत्थंसारस्व
ताविप्रान्तणांसंशयनुत्तये पुरुषस्यपदांभोजसेवयातद्ग
तिंगताः २०

ति २०
षार्थहेतुः १९ इत्थंनिश्चित्यसरस्वतीतीरवासिनोविप्राहरिसेवयामुक्तिंप्रापुरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८

व्यासनंदनस्यमुखपंकजाद्उत्तंगंधयुक्तपीयूषतुल्यंहरेः प्रशस्तंयशोयःसंसा

सूतउवाच इत्येतन्मुनितनयास्यपद्मगंधपीयूषंभवभयभित्परस्यपुंसः
सुश्लोक्यंश्रवणपुटैःपिबत्यभीक्ष्णंपांथोध्वभ्रमणपरिश्रमंजहाति २१
शुकउवाच॥ एकदाद्वारवत्यांतुविप्रपत्न्याःकुमारकः जातमात्रोभुवंस्पृष्ट्वाम
मारकिलभारत २२ विप्रोगृहीत्वामृतकंराजद्वार्युपधायसः इदंप्रोवाच
विलपन्नातुरोदीनमानसः २३

रीसेवनेसमुक्तोभवतीति २१ सचोक्तलक्षणोभगवान्कृष्णएवेतिदर्शयितुंआ
ख्यानांतरमाह एकदेति २२ २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मद्विषइत्यादि २४ २५ कांतांगाथांवाक्यं मयिनकश्चिद्दोषः अतोराजदोषेणै

ब्रह्मद्विषः शठधियोलुब्धस्यविषयात्मनः क्षत्रबंधोःकर्मदोषात्पंचत्वंमेगतो
र्भकः २४ हिंसाविहारंनृपतिंदुःशीलमजितेंद्रियं प्रजाभजंत्यःसीदंतिदरि
द्रानित्यदुःखिताः २५ एवंद्वितीयंविप्रर्षिस्तृतीयंत्वेवमेवच विसृज्यसन्न
पद्वारितांगाथांसमगायत २६ तामर्जुनउपश्रुत्यकर्हिचित्केशवांतिके प
रेतेनवमेबालेब्राह्मणंसमभाषत २७

वमत्सुत्राम्रियंतइतिवारंवारंचुक्रोशेत्यर्थः २७ श्रीमदनांतकायनमः राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मन् किंस्वित्किमर्थं च थारोदिषि यत्त्वन्निवासे धनुर्द्धरमात्रो राजन्यबंधुरपि नास्ति
ब्राह्मण्यस्य तु का वार्त्ता एतेन तु सत्रयागा इव ब्राह्मणा मिलिता भवितुमर्हंतीत्यर्थः २८
न देवा हधनदारात्मजापृक्ता इति धनादिभिर्युक्ता ये षु जीवत्सु शोचंति ते जीवंति

किंस्वित् ब्रह्मंस्त्वन्निवास इह नास्ति धनुर्धरः राजन्यबंधुरेते वै ब्राह्मणाः सत्रमा
सते २८ धनदारात्मजापृक्ता यत्र शोचंति ब्राह्मणाः ते वै राजन्यवेषेण नटा
जीवंत्यसुंभराः २९ अहं प्रजावां भगवन् रक्षिष्ये दीनयोरिह अनिस्तीर्णप्र
तिज्ञो ग्निं प्रवेक्ष्ये हतकल्मषः ३० केवलां जीविकां संपादयंति २९ हतकल्म

षइति अग्निप्रवेशेन ब्राह्मणविलापश्रवणपातकात् पूतो भवेयमित्यर्थः अह
नकल्मषश्चेदिति वा ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३१ नश्रद्दध्महेनसंप्रतीमः ३२ ३३ ३४ एवंप्रोदीवादैर्विश्रंभितः विश्वासंप्रापि

ब्राह्मणउवाच संकर्षणोवासुदेवः प्रद्युम्नोधन्विनांवरः अनिरुद्धोप्रतिरथोनत्रातुं
शक्नुवंतियत् ३१ तत्कथंतुभवान्कर्मदुष्करंजगदीश्वरैः चिकीर्षसित्वंबालि
श्यात्तन्नश्रद्दध्महेवयं ३२ अर्जुनउवाच नाहंसंकर्षणोब्रह्मन्नकृष्णःकार्ष्णि
रेवच अहंवैवार्जुनोनामगांडीवंयस्यवैधनुः ३३ मावमंस्थाममब्रह्मन्वी
र्यंत्र्यंबकतोषणं मृत्युंविजित्यप्रधनेआनेष्येतेप्रजांविभो ३४ एवंविश्रंभि
तोविप्रः फल्गुनेनपरंतप जगामस्वगृहंप्रीतः पार्थवीर्यंनिशामयन् ३५ प्रसू
तिकालआसन्नेभार्यायाद्विजसत्तमः पाहिपाहिप्रजांमृत्योरित्याहार्जुनमातुरः

तः निशामयन्नश्रृण्वन् ३५ ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरं नमस्कृत्य ३७ अरुणत् आवृतवान् तदे

सउपस्पृश्य शुच्यंभो नमस्कृत्य महेश्वरं दिव्यास्त्राणि च संस्मृत्य सज्यं गांडीवमा
दधे ३७ न्यरुणत्सूतिकागारं शनैर्नानास्त्रयोजितैः तिर्यगूर्ध्वमधः पार्थ
श्चकार शरपंजरं ३८ ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः सद्योऽदर्शनमा
पेदे सशरीरो विहायसा ३९ तदाह विप्रो विजयं विनिंदन्कृष्णसन्निधौ मौढ्यं
पश्यत मे योऽहं श्रद्दधे क्लीबकत्थनं ४० न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः
यस्य शेकुः परित्रातुं कोन्यस्तदवितेश्वरः ४१ धिगर्जुनं मृषावादं धिगात्मश्ला
घिनो धनुः दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ४२

ततस्तत्र ४१५
वा हा तिर्यगूर्ध्वमिति ३८ अदर्शनमापदे हो पिनावशिष्ट इत्यर्थः ३९ यस्य प्रजाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२ ४१ प्रयुक्तः वारितः उपपत्तिभिः प्रतिषेधं कुर्वता मावज्ञमावज्ञानीहि ४९ येनिं

एवं शापतिविप्रर्षौ विद्यामास्थाय फाल्गुनः ययौ संयमनीमाशु यत्रास्ते भगवा
न्यमः ४२ विप्रापत्यमचक्षाणस्तत ऐंद्रीमगात्पुरीं आग्नेयीं नैर्ऋतिं सौम्यां
वायव्यां वारुणीमथ ४४ रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ततो
लब्धद्विजसुतो ह्यनिस्तीर्णप्रतिश्रुतः ४५ अग्निं विविक्षुः कृष्णेन प्रयुक्तः प्र
तिषेधता दर्शये द्विजसूनुंस्ते मावज्ञात्मानमात्मना ४६ येने ह कीर्त्तिं विम
लां मनुष्याः स्थापयिंतिनः इति संभाष्य भगवानर्जुनेन सहेश्वरः ४७

दंतितनएव मनुष्याः नः कीर्त्तिं स्थापयिष्यंति निश्चलां करिष्यंपादांतरं तु छंदो भंग
भयात् अगंतुकमिति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तसंख्यागिरयोयेषुद्वीपेषुतान् ॥ हृतमिति परिणामरूपंनालोकाभावमात्रं
५१ चक्रानुपथेनचक्रमनुगतेनद्वारेणतमः परंतस्मात्तमसः परंदूरेवर्त्तमानंप

दिव्यंसरथमास्थायप्रतीचींदिशमाविशत् सप्तद्वीपान्सप्तसिंधून्सप्तस
प्तगिरीनथ ४८ लोकालोकंतथातीत्यविवेशसुमहत्तमः तत्राश्वाः शैब्यसु
ग्रीवमेघपुष्पबलाहकाः ४९ तमसिभ्रष्टगतयोबभूवुर्भरतर्षभ तान्दृ
ष्ट्वाभगवान्कृष्णोमहायोगेश्वरेश्वरः ५० सहस्रादित्यसंकाशंस्वचक्रंप्रा
हिणोत्पुरः तमःसुघोरंगहनंकृतमहद्विदारयद्भूरितरेणरोचिषा मनो
जवंनिर्विविशेसुदर्शनंगुणच्युतोरामशरोयथाचमूः ५१ द्वारेणचक्रानुपथे
नतत्तमःपरंपरंज्योतिरनंतपारं समश्नुवानंप्रसमीक्ष्यफाल्गुनःप्रताडिताक्षो
पिदधेक्षिणीउभे ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रंश्रेष्ठंभागवतंज्योतिःसमस्तुवानंप्राभुवन्प्रसमीक्ष्यप्रताज्जिताक्षोनेत्रेन्यमी
लयदिति ५२ एजंतः उच्चलंतः उर्म्मयोभूषणंयस्यतत्तत्रसलिलेभवनंम

ततःप्रविष्टःसलिलंनभस्वताबलीयसैजद्बृहदूर्मिभूषणं तत्राद्भुतंवैभवनं
द्युमत्तमंभ्राजन्मणिस्तंभसहस्रशोभितं ५३ तस्मिन्महाभीममनंतमद्भुतं
सहस्रमूर्धन्यफणामणिद्युभिः विभ्राजमानंद्विगुणोल्बणेक्षणंसिताच
लाभंशितिकंठजिह्वं ५४ ददर्शतद्भोगसुखासनंविभुंमहानुभावंपुरुषोत्त
मोत्तमं सांद्रांबुदाभंसुपिशंगवाससंप्रसन्नवक्त्रंरुचिरायतेक्षणं ५५

हाकालपुरं द्युमत्तमंद्युतिमत्सुश्रेष्ठं ५२ सहस्रंमूर्ध्निभवाःफणास्तासुमणयस्ते
षांकांतिभिर्द्विसहस्रनेत्रैरूर्जितंस्फटिकगिरेःसंकाशंशितिकंठजिह्वं कंठश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिह्वाश्चशितयोनीलाःकंठजिह्वायस्यतं ५४ तद्भोगसुखासनंतस्यभोगोदेहःसु
खकरमासनंयस्यतं ५५ महांतोमणिव्रातायेषुतेषांकिरीटकुंडलानांप्रभा

महामणिव्रातकिरीटकुंडलप्रभापरिक्षीप्तसहस्रकुंतलं प्रलंबचार्वष्टभु
जंसकौस्तुभंश्रीवत्सलक्ष्म्यावनमालयावृतं ५६ सुनंदनंदप्रमुखैःस्वपा
र्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः पुष्ट्याश्रियाकीर्त्यजयाखिलर्धिभि
र्निषेव्यमानंपरमेष्ठिनांपतिं ५७ ववंदआत्मानमनंतमच्युतोजिष्णुश्चत
द्दर्शनजातसाध्वसः तावाहभूमापरमेष्ठिनांप्रभुर्बद्धांजलीसस्मितमूर्ज
यागिरा ५८

तयापरिक्षिप्ताःसर्वतःस्फुरंतःसहस्रंअपरिमिताःकुंतलायस्य
तं ५६ कीर्त्यजयाकीर्तिसहितयाअजयाखिलर्धिभिरणिमादिविभूतिभिर्मू
र्तिधराभिः ५७ ऊर्जितयागिरा ५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेकलावतीर्णाविति संबोधनं शीघ्रंमेअंतिसकाशंइतंआगछतं ५९ आचरतां

द्विजात्मजामेयुवयोर्दिदृक्षुणामयोपनीताभुविधर्मगुप्तये कलावतीर्णा
ववनेर्भरासुरान्हत्वेहभूयस्त्वरयेतमंतिमे ५९ पूर्णकामावपियुवांनर
नारायणावृषी धर्ममाचरतांस्थित्यैऋषभौलोकसंग्रहं ६० इत्यादिष्टौ
व भगवतातौकृष्णौपरमेष्ठिना ॐमित्यानम्यभूमानमादायद्विजदारकान्
६१ न्यवर्तेतांस्वकंधामसंप्रहृष्टौयथागतं विप्रायददतुःपुत्रान्यथारूपं
यथावयः ६२ निशाम्यवैष्णवंधामपार्थःपरमविस्मितः यत्किंचित्पौरुषंपुं
सांमेनेकृष्णानुकंपितं ६३ इतीदृशान्यनेकानिवीर्याणीहप्रदर्शयन् बुभु
जेविषयान्ग्राम्यानीजेचात्यूर्जितैर्मखैः ६४

आचरतं ६० ६१ ६२ ६३ ६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदंतुभारतयुद्धात् पूर्वमेवकृतमपिश्रैष्ठ्यकथनप्रस्तावेनअत्रोक्तं ६५ ६६
इतिद्वादशमेटीकायांएकोननवतितमोध्यायः ८९॥ चरमेतुपुनःप्रोक्ताकृष्णलीला

प्रववर्षाखिलान्कामान्प्रजासुब्राह्मणादिषु यथाकालंयथैवेंद्रोभग
वान्श्रैष्ठ्यमास्थितः ६५ हत्वान्पानधर्मिष्ठान्घातयित्वार्जुनादिभिः
अंजसावर्त्तयामासधर्मंधर्मसुतादिभिः ६६ इतिश्री॥०म॰ द॰ द्विजकु
मारारणंमवानितमोध्यायः॥८९॥श्रुकउ०॥सुखंस्वपूर्यांनिवसन्
द्वारकायांश्रियःपतिः सर्वसंपत्समृद्धायांजुष्टायांवृष्णिपुंगवैः १

समासतःयदुवंशप्रसूतानामानंत्यंचसकारणं १ श्रीकृष्णंविश्रुतिसमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णविभूतिंसमासेनदर्शयति सुरवंसपुर्यामितिसंपदादिविशिष्टायां १ ४

स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः कंदुकादिभिर्हर्म्येषुक्रीडंतीभिस्त
डित्द्युभिः २ नित्यसंकुलमार्गायांमदच्युद्भिर्मतंगजैः स्वलंकृतैर्भटैरश्वैरथै
श्चकनकोज्वलैः ३ उद्यानोपवनाढ्यायांपुष्पितद्रुमराजिषु निर्विशद्भृंगविह
गैर्नादितायांसमंततः ४ रेमेषोडशसाहस्रपत्नीनामेकवल्लभः तावंति
विचित्ररूपाणितद्गृहेषुमहर्द्धिषु ५ प्रोत्फुल्लोत्पलकल्हारकुमुदांभोजरेणुभिः
वासितामलतोयेषुकूजद्द्विजकुलेषुच ६ श्रियःपतिः षोडशसहस्रपत्नीना

मेकवल्लभःसन्तासांगृहेषुरेमेइत्यन्वयः ५ गेहविशेषणंप्रोत्फुल्लेत्यादिश्लोकेन ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाल्हदिनीषुच अंभोविगाल्यविजहार महानुदयोवैभवंयस्यसः योषितांकुचकुं
कुमैर्लिप्तांगःयतस्ताभिःपरिरब्धः ७ सूतमागधवंदिभिश्चोपगीयमानः ८११

विजहारविगाह्यांभोह्रदिनीषुमहोदयः कुचकुंकुमलिप्तांगःपरिरब्धश्चयो
षितां ७ उपगीयमानोगंधर्वैर्मृदंगपणवानकान् वादयद्भिर्मृदावीणांसूत
मागधवंदिभिः ८ सिच्यमानोच्युतस्ताभिर्हसंतीभिःस्मरेचकैः प्रतिसिं
चैत्स्यउध्वस्तवहत्कबरप्रसूनाः कांतंस्मरेचकजिहीर्षितयोपगूह्यजातस्म
रोत्सवलसद्वदनाविरेजुः १०४ नूविचिक्रीडेयक्षीभिर्यक्षराडिव ९ ताःक्लि
न्नवस्त्राविस्रतोरुकुचप्रदेशाःसिंचं४ ताःक्लिन्नवस्त्राः अतएवविवृतोरुकुचप्रदे
शाः उद्धूतानिविस्रस्तानिबृहत्कबरेभ्यःप्रसूनानियासांताः जातेनस्मरेणयउत्स

वस्तेनलसंतिवदनानियासांताः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासांस्तनेभ्योविषज्जितकुंकुमास्रग्यस्यसः क्रीडयाअभिषंगेणाभिनिवेशेन
धुतः कंपितः कुंतलवृंदबंधोयस्यसः ॥ १३ मुकुंदैकधियः समाहिताइवक्ष

कृष्णस्तुतत्स्तनविषज्जितकुंकुमस्रक्क्रीडाभिषंगधुतकुंतलवृंदबंधः
सिंचन्मुहुर्युवतिभिः प्रतिसिच्यमानोरेमेकरेणुभिरिवेभपतिः परीतः ॥
नटानांनर्तकीनांचगीतवाद्योपजीविनां क्रीडालंकारवासांसिकृष्णोदात्तस्य
चस्त्रियः १२ कृष्णस्यैवंविहरतोगत्यालापेक्षितास्मितैः नर्मक्ष्वेलिपरिष्वंगैःस्त्री
णांकिलहृताधियः १३ मुचुर्मुकुंदैकधियोगिरउन्मत्तवज्जडं चिंतयंत्योरविंदा
क्षंतानिमेगदतः शृणु १४

गमगिरः सत्यः पुनस्तमेवेशंचिंतयंत्योजडंयथाभ
वतितथायानिवाक्यान्यूचुस्तानिमेमत्तोगदतःशृण्वित्यर्थः १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वरः श्रीकृष्णः स्वापिति त्वं तु निद्राभंगं कुर्वती विलपसि नशेषे नस्वपिषि तदनुचित
मित्यर्थः अथवानापराधस्तवापि ईश्साशयेनाहुः नलिननयनस्यहासेनसहितमु

श्री महिष्यनुचुः॥ कुररिविलपसित्वंवीतनिद्रानशेषेस्वपितिजगतिराज्ञामीश्व
रोगुप्तबोधः वयमिवसखिकाश्विज्ञादनिर्भिन्नचेतानलिननयनहासोदारली
लेक्षितेन १५ नेत्रेनिमीलयसिनक्तमदृष्टबंधुस्त्वंरोरवीषिकरुणंबतचक्र
वाकी दास्यंगतावयमिवाच्युतपादजुष्टांकिंवास्त्रजंस्पृहयसेकबरेणवोढुं

५६

दारं यल्लीलेक्षितं तेन कश्चिज्ञादं निर्भिन्न चेतास्त्वमिति १५ नक्तंरात्रावदृष्टबंधुः
सतीरोरवीषि किंकिंवानैतावदपितु वयमिहस्पृहयसे १६ श्रीकृष्णपरमात्म॰

३५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलब्धनिद्रः सदानिष्ठनसेत्क्रोशासि किं वा स्मराग्निः प्राप्तां दशां त्वमपिगतो
सि अहोकष्टंयथावयंसंभोगेन मुकुंदायत्तन कुचकुंकुमादिलांछनः न

भोभोसदानिष्ठनसेत्पुदन्नन् नलब्धनिद्रोधिगत प्रजागरः किंवामु
कुंदापत्तनात्मलांछनः प्राप्तांदशांत्वंच गतोसुस्यपां १७ त्वंयक्ष्मणा
बलवतासिगृहीन इंदोक्षीणस्तमोन निजदीधितिभिः क्षिणोषि क
च्चिन्मुकुंदगदितानियथावयंत्वंविस्मृत्यभोस्थगितगीरुपलक्ष्यसे
नः १८

थात्वमपियत्नोपलक्षतश्रीः कौस्तुभादिलांछनोलक्ष्यसे १८ मुकुंदगदि
तानिरहस्यानिविस्मृत्यनदेकच्चितयाकच्चित्त्वांक्षिणोषिवृयमिवस्थगित
गीः स्तब्धवाकूहेइंदोनस्तथैवोपलक्ष्यसे १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रियाचरणं विनास्म रोदीरणेन व्यथाजननं मलयानिल त्वयानु चिंतमि
त्यर्थः १९ मेघेति आतपार्तिहरणादिसाम्या... त्वं यादवेंद्रस्य नूनं दयितः

किं त्वाचरितमस्माभिर्मलयानिलनेप्रियं गोविंदापांगनिर्भिन्नेलद्दीप
यसिनःस्मरं १९ मेघश्रीमंस्त्वमसिदयितोयादवेंद्रस्यनूनं श्रीवत्सांके
वयमिवभवान् ध्यायतिप्रेमवक्षः अत्युत्कंठःसबलहृदयोस्मद्विधो
वाष्पधाराःस्मृत्वास्मृत्वाविसृजसिमुहुर्दुःखदस्त्वत्प्रसंगः २० राम

सरवासि अतोभवांस्त्वं ध्यायतिध्यानेलिंगान्याहुः अत्युत्कंठइत्यादि अ
होकिमितित्वयातेनसख्यंकृतंयतोदुःखदस्त्वत्प्रसंगइति २० श्रीराम।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेकोकिलप्रियरावस्यप्रियंवदस्यश्रीकृष्णस्यपदानीवपदानिशरांसंभा
षसेमृतान्संजीवयतीतितथानयाकोमलयागिरावलितकंठरमणी
यकंठमेकथयकिंतवप्रियंकरवाणीति २७ होसितिधरत्वंनवदासिअ

प्रियरावपदानिभाषसेमृतसंजीविकयागिरा करवाणिकिमद्यतेप्रि
यंवदमेवलितकंठकोकिल २१ नचलसिनवदस्युदारबुद्धेसितिध
रचिंतयसेमहांतमर्थं अपिबतवसुदेवनंदनांघ्रिंवयमिवकामय
सेस्तनैर्विधर्तुं २२
तोनूनंमहांतमर्थंचिंतयसेव ततर्हिअपिकिंवयंयथा
स्तनैर्विधर्तुंकामयामहे तथास्त्वस्तनतुल्यैःशृंगैर्वोढुंकामयसेगंभीरमितिचे
त्तर्हिनवाप्यसमदवस्थाभविष्यतीति २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भोसिंधुपत्न्यः नद्यः संप्रतीग्रीष्मेसिंधुर्मेघधाराभमरतवर्ष्मायुष्मात्मानं
दयति बतअहोकष्टंअन्तः शुष्यंतोह्रदायासांताः अपगताःकमलशो

शुष्यद्ध्रदाः कर्शिताबतसिंधुपत्न्यःसंप्रत्यपास्तकमलश्रियइष्टभर्त्तुः
यद्वद्वयंयदुपतेः प्रणयावलोकमप्राप्यमुष्टहृदयाः पुरुकर्शितास्म २२

भाः ह्लशाश्चवयं यथाप्रियतमस्यभर्त्तुर्मधुपतेःस्मप्रासिद्धं २२ श्रीगोल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदैव दैवादागतं हंसं दूतं कल्पयित्वाहुः हंसेति॥ अस्मान्प्रति पुरारहस्युक्तं कि
वा चलसौहृदः स्मरति स्मृत्वैव मां प्रस्थापितवानिति चेदत आहु हे हंसोऽद्य सु
इस्य दूतं कस्मात्त्वं वयं भजामः कामार्थमाह्वयति युष्मदाह्लेति चेदत आहुः अ
हंस स्वागतमास्यतां पिब पयो ब्रूह्यंग गौरीः कथां दूतं त्वां नु विदाम कच्चिदजि
तः स्वस्त्यास्त उक्तं पुरा किं वा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयं स्रो
इलापमकामदं श्रीयमृते सर्वैकनिष्ठास्त्रियां २४ होतर्हि तं इहालापयत्वा
कारयन्तुं इति गच्छन्तमिव तं पुनराहुः योऽस्मान्वंचयित्वा एकाकी नीरमते तां श्रि
यं कृते तमेवालापयामास तदेकनिष्ठा कथं परिहर्तुं शक्यत इति चेत् अत आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हुः स्त्रियांजातावेकवचनं अस्मासुस्त्रीषु
मध्येकिंसेवैकनिष्ठानतुवयमित्यर्थः पाठांतरे
ह्रेपोदंमधुतन्मधुरालापमात्रंयस्यतंअकामदंअरतिप्र
दंप्रियमस्तेवयंकस्माद्भजामः किंत्वनादृतापिसतीपुनः
सेवभजतुयत्तोऽस्मादृश्योमानिन्यः स्त्रियएकनिष्ठाःए
कत्रैवरखमानसिधौनिष्ठायासामिति २४ रामसीता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५ तासांकृष्णेएवंभूतोभावोनातिविचित्रमित्याह श्रुतमात्रोपीतिउरुभिर्गायैः
गीतिः उरुधागीतेः वायैः काश्चिदपिगीतैर्यथाकथंचिदपिगीतोवेत्यर्थः २६ २७ पदं

रतिहृशेनभावेनकृष्णेयोगेश्वरेश्वरे क्रियमाणेनमाधव्योलेभिरेपरमांगतिं २५
श्रुतमात्रोपियःस्त्रीणांप्रसत्याकर्षतेमनः उरुगायोरुगीतोवापश्यंतीनांकुतः
पुनः २६ याःसंपर्यचरन्प्रेम्णापादसंवाहनादिभिः जगद्गुरुंभर्तृबुध्यातासां
किंवर्ण्यतेतपः २७ एवंवेदोदितंधर्ममनुतिष्ठन्सतांगतिः गृहंधर्मार्थकामा
नांमुहुश्चादर्शयत्पदं आस्थितस्यपरंधर्मंकृष्णस्यगृहमेधिनां २८ श्रीकृष्ण

स्थानं २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यारुक्मिणीप्रमुखाअष्टौताउदाहृताःप्रागेव २० एवमष्टोत्तरशताधिकषोडशसहस्र
महीषीणांपुत्राःलक्षमेकमशीत्युत्तरैकषष्टिसहस्राणिचभवंति अनिरुद्धस्त्वे

आसन्षोडशसाहस्रंमहिष्यश्चशताधिकं तासांस्त्रीरत्नभूतानामष्टौयाःप्रा
गुदाहृताः २९ रुक्मिणीप्रमुखाराजन्तत्पुत्रांश्चानुपूर्वशः एकैकस्यांदशदश
कृष्णोजीजनदात्मजान् ३० यावत्यआत्मनोभार्य्यास्यमोघगतिरीश्वरः तेषा
मुद्दामवीर्याणामष्टादशमहारथाः ३१ आसन्नुदारयशस स्तेषांनामानिमे
शृणु प्रद्युम्नश्चानिरुद्धश्चदीप्तिमान्भानुरेवच ३२

ति अन्तःपुत्राणांमध्येसप्त
दशैवमहारथाज्ञेयाः अथवाऽनिरुद्धनामापिकश्चित्पुत्रएवेति ३१ ३२ गोपालस्वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सांबोमधुर्बृहद्भानुश्चित्रभानुर्वृकोरुणः २२ पुष्करोवेदबाहुश्चश्रुतदेवःसुनंदनः चि
त्रभानुर्विरूपश्चकविर्न्यग्रोधएवच एतेषामपिराजेंद्रतनुजानांमधुद्विषः २३
प्रद्युम्नआसीत्प्रथमः पितृवद्रुक्मिणीसुतः २४ सरुक्मिणोदुहितरमुपयेमेमहा
रथः तस्मात्सुतोनिरुद्धोभून्नागायुतबलान्वितः २५ सचापिरुक्मिणःपौत्रींदौ
हित्रोजगृहेततः वज्रस्तस्याभवद्यस्तुमौशलादवशेषितः २६ प्रतिबाहुरभूत्त
स्मात्सुबाहुस्तस्यचात्मजः सुबाहोःशांतसेनोभूत्शतसेनस्तुतत्सुतः २७ न
ह्येतस्मिन्कुलेजाताअधनाअबहुप्रजाः अल्पायुषोल्पवीर्याश्चअब्रह्मण्याश्च
जज्ञिरे २८ यदुवंशप्रसूतानांपुंसांविख्यातकर्मणां संख्यानशक्यतेकर्त्तुमपि
वर्षायुतैर्नृप ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहस्राणामपरिमितानांकुमाराणामित्यन्वयः ४१ यदाप्रत्येकंबहूनध्यापयतामा
चार्याणामियंसंख्या तदपिश्रुतमात्रंनतुसम्यक्ज्ञायते तदाकुमाराणामेवसंख्या

तिस्रःकोट्यःसहस्राणामष्टाशीतिशतानिच आसन्यदुकुलाचार्याःकुमाराणामि
तिश्रुतिः ४१ संख्यानंयादवानांकःकरिष्यतिमहात्मनां यत्रायुतानामयुतलक्षे
णास्तेसआहुकः ४२ देवासुराहवहतायेदैतेयाःसुदारुणाः तेचोत्पन्नामनुष्ये
षुप्रजाहृप्ताबबाधिरे ४२

नंकर्तुंनशक्यतेकु तंःपुनःसर्वेषांयादवानामिति ४२
तेचोत्पन्नाइतिप्रत्येकंबहुभीरूपैरितिज्ञेयं ४३ श्रीकृष्णजयकृष्णकृष्णेतिनामस्मरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमेवयदुकुलेपिदेवाइतितथाचोक्तंसहस्रशः समुद्भूतादेवायदुकुलेपृथगिति

तन्निग्रहायहरिणाप्रोक्तादेवायदोःकुले अवतीर्णाः कुलशतं
तेषामेकाधिकंनृप ४४ तेषांप्रमाणंभगवान्प्रभुत्वेनाभव
द्धरिः येचानुवर्त्तिनस्तस्यववृधुःसर्वयादवाः ४५ शय्यास
नाटनालापक्रीडास्नानाशनादिषु नविदुःसंतमात्मानंवृष्ण
यःकृष्णचेतसः ४६

५४ ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्कृष्णकीर्त्तेःसर्वतीर्थोत्तमत्वंकृष्णस्यचसर्वदेवोत्तमत्वंनचित्रमित्याहतीर्थंचक्रेइ
ति इतः पूर्वंस्वःसरिदेवगंगासर्व तोधिकंतीर्थमित्यासीत् इदानींतुयदुषुयदजनि
तीर्थंचक्रेनृपोनंयदजनियदुषुस्वःसरित्पादशौचंविद्विट्स्निग्धाःस्वरूपंययुरजि
तपराश्रीर्यदर्थेन्ययत्नः यन्नामामंगलघ्नंश्रुतमथगदितंयत्कृतोगोत्रधर्मः
कृष्णस्यैतन्नचित्रंक्षितिभरहरणंकालचक्रायुधस्य ४७ जातंतीर्थंश्रीकृष्णकी
र्तिरूपंएतत्स्वःसरिद्रूपंपादशौचं तीर्थंतुन्यूनंचक्रेस्वयमेवसर्वतीर्थोपरिविरा
जतइत्यर्थः श्रीकृष्णस्यविद्विषःस्निग्धाश्चतत्सारूप्यंययुरित्यपिनातिचित्रंतस्यप
रमकारुणिकत्वात् यद्येवंचनचित्रंकिंतत् अजितपराअजिताकेश्चिदप्यप्राप्ताप
रासर्वतःपरिपूर्णाश्रीःकृष्णस्यैवदास्येन्येपतितदेवाह यदर्थेन्येषांब्रह्मादीनांयत्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति ननु निरपेक्षं तमेव लक्ष्मीः श्रयन इति चित्रमेवेति चेत् न हि परम मंगलना
मधेयत्वात् तस्येत्याह यन्नामेति तदपि नार्थस्मरणापेक्षमित्याह श्रुतमथ
गदितमिति सर्वधर्माश्रयत्वादपीत्याह यत्कृतो गोत्रधर्म इति गोत्रेषु तत्त
दृषिवंशेषु धर्मो यत्कृतः येन प्रवर्त्तितः तस्याक्षितिभरहरणं नैव चित्रमित्या
ह कृष्णस्येतदिति कालचक्रायुधस्येति सर्वसंहारककालमूर्त्तेः विशेषतोउरं
तप्रभावचक्रायुधस्येति कियदेतदित्यर्थः ४७ गोपालमूर्त्तये नमः॥ ८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऍत एवंभूतः श्रीकृष्णः ततः स एव सर्वोत्तम इत्याह जयतीति जनानां जीवानां यो
निवास आश्रयस्तेषु वा निवसति अंतर्यामीतया तथा स कृष्णो जयति देवक्यां ज
न्मेति वादमात्रं यस्य सः यदुवराः पर्षत्सभासेवकरूपा यस्य इच्छामात्रेण निरस

जयति जननिवासो देवकीजन्मवादो यदुवरपर्षत्स्वैर्दोर्भिरस्यन्नधर्मं स्थिरच
रवृजिनघ्नः सुस्मितः श्रीमुखेन व्रजपुरवनितानां वर्धयन् कामदेवं ॥ ४८ ॥

न समर्थोऽपि क्रीडार्थं दोर्भिरधर्ममस्यन् क्षिपन् स्थिरचरवृजिनघ्नः अधिकारि
विशेषानपेक्षमेव वृंदावनगततरुलतादीनां संसारदुःखहंता तथा विलासवैद ५
ग्ध्यानपेक्षं व्रजवनितानां पुरवनितानां च सुस्मितेन श्रीमता मुखेनैव कामदेवं वर्ध हरिः
यन् कामस्यासौ दीव्यति रतिविजिगीषति संसारामिति देवस्तं भोगद्वारा मोक्षप्रदमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततत्कार्यविशेषैःस्वीकृतमत्स्यकूर्मादिनानामूर्त्तेर्विशेषतोयदूत्तमस्यस

इत्थंपरस्यनिजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरूपविडं
बनानि कर्म्माणिकर्मकषणानियदूत्तमस्यश्रूयादमुष्य
पदयोरनुवृत्तिमिच्छन् २३

तःपरमस्यतदनुरूपानुकारीणिकर्मकषणानिकर्माणिचरितानिश्रूयात्शृ
णुयादित्यर्थः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुवृत्तेः फलमाह मर्त्य इति श्रीमत्याः कथायाः श्रवणकीर्त्तनयुक्तया चिंतया सं
वर्द्धितानुवृत्त्यानया तन्निष्ठया तन्निष्ठत्वेन तस्य धामलोकमेति लोकत्वेपि काला

मर्त्यस्तयानुसवमेधितया मुकुंद श्रीमत्कथाश्रवणकीर्त्तनचिंतयेति तद्धा
मदुस्तरकृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोपि ययुर्यदर्थाः ५० चित्रं न
चैतदुरुगायपदाब्जरागाविध्वस्तकल्मषकदंबकमुक्तिरूपं स्त्रीणां सुदुस्त्य
ग्रामा जकृतांतजवापवर्गं हृनं क्षितिभुजोपि ययुर्यदर्थाः ५१

नां कलिनत्वमित्याह दुस्तरेति दुर्लभपुरुषार्थतामाह ग्रामादिति ५० ५१ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्रीपरमानंदसमताहशमाश्रया श्रीधरस्वामिरचिताश्रीभागवतदीपिका

इतिश्रीभागवतेमाहापुराणेदशमस्कंधेश्रीकृष्णाचरितं
लीला चरितानुवर्णनेनवतितमोऽध्यायः ॥९०॥श्री

इतिश्रीभागवतेमाहापुराणेदशमेटीकायांनवतितमोऽध्यायः ॥९०॥ श्रीकृष्णार्पण
मस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.रु.उ.
३२५

३२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामचंद्राय स्रजः

श्रीगणेशायनमः ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदायभक्त
जनमानसनिवासाय विजयंतेपरानंदकृष्णपादरजः याधृताम्मूर्ध्निजायं
तेमहेंद्रादिमहस्रजः १ उक्तैकत्रिंशदध्यायैर्मुक्तिरेकादशेततः जायंतेयेति
हासाद्यैः समासव्यासरूपतः २ नारदोवसुदेवायसमासेनन्यवर्णयत् भ
गवानुद्धवायाथविस्तरेणोपपत्तिभिः ३ तत्रतुप्रथमेऽध्यायेयदुवंशस्यसंक्ष
यः उपाक्षिप्तोविरागायमौशलव्यपदेशतः ४ प्रवृत्तिःपरानंदकृष्णक्रीडानु
वर्णिता तन्निवृत्त्यापरानंदरूपस्वारोहोनुवर्ण्यते ५ एवंतावद्दशमस्कंधेभूभारा
वतरणाय निजविभूतिविभूषित यदुवंशस्ययदुवंशावतारितसकलसुरांश
स्यभगवतः श्रीकृष्णस्यतदुचितप्रवृत्तिविडंबनेनतच्छ्रवणस्मरणादिपराणांपरे

मद्दुध्य युक्तक

प्रणतजनसकलदुरितशमनैकहेतोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रीडार्थं भूतले अवतारितानां चाधिकारिणां सुरांगनानां

तयोगमायावैभवस्य भक्तानामात्मतत्वोपदेश

षामानंदकारणं क्रीडा निरूपिता अथेदानीं मुपॅप्रिंपूर्वकं च बलाद्यनुग्रहायनि

जपदारोहो निरूप्यते तत्र कुरुक्षेत्रयात्रायां अविरक्त

सुदेवस्य कर्मणा कर्मनिर्हारो यथास्यात्तथा स्तदुच्यतामित्येवं कर्मयोगं पृष्ठवतो

नारदादिभिः कर्म्मयोगो निरूपितः कर्म्मणा कर्म्मनिर्हार एष साधु

श्रीबादरायणिरुवाच कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः भुवोवतारय

द्भारं जविष्ठं जनयन्कलिं १

रूपितः यदृच्छया भवित्तेन शुक्लेनेज्येत पूरुषं इ

त्यादिना तेन च विशुद्धसत्वस्य श्रीकृष्णरामौ परमेश्वरत्वेन ज्ञातवतः षड्गर्भान

यनाध्याये श्रीकृष्णेनात्मतत्वमुपदिष्टं वत्रोवः समवेतार्थतातैतदुपमन्महे य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.ए.
२

नः पुत्रान्समुद्दिश्यतत्वग्रामउद्दाहृतरस्यादिना तत्वविषयभोगातिशयेन
पुनस्तिरोहितमासीत् तदेवेदानींनारदमुखेन प्रथमंपंचाध्यायानिरूप्यते
तत्रप्रथमेऽध्यायेवैराग्योत्पादनाययदुकुलब्रह्मशापापदेशेनासुन्नतविषय स्
सुखानामप्यनित्यताप्रतिपाद्यते ततश्चतुर्भिर्निमिजायंतेयसंवादेनसप
१२ रिकरमात्मतत्वनिरूपणंततः षष्ठेभगवदुद्धवसंवादप्रस्तावः ततस्त्रयोवि
शत्याउद्धवंप्रतिभगवतस्त त्वनिरूपणं ततोद्वाभ्यांमोशलक्रीडेत्येवमेक
त्रिंशताध्यायैरेकादशस्कंधस्यप्रवृत्तिः तस्यचयथामतिव्याख्यानमारभ्य
ते अत्रमोशलप्रसंगार्थेपूर्वस्कंधार्थमनुवदति श्लोकद्वयेन कृत्वेति अवता
रयदित्यउगमोद्रहव्यः जविष्वंवेगवत्तरंअतिशीघ्रंहिंसापर्य्यवसायिनमिस २
र्थः कलिंकलहं १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ एतद्विवृणोति येकोपिताः इति सपत्नैर्दुर्योधनादिभिः कोपिताः कोपं कारिताः सु
बहु यथा भवति तथा बहुवाराणीत्यर्थः तदेवाह दुर्द्यूतहेलनकचग्रहणादिभिरि
ति दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणं तता
नि आदिर्येषां गरदानजतुगृहदाहादीनां तैः कृता ये कोपितास्तानितरेतरतः तान्

ये कोपिताः सबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् कृत्वा निमि
त्तमितरेतरतः समेतान्हत्वा नृपान्निरहरत्क्षितिभारमीशः ३

पांडुसुतान्नि
मित्तं कृत्वा इतरेतरतः उभयोः पक्षयोः समेतान्नृपान्हत्वा क्षितेर्भारं निरहरत् अ
हारयद्वा ये कोपिताः यैश्च कोपितास्तानितरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः येना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
२

त्मकटदैत्याः पूतनादयः तान्स्वयमेवहतवान् येनुदैत्याः बांधवछद्मनास्थिताः
तान्परस्परंनिमित्तंविधायहत्वा भूभारमपाहृतवानित्यर्थः २ अपिचभूभारे
त्यादि अन्याश्चभुभारभूताः राजपृतनाः राज्ञांपृतनाः राज्ञः तेषांपृतनाश्चेतिवा

भूभारराजपृतनायदुभिर्निरस्यगुप्तैःस्वबाहुभिरचिंतयदप्रमेयः मन्येवनेर्न
नुगतोप्यगतंहिभारंयद्यादवंकुलमहोअविषह्यमास्ते २ नमोभगवतेकृष्णा

स्वबाहुभिर्गुप्तैःपरिरक्षितैर्यदुभिर्विवाहादिछलेननिरस्यहत्वा बाहुभिरितिबहुवचनं
वस्तुतः चतुर्भुजात्मप्रायेणनन्वेवंकृष्णस्यचिकीर्षितमितिज्ञात्वायादवोस्तिस्मेकथंन २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्युंति तत्राह अप्रमेयः प्रमातुरशेमेक्यः चिंतामाह मन्यइति नन्विति वितर्के अ
वनेर्भर्मेर्यद्यपि लोकप्रतीत्साभारोगतः तथाप्यहमगतमेवमन्ये यद्यस्मात् अवि
पत्यंसोढुमशक्यं यादवकुलमित्यनेनैवस्ववंशत्वात्स्वयंहननमनुचितमिति
सूचितं ३ तर्हितदप्यन्येर्घात्यतांतत्राह नैवेति अन्यतः देवादिभ्योपियादवकुल

नैवान्यः परिभवोस्य भवेत्कथंचिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यं अंतः क
लिंपदुकुलस्य विधायवेणुस्तंवस्य वन्हिमिव शांतिमुपैति धाम ४ नमोभगवते

स्यपरिभवस्तिरस्कारोनभवेत् कुतः मत्संश्रयंतइतिमत्संश्रयंकुलंतस्य किंचवि
भवोन्नहनस्यविभवैर्गजतुरगादिभिः उच्छृंखलस्य यद्वातर्हीदंकिमितिसंहर्तव्यं

स्यमांसंश्रय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्राह विप्रवोन्नहनस्येति तस्मादेवंकरिष्यामीत्याह अंतः कलिमिति शांतिंउपशमं
उपैमि वर्तमानसामीप्येवर्तमानवद्वा उपैष्यामि तदनंतरंधामवैकुंठाख्यंउपेष्या

एवंव्यवसितोराजन्सत्यसंकल्पईश्वरः
शापव्याजेन विप्राणांसंजह्रेस्वकुलंविभुः ५

मीत्यर्थः ४ व्यवसितः कृतनिश्चयः संजह्रेउपसंहृतवान् ५ नमोभगवतेश्रीकृष्ण

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमवतारप्रयोजनंसर्वंसंपाद्यस्वंलोकंजगामेत्याह श्लोकद्वयेन स्वमूर्त्त्येति
लोकानांलावण्यनिर्मुक्तिस्त्यागोययायामपेक्ष्यलोकेषुलावण्यनास्तीत्यर्थः
यद्वालोकेभ्योलावण्यनिर्मुक्तिर्दानंयतः यत्संपर्केणलोकालावण्यवंतोभवंती

॥ स्वमूर्त्यालोकलावण्यनिर्मुक्त्यालोचनंनृणां
गीर्भिश्चित्ताःस्मरतांचित्तंपदैस्तानीक्षतांक्रियाः ६

त्यर्थः तयास्वमूर्त्यानृणांलोचनमाछिद्यआकृष्य तत्तोन्यस्यावलोकनेलोचन
स्याप्रवृत्तेः तथास्वगीर्भिश्चित्ताःगिरःस्मरतांचित्तंचाछिद्य तथापदैः तत्रतत्रांकि
तैः तानिपदानीक्षतामीक्षमाणानोअन्यतोगमनादिकाः क्रियाश्चाछिद्य तदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा° ए°
५

नींतनानांसर्वेषांचचक्षुरादिप्रवृत्तीःस्वैकनिष्ठाः कृत्वेत्यर्थः ६ किंचस्तत्वउपरिजनि
ष्यमाणानांसंसारतारणायकोशपृथिव्यांशोभमानाः श्लोकाःकवीनांयस्यांतां

आस्थियकीर्त्तिंसुश्लोकांवितत्यल्यंजसानुको
तमोनमातरिष्यंतीत्यगात्स्वंपदमीश्वरः ७

स्वकीर्त्तिंवितत्यविस्तार्यपाकीर्त्याअंजसासुखेनैवनुश्चितंतमस्तरिष्यंतीत्य
भिप्रेत्यईश्वरःस्वंपदंस्थानमगादिति ७ नमोभगवतेवासुदेवायनमोनमः॥

५

अन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अब्रह्मण्येभ्यः अदातृभ्योवा असेवकेभ्योवा विप्राः कुप्यंति वृष्णयस्तु न तथे
त्याह ब्रह्मण्यानामित्यादिना किंच कोपे जातेपि कृष्णचेतसां कथमभूत्कथंप्रा

श्रीराजोवाच ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां विप्रशा
पः कथमभूद्वृष्णीनां कृष्णचेतसां ८ यन्निमित्तः सवैशापोयादृ
शो द्विजसत्तम कथमेकात्मनां भेद एतत्सर्वं वदस्वमे ९ नमोनमः

दुरभूदित्यर्थः ८ अतः स्पष्टस्यनिमित्तस्याभावान्निमित्तांतरं पृच्छति यन्निमित्त
इति एकात्मनामेकचित्तानां कथं भेदः कलहः ९ नमो भगवते श्रीकृष्णाय नमो नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.प.
६

ईश्वरेछैवात्रनिमित्तमितिपरिहरति विभ्रदिति सकलानांसुंदरवस्तूनांसन्निवेशो
विन्यासविशेषोयास्मिन्तद्वपुर्विभ्रत् तर्हिकिमतिसौंदर्याद्विषयपरः नसुमंगलंक
र्माचरन्तत्किंकयापिकामनया नआप्तकामः तर्हिकिमितिकर्म्माचरतिधामद्वारव

श्रीशुकउवाच विभ्रद्वपुःसकलसुंदरसंन्निवेशंकर्म्माचरन्भुविसुमंगलमात्म
कामः आस्थायधामरममाणउदारकीर्त्तिःसंहर्त्तुमैछत्कुलंस्थितकृत्यशेषः १०

त्याख्यंगृहमास्थायरममाणः गृहेरममाणान्कर्मंण्याहपितुमित्यर्थः ननुकिमात्म
कामस्यगृहरत्याकर्मभिर्वातत्राह उदारकीर्त्तिः बहुफलप्रदाकीर्त्तिर्यस्यकीर्त्तिविना
नार्थमित्यर्थः एवंपरमैश्वर्येणवर्त्तमानएवकुलंसंहर्त्तुमैछत् तत्कस्यहेतोः स्थितकृत्य
शेषः कृत्येभूभारहरणेशेषोयस्यसः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वरेच्छयोत्थितंब्रह्मशापनिमित्तंवक्तुमाह कर्म्माणीति कर्मार्थमाहूताःकर्माणिकृ
त्वानिसृष्टामुनयःपिंगारकंसमागमन्नित्यन्वयः निसृष्टाःप्रस्थापिताःपूर्वोक्तामु
दारकीर्त्तिनांविवृण्वन्कर्माणिविशिनष्टिपुण्यनिवहानीत्यादित्रिभिःपदैः कानिचिदश्व

कर्माणिपुण्यनिवहानिसुमंगलानिगायज्जगत्कलिमलापहराणिकृत्वा काला
त्मनानिवसतायदुदेवगेहेपिंडारकंसमगमन्मुनयोनिसृष्टाः ११ श्रीगोपाल॰

मेधादिकर्माणिपुण्यमेवजनयंति पुत्रोपलालनादीनितत्कालंसुखमेवकुर्वंति प्रा
यश्चित्तादीनिपापमेवहरंतिएतानिसर्वतोमुखानीत्याह पुण्यनिवहानीति कीर्त्तना
दिनापुण्यानिनिवहंतिप्रापयंतीति तथासुमंगलानिअतिसुखात्मकानिगायतोज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग.
७

गतः कलिमलापहरणीं कृत्वा मुनिप्रस्थापने हेतुः कालात्मना संहारकरूपेण यदुदे
वगेहे निवसता स्वकुलं संजिहीर्षता तेऽस्य अर्थः पिंडारकं तत्तोनातिदूरे तीर्थविशेषं ११

विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगिराः कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदाद
यः १२ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः उपसंगृह्य पप्रच्छुरविनीता विनीतव
त् १३ तेवेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं एषा पृच्छति वो विप्रा अंतर्वत्न्य
सितेक्षणा १४

उपसंगृह्य पादग्रहणं कृत्वा १३ प्रश्नप्रकारमाह द्वयेन तेवेषयित्वेति हे अमोघद
र्शनाः विप्राः एषा अंतर्वत्नी गर्भिणी १४ नमो भगवते वासुदेवाय नमो नमः ॥ १४॥

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः युष्मान् साक्षात् प्रष्टुं विलज्जती लज्जमाना स्वमुखेन न पृच्छति। प्रसोष्यंती आसन्नप्र
सवा किंस्वित्संजनयिष्यतीति कन्यां वा पुत्रं वा तत्प्रब्रूत १५ प्रलब्धा वंचिताः १६ तस्मि

प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्य
ति १५ एवं प्रलब्धा मुनयस्तानूचुः कुपितान्नृप जनयिष्यति वो मंदा मुशलं कुलनाश
नं १६ तच्छ्रुत्वा तेतिसंत्रस्ता विमुच्य सहसोदरं सांबस्य ददृशुस्तस्मिन्मुशलं खल्व
यस्मयं १७ किं कृतं मंदभाग्यैर्नः किं वदिष्यंति नो जनाः इति विह्वलिता गेहानादाय
मुशलं ययुः १८

स्मिन् उदरे अयस्मयं लोहमयं १७ मंदभाग्यैरस्माभिः किमेतत्कृतं नः अ
स्मान् किं वदिष्यंति इति विह्वलिताः संतो मुशलमादाय गेहान्ययुः १८ नमो भग०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.ए.
८

राज्ञेउग्रसेनायननुकृष्णाय १९ आहुकउग्रसेनः सोपिश्रीकृष्णमपृष्ट्वैवप्रास्यमु
सलस्यचूर्णीक्रियमाणस्यावशेषितंलोहंचप्रास्यत् २० तरलैस्तरंगैः २१ अन्यैर्म

तत्रोपन्नीयसदसिपरिम्लानमुखश्रियः राज्ञआवेदयांचक्रुः सर्वयादवसन्निधौ १९
श्रुत्वामोघंविप्रशापंदृष्ट्वाचमुशलंनृप विस्मिताभयसंत्रस्ताबभूवुर्द्वारकौकसः
२० तच्चूर्णयित्वामुशलंयदुराजः सआहुकः समुद्रसलिलेप्रास्यल्लोहंचास्यावशेषि
तं २१ कश्चिन्मत्स्योग्रसील्लोहंचूर्णानितरलैस्ततः उह्यमानानिवेलायांलग्नान्यास
न्किलैरकाः २२

त्स्यैः सहशल्यैःशराये २३ श्रीराम

ज्ञाताः सर्वे अर्था येन सः ईश्वरोपि सन् अन्यथा कर्तुं नैछत् किं तु अनुमोदत यतः काल
रूपी २४ इति श्रीभागवते महापुराणे एकादशस्कंधे प्रथमोध्यायः ॥१॥ द्वितीये निमिजा

मत्स्यो गृहीतो मत्स्यघ्नैर्जालिनान्यैः सहार्णवे मत्स्योदरगतं लोहं स शल्ये लुब्धको क
रोत् २३ भगवान्ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा कर्तुं नैछद्विप्रशापं कालरूप्यन्वमो
दत ॥२४॥ इति भागवते महापुराणे एकादशस्कंधे प्रथमोध्यायः ॥१॥ श्रीशुक उवाच
गोविंदभुजगुप्तायां द्वारवत्यां कुरूद्वह अवात्सीन्नारदो भीक्ष्णं कृष्णोपासनलालसः

यं तत्संवासेनाह नारदः धर्मान्भागवतान्भक्त्या वसुदेवाय पृच्छते अभीक्ष्णं तस्यापि
पितोपि पुनः पुनः वासी दित्यर्थः ननु नारदस्य दक्षादिशापान्नैकत्र वासः संभवतीत्याशं
क्याह गोविंदभुजगुप्तायामिति न तत्र शापादेः प्रभाव इत्यर्थः कृष्णोपासने लालसा औ

[illegible]ः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द
२

यद्गुणेने मुक्तानामपीदृशमौत्सुक्यं तत्र कोनु नाम न भजेदित्याह कोन्विति इंद्रियवलमा त्र
मेव यत्राधिकारिविशेषणमित्यर्थः सर्वतः सर्वेष्वपि लोकेषु मृत्युर्यस्य सः २ यथापि
त्रोर्यात्रा आगमनं अपत्यानां स्वस्तये मंगलाय यथा चउत्तमश्लोकस्य वर्त्म भृतानाम

कोनु राजन्निंद्रियवान्मुकुंदचरणांबुजं न भजेत्सर्वतो मृत्युरुपास्यममरोत्तमैः २ तमे
कदा तु देवर्षिं वसुदेवो गृहागतं अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ३ वसुदेव
उवाच भगवन्भवतो यात्रा स्वस्तये सर्वदेहिनां कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्म
नां ४

हतां यात्रा कृपणानां [illegible] स्वस्तये [illegible]
[illegible] तथा भगवद्रूपस्य भवतो यात्रा सर्वदेहिनां स्वस्तय इति ४ नमो नम

राम
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवैरपिमहत्त्वामुपमानमनुचितमित्याह भूतानांदेवचरितमितिदेवचरितमतिरुष्या
दिना भूतानांदुःखायापि भवति तादृशांत्वयासदृशानांअच्युतआत्मायेषां ५ किं

भूतानांदेवचरितंदुःखायचसुखायच सुखायैवहिसाधूनांत्वादृशामच्युतात्मनां
५ भजंतियेयथादेवान्देवाअपितथैवतान् छायेवकर्मसचिवाःसाधवोदीनव
त्सलाः ६ ब्रह्मंस्तथापिपृच्छामो धर्मान्भागवतांस्तव यान्श्रुत्वाश्रद्धयामर्त्योमुच्यते
सर्वतोभयात् ७

सुखंकुर्वंतोपिदेवाभजनानुसारेणकुर्वंतिनतथासाधवइत्याहभ
जंतीति छायेव यथापुरुषोयावत्करोतितावदेवतस्यछायापि तथाकर्मसचिवाः
कर्मसहायाः ६ तदेवंयद्यपिभगवतआगमनमात्रेणैववयंकृतार्थास्तथापिपृच्छामःत

वैनितवयैर्द्धर्मैः प्रसन्नो भगवान्नृनामित्यर्थः ७

ननुत्वत्तोपिकमन्योभगवत्प्रसादस्यात्रभास्तितत्राहअहंकिलेतिमुविप्रजार्थोपूजयं
पुत्रलाभप्रयोजनःसन्पूजितवान् किलेतिस्मृतिगृहेभगवदुक्तमनुस्मरति ८ अतो
यथामुच्येमहि तथानोस्मान्शाधिशिक्षय विचित्राणिव्यसनानियास्मिन्तस्मात्सं

अहंकिलपुरानंतंप्रजार्थोभुविमुक्तिदं अपूजयंनमोक्षायमोहितोदेवमायया ८
यथाविचित्रव्यसनाद्भवद्भिर्विश्वतोभयात् मुच्येमह्यंजसैवाद्धातथानःशाधिसुव्र
तः९॥श्रीशुकः॥०॥राजन्नेवंकृतप्रश्नोवसुदेवेनधीमता प्रीतस्तमाहदेवर्षिर्हरेःसंस्मारि
तोगुणैः १०

सारात् तथाविश्वतःसर्वतोभयंय स्मिन्तस्मात् भवद्भिर्हेतुभूतैःअंज
साअनायासेन अद्धासाक्षात् ९ हरेर्गुणैर्वर्णनीयत्वेनप्रस्तुतैःहरिःसंस्मारितइत्यर्थः १० १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रीतिमाविष्करोति सम्यगितित्रिभिः पृछसे पृछसि विश्वभावनात् सर्वशोधकान् आदृ
तःआस्तिक्येनगृहीतः अनुमोदितःपरैःक्रियमाणःसंस्तुतः सद्धर्मोभागवतोधर्मः
देवद्रुहेवसुदेवेत्यर्थः यद्वादेवेभ्योविश्वस्मैचद्रुह्यंतियेतानपि ११ किंच त्वयामहानुपका

नारदउवाच॥सम्यगेतद्व्यवसितंभवतासात्वतर्षभ यत्पृछसेभागवतान्धर्मांस्त्वंविश्व
भावनान् ११ श्रुतोनुपठितोध्यातआदृतोवानुमोदितः सद्यःपुनातिसद्धर्मोदेवविश्व २
द्रुहोपिहि १२ त्वयापरमकल्याणःपुण्यश्रवणकीर्तनः स्मारितोभगवानद्यदेवोनारा
अत्राप्युदाहरंतीममितिहासंपुरा॰ यणोमम १३ तनं आर्षभाणांचसंवादंविदेहस्य
महात्मनः १४

रःकृतइत्याह त्वयेति पुण्यश्रवणकीर्तनेयस्यसः १३ अत्रापिभगवद्धर्मनिर्णयेपिविदे
हस्यजनकस्य १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए
११

आ र्षभाणामुत्पत्तिंसान्वयांविविच्यकथयतिसप्तभिःप्रियव्रतइति १५ मोक्षधर्माणांप्र
वर्त्तनेछया अवतीर्णंवासुदेवांशमाहुः तस्यचवेदपारगंसुतशतमासीत् १६ तेषाम्ऋष
भसुतानांमध्येनवयोगेश्वराणांचरितंवक्तुमितरेषांचरितंततोविविच्याहतेषामिति

प्रियव्रतोनामसुतोमनोःस्वायंभुवस्ययः तस्याग्नीध्रस्ततोनाभिऋषभस्तत्सुतःस्मृ
तः १५ तमाहुर्वासुदेवांशंमोक्षधर्मविवक्षया अवतीर्णंसुतशतंतस्यासीद्ब्रह्म
पारगं १६ तेषांतुभरतोज्येष्ठोनारायणपरायणः विख्यातंवर्षमेतद्यआम्नाभारत

सद्भुत ११

एतदजनाभंनामवर्षंयस्यनाम्ना भारतमितिसद्भुतंविख्यातमासीत् एत
न्नतस्यधर्म्मातिरेकोनिरूपितः १७ श्रीरामजयरामजयजयरामकृष्णपरमात्मने॰ ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमांपृथ्वींगृहान्निर्गतः हरिमुपासीनःसेवमानःसन् १८ नवसुताःनवद्वीपपतयःन
वानांब्रह्मावर्तादिनवखंडानांपतयः अस्यभारतवर्षस्यएकाशीतिःसुताःकर्ममार्ग
प्रवर्तकाब्राह्मणा अभवन् १९ अर्ध्वमंसिनःपरमार्थनिरूपकाःश्रमणाःश्रमवंतः

सम्भुक्तभोगांत्यक्त्वेमांनिर्गतस्तपसाहरिं उपासीनस्तत्पदवींलेभेवैजन्मभिस्त्रिभिः
१८ तेषांनववनवद्वीपपतयोस्यसमंततः कर्मतंत्रप्रणेतारएकाशीतिर्द्विजातयः १९
नवाभवन्महाभागामुनयोह्यर्थशंसिनः श्रमणावातरशनाआत्मविद्याविशारदाः २०

आत्माभ्यासेकृतश्रमाःस्यर्थः वातरशनादिगंबराःआत्मविद्यायांविशारदाःनिष्णा
ताः २० नमोनमोभगवतेश्रीकृष्णायनमोनमः नारायणायनमोनमः रामचंद्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषांपारमहंस्यचरितमाह द्वाभ्यां तएतइति भगवद्रूपंविश्वंपश्यंतःसदसदात्मकं
स्थूलसूक्ष्मरुपं तच्चस्वाव्यतिरेकेणपश्यंतः २१ अव्याहताअप्रतिहताइष्टाअभिप्रेता

कविर्हरिरंतरिक्षःप्रबुद्धःपिप्पलायनः आविर्होत्रोथद्रुविलश्चमसःकरभाजनः २१
तएतेभगवद्रूपंविश्वंसदसदात्मकं आत्मनोव्यतिरेकेणपश्यंतोव्यचरन्महीं २२ ७
अव्याहते ष्टगतयःसुरसिद्धसाध्यगंधर्वयक्षनराकिंनरनागलोकान् मुक्ताश्च
रंतिमुनिचारणभूतनाथविद्याधरद्विजगवांभुवनानिकामं २३ तएकदानिमेःसत्रमु
पजग्मुर्यदृच्छया वितायमानमृषिभिरजनाभेमहात्मनः २४

गतिर्येषांतेमुक्ताअना
सक्ताः २३ महात्मनोनिमेर्वितायमानंअनुष्ठीयमानंअजनाभेभारतवर्षे २४ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यजमानोनिमिः अग्नयआहवनीयादयः विप्राकविगादयः २४ अभिप्रेत्यज्ञात्वा
२६ स्वरुचैवरोचमानान्नत्वाभरणादिप्रकाशैः ब्रह्मपुत्रोपमान्सनत्कुमारादिस

तान्दृष्ट्वासूर्यसंकाशान्महाभागवतान्नृप यजमानोग्नयोविप्राःसर्वएवोपतस्थिरे
२५ विदेहस्तानभिप्रेत्यनारायणपरायणान् प्रीतःसंपूजयांचक्रेआसनस्थान्यथार्ह
तः २६ तान्रोचमानान्स्वरुचाब्रह्मपुत्रोपमान्नव पप्रच्छपरम प्रीतःप्रश्रयावन
तोनृपः २७ ॥ विदेह उवाच ॥ मन्येभगवतःसाक्षात्पार्षदान्वोमधुद्विषः विष्णोर्भूता
निलोकानांपावनायचरंतिहि २८

दृशान् २७ परमप्रीतःसातिशयंनमाभिनंदतिद्वाभ्यां मन्य
इति ननुभगवतःपार्षदानांकथमत्रोपलब्धिस्तत्राह विष्णोरिति विष्णुभक्तालोकपा
वनार्थंसर्वत्रपर्यटंतीत्यर्थः २८

श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयादुर्ल्लभंलब्धंअहोभाग्यमित्याह दुर्ल्लभइति बहवोदेहाभवंतियेषांतेदेहिनोजीवास्ते
षांक्षणभंगुरोपिमानुषोदेहोदुर्ल्लभः परमपुरुषार्थसाधनत्वात्वैकुंठःप्रियोयेषांवैकुंठ
स्यवाप्रियास्तेषांदर्शनं २९ हेअनघाःनिरवद्याः भवंतःयुष्मानात्यंतिकंक्षेमंपृच्छामःय

दुर्ल्लभोमानुषोदेहोदेहिनांक्षणभंगुरः तत्रापिदुर्ल्लभंमन्येवैकुंठप्रियदर्शनं २९
अतआत्यंतिकंक्षेमंपृच्छामोभवतोनघाः संसारेस्मिन्क्षणार्द्धोपिसत्संगःशेवधिर्नृ
णां ३०

तःक्षणार्द्धकालभवोपिसत्संगःशेवधिर्निधिःनिधिलाभेयथानंदोभवतितथात्रप
रमानंदइत्यर्थः ३० नमोभगवतेवासुदेवायनमोनमः रामायनमोनमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदर्थंचभागवतान्धर्म्मान्ब्रूतयदिनोस्माकंश्रुतयेश्रवणायक्षमंयोग्यंभवति कथंभू
तान् यैर्ईदृशैःप्रपन्नायभक्तायाजोहरिःआत्मानमपिदास्यतितान् ३१ सद्भ्सदस्यैर्कल्मि
भिश्चवर्त्तमानंतेपिभगवद्धर्म्मश्रवणपराबभूवुरित्यर्थः भगवद्धर्मंतद्भक्तमायातत्तर

धर्मान्भागवतान्ब्रूतयदिनःश्रुतयेक्षमं यैःप्रपन्नःप्रपन्नायदा
स्यत्यात्मानमं जः ३१॥नारदउवाच॥ एवंतेनिमिनापृष्टावसुदे
वमहत्तमाः प्रतिपूज्याब्रुवन्प्रीत्यासासदस्यर्त्विजंनृप ३२

णानिच ब्रह्मकर्मावतारेहाभक्तप्राप्ययुगक्रमात् ह्यातुंक्रमेणकृतवान्नवप्रश्नान्निमि
र्नवएकैकस्योत्तरंप्रोचुः कविमुख्यामुनीश्वराः ३२ नमोभगवतेश्रीकृष्णायनमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भयममास्येतिकंक्षेमंकथयाति मन्यइति नकुतश्चिद्भयंयस्मात्तदकुतश्चिद्भयंअसं
सारेअसदात्मभावात् असतिदेहादावात्मभावात् नित्यंसर्वदाउद्विग्नबुद्धेः विश्वा
त्मनासर्वथानिःशेषंयत्रपादांबुजोपासनेभीर्निवर्त्ततेत त् ३३ भागवतधर्म्मलक्ष
कविरुवाच ॥ मन्येकुतश्चिद्भयमच्युतस्यपादांबुजोपासनमत्रनित्यं उद्विग्नबुद्धेरसदा
त्मभावाद्विश्वात्मनायत्रनिवर्त्ततेभीः ३३ येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये
न् अंजःपुंसामविदुषांविद्धिभागवतान्हितान् ३४
णमाह येवैइति मन्वादिमुखेनवर्णाश्रमा
दिधर्मानुक्तानिरहस्यत्वात्स्वमुखेनैवभगवताअविदुषामपिपुंसांअंजः सुखेनैवात्म १४
लब्धयेयेवैउपायाःप्रोक्ताः तान्भागवतधर्म्मान्विद्धि ३४ नमोभगवतेकृष्णाय ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वापयंतंयस्तुमध्येबोधयेत्वामचेतनः सत्वयादृष्टभस्मीभवतुतत्क्षणात्
२२ यवनेभस्मसान्नीतेभगवान्सात्वतर्षभः आत्मानंदर्शयामासमुचुकुं
दायधीमते २३ तमालोक्यघनश्यामंपीतकौशेयवाससं श्रीवत्सवक्षसं
भ्राजत्कौस्तुभेनविराजितं २४ चतुर्भुजंरोचमानंवैजयंत्याचमालया अ
पीच्यवयसंमत्तमृगेंद्रोदारविक्रमं २६ × चारुप्रसन्नवदनंस्फुरन्मकरकुंड
लं २५ प्रेक्षणीयंनृलोकस्यसानुरागस्मितेक्षणं × २६ पर्यपृच्छन्महा
बुद्धिस्तेजसातस्यधर्षितः शंकितःशनकैराजादुर्द्धर्षमिवतेजसा २७ श्री

रामजयरामजयपति

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपिनेअरण्येतत्रापिगिरिगह्वरेदुःप्रवेशस्थानेतत्रापिउरुकंटकेपद्मपलाशसदृशा

मुचुकुंद उ० कोभवानिहसंप्राप्तोविपिनेगिरिगह्वरे पद्भ्यांपद्मपलाशाभ्यां
विचरस्युरुकंटके २८ किंस्वित्तेजस्विनांतेजोभगवान्वाविभावसुः सूर्यःसोमो
महेंद्रोवालोकपालोपरोपिवा २९ मन्येत्वांदेवदेवानांत्रयाणांपुरुषर्षभं यद्बा
धसेगुहाध्वांतंप्रदीपःप्रभयायथा ३० शुश्रूषतामव्यलीकमस्माकंनरपुंग
व स्वजन्मकर्मगोत्रंवाकथ्यतांयदिरोचते ३१ वयंतुपुरुषव्याघ्रऐक्ष्वाकाः
क्षत्रबंधवः मुचुकुंदइतिप्रोक्तोयौवनाश्वात्मजःप्रभो ३२

भ्यांपद्भ्यांविचर
सीति २८ तेजःमूर्त्तिःप्रभावोदीप्तिर्वा २९ सर्वत्रापरितोषादाहमन्यइति पुरुषर्ष
भंश्रीविष्णुंगुहाध्वांतअंतस्तमः ३०

CC-0, In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यपुत्रोहं २

वयंत्विति वंश्याभिप्रायेण बहुवचनं तेषु अहं मुचुकुंद इति प्रोक्तः युवनाश्वो मांधा
तुः पिता अतो मांधाता यौवनाश्वः ३२ ३५ ३७ क्वचित्कदाचित्कस्मिंश्चित्ययपि

चिरप्रजागरश्रांतो निद्रयोपहतेंद्रियः शयेस्मिन्विजने कामं केनाप्युत्थापितो
धुना ३३ सोपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना अनंतरं भवान्श्रीमाल्
क्षितो मित्रशातन ३४ तेजसा तिविषह्येण भूरि द्रष्टुं न शक्नुमः हतौजसो
महाभाग माननीयोसि देहिनां ३५ एवं संभाषितो राज्ञा भगवान्भूतभा
वनः प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ३६ ॥श्रीभगवानुवाच॥ जन्मक
र्माभिधानानि संति मेंग सहस्रशः न शक्यं ते नु संख्यातुमनंतत्वान्मयापि हि ३७
क्वचिद्रजांसि विममे पार्थिवान्युरुजन्मभिः गुणकर्माभिधानानि न मे जन्मानि

कर्हिचित् ३ २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजांस्यपिविममेगणितवान् तथापिनजन्मानि कर्माणिविमिमीते ३८ ३९ ४१

कालत्रयोपपन्नानिजन्मकर्माणिमेनृप अनुक्रमंतोनैवांतंगच्छंतिपरमर्षयः
३९ तथाप्यद्यतनान्यंगशृणुष्वगदतोमम विज्ञापितोविरंच्येनपुराहंधर्मगुप्त
ये ४० भूमेर्भारायमाणानामसुराणांक्षयायच ४० अवतीर्णोयदुकुलेगृह
आनकदुंदुभेः वदंतिवासुदेवेतिवसुदेवसुतंहिमां ४१ कालनेमिर्हतःकंसः
प्रलंबाद्याःसुरद्विषः अयंचयवनोदग्धोराजंस्तेतिग्मचक्षुषा ४२ सोहंत
वानुग्रहार्थंगुहामेतामुपागतः प्रार्थितःप्रचुरंपूर्वंत्वयाहंभक्तवत्सलः ४३

तेतिग्मचक्षुषानिमित्तेनमयैवदग्धः ४२ ४३ श्रीरामचंद्रायनमः श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰
५५

अपूर्णोहमितिशोचितुंयद्वा अन्यैर्दत्तेषुवरेषुक्षीयमाणेषुयथाशोचतिनैवंमांप्रप
न्नःमद्दत्तवराणामक्षयत्वादितिभावः ॥५१॥ अष्टाविंशतिमेयुगेभगवानवतरिष्य

वरान्वृणीष्वराजर्षेसर्वान्कामान्ददामिते मांप्रपन्नोजनःकश्चिन्नभूयोर्ह
तिशोचितुं ॥५१॥ ॥मुकुंद उ०॥ इत्युक्तस्तंप्रणम्याहमुचुकुंदोमुदान्वितः ज्ञात्वानारा
यणंदेवंगर्गवाक्यमनुस्मरन् ॥५२॥ मुचुकुंद उ० विमोहितोयंजनईशमायया
त्वदीययात्वांनभजत्यनर्थदृक् सुखायदुःखप्रभवेषुसज्जतेगृहेषुयोषित्पु
रुषश्चवंचितः ॥५३॥

तीति वृद्धगर्गवाक्यंअनुस्मरन्नित्यर्थः ॥५२॥ त्वद्भक्तिरेवकेव
लंदुर्लभा कामास्तुतुच्छानवरणयोग्याइत्याशयेनाभक्तानांसंसारमष्टभिःप्रपं
चयन्स्तौतिविमोहितइति हेईशयोषित्पुरुषश्चेतिद्विविधोप्ययंजनः त्वदीय ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यामायया विमोहिताअनोनर्थदृक् अर्थपरमार्थस्वरूपंतांनपश्यंतीतितथा अ
तस्त्वांनभजंति किंतुपरस्परंवंचितः सन्सुखेच्छयादुःखानामेवप्रभवोयेषुतेषु
गृहेषुअवसज्जनइति ४६ किंचकामसुखंसूकरादिष्वपिसंभवति भगवद्भज

लब्ध्वाजनोदुर्लभमत्रमानुषंकथंचिदव्यंगमयत्नतोनघ ॥
पादारविंदंनभजत्यसन्मतिर्गृहांधकूपेपतितोयथापशुः ४७

नंतुनमानुषजन्मव्यतिरेकेणेतिमानुषत्वंप्राप्यत्वामभजन्नतिमूढइत्याह ल
ब्ध्वेति अत्रकर्मभूमौअव्यंगंअविकलांगंकिंच असतिविषयसुखेमतिर्यस्य
सः गृहमेवांधकूपस्तस्मिन्निपतितः यथापशुस्तृणलुब्धोंधकूपेपततीति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्व
१९

नकेवलमस्यजनस्येयंगतिः किंतुममापितथैवेसाहममैषइति मर्त्यैशरीरेआत्म
बुद्धिर्यस्यतस्यममम अतएवसुतादिषुआसज्जमानस्य ४८ उन्नद्धमदत्वंप्रपंचय

ममैषकालोजितनिष्फलोगतोराज्यश्रियोन्नद्धमदस्यभूपतेः मर्त्या
त्मबुद्धेःसुतदारकोशभूष्वासज्जमानस्यदुरंतचिंतया ४८ कलेव
रेस्मिन्घटकुड्यसंनिभेनिरूढमानोनरदेवइत्यहं वृतोरथेभाश्वप
दात्यनीकपैर्गांपर्य्यटंस्त्वागणयन्सुदुर्मदः ४८

यतिकलेवरइतिघटकुड्या
दिसदृशे दृश्ये ऽनात्मनियतएवंसुदुर्मदोफवंअतोममैषकालोनिष्फलोगतइति

त्वामगणयंतं त्वमाक्रमसीत्याह प्रमत्तमिति प्रमत्तमनवहितं त्वामंतकमविग
णय्य देहादिष्वासक्तमिति यावत् कुतः प्रमत्तं इतिकृत्यचिंतया एवमेवं करणीय

५ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं
त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोहिरिवाखुमंतकः ॥५०॥

मिति मनोरथपरंपरया मनोरथे भग्नेपि विषयेषु लालसमुत्सुकं प्राप्तेपि पुनः प्र
वृद्धो लोभस्तृष्णा यस्य तं अंतकस्त्वमभिपद्यसे अभिभवसीत्यर्थः क्षुधा सृक्किणी
लेलिहानो अहिराखुं मूषकमिवेति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच कालात्मनात्वयाभिपन्नोदेहएवंभवतीत्याह पुरेति श्वसृगालादिभिर्भ
सं क्षितोविट्संज्ञितः नैरभक्षितः कृमिसंज्ञितः दग्धोभस्मसंज्ञितोभवतीति बुध्या
विचार्यैवंभूतेशरीरेममतांकुर्वंतोजनाहरिंनाराधयंतितेआत्मनिशत्रुभूता

पुरारथैर्हैमपरिष्कृतैश्चरन्मतंगजैर्वानरदेवसंज्ञितः ६
सएवकालेनदुरत्ययेनतेकलेवरोविट्कृमिभस्मसंज्ञि ।८

ज्ञेयाःसततंयतःयोनेःसहस्राणिबहूनिगत्वादुःखेनलब्ध्वापिचमानुषत्वं सु
खावहंयेनभजंतिविष्णुंतेवैमनुष्यात्मनिशत्रुभूताः ५१ श्रीरामचंद्रायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचअंतकथासैःप्रागपिदिग्विजयिनोराज्ञोपिपारतंत्र्यदुःखंतदवस्थमेवेत्याहनि
र्जित्येति अभूतविग्रहः अविद्यमानसंग्रामःपूर्वंयेसमानाराजानस्तैराजभिर्वं
दितोपिमिथुनीभावःसुरतमेवपरंयेषुतेषुयोषितांगृहेषुक्रीडामृगइवदृश्यतेतस्त

निर्जित्यदिक्चक्रमभूतविग्रहोवरासनस्थःसमराजवंदितः गृहेषुमैथुन्य
सुखेषुयोषितांक्रीडामृगःपूरुषईशनीयते ५२ करोतिकर्माणितपस्सुनिष्ठि
तोनिवृत्तभोगस्तदपेक्षयादृढं पुनश्चभूयेयमहंस्वराडितिप्रवृद्धतर्षोनसु
खायकल्पते ५३

तोनीयते ५२ किंचतत्रातितृष्णा कुलस्यनभोगलक्षणःकश्चिदस्ति
इत्याहकरोतीतितपसिअधःशयनब्रह्मचर्यादौसुनिष्ठितःपुनश्चस्वराडिंद्रःस्यामि
तियद्राजन्मांतरेष्वेवमेवचक्रवर्तीस्यामिति ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰
१८

तदेवमष्टभिः श्लोकैरीशबहिर्मुखानां संसारं प्रपंच्य भक्त्यैव तन्निवृत्तिक्रममाह भवाप
वर्ग इति भो अच्युत भ्रमतः संसरतो जनस्य यदा त्वदनुग्रहेण भवस्य बंधस्य अपव
र्गः अंतो भवेत् प्राप्तकालः स्यात्तदा सतां संगमो भवेत् यदा च सत्संगमो भवेत्

भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः सत्संगमो यर्हि त
दैव सद्गतौ परावरेशे त्वयि जायते मतिः ५४ मन्ये ममानुग्रह ईश ते कृतो रा
ज्यानुबंधापगमो यदृच्छया यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिर
खंडभूमिपैः ५५

तदा सर्वसंग निरस्य अकार्यकारण नियंतरि त्वयि भक्तिर्भवति ततो
मुच्यत इत्यर्थः ५४ मम तु सत्संगमात्पूर्वमेव यो राज्यादिसंगविच्छेदो जातः सोयं त्व
या महाननुग्रहः कृत इत्यॉ मन्य इति ते त्वया साधुभिर्विवेकिभिस्तपसे वनं प्रवेष्टु मि
च्छद्भिः स्वयं त्यक्तुं अलभमानैः प्रार्थ्यत इति ५५ १८

ह

नदेवंविषयसेवामार्गंभगवत्सेवामार्गंचविविच्यवरानूवृणीष्वेतियदुक्तं तत्रो
त्तरमाहनकामयइति अकिंचनानिरस्ताभिमानाः आर्योविवेकी ५६ रजस्तमः

नकामयेन्यंतवपादसेवनादकिंचनप्रार्थ्यतमाद्वरंविभो आराध्यक
स्त्वांह्यपवर्गदंहरेवृणीतआर्योवरमात्मबंधनं ५६ तस्माद्विसृज्या
शिषईशसर्वतोरजस्तमःसत्वगुणानुबंधनाः निरंजनंनिर्गुणम
द्वयंपरंत्वांज्ञप्तिमात्रंपुरुषंव्रजाम्यहं ५७ सत्वगुणैरनुबध्यंतइतितथा

ताः ऐश्वर्यादिशत्रुमरणादिधर्मादिरूपाः विसृज्यपरंपुरुषमीश्वरंज्ञप्तिमात्रं
ज्ञानघनंकुतःनिरंजनंनतःकुतःनिर्गुणंतदपिकुतःअद्वयंअतएवअक्षरंत्वांशरणं

२

आशिषः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं०
१०

मुंचनावज्ञोगान् कैवल्यं तु करस्थमेवेति पुनर्वरैः प्रलोभयंतं श्रीकृष्णं पादोपग्रहणे
नप्रार्थयते चिरमिति वृजिनैः कर्मफलैरार्त्तः पुनस्तद्वासनाभिस्तप्यमानस्तथा
पि अवितृषषडमित्रः त्वेवतृषानविगततृष्णाः षडमित्राः शत्रव इंद्रियलक्षणाः

चिरमिह वृजिनार्त्तस्तप्यमानोनुतापैरवितृषषडमित्रोलब्धशांतिः कथंचित् श
रणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि मापन्नमीश ५८ श्री
भगवानुवाच सार्वभौम महाराज मतिस्ते विमलोर्ज्जिता वरैः प्रलोभितस्यापि
नकामैर्विहतायतः ५९

यस्य सः अतएव अलब्धशांतिः कथंचिद्दैववशेन लब्धशांतिरिति वा शरणं स्व
ज्ञानं तद्ददातीति तथा हे शरणद समुपेतः प्राप्तोहं अशोकत्वे हेतुः कृतं आपन्नं
आपदाव्याप्तं पाहीति ॥५८॥

अभयं तत्रापि हेतुः

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रमादाय प्रमादायन भवस्येव कुत इत्यंत आह न धीरिति एकांतभक्तानां धी
राशीर्भिः भासाभिरपि न भिद्यते नासज्जत इत्यर्थः ६० व्यतिरेकमाह युंजानाना

प्रलोभितो वरैर्यस्त्वमप्रमादाय विद्धि तत् न धीर्मय्येकभक्तानामाशीर्भिर्भि
द्यते क्वचित् ६० युंजानानामभक्तानां प्राणायामादिभिर्मनः अक्षीणवासनं
राजन् दृश्यते पुनरुत्थितं ६१ विचरस्व महीं कामं मय्यावेशितमानसः अस्त्वे
वं नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ६२ क्षात्रधर्मस्थितो जंतून्न्यवधीर्मृग
यादिभिः समाहितस्तत्तपसा जह्यघं मदुपाश्रितः ६३ जन्मन्यनंतरे राजन् स
र्वभूतसुहृत्तमः भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलं ६४ मिति तत्र स्थितं विषया
भिमुखं ६१ तुभ्यं तव ६२ युत्स्याभासेन भीषयंस्तपसि लोकसंग्रहेण वर्त्तयति क्षा

मे

इतिदशमेएकपंचाशत्तमः ॥५१॥ द्विपंचाशत्तेंऽ धावन्भयादिवगतःपुरीं अन्वमोद

इतिश्रीभा०म०पुराणेद०म स्कंधेयवनवधमुचुकुंदस्तुतिर्नामैकपंचाशत्तमोध्या
य ॥५१॥ श्रुकउवाच ॥ इत्थंसोनुग्रहीतोंगकृष्णेनेक्ष्वाकुनंदनः तंपरिक्रम्य
सन्नम्यनिश्चक्रामगुहामुखात् १ सवीक्ष्यक्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्प
तीन् मत्वाकलियुगंप्राप्तंजगामदिशमुत्तरां २ तपःश्रद्धायुतोधीरोनिःसं
गोमुक्तसंशयः समाधायमनःकृष्णेप्राविशद्गंधमादनं ३ बदर्याश्रममासा
द्यनरनारायणालयं सर्वद्वंद्वसहःशांतस्तपसाराधयद्धरिं ४ तसंदेशंरुक्मि
ण्याद्विजवर्णितं १ क्षुल्लकान्अल्पप्रमाणान् २ तपसिश्रद्धायुतः तत्रचबदर्याश्रमं
४

क्षणेन हरिं आराधयत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे.

निन्येनयनमार्गेचलतिस्म ५ ६ वेगरभसँगोद्देकं ७ भीरुभीनवत्भीरोरपि

भगवान्पुनराव्रज्यपुरींयवनवेष्टितां हत्वाम्लेछबलंनिन्येनदीयंद्वारकांध
नं ५ नीयमानेधनेगोभिर्नृभिश्चाच्युतचोदितैः आजगामजरासंधस्त्रयो
विंशत्यनीकपः ६ विलोक्यवेगरभसंरिपुसैन्यस्यमाधवौ मनुष्यचेष्टा
मापन्नौराजन्दुद्रुवतुर्द्रुतं ७ विहायवित्तंप्रचुरमभीतोभीरुभीतव
त् पद्मांपद्मपलाशाभ्यांचेलतुर्बहुयोजनं ८ पलायमानौतौदृष्ट्वामा
गधःप्रहसन्बली अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ९ भीराम

भीतवत्अ तिभीतवदित्यर्थः चेलतुःपलायेतांबहुयोजनंदेशं ८ अप्रमा
णवित्प्रमाणमियत्तातन्नवेत्तीतितथा ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुंगंएकादशयोजनोन्नतं प्रकर्षेणवर्षत्यस्मिन्निति प्रवर्षणइत्साख्यायस्यतंतदा
हभगवान् ईढः १० तत्राविचिन्वन्नपितयोः पदं निलयस्थानमनधिगम्य ११

प्रद्रुत्यदूरंसंश्रांतौतुंगमारुहतांगिरिं प्रवर्षणाख्यंभगवान्नित्यदायत्रवर्ष
ति १० गिरौनिलीनावाज्ञायनाधिगम्यपदंनृप ददाहगिरिमेधोभिःसमंतादं
ग्निमुत्सृजन् ११ ततउत्पत्यतरसाद्रुह्यमानाउभौनदात् दशैकयोजनोत्तुंग
न्निपेततुरधोभुवि १२ अलक्ष्यमाणौरिपुणासानुगेनयदूत्तमौ स्वपुरंपुन
रायातौसमुद्रपरिखांनृप १३ सोपिदग्धावितिमृषामन्वानोबलकेशवौ ब
लमाकृष्यसुमहन्मगधान्मागधोययौ १४ ततोगिरेः दशचैकंचयानियोजना
निताबुत्तुंगंमागधसंरोधदेशमतिक्रम्यपरतोधोनिपेततुः १२ १३ १४ १४५

नृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णस्यविवाहंनिरूपयितुंबलदेवविवाहंनवमस्कंधोक्तमनुस्मारयति आ
नर्त्तेति १५ मात्रांकल्लां १६ गरुडोयथादेवान्प्रमथ्यसुधामहरत् तथेति १७

आनर्त्ताधिपतिःश्रीमान्रैवतोरेवतींसुतां ब्रह्मणाचोदितःप्रादाद्बलायेति
पुरोदितं १५ भगवानपिगोविंदउपयेमेकुरूद्वह वैदर्भीभीष्मकसुतांश्रियो
मात्रांस्वयंवरे १६ प्रमथ्यतरसाराज्ञःशाल्वादींश्चैद्यपक्षगान् पश्यतांसर्व
लोकानांतार्क्ष्यपुत्रःसुधामिव १७ राजोवाच भगवन्भीष्मकसुतांरुक्मि
णींरुचिराननां राक्षसेनविधानेनउपयेमइतिश्रुतं १८

राक्षसोयुद्धहरणादि
तिस्मृतेः राज्ञःप्रमथ्येतिचत्वउक्त्याराक्षसेनविधानेनोपयेमेपरिणीतवानिति
श्रुतंपूर्वमेववासामान्यतएवश्रुतं १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषं तु श्रोतुमिच्छामः १९ श्रवणौत्सुक्यमाविष्करोति ब्रह्मन्निति पुण्याः महा

भगवन् श्रोतुमिच्छामः कृष्णस्यामिततेजसः यथा मागधशाल्वादीन्
जित्वा कन्यामुपाहरत् १९ ब्रह्मन् कृष्णकथाः पुण्या माध्वीर्लोकमलाप
हाः को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः २० शुक उवाच राजासी
द्भीष्मको नाम विदर्भाधिपतिर्महान् तस्य पंचाभवन्पुत्राः कन्यैका च
वरानना २१ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः रुक्मकेशो रुक्म
माली रुक्मिण्येषां स्वसा सती २२ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणश्रि
यः गृहागतैर्गीयमानास्तं मेने सदृशं पतिं २३

फलाः माध्वीः श्रुतिसुखाः लो
कस्य मलापहाश्च श्रृण्वँन् शृण्वन्नित्यर्थः श्रुतज्ञः श्रुतसारवित् नित्यनूतनाः प्रति
क्षणमाश्चर्यवत्प्रतीयमानाः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२४ चैद्यममन्यत तस्यावरमित्यर्थः २५ अवेस्यज्ञात्वा असितापांगीसुनीलक

तांबुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां कृष्णस्यसदृशींभार्यांसमुद्वोढुंम
नोदधे २४ बंधूनामिछतांदातुंकृष्णायभगिनींनृप ततोनिवार्यकृष्णद्विड्
रुक्मीचैद्यममन्यत २५ तदवेत्यासितापांगीवैदर्भीदुर्मनाभृशं विचिंत्याप्तंद्वि
जंकंचित्कृष्णायप्राहिणोद्द्रुतं २६ द्वारकांसससमभ्येत्यप्र तीहारैःप्रवेशितः अ
पश्यदाद्यंपुरुषमासीनंकांचनासने २७ दृष्ट्वाब्रह्मण्यदेवस्तमवरुह्यनिजा
सनात् उपवेश्यार्हयांचक्रे यथात्मानंदिवौकसः २८ तंभुक्तवंतंविश्रांतमुप
गम्यसतांगतिः पाणिनाभिमृशन्पादावव्यग्रस्तमपृछत २९

दासीकृष्णाय

कृष्णमानेतुंप्रेषयामास २६ प्रतीहारैर्द्वारपालैः २७ आत्मानंश्रीकृष्णं २८ अभिमृश

न्शनैःसंमर्दयन् २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लोकं

३० सधर्मोस्यब्राह्मणस्याखिलकामदोग्धायद्वासब्राह्मणोस्यविश्वस्याखिलका
मधुकृइति ३१ लोकानाप्नोतिलोकौंतरंपर्यटतिनैकत्रनिर्वृत्तास्तिष्ठतीत्यर्थः ना

कश्चिद्द्विजवरश्रेष्ठधर्मस्तेवद्वसंमतः वर्त्ततेनातिक्लिष्टेनसंतुष्टमनसःसदा
३० संतुष्टोयर्हिवर्त्तेतब्राह्मणोयेनकेनचित् अहीयमानःस्वाद्धर्मात्सस्य
स्याखिलकामधुक् ३१ असंतुष्टोसकृल्लोकानाप्नोत्यपिसुरेश्वरः अकिंचनो
पिसंतुष्टः शेतेसर्वांगविज्वरः ३२

प्नोतीतिपाठेसुरेश्व रोपिभूत्वालोकान्ना
प्नोत्युत्तमलोकान्प्राप्नोप्यप्राप्तवत्क्लिश्यतीत्यर्थः शेतेसुखमास्तइत्यर्थः न
देवाहसर्वेषुअंगेषुव्याध्यादिषुविज्वरस्तापरहितः ३२ श्रीकृष्णपरमात्मने॰॥

था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वलाभः स्वतएवप्राप्तोलाभः आत्मलाभोवातेनसंतुष्टान्पूर्णान्साधून्स्वधर्मनिष्ठा
न् ३३ यस्यराज्ञोविषयेदेशे ३४ यतःस्थानात् यदिछयायत्कार्येछयाउुर्गंसमुद्रं

विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् निरहंकारिणःशांतान्न
मस्येशिरसाऽसकृत् ३३ कच्चिद्वःकुशलंब्रह्मन्राजतोयस्यहिप्रजाः
सुखंवसंतिविषयेपाल्यमानाःसमेप्रियः ३४ यतस्त्वमागतोदुर्गंनि
स्तीर्येहयदृछया सर्वंनोब्रूह्यगुह्यंचेत्किंकार्यंकरवामते ३५ एवंसंपृ
ष्टसंप्रश्नोब्राह्मणःपरमेष्ठिना लीलागृहीतदेहेनतस्मैसर्वमवर्णयत् ३६

३५ संपृष्टःसंप्रश्नःप्रष्टव्योर्थोयस्यसः परमेष्ठिनापरमेश्वरेण बंधूनामभिप्रेत
रुक्मिण्याश्चेष्टितमित्यादिसर्वं ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
२४

रुक्मिण्यास्वयमेकांतेलिखित्वादत्तपत्रिकां मुद्रामुन्मुच्यकृष्णायप्रेमचिन्हामद
र्शयत् ब्राह्मणः श्रीकृष्णानुज्ञयावाचयति श्रुत्वेति अयमर्थः हेअच्युतहेभुवन
सुंदरेति औत्सुक्यंद्योतयति कृतवमहिमाकचाहंरूपकुलशीलादियुक्तापि न

रुक्मिण्युवाच ॥ श्रुत्वागुणान्भुवनसुंदरशृण्वतांतेनिर्विश्यकर्णविवरैर्हरतोंगतापं रूपंदृशांदृशिमतामखिलार्थलाभंत्वय्यच्युताविशतिचित्तमपत्रपं मे ३७

थापिअपगतात्रपायस्मात्तन्मेचित्तंत्वयिआविशति आसज्जतेनतु
तस्तत्राहशृण्वतांकर्णविवरैरंतःप्रविश्यअंगेतिपृथक्संबोधनंवाहरतस्तवगु
णान्श्रुत्वातथादृशिमतांचक्षुष्मतांदृशामखिलार्थलाभात्मकंरूपंचश्रुत्वेति ३७

अंगतापं २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो कुलकन्यानामिदमतिधार्ष्ट्यमिति मां शंकयिस्या हकाेतेति हे मुकुंद नृसिंह नरश्रेष्ठ कानाम कन्या कुलवती तथा महती गुणोदारा न याधीराधीमती त्वां पतिं न वृणीत मय्येव केयं दोषशंकेति भावः कथंभूतं गुणशीलादिभिरात्मनैव

कान्ता मुकुंद महती कुलशीलरूपविद्यावयोद्रविण
धामभिरात्मतुल्यं धीरा पतिं कुलवती न वृणीत
कन्या काले नृसिंह नरलोकमनोभिरामम् ३८

तुल्यं निरूपममित्यर्थः द्रविणं द्रव्यसंपत् धाम प्रभावः तथा नरलोकस्य मन सां अभिरामो भिरमणं यस्मात्तं किंच काले विवाहावसरे ३८ श्रीरामचंद्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५ हे विभो तत्तस्मान्मे मया भवान् खलु पतिर्वृतः आत्मा च भवतोऽर्पितः अतस्त्वमत्राग
त्य मां भवतो जायां विधेहि विपक्षे बाधकं घोतयंस्या हमा वीरभागमिति वीरस्यत
व भागं आराच्छीघ्रमेत्यागत्य चैद्यो माभिमर्शतु मास्पृशतु मृगपतेर्बलिं गोमायुः
तन्मे भवान् खलु वृत्तः पतिरंग जायामात्मार्पितश्च भवतोऽत्र विभो विधेहि मावी
रभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष ३९ पूर्तेष्टदत्त
नियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान्परेशः आराधितो यदि गदा
ग्रजएत्य पाणिं गृह्णातु मे न दमघोषसुतादयोऽन्ये ४० शृगालइवेति ३९ अ
नेकजन्मकृतैरिदमेव भूयादिति प्रार्थयते पूर्तेति पूर्तं कूपादि इष्टमग्निहोत्रादि
दत्तं हिरण्यादि नियमस्तीर्थाटनादिव्रतं कृच्छ्रादि ४० श्री० २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चैद्यायबंधुभिरर्पितायांत्वयिकिमधुनाकरणीयमित्यपेक्षायामाहश्वोभाविनी
तिहेअजितश्वोभाविनिउद्वहनेविवाहेअग्रथमंगुप्तः अलक्षितएवागत्यपश्चात्पृ

॥ श्वोभाविनित्वमजितोद्वहनेविदर्भान्गुप्तःसमेत्यपृतन
॥ नापतिभिःपरीतः निर्मथ्यचैद्यमगधेंद्रबलंप्रसह्यमां २७
राक्षसेनविधिनोद्वहवीर्यशुल्कां ४१ श्रीरामकृष्णपर०

तनापतिभिःपरिवृतःसन्चैद्यादिबलंनिर्मथ्यप्रसह्यहठात्वीर्यप्रभावदर्श
नमेवशुल्कंवैवाहिकंदेयंयस्यास्तांमांअनेनराक्षसविधिनोद्वहेतिउपदेशरहस्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुभवतुशिशुपालादिबलप्रमथनं अंतःपुरमध्यगतांस्तवहरणेत्वद्बंधुवधोपि
प्रसज्येतेस्यतआहअंतःपुरेति पुराद्बहिर्वर्त्तमानांगिरिजामंबिकांअंबिकाग्र

अंतःपुरांतरचरीमनिहत्यबंधूंस्त्वामुद्वहे कथमितिप्रवदाम्यु
पायं पूर्वेद्युरस्तिमहतीकुलदैवियात्रायस्यांबहिर्नववधूर्गि
रिजामुपेयात् ४२

हादेवमहेमेरणंसुकरमितिभावः ४२ श्रीरामजयरामजयजयरामकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

ननुकिमनेनानर्थकारिणानिर्बंधेनचैद्योपितावत्स्वख्यातगुणकर्मयोग्यएव
रइतितत्राहयस्येतिहेअंबुजाक्षभवतोंघ्रिपंकजरजोभिःस्नपनंआत्मतमस
मसोपहत्यैउमापतिरिवमहांतोवांछंतितस्यभवतःप्रसादंयद्यहंनलभेयंत

यस्यांघ्रिपंकजरजःस्नपनंमहांतोवांछंत्युमापतिरिवात्मतमोपहत्यै यद्यं
बुजाक्षनलभेयभवत्प्रसादंजह्यामसून्व्रतकृशान् शतजन्मभिःस्यात्
४२ ब्राह्मण ॥ ० ॥ इत्येतेनगुह्यसंदेशायउदेवमयाकृताः विमृश्यकर्त्तुयच्चा
त्रक्रियतांतदनंतरं ४४

श्राम्युयांनार्हिव्रतैरुपवासादिभिःकृशान्असून्प्राणान्
जह्यांत्यजेयं ततःकिमित्यतआहशतजन्मभिरिति एवमेववारंजह्यांयावच्छत
जन्मभिरपितवप्रसादःस्यादिति ४३ अत्रयत्कर्त्तुंकरणीयंतद्विमृश्यक्रियतांत
च्चानंतरमेवक्रियतामिति ४४

वारं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति द्वाभे द्विपं चाशत्तमः ॥५२॥ त्रिपंचाशत्तमे गत्वा विदर्भान्कृष्णेनेहितः रुक्मिणीमहरत्कृ
ष्णो मिषतां द्विषतां बलात् ११ निद्राया अलाभे कारणांतरं वेदेति तया अकथि

इति श्रीभागवते म॰द॰ रुक्मिण्युद्वाहे द्विपंचाशत्तमोध्यायः ॥५२॥ श्रीशुक उ॰
वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः प्रगृह्य पाणिना पाणिं प्रहसन्नृद्विज
मब्रवीत् १ ॥श्रीभगवानु॰॥ तथाहमपि तच्चित्तो निद्रां च न लभे निशि वेदाहं
रुक्मिणा द्वेषान्ममोद्वाहो निवारितः २ तामानयिष्य उन्मथ्य राजन्यापसदान्
मृधे मत्परामनवद्यांगीमेधसोग्निशिखामिव ३

तमप्यहं जानामीति २ आ
नयिष्ये आनयिष्यामि राजन्यापसदान् राजसु हीनान् उन्मथ्य आनयने दृष्टांतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्वाहर्क्षमिति परश्वोरात्रौविवाहनक्षत्रमिति विज्ञायतस्यांरात्र्यांप्रस्थायप्रा
तर्विदर्भदेशानगमत् श्वोभाविनित्वमजितोद्वहनेविदर्भानगुप्तः समेत्ये

उद्वाहर्क्षंचविज्ञायरुक्मिण्यामधुसूदनः रथः संयुज्यतामाशुदारुकेत्याह
सारथिं ४ सचाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः युक्तंरथमुपानीयत
स्थौप्रांजलिरग्रतः ५ आरुह्यस्यंदनंशौरिर्द्विजमारोप्यतूर्णगैः आनर्त्तादे
करात्रेणविदर्भानगमद्धयैः ६ राजासकुंडिनपतिः पुत्रस्नेहवशंगतः शिशु
पालायस्वांकन्यांदास्यन्कर्माण्यकारयत ७

तिरुक्मिणीसंदेशात् ४ शैब्यइत्या
दीनिचत्वारिअश्वनामानि ५ ६ पुत्रस्यरुक्मिणः स्नेहेनतद्वशमनुगछतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा अनेनाशिशुपालेभिरुचिंद्योतयनिकर्माणिपुरालंकार पितृदेवार्च्चनानि ७
तान्येवाह पुरमित्यादिचतुर्भिः संमृष्टाः संसिक्ताश्चमार्गादयोयस्मिन् ततुवि

पुरंसंमृष्टसंसिक्तमार्गरथ्याचतुष्पथं चित्रध्वजपताकाभिस्तोरणैःसम
लंकृतं ८ स्रगंधमाल्याभरणैर्विरजोंबरभूषितैः जुष्टंस्त्रिपुरुषैः श्रीम
द्गृहैरगरुधूपितैः ९ पितॄन्देवान्समभ्यर्च्यविप्रांश्चविधिवन्नृप भोज
यित्वायथान्यायंवाचयामाससमंगलं १०

...ध्वजेषुपताकास्ताभिःसम
लंकृतमकारयत् ८ स्रगंधमाल्याभरणैरित्यत्रमत्वर्थोद्रष्टव्यः यद्वास्रगंध
माल्यानिआविध्नतीनितथातैस्तथाविरजोंबरैर्विभूषितैस्त्रीपुरुषैर्जुष्टंत
थाश्रीमद्भिर्गृहैश्चजुष्टं ९ यथान्यायमन्यांश्चकन्यांप्रतिमंगलंवाचयामास १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतंकौतुकेनविवाहसूत्रेणमंगलंयस्यास्तां अहतंनवीनंभूषणोत्तमैश्चभूषि

सुस्नातांसुदतींकन्यांकृतकौतुकमंगलां अहतांशुकयुग्मेनभूषितांभू
षणोत्तमैः ११ चक्रुःसामर्ग्यजुर्मंत्रैर्वध्वारक्षांद्विजोत्तमाः पुरोहितोथर्व
विद्दैजुहावग्रहशांतये १२ हिरण्यरूप्यवासांसितिलांश्चगुडमिश्रिता
न् प्रादाद्धेनूंश्चविप्रेभ्योराजाविधिविदांवरः १३ एवंचेदिपतीराजादम
घोषःसुतायवै कारयामासमंत्रज्ञैः सर्वमभ्युदयोचितं १४ श्रीकृष्ण

तां ११ वध्वास्तस्याः कन्यायाः अथर्ववित् अथर्वणमंत्रवित् १२ अभ्युदयेऽउचितं १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चतुरंगसैन्यैः परिवृतः कुंडिनं भीष्मकस्य पुरं ययौ मदंच्चवंनेमदच्युतस्तैः स्यं
दनैरथैः हेमरचितामालाविद्यंतेयेषुतैः १५ कल्पितंनिर्मितंयदन्यन्निवेशनंत

मदश्च्युद्भिर्गजानीकैः स्यंदनैर्हेममालिभिः पत्त्यश्वसंकुलैः सैन्यैः परितः कुं
डिनं ययौ १५ तं वै विदर्भाधिपतिः समभ्येत्याभिपूज्य च निवेशयामास मुदा
कल्पितान्यनिवेशने १६ तत्र शाल्वो जरासंधो दंतवक्रो विदूरथः आजग्मुश्चै
द्यपक्षीयाः पौंड्रकाद्याः सहस्रशः १७ कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साः
धितुं यद्यागत्य हरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः १८ श्रीकृष्णपरमात्मनेनमः

स्मिन् १६ १७ यदि श्रीकृष्णो हरेदिति निशंकिताः कन्यां साधयितुं मिलिताः १८ ७

१९ २१ सूर्योदयात्पूर्वमेवोत्सवस्येनरुक्मिण्यचिंतयदित्याह भीष्मकन्येति प्रत्यापत्तिं

योस्माकंसंहितास्तेनइतिनिश्चितमानसाः आजग्मुर्भूभुजःसर्वेसमग्रबलवा
हनाः १९ श्रुत्वैतद्भगवान्रामोविपक्षीयनृपोद्यमं कृष्णंचैकंगतंहर्तुंकन्यांक
लहशंकितः २० बलेनमहतासार्धंभ्रातृस्नेहपरिप्लुतः त्वरितःकुंडिनंप्रागाद्ग
जाश्वरथपत्तिभिः २१ भीष्मकन्यावरारोहाकांक्षंत्यागमनंहरेः प्रत्यापत्तिम
पश्यंतीद्विजस्याचिंतयत्तदा २२ अहोत्रियामांतरितउद्वाहोमेल्पराधसः ना
गच्छत्यरविंदाक्षोनाहंवेद्म्यत्रकारणं २३ सोपिनावर्त्ततेद्यापिमत्संदेशहरोद्वि
जः अपिमय्यनवद्यात्मादृष्ट्वाकिंचिज्जुगुप्सितं २४ प्रत्यागमनं २२ त्रियामारात्रि
स्तावन्मात्रेणांतरितः अल्पराधसः मंदभाग्यायाः २३ जुगुप्सितं धार्ष्ट्यादि अपीति

दशम ४४

भा॰द॰उ॰
३०

नायातिहिक्लृतोयमरतिअस्यार्थः आदोक्लृतोयमत्वात्तंनप्रस्थापितवान् प्रस्थान
वसरेचकिंचिन्मयिजुगुप्सितंमत्वाप्रस्साचष्टेअतः सोपिद्विजोनूनंनायातीति य
द्वाततोनिर्गतोपिश्रीकृष्णोमदैववैमुख्यात्क्वचिल्यानिबंधोभवेदित्याहदुर्भगाया

मत्पाणिग्रहणेनूनंनायातिहि क्लृतोयमः दुर्भगायानमेधातानानुकूलोमहेश्व
रः २५ देवीवाविमुखागौरीरुद्राणीगिरिजासती एवंचिंतयतीबालागोविंद
हृतमानसा न्यमीलयतकालज्ञानेत्रेचाश्रुकलाकुले २६ एवंवध्वाः प्रतीक्ष
त्यागोविंदागमनंनृप वामऊरुर्भुजोनेत्रमस्फुरन्प्रियभाषिणः २७ शति २५

कालज्ञाअ॑ धुनापिगोविंदागमनकालइतिमत्वानाकिंचिदास्वस्लचित्तासतीचिंता
स्तब्धेलोचनेनिमीलितवतीत्यर्थः २६ प्रियभाषिणःप्रियसूचकाः २७

३

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरोपवनंप्राप्तेनश्रीकृष्णेनविनिर्दिष्टः प्राप्तंसंप्रांकुयययेत्यादिष्टः २९ नव्यग्राआत्म
नोदेहस्यगतिर्यस्यतं दूतस्यलक्षणंतत्तत्कार्यसूचकमभिज्ञानातीतितथा २९
तस्यैप्राप्तंयदुनंदनंआवेदितवान्तंचशशंस आत्मनोपनयनंप्रतिआत्मना

अथकृष्णविनिर्दिष्टः सएवद्विजसत्तमः अंतःपुरचरींदेवींराजपुत्रींददर्शह २
सातंप्रहृष्टवदनमभ्ययात्मगतिंसती आत्मस्यलक्षणाभिज्ञासमपृच्छच्छुचि
स्मिता २९ तस्याआवेदयत्प्राप्तंशशंसयदुनंदनं उक्तंचसत्यवचनमात्मो
पनयनंप्रति ३०

५१ स्वयंश्रीकृष्णस्यानयनंप्रति तेनद्विजेनसत्यवचनंप्रोक्तमिति
आत्मनःप्राणेश्वरस्येतिंयद्वाआत्मनःस्वस्यात्रपनयनंप्रतिश्रीकृष्णेनयदुक्तंस
त्यवचनंतामानयिष्येत्यादितच्चशशंसअवर्णयदित्यर्थः ३० श्रीकृष्णपरमात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाःदःउः
३१

अन्यं

तंश्रीकृष्णमस्मिन्कार्येसर्वस्वार्पणमपिअपर्याप्तमितिनदुचितंप्रियँअपश्यं
तीतदाकेवलंननाम पश्चाद्धकुददाविस्यर्थः यद्वामांप्रियंयेनमंतितेनावस्त

तमागतंसमाज्ञायवैदर्भीहृष्टमानसा नपश्यंतीब्राह्मणायप्रियमन्यंन
नामसा ३१ प्राप्तौश्रुत्वास्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ अभ्ययातांतूर्यघो
षेणरामकृष्णौसमर्हणैः ३२ मधुपर्कमुपानीयवासांसिविरजांसिसः
उपायनान्यभीष्टानिविधिवत्समपूजयत् ३३ तयोर्निवेशनंश्रीमदुपक
ल्प्यमहामतिः ससैन्ययोःसानुगयोरातिथ्यंविदधेयथा ३४ वंसंपदामास्य

दंभवतिकिंपुनर्मयिप्रणतायामिति ततोधिकमन्यतप्रियंनपश्यंतीननामेति
३१ ३२ महामतिरित्यनेनश्रीकृष्णोबाढंकन्यामुद्वोढुमेवागतःस्यादितिवरोचिते
नविधिनासमपूजयदितिकृचितं ३४ यथायथावत्॥

भा०
३१

समेतानांराज्ञांमध्येवीर्याद्यनतिक्रम्यतंतंसमर्हितवानित्यर्थः
३५ श्रीकृष्णेभाविकार्यसूचकंजनानुरागंदर्शयतिश्रीकृष्णमागतमितित्रि

एवंराज्ञांसमेतानांयथावीर्यंयथावयः यथाबलंयथावित्तंसर्वैःकामैःस
मर्हयत् ३५ कृष्णमागतमाकर्ण्यविदर्भपुरवासिनः आगत्यनेत्रांजलिभिः
पपुस्तन्मुखपंकजं ३६ अस्यैवभार्याभवितुंरुक्मिण्यर्हतिनापरा असावप्यनवद्यात्माभैष्म्याः समुचितः पतिः ३७

भिः ३६ अस्यैवरुक्मिण्येवार्ह
त्येवअसावेवभैष्म्याएवसमुचितएवेतिषड्वधारणानितत्रैकस्मिन्व्यतिरे
कप्रदर्शनेनउपलक्षणार्थंनापरेतिनचवाक्यभेददोषः अनूद्यविधेयभेदेनवि
भिन्नानामेववाक्यानांसहप्रयोगात् गृहंसंमार्ष्टीत्यादिवदिति ३७ श्रीरामकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
२१

अनु

अयमेवानुग्रहइतिनिर्दिशंतिग्रष्हाविति ३८ प्रेम्णः कलाक्षंशः तेनवदंतिस्म

किंचित्सुचरितंयन्नस्तेनतुष्टस्त्रिलोककृत् अनुग्रहात्गृष्हातुवैदर्भ्याःपाणि
मच्युतः ३८ एवंप्रेमकलाबद्धावदंतिस्मपुरौकसः कन्याचांतःपुरात्प्रागाद्भ
टैर्गुप्तांबिकालयं ३९ पद्भ्यांविनिर्ययौद्रष्टुंभवान्याःपादपल्लवं साचानुध्या
यतीसम्यक्मुकुंदचरणांबुजं ४० यतवाङ्मातृभिःसार्द्धंसखीभिःपरिवा
रिता गुप्ताराजभटैःशूरैःसन्नद्धैरुद्यतायुधैः ४१ मृदंगशंखपणवास्तूर्य
भेर्यश्चजघ्निरे नानोपहारबलिभिर्वारमुख्याःसहस्रशः स्रग्गंधवस्त्राभर
णैर्द्विजपत्न्यःस्वलंकृताः ४२ संपूर्णंप्रेमतेषांलब्धंवर्त्तनरस्यर्थः ३९ तस्याग
मनंविशिनष्टिद्वयेनपद्भ्यामिति ४० अपिचमृदंगेत्यादिजघ्निरे आहताःवादि
ताइत्यर्थः ४१ वारमुख्या...गणिकोत्तमाः ४२ २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२ उपस्पृश्यआचम्य ४४ प्रवयसोवृद्धाः भवानितामितामितिभवस्योपस
र्जनत्वंस्त्रीकर्मोचितमुक्तं ४५ नमस्यइतिरुक्मिण्यातदेवदृष्टोयंमंत्रः स्वसंता
गायंतश्चस्तुवंतश्चगायकावाद्यवादकाः परिवार्यवधूंजग्मुःसूतमागधबंदिनः
४३ आसाद्यदेवसदनंधौतपादकरांबुजा उपस्पृश्यशुचिःशांताप्रविवेशां
बिकांतिकं ४४ तांवैप्रवयसोबालांविधिज्ञाविप्रयोषितः भवानींवंदयांचक्रु
र्भवपत्नींभवान्वितां ४५ नमस्येत्वांबिकेभीक्ष्णंस्वसंतानयुतांशिवां भू
यात्पतिर्मेभगवान्कृष्णस्तदनुमोदतां ४६
नयुतांगणेशादिसहितांआत्मारा
मो सोकथंत्वत्पतिर्भवेत् इतिचेदतआहतदनुमोदतामितिभवानीतिश्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रग्गंधादिभिरंबिकांसमपूजयत् ४७ तथाविप्रास्त्रियोपितैर्द्रव्यैर्लवणादिभि

अद्भिर्गंधाक्षतैर्धूपैर्वासिःस्रग्माल्यभूषणैः नानोपहारबलिभिःप्रदी
पावलिभिःपृथक् ४७ विप्रास्त्रियःपतिमतीस्तथातैःसमपूजयन् ल
वणापूपतांबूलकंठसूत्रफलेक्षुभिः ४८ तस्यैस्त्रियस्ताःप्रददुःशेषां
युयुजुराशिषः ताभ्योदेव्यैनमश्चक्रेशेषांचजगृहेवधूः ४९ मुनिव्र
तमथत्यक्त्वानिश्चक्रामांबिकागृहात् प्रगृह्यपाणिनाभृत्यांरत्नमु
द्रोपशोभिना ५०

श्वसमपूजयन्निति ४८ शेषांनिर्माल्यं ४९ मुनिव्रतंमौनंभृत्यांसखीं ५० श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१

तांविलोक्यवीरामुमुहुरितितृतीयश्लोकेनान्वयः श्यामांअज्ञातरजस्कांकुंत
लेभ्यः शंकितेइवचपलेईक्षणेयस्यास्तां ५१ द्विजाएवकुंदानांकुड्मलानिमुकु

तांदेवमायामिववीरमोहिनींसुमध्यमांकुंडलमंडितानना श्यामां
नितंबार्पितरत्नमेखलांव्यंजत्स्तनींकुंतलशंकितेक्षणां ५१ शुचि
स्मितांबिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलां पदाचलं
तींकलहंसगामिनींसिंजत्कलानूपुरधामशोभिना ५२ श्रीराम

तानि
लानिबिंबफलवघोधरस्तस्यद्युतिभिः शोणायमानानियस्यास्तांकलाशोभा
तयुक्तंनूपुरंसिंजच्चतत्कलानूपुरंचतस्यधामदीप्तिः तेनशोभितुंशीलमस्यते
नपदाचलंतीं ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकेवलंमुमुहुः पेतुश्चेत्याहयामिति यात्रामिषेणहरयेस्वलावण्यंसमर्पयतींयां
विलोक्यवीरामुमुहुः समागतायशस्विनस्तत्कृतलक्ष्यार्द्दिताः यांवीक्ष्यतेनृप
तयस्तदुदारहासवल्गावलोकलूनचेतसउज्झितास्त्राः ५२ पेतुःक्षितौगजरथा
श्वगताविमूढयात्राछलेनहरयेर्पयतींस्वशोभां सैवंशनैश्चलयतीचलपद्म°
कोशौप्राप्ताभगवतःप्रसमीक्ष्यमाणा ५४ उत्सार्यवामकरजैरलका
नपांगैः प्राप्तान्ह्रियैक्षतनृपान्ददृशेच्युतंसा तांराजकन्यांरथमारुरुक्ष
तींजहारकृष्णोद्विषतांसमीक्षतां ५५ रथंसमारोप्यसुपर्णलक्षणंराजन्यच
क्रंपरिभूयमाधवः ततोययौरामपुरोगमःशनैःशृगालमध्यादिवभागहृद्धरिः

वीक्ष्यैक्षितौपेतुः सानन्प्राप्तान्ह्रियारैक्षननदेवाच्युतंचददर्शेत्युत्तरेणान्वयः ५३

मोहिताः नृपाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चलपद्मकोशातुल्यौचरणौचालयंती ५४ ५५ सुपर्णलक्षणंगरुडध्वजंहरिः रथं
सिंहः ५६ असहमानानांतेषांआक्रोशमाह अहोधिगस्मान्यतोस्माकं

तेमानिनःस्वाभिभवंयशः क्षयंपरेजरासंधवृशानसेहिरे अहोधिग
स्मयशआत्तधनुनांगोपैर्हृतंकेसरिणांमृगैर्वरि५७ इतिश्रीभागवतेमा
हापुराणेदशमस्कंधेरुक्मिणीवरणेत्रिपंचाशत्तमोध्याय ॥५३॥ शुकउवाच
इतिसर्वेसुसंरब्धावाहानारुह्यदंशिताः स्वैःस्वैर्बलैःपरिक्रांताअन्वीयु
र्धृतकार्मुकाः १

यशोगोपैर्हृतमिति ॥५७॥ इतिदशमेटीकायांत्रिपंचाश ॥५३॥ चतुःपंचाशत्त
मेतुजित्वाराज्ञोरिपक्षगान् रुक्मिणंचविरूप्याथभैष्म्याःपाणिंपुरेग्रहीत् १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
२५

इतीति अहो धिग्गित्येवं वदंतः सुसंरब्धाः क्रोधाविष्टाः दंशिताः कृतसंनाहाः प
रिक्रांता परिवृताः अन्वीयुः अन्वधावन् १ विस्फूर्ज्य टंकारयित्वा २ परेषां श

तानापततआलोक्ययादवानीकयूथपाः तस्थुस्तत्संमुखा राजन्विस्फू
र्ज्यस्वधनूंषिते २ अश्वपृष्ठेगजस्कंधेरथोपस्थेचकोविदाः मुमुचुः शरव
र्षाणिमेघाअद्रिष्वपोयथा ३ पत्युर्बलंशरासारैश्छन्नंवीक्ष्यसुमध्यमा
सव्रीडमैक्षत्तद्वक्त्रं भयविह्वललोचना ४ प्रहस्यभगवानाहमास्मभैर्वा
मलोचने विनंक्ष्यत्यधुनैवैतत्तावकैः शात्रवंबलं ५ रणाबाहूल्येयाद

वानामचलत्वेदृष्टांतः मेघा इति ३ ऐक्षत् ऐक्षत ४ मास्मभैः माभयंकु
रुहेवामलोचने वराक्षि तावकैः त्वदीयैः कृत्वा ५ श्रीकृष्णपरमात्मनेनमः ५

राम
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१

सचासौविक्रमश्चतं ६ उष्णीषाणिशिरोवतंस वस्त्राणितत्सहितानिशि

तेषांतद्विक्रमंवीरागदसंकर्षणादयः अमृष्यमाणानाराचैर्जघ्नुर्हयगजा
न्रथान् ६ पेतुःशिरांसिरथिनामश्विनांगजिनांभुवि सकुंडलकिरीटा
निसोष्णीषाणिचकोटिशः ७ हस्ताःसासिगदेष्वासाःकरभाऊरवोंघ्रयः
अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसिच ८ हन्यमानबलानीकावृष्णिभि
र्जयकांक्षिभिः राजानोविमुखाजग्मुर्जरासंधपुरःसराः ९ शिशुपालं
समभ्येत्यहृतदारमिवातुरं नष्टत्विषंगतोत्साहंशुष्यद्वदनमब्रुवन् १०

रांसि ७ करभाःप्रकोष्ठाःविस्तृतकराःऊरुविशेषणंवा ८ ९ अप्राप्तदारम
वतंहृतदारमिवातुरं १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्ठास्थैर्यं ११ कुहकोनर्त्तयितातस्येछयादुःखेपीहमानत्वेनपारवश्यंव्य
क्तंदर्शितं १२ अत्रचाहमेवदृष्टांतइत्याह जरासंधः शौरेरिति कृष्णात्स

भोभोपुरुषशार्दूलदौर्मनस्यमिदंत्यज नप्रियाप्रिययोराजन्निष्ठादेहिषु
दृश्यते ११ यथादारुमयीयोषिन्नृत्यतेकुहकेछया एवमीश्वरतंत्रोयमी
हतेसुखदुःखयोः १२ शौरेः सप्तदशाहंवैसंयुगानिपराजितः त्रयोविंश
तिभिः सैन्यैर्जिग्यएकमहंपरं १३ तथाप्यहंनशोचामिनप्रहृष्यामिकर्हि
चित् कालेनदैवयुक्तेनजानन्विद्रावितंजगत् १४
युक्तेन १४

काशात् एकंसंयुगंपरंकेवलंअं तिमंवाजिग्येजितवानहं १३ दैवमदृष्टंतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फल्गुतंत्रैः स्वल्पसैन्यैः १५ प्रदक्षिणः अनुकूलः १६ १७ १८ १९ २० २०

अधुनापिवयंसर्वेवीरयूथपयूथपाः पराजिताः फल्गुतंत्रैर्यदुभिः कृष्णपालितैः १५ रिपवोजिग्युरधुनाकालआत्मानुसारिणि तदावयंविजेष्यामोयदाकालः प्रदक्षिणः १६ एवंप्रबोधितोमित्रैश्चैद्योगात्सानुगःपुरं हतशेषाः पुनस्तेपिययुः स्वंस्वंपुरंनृपाः १७ रुक्मीतुराक्षसोद्वाहंकृष्णद्विडसहन्स्वसुः पृष्ठतोन्वगमत्कृष्णमक्षौहिण्यावृतोबली १८ रुक्म्यमर्षीतुसंरब्धःशृण्वतांसर्वभूभुजां प्रतिजज्ञेमहाबाहुर्दंशितःसशरासनः १९ अहत्वासमरेकृष्णमप्रत्यूह्यचरुक्मिणीं कुंडिनंनप्रवेक्ष्यामिसत्यमेतद्ब्रवीमिवः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोपालस्यवेदपालस्यवास्तवोर्थः तथासुदुर्मतेरिति शोभना अनुग्रहवतीदुष्टे
षपिमतिर्यस्यतस्येति २१ २२ २३ यदूनांकुलपांसनकुलदूषणवस्तुतस्तु य

इत्युक्त्वारथमारुह्यसारथिंप्राहसत्वरः नोदयाश्वान्यतःकृष्णस्त
स्यमेसंयुगंभवेत् २१ अद्याहंनिशितैर्बाणैर्गोपालस्यसुदुर्मतेः ने
ष्येवीर्यमदंयेनस्वसामेप्रसभंहृता २२ विकत्थमानःकुमतिरीश्व
रस्याप्रमाणवित् रथेनैकेनगोविंदंतिष्ठतिष्ठे थाह्वयत् २३ धनुर्वि
कृष्यसुदृढंजघ्नेकृष्णंत्रिभिःशरैः आहचात्रक्षणंतिष्ठयदूनांकुलपां
सन २४

ने
दूनांकुलस्यपतेस्वयंचरिपुहननचतुर अंससमाधाइत्यस्माद्धातोःकर्त्तरिसु
इत्यस्ययोनंयादिविहितः २४

हेअंसन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वांक्षः काकः स यथा हविर्मुष्णाति तद्वत् वस्तुतस्तु अध्वांक्षवदिति छेदः सह

कुत्र यासि स्वसारं मे मुषित्वा ध्वांक्षवद्धविः हरिष्येऽद्य मदं मंदमायिनः कू

टयोधिनः २५ यावन्न मे हतो बाणैः शयीथा मुंच दारिकां २५ स्मयन् कृ

ष्णो धनुश्छित्वा षड्भिर्विव्याध रुक्मिणं अष्टाभिश्चतुरो वाहान् द्वाभ्यां सू

तं ध्वजं त्रिभिः २६ स चान्यद्धनुरादाय कृष्णं विव्याध पंचभिः तैस्ता

डितः शरौघैस्तु चिच्छेद धनुरच्युतः २७ पुनरन्यदुपादत्त तदप्याछिनदव्

ययः परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ यद्यदायुधमादत्त तत्

सर्वमछिनद्धरिः २९

स्वाक्षवदित्यर्थः हेमंदास्थिरेत्यर्थः २५ २६ २८ २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२९ ३२ परित्रासेनविकंपितान्यंगानियस्यास्तयाशुचाशोकेनशुष्यन्मुखंयस्याः

ततोरथादवप्लुत्यखड्गपाणिर्जिघांसया कृष्णमभ्यद्रवत्क्रुद्धः पतंगइवपावकं
२९ तस्यचापततःखड्गंतिलशश्चर्मचेषुभिः छित्वासिमाददेतिग्मंरुक्मिणंहंतुमु
द्यतः ३० दृष्ट्वाभ्रातृवधोद्योगंरुक्मिणीभयविह्वला पतित्वापादयोर्भर्तुरुवा
चकरुणंसती ३१ योगेश्वराप्रमेयात्मन्देवदेवजगत्पते हंतुंनार्हसिकल्या
णभ्रातरंमेमहाभुज ३२ शुकउवाच तयापरित्रासविकंपितांगयाशुचाव
शुष्यन्मुखरुद्धकंठया कातर्यविस्रंसितहेममालयागृहीतपादःकरुणोन्य
वर्तत ३३

रुद्धःकंठोयस्याःसाचसाचतया कातर्येणवैक्लव्येनविस्रंसिताहेममयी
मालायस्याः तयागृहीतौपादौयस्यसः ३३ ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सश्मश्रुकेशांसहितानिस्थानेस्थानेअवशिष्टानिश्मश्रूणिकेशांश्चयथाभवंति

चैलेनबध्वातमसाधुकारिणंसश्मश्रुकेशंप्रवपन्नरूपयत् ताव
न्ममर्दुःपरसैन्यमद्भुतंयदुप्रवीरानलिनींयथागजाः ३४ कृष्णांति
कमुपव्रज्यददृशुस्तत्ररुक्मिणं तथाभूतंहतप्रायंदृष्ट्वासंकर्षणो
विभुः विमुच्यबद्धंकरुणोभगवान्कृष्णमब्रवीत् ३५ असाध्विदं
त्वयाकृष्णकृतमस्यज्जुगुप्सितं वपनंश्मश्रुकेशानांवैरूप्यंसुहृदो
वधः ३६

तथातेनैवास्मिन्नाप्रवपनमुंडयान्विरूपमकरोत् ३४ तथाभूतंहतप्रायमित्युत्त
रवाक्येप्यनुषंगः ३५ ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुक्मिणींसांत्वयतिमैवास्मानिति ३७ पुनः कृष्णमाक्षिपतिबंधुरिति ३८ पुनर्दे
वींप्रत्याहक्षत्रियाणामिति येनधर्मेणभ्रातापित्रातरंहन्यात्ततः तस्माद्दो

मैवास्मान्साध्व्यसूयेथाभ्रातुर्वैरूप्यचिंतया सुखदुःखदोनचान्यो
स्तियतः स्वकृतभुक्पुमान् ३७ बंधुर्वधार्हदोषोपिनबंधोर्वधमर्ह
ति त्याज्यः स्वेनैवदोषेणहतः किंहन्यतेपुनः ३८ क्षत्रियाणामयं
धर्मः प्रजापतिविनिर्मितः भ्रातापिभ्रातरंहन्याद्येनघोरतमस्त
तः ३९ राज्यस्यभूमेर्वित्तस्यस्त्रियोमानस्यतेजसः मानिनोन्य
स्यवाहेतोः श्रीमदांधाः क्षिपंतिहि ४०

रनरः अतिदारुणः धर्मश्चततश्च
कोस्माकमपराधइतिभावः ३९ पुनः श्रीकृष्णंप्रत्याहराज्यस्येतितथाप्यस्माकमेतदनु
चितमितिभावः ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनर्द्देवींप्रत्याहतवेयमितिसर्वभूतेषुदुर्हृदामहितानांभ्रातॄणांअवेक्षेयद्भद्रंम
न्यसेइच्छसि इयंतेविषमाऽसमीचीनाबुद्धिः कुतः यतस्त्वदेवसुहृदामभद्रमि
तियद्वासर्वभूतेषुदुर्हृदामपिस्वसुहृदांभद्रमेवदंडरूपंमुंडनंअभद्रंयन्मन्यसे

तवेयंविषमाबुद्धिःसर्वभूतेषुदुर्हृदां यन्मन्यसेसदाभद्रंसु
हृदांभद्रमज्ञवत् ४१ आत्ममोहोनृणामेवकल्पतेदेवमाय
या सुहृत्दुर्हृदुदासीनइतिदेहात्ममानिनां ४२

तवेयंविषमाबुद्धि
रिति अथवासर्वभूतेषुमध्येदुर्हृदांशिशुपालादीनांअभद्रंसुहृदांभद्रंचयन्म
न्यसेतवेयंविषमाबुद्धिःसमानभवतिअज्ञवत्अज्ञानामिव ४१ कुतस्त्यतआ
ह आत्ममोहइति ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University-Ramtek Collection

परमार्थमाह एकएवेतिपरःशुद्धः ज्योतिश्चंद्रादिर्यथोदकेषुनभोयथाघटादि
ष्विति ४३ कुतस्तर्हिनचंद्रादिवदात्मानमेकंशुद्धंप्रतीमः तत्राहदेहइतिद्वयम

एकएवपरोह्यात्मासर्वेषामपिदेहिनां नानेवगृह्यतेमूढैर्य
थाज्योतिर्यथानभः ४३ देहआद्यंतवानेषद्रव्यप्राणगुणा
त्मकः आत्मन्यविद्ययाक्लृप्तःसंसारयतिदेहिनं ४४ श्रीराम

धिभूतंप्राणाइंद्रियाण्यध्यात्मंगुणशब्देनाधिदैवंतत्त्रितयात्मकः देहोपाधिना
शुद्धोनप्रतीयतइत्यर्थः ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुदेहसंबंधेनापिसंसारेसतिशुद्धत्वंगतमेवतत्राहनात्मनइतिहेसतिअन्येन
आधिभूतादिनाआत्मनःसंयोगवियोगौनस्तः कुतःअसतःअसत्वादन्यस्ये
त्यर्थः कुतोसत्वंतत्राहतद्धेतुत्वादितितस्यान्यस्यभूतेंद्रियादेःप्रसिद्धेःप्रकाश
स्यतद्धेतुत्वादात्महेतुकत्वात् ननुदेवैरधिष्ठितेभ्यइंद्रियेभ्योभूतानांप्रतीतिःप्रसि

नात्मनोन्येनसंयोगोवियोगश्चासतःसती तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यांयथार
वेः ४५

द्धाभूतप्रतीत्याचतत्प्रसिद्धिर्नात्मन रस्यतआहदृग्रूपाभ्यांयथारवेःयथा
प्रकाश्यप्रकाशकत्वेनवर्तमानयोरपिचक्षुरूपयोःरवेःप्रकाशात्प्रसिद्धिःद्वयो
रपितैजसत्वात्तदभेदश्चतथाभूतेंद्रियादीनांपरस्परंसिद्धानामपिचैतन्याधी
नएवप्रकाशःतत्कार्यत्वाच्चतद्व्यतिरेकेणासत्वंचेत्यर्थः तथांतद्वादशेवक्ष्यतिदी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०उ०
४९

पश्यस्तुस्वरूपंचज्योतिषोनपृथग्भवेत् एवंधीः खानिमात्राश्चनस्युरन्यतमाद्द
तादिति यद्वारवेः प्रसिद्धाभ्यामेवदृग्रूपाभ्यांपरस्परंप्रसिद्धिर्यथातद्वदिति ४५
देहसंबधाभावादेवनात्मनोजन्मादयोपिइतिवक्तुंजन्मादीनांदेहधर्मत्वमाह
जन्मादयस्त्विति कथंतर्हिजानोहंबालोहंवृद्धोहमितिआत्मनिजन्मादिप्रती

जन्मादयस्तुदेहस्यविक्रियानात्मनःक्वचित् कलानामिवनैवेंदोर्मृतिर्ह्यस्य
कुहूरिव ४६

तिः देहजन्मादिनाएवेतिसदृष्टांतमाह कलानामिवेति इंदोःकला
नामेवजन्मादयोनैवेंदोः यथातद्वत्तथाचकलानाशादेवकुहूरमावास्यांइंदुक्षय
उच्यतेतद्वदस्यआत्मनोदेहनाशादेवमृतिव्यवहारइत्यर्थः ४६ श्रीरामकृष्ण

राम
४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भोगान्

नन्वात्मनोदेहादिसंबंधाभावेकथंभोक्तृभोग्यभोगप्रतीतिरित्याशंक्यस्वप्रद
ष्टांतेनसमर्थयतियथाशयानइति आत्मानंभोक्तारंविषयान्फलंभोगंअस

यथाशयानआत्मानंविषयान्फलमेवच अनुभुंक्तेप्यसत्यर्थेतथाभोत्सबु
धोभवं ४७ तस्मादज्ञानजंशोकमात्मशोषंविमोहनं तत्वज्ञानेननिर्दह्य
स्वस्थाभवशुचिस्मिते ४८ ॥शुक उ०॥ एवंभगवतातन्वीरामेणप्रतिबोधि
ता वैमनस्यंपरित्यज्यमनोबुध्यासमादधे ४

त्यप्यर्थेअन्वनु भुक्तेनथाबुधः
संसारंप्राप्नोतिश्रुति ४७ आत्मानंशोषयतिविमोहयतितथातं निर्दह्यअपाकृत्य
४८ समादधेसमाहितमकरोत् ४९ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
४

संभ्रमादौत्सुक्यात्परिधावतांबंधूनांमध्येमिथःसमेत्यसमुदंप्राप्ताः ५७ ५८ ६०

॥ कुरुसृंजयकैकेयविदर्भयदुकुंतयः मिथोमुमुदिरेतस्मिन्संभ्रमात्परि
धावतां ५७ रुक्मिण्याहरणंश्रुत्वागीयमानंततस्ततः राजानोराजकन्या
श्चबभूवुर्भृशविस्मिताः ५८ द्वारकायामभूज्जाजन्महामोदःपुरौकसां रु
क्मिण्यारमयोपेतंदृष्ट्वाकृष्णंश्रियःपतिं ५९ श्रुत्वाविवाहंकृष्णस्यरुक्मि
ण्याहरणंतथा सायंप्रातरनंतस्यसविष्णोर्दयितोभवेत् ६० इतिश्रीभाग
वतेमहापुराणेदशमस्कंधेरुक्मिण्युद्वाहोत्सवश्चतुःपंचाशत्तमः ५४

इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुःपंचाशत्तमोध्यायः ॥५४॥ श्रीकृष्ण॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचपंचाशत्तमेतुप्रद्युम्नोजनिरूष्णतः शंबरेणहृतः सोथहत्वातंकांतयागमत

प्रद्युम्नहानिलाभायैः शंबराहरणादिना कुटुंबिनामपत्यादिसुखदुःखमसूसु

चत् २ जांबवत्यादिविवाहेभ्यः प्रागेवप्रद्युम्नजन्मततोविवाहाः ततःशंबरागा

शुकउवाच ॥ कामस्तु वासुदेवांशोदग्धःप्राग्रुद्रमन्युना देहोपपत्तयेभू

यस्तमेवप्रत्यपद्यत १

रात्प्रद्युम्नप्रत्यागमनंअतःपुत्रकथनप्रस्तावे

पिप्रथमंप्रद्युम्नस्यजातमात्रस्यशंबरेणहरणंनिरूप्यतेप्रत्यागमनंतूत्तरका

लीनमपिकथापर्यवसानायत्रोक्तमितिवासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासु

देवांशः सृष्टिहेतुत्वाच्चदेहोपपत्तयेदेहप्राप्तये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हत्या

अनवमः अन्यूनः संप्रसिद्धः कामशत्रुः शंबरस्तमात्मनः शत्रुं विदित्वा समु
द्रेपास्यग्रहमागमदिति २ निर्जगार गिलितवान् ४ स्वधितिना शस्त्रिकया

सएवजातोवैदर्भ्यांकृष्णवीर्यसमुद्भवः प्रद्युम्नइतिविख्यातःसर्वतोनघमः
पितुः २ तंशंबरःकामरूपीहृत्वातोकमनिर्दशं सविदित्वात्मनःशत्रुंप्रा
स्योदन्वत्यगाद्गृहं ३ तंनिर्जगारबलवान्मीनःसोप्यपरैःसह वृतोजालेन
महतागृहीतोमत्स्यजीविभिः ४ तंशंबरायकैवर्त्ताउपाजह्रुरुपायनं सूदा
महानसंनीत्वावद्यन्स्वधितिनाद्भुतं ५ दृष्ट्वातदुदरेबालंमायावत्यैन्यवेदयन्
नारदोकथयत्सर्वंतस्याःशंकितचेतसः ६ अवद्यन् अवद्यन्खण्डितवंतः ५
तवायंकामोयंतवभर्त्तेतितत्सान्त्वितःश्रीकृष्णाद्रुक्मिण्यामुत्पन्नइति ६ ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यशस्विनीपतिव्रताभर्त्तृदेहप्राप्तिंप्रतीक्षमाणा ७ तंशिशुंकामदेवंबुध्वा ८

बालस्यतत्त्वमुत्पत्तिंमत्स्योदरनिवेशनं साचकामस्यवैपत्नीरतिर्नामयश
स्विनी पत्युर्निर्दग्धदेहस्यदेहोत्पत्तिंप्रतीक्षती ७ निरूपिताशंबरेणसासूपो
दनसाधने कामदेवंशिशुंबुध्वाचक्रेस्नेहंतदर्भके ८ नातिदीर्घेणकालेनस
कार्ष्णीरूढयौवनः जनयामासनारीणांवीक्षंतीनांचविभ्रमं ९ सातंपतिं
पद्मदलायतेक्षणंप्रलंबबाहुंनरलोकसुंदरं सव्रीडहासोत्तभितभ्रुवेक्ष
तीप्रीत्योपतस्थेरतिरंगसौरतैः १० तामाहभगवान्कार्ष्णिर्मातस्तेमतिर
न्यथा मातृभावमतिक्रम्यवर्त्तसेकामिनीयथा ११

विभ्रमसंमोहं ९ अंगह

सजन्सौरतैर्भर्विः उपतस्थेअभजत् १० ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा० टी०
४५

अधिकृतापल्लीत्यत्र हेतुः रतिरहं भवान्काम इति १२ १३ दुर्जयत्वे हेतुः माया

रतिरुवाच ॥ भवान्नारायणसुतः शंबरेण हृतो गृहात् अहं तेधिकृतापत्नी

रतिः कामोभवान्प्रभो १२ एषत्वानिर्दशाहंसिंधावक्षिपच्छंबरोसुरः मत्स्योग्रसी

त्तदुदरादिहप्राप्तोभवान्प्रभो १३ तमिमंजहिदुर्द्धर्षंदुर्जयंशत्रुमात्मनः मा

याशतविदंत्वंचमायाभिर्मोहनादिभिः १४ परिशोचतितेमाताकुररीवग

तप्रजा पुत्रस्नेहाकुलादीनाविवत्सागौरिवातुरा १५ प्रभाष्यैवंददौविद्यांप्र

द्युम्नायमहात्मने मायावतीमहामायांसर्वमायाविनाशिनीं १६ सचशंब

रमभ्येत्यसंयुगायसमाह्वयत् अविषह्यैस्तमाक्षेपैःक्षिपन्संजनयन्कलिं १७

शतविदमितिकथंतर्हिहंतव्यस्तत्राहमयाभिरिति १४ नचात्रविलंबःकार्यइत्या

हपरिशोचतिरोदितीत्यर्थः १५ १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ वज्रस्यनिष्पेषेनिर्घातेयथानिष्ठुरस्तीव्रोनादोभवति तथाभूतंनादंव्यन

सोपिक्षिप्तोदुर्वचोभिःपदाहतइवोरगः निश्चक्रामगदापाणिरमर्षा
ताम्रलोचनः १८ गदामाविध्यतरसाप्रद्युम्नायमहात्मने प्रक्षिप्य
व्यनदन्नादंवज्रनिष्पेषनिष्ठुरं १९ तामापतंतींभगवान्प्रद्युम्नोगद
यागदां अपास्यशत्रवेक्रुद्धःप्राहिणोत्स्वगदांनृप २० सचमायांस
माश्रित्यदैतेयींमयदर्शितां मुमुचेस्त्रमयंवर्षंकार्ष्णौवैहायसोसुरः

इत सामान्यविशेषतयाँव्यापव्योप्यैकत्वमोदनंपाकंपचतीतिवत् अति
निष्ठुरंनादमकरोत्इत्यर्थः १९ २० वैहायसःआकाशेस्थितः २१ श्रीरामः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्वात्मिकांसत्वगुणमयींप्रायुंक्तेस्तत्तरस्यानुषंगः २२ ताःमायाःव्यधमयत्व्यु

बाध्यमानोस्त्रवर्षैस्तरौक्मिणेयोमहारथः सत्वात्मिकांमहाविद्यांसर्वमायोप
मर्द्दिनी २२ ततोगौह्यकगांधर्वपैशाचोरगराक्षसीः प्रायुंक्तशातशोदैत्यःकार्ष्णि
र्व्यधमयत्सताः २३ निशातमसिमुद्यम्यसकिरीटंसकुंडलं शंबरस्यशिरःका
यात्तात्प्रश्मश्रोजसाहरत् २४ आकीर्यमाणोदिविजैस्तुवद्भिःकुसुमोत्करैः भा
र्ययांबरचारिण्यापुरंनीतोविहायसा २५ अंतःपुरवरंराजन् ललनाशतसं
कुलं विवेशपत्न्यागगनात्विद्युतेवबलाहकः २६ तंदृष्ट्वाजलदश्यामंपीत
कौशेयवाससं प्रलंबबाहुंताम्राक्षंसुस्मितंरुचिराननं २७ नाशयत् २२

ताम्राणिश्मश्रूणियस्मिन्तत् ओजसाबलेन २४ २५ विद्युतासहबलाहको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलाश्चयेअलकास्तएवालयस्तैः ह्रीताःलज्जिताः २९ श्रीकृष्णोनभवतीय

स्वलंकृतमुखांभोजंनीलवक्रालकादिभिः कृष्णंमत्वास्त्रियोह्रीतानिलिल्यु
स्तत्रतत्रह २९ अथवधार्यशनैरीषद्वैलक्षण्येनयोषितः उपजग्मुःप्रमु
दिताःसस्त्रीरत्नंसुविस्मिताः ३० अथतत्रासितापांगीवैदर्भीवल्गुभाषि
णी अस्मरत्स्वसुतंनष्टंस्नेहस्नुतपयोधरा ३१ कोन्वयंनरवैडूर्यःकस्य
वाकमलेक्षणः धृतःकयावाजठरेकेयंलब्धास्त्वनेनवा ३२ ममचाप्यात्म
जोनष्टोनीतोयःसूतिकागृहात् एतत्तुल्यवयोरूपोयदिजीवतिकुत्रचित् ३३

वधार्यसस्त्रीरत्नंश्रेष्ठारातिस्तत्सहितं ३० सुतंस्मरंत्याह कोन्वयमिति नर
वैडूर्यःपुरुषश्रेष्ठः ३२ एतेनतुल्यंवयोरूपंचयस्यसभवेदिति ३३ श्रीकृष्ण०प०

स्त्रीषुरत्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं

तस्यस्वपुत्रँसंभावयंस्त्वाह कथंत्विति ३४ तदेवाधिकंसंभावयतिसएवेति ३५

कथंत्वनेनसंप्राप्तंसारूप्यंशार्ङ्गधन्वनः आकृत्यावयवैर्गत्यास्वरहासावलोक
नैः ३४ सएववाभवेन्नूनंयोमेगर्भेधृतोर्भकः अमुष्मिन्प्रीतिरधिकावाम
स्फुरतिमेभुजः ३५ एवंमीमांसमानायांवैदर्भ्यांदेवकीसुतः देवक्यानक
दुंदुभ्यामुत्तमश्लोकआगमत् ३६ विज्ञातार्थोपिभगवांस्तूष्णीमासजना
र्दनः नारदोकथयत्सर्वंशंबराहरणादिकं ३७ तच्छ्रुत्वामहदाश्चर्यंकृष्णांतः
पुरयोषितः अभ्यनंदन्बहून्नष्टान्नष्टंमृतमिवागतं ३८ देवकीवसुदेवश्च
कृष्णरामौतथास्त्रियः दंपतीतौपरिष्वज्यरुक्मिणीचययुर्मुदं ३९ नष्टंप्र
द्युम्नमायांतमाकर्ण्यद्वारकौकसः अहोमृतमिवायातोबालोदिष्ट्येतिहाब्रुव
न् ४०
देवक्यानकदुंदुभ्यांदेवक्यानकदुंदुभिभ्यामित्यर्थः ३६ ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रद्युम्ने

अतिसौंदर्य्येण प्रद्युम्नमनुवर्णयति यमिति पिता श्रीकृष्णः तत्सरूपे निज आत्मी
यईशः भर्त्तेति भावो भावनायास्तां तास्तन्मातरः कृष्णपत्न्योपि रहसि निरूढभा
वाः सत्सोयं भजन्निति यदम खलु चित्रं कथं सति स्मर्य्यमाणत्वेनैव क्षोभकेका — स्मरे

॥ यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन्नूरहरूढभावाः
त — चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्मरे क्षविषये किमुतान्यनार्य्यः ४१
इति श्रीभागवते म० ॥ ॥ ० प्रद्युम्नागमनं नाम पंचपंचाशत्तमोध्यायः ॥ ५५ ॥ ७

मेक्षविषये सति अक्षाणां इंद्रियाणां विषये तास्मिन् किं च रमास्पदं श्रीकृष्ण
स्तस्य [illegible] बिंबं श्रीमूर्तिस्तस्य बिंबे प्रतिबिंबे पुत्रे तदा किमु वक्तव्यमन्यनार्यो
भेजुरिति ४१ इ० ॥ भा० ॥ टी० ॥ पंचपंचाशत्तमः ॥ ५५

रमास्पदबिंबबिंबे

षट्पंचाशत्तमेमिथ्याभियोगेमणिमाहरत् कन्यांजांबवतःप्रापकृष्णःसत्राजि
तस्ततः १ पुत्रादिकामसौख्यस्यनिष्ठामुक्त्वातिचंचलां अर्थस्यानर्थतामाहस्य
मंतहरणादिना २ सत्यभामाजांबवत्योर्विवाहप्रस्तावायस्यमंतकाख्यानमाह

श्रीशुकउवाच सत्राजितःस्वतनयांकृष्णायकृतकिल्बिषः स्यमंतकेनमणिना
स्वयमुद्यम्यदत्तवान् १ राजोवाच सत्राजितः किमकरोत्ब्रह्मन्कृष्णस्यकि
ल्बिषं स्यमंतकःकुतस्तस्यकस्माद्दत्तासुताहरेः २ ॥श्रुकउ०॥ आसीत्सत्रा
जितःसूर्योभक्तस्यपरमःसखा प्रीतस्तस्मैमणिंप्रादात्सूर्यस्तुष्टःस्यमंतकं

सत्राजितइत्सकारांतः क्वचित्तकारांतोप्यत्रपानुसारेणद्रष्टव्यः कृतापराधस्त
च्छांतयेस्वयमेवोद्यमंकृत्वामणिनासहप्रादादिति भक्तस्यसत्राजितःसूर्यःस्वा
म्यपिसखेवासीदित्यर्थः सचतुष्टस्तस्मैस्यमंतकंनाममणिंप्रादात्प्रीतःस्निग्धः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोपलक्षितः सत्राजितोसाविस्यविशातः ३ दीव्यतेक्षीडतेसूर्योयमितिशंकिताः
संतः कथयामासुरिति ४ सूर्येनमस्कारायागतंकल्पयित्वोद्विक्तभक्तीनांसंबो

स्यंतंबिभ्रन्मणिंकंठेभ्राजमानोयथारविः प्रविष्टोद्वारकांराजंस्तेजसानोपल
क्षितः ३ तंविलोक्यजनादूरात्तेजसामुष्टदृष्टयः दीव्यतेक्षैर्भगवतेशशंसुः
सूर्यशंकिताः ४ नारायणनमस्तेस्तुशंखचक्रगदाधर दामोदरारविंदा
क्षगोविंदयदुनंदन ५ एषआयातिसवितात्वांदिदृक्षुर्जगत्पते मुष्णन्
गभस्तिचक्रेणनृणांचक्षूंषितिग्मगुः ६

धनानिनारायणेत्यादीनि ५ गभ
स्तिचक्रेणरश्मिजालेनमुष्णन्प्रतिघ्नन्तिग्मातीक्ष्णागावोरश्मयोयस्यसः

॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥६

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचेदमघटमानमित्याहुः नान्विंतिअन्विंछंतिमृगयंतेऽजःस्वर्य्यः ७ बालानाम

नन्वन्विछंतितेमार्गेत्रिलोक्यांविबुधर्षभाः ज्ञातायगूढंयदुपुंगवंतु

त्वायात्यजःप्रभो ७ शुकउवाच निशम्यबालवचनंप्रहस्यांबुज

लोचनः प्राहनासौरविर्द्देवःसत्राजिन्मणिनाज्वलन् ८ सत्राजि

त्स्वगृहंश्रीमत्कृतकौतुकमंगलं प्रविश्यदेवसदनेमणिंविप्रै

र्न्यवेशयत् ९

ज्ञानांवचनंज्वलन्वियोनमानः ८ कृतानिकौतुकेनोत्स

वेनमंगलानियस्मिन्तत्रविप्रैःकृत्वा ९ श्रीकृष्णपरमात्मनेनमः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भारप्रमाणंचचतुर्भिर्व्रीहिभिर्गुंजंगुंजान्पंचपणंपणान् अष्टौधरणमष्टौच
कर्षंतांश्चतुरःपलं १ तुलांपलशतंप्राहुर्भारःस्याद्विंशतिस्तुलाइति मारीना
मअकालमत्युःअरिष्टमभद्रंअशुभाःदुःखहेतवः क्वापिकदाचिदनेनभगव

दिनेदिनेस्वर्णभारानष्टौससृजतिप्रभो दुर्भिक्षमार्यरिष्टानिसर्प्पाधिव्या
धयोऽशुभाः १० नसंतिमायिनस्तत्रयत्रास्तेऽभ्यर्च्चितोमणिः सयाचितोम
णिंक्वापियदुराजायशौरिणा नैवार्थकामुकःप्रादात्पात्राभंगमतर्कयन्
११ तमेकदामणिंकंठेप्रतिमुच्यमहाप्रभं प्रसेनोहयमारुह्यमृगयांव्यच
रद्वने १२

त्यसम पश्यस्वयमग्रतोभोजिनः सर्वानिष्टनिवर्त्तकमपिअनिष्टहेतुरे
वभवतीतिसूचितं १० तदेवंदर्शयितुमाहतमेकदेतिप्रतिमुच्यबध्वाप्रसेनःस
वाजिह्नाता १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसेनंसहयंहत्वामणिमाछिद्यकेसरी गिरिंविशंजांबवतानिहतोमणिमिछ
ता सोपिचक्रेकुमारस्यमणिंक्रीडनकंबिले १५ अपश्य[न्भ्रा]तरंभ्रातासत्रा
जित्पर्य्यतप्यत प्रायःकृष्णेननिहतोमणिग्रीवोवनंगतः १६ भ्राताममेति
तच्छ्रुत्वाकर्णेकर्णेजपन्जनाः भगवांस्तदुपश्रुत्यदुर्यशोलिप्तमात्मनि मा
र्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः १७ हतंप्रसेनमश्वंचवीक्ष्यकेसरिणावने
तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः १८ ऋक्षराजबिलंभीममंधेनतम
सावृतं एकोविवेशभगवानवस्थाप्यबहिःप्रजाः १९ तत्रदृष्ट्वामणिप्रेष्ठंबा
लक्रीडनकंकृतं हर्तुंकृतमतिस्तस्मिन्नवतस्थेर्भकांतिके २० तमपूर्वंनरं
दृष्ट्वाधात्रीचुक्रोशभीतवत् तच्छ्रुत्वाभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः २१

आछिद्याकृष्णगृहीला १५ अजपन्उपांश्ववोचन् १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ क्रव्यार्थेआमिषार्थे २३ अष्टविंशाहंअष्टविंशतिस्स्वदिनानियस्मिंस्तदष्ट
विंशाहंविंशतिशब्देतिलोपश्चार्षः वज्रस्यनिष्पेषोनिर्घातस्तद्वत्परुषैर्नि

सवैर्भगवतातेनयुयुधेस्वामिनात्मनः पुरुषंप्राकृतंमत्वाकुपितोना
नुभाववित् २२ द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः आयुधाश्मद्रु
मैर्दोर्भिः क्रव्यार्थेश्येनयोरिव २३ आसीत्तदष्टविंशाहमितरेतरमुष्टि
भिः वज्रनिष्पेषपरुषैरविश्रममहर्न्निशं २४ कृष्णमुष्टिविनिष्पातनि
ष्पिष्टांगोरुबंधनः क्षीणसत्वः खिन्नगात्रस्तमाहातीवविस्मितः २५

ष्ठुरैः २४ श्रीकृष्णस्यमुष्टीनांविनिष्पातैःविनिष्पिष्टानिम्लयान्यंगानि ऊरूणि
बंधनानिसंधिस्थानानियस्यसः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग
५१

लोकेकोवायंमत्तोबलीयानितिविस्मितः सन् विमृश्याह जानेइतिसर्वभू
तानांयः प्राणः तत्रयदोजः सहोबलंचइंद्रियतत्हृदयदेहबलानितत्सर्वंत्वमि

जानेत्वांसर्वभूतानांप्राणओजः सहोबलं विष्णुंपुराणंपुरुषंप्रभ
विष्णुमधीश्वरं २६ त्वंहिविश्वसृजांस्रष्टासृज्यानामपियच्चस
त् कालः कलयतामीशः परआत्मातथात्मनां २७

त्यहंजानेकथंतथात्वमतआह विष्णुमित्यादि २६ पुराणत्वेहेतुः त्वंहीतिस्र
ष्टानिमित्तंयच्चसत्तदुपादानं अतः पुराणः प्रभविष्णुत्वेहेतुः कालइति अधी
श्वरत्वमप्यतएवेत्याहईशः परइतितच्चनपृथक्इत्याहआत्मनामात्मेति २७ ५१

प्रभविष्णुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं

यतएवंभूतः अतोममेष्टदेवं रघुनाथएवत्वमित्याह यस्येतिर्द्दुत्कलितउद्दीपितोयो रोषस्तेनपेकटाक्षमोक्षास्तैः क्षुभितानक्राग्राहा स्तिमिंगिलादयोमहामत्स्याश्च यस्मिंस्तोब्धिर्वर्त्मादिशत्‌ दत्तवांस्तथापितस्मिन्‌ येनत्वयास्वयशएवसेतुः कृतः

यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्‌ क्षुभितनक्रतिमिंगिलोब्धिः सेतुःकृतःस्वयशउज्वलिताचलंकाररक्षःशिरांसिभुविपेतुरिषुक्षतानि २८ इति विज्ञातविज्ञानमक्षराजानमच्युतः व्याजहारमहाराजभगवान्‌ देवकीसुतः २९

उज्वलितादग्धायस्येषुभिः क्षतानिछिन्नानिरक्षसोदशग्रीवस्यशिरांसिभुविपेतुः सएवत्वमितिजाने २८ इतिविज्ञा तंविज्ञानंयेनतंविज्ञानशब्दःकरणसाधनःक र्मसाधनोवाऋक्षराजंप्रतिउक्तवान्‌ २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयंत्विहबहवोबिलद्वारंप्राप्तास्तत्रमिथ्याभिशापमसुनामणिनाप्रमज्जन्प्रमार्ष्टुमह

अभिमृश्यारविंदाक्षः पाणिनाशंकरेणतं कृपयापरयाभक्तंप्रेमगंभीरयागिरा ३०
मणिहेतोरिहप्राप्तावयमृक्षपतेबिलं मिथ्याभिशापंप्रमृजन्नात्मनोमणिनामुना
३१ इत्युक्तःस्वांदुहितरंकन्यांजांबवतींमुदा अर्हणार्थंसमणिनाकृष्णायोपजह्
रह ३२ अदृष्टानिर्गमंशौरेः प्रविष्टस्यबिलंजनाः प्रतीक्ष्यद्वादशाहानिदुःखिताः
स्वपुरंययुः ३३ निशाम्यदेवकीदेवीरुक्मिण्यानकदुंदुभिः सुहृदोज्ञातयोऽशोचन्
बिलात्कृष्णमनिर्गतं ३४ सत्राजितंशपंतस्तेदुःखिताद्वारकौकसः उपतस्थुर्महा
मायांदुर्गांकृष्णोपलब्धये ३५

मंतर्बिलमिहप्राप्ताइत्यर्थः ३१ सहमणिनासमर्पया
मास ३२ ३३ ३४ श्रीकृष्णप्राप्तयेचंद्रभागांनामदुर्गामभजन ३५ श्रीरामचंद्रायन॰ ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंतुरक्ष्याः पोष्याश्च अनुकंप्याः प्रजाहिवः २९ भवद्विधामहाभागाः संनि
षेव्याःर्हसत्तमाः श्रेयस्कामैर्नृभिर्नित्यंदेवाः स्वार्थानसाधवः ३० नमोभगव

वत्सपरानुग्रहपराः परमार्थतस्तुसाधवएवदेवाइतितएवसेव्याइत्यर्थः ३० श्रीवासुदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ पू॰
३०१

तर्हि मृच्छिलादिमयाः किं देवादयो नैवेत्यत आह नहीति अम्मयानितीर्थानिमृन्मया:
शिलामयाश्च देवा न भवंतीति न अपितु भवंत्येव तथापि साधूनां तेषां च महदंतरमि
त्यत आह तेपुनंतीति ३१ किं चिच्चिकीर्षयन् प्रागादिति यदुक्तं तत्कार्यमादिशति

नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः तेपुनंत्युरुकाले[illegible]दर्शनादे
वसाधवः ३१ सभवान्सुहृदांवैनःश्रेयान्श्रेयश्चिकीर्षया जिज्ञासार्थं
पांडवानांगछस्वगजसाह्वयं ३२

सइतिनः सुहृदांमध्येभ[gap]वान्श्रेष्ठः अतः पांडवानांश्रेय
श्चिकीर्षयागजाह्वयंगछस्वगछेति यद्वास्वेतिएथकूपदंहेस्वआत्मीयेत्यर्थः ३२ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनीताःस्वेतो

राज्ञाधृतराष्ट्रेण राजश्रृंगात्पर्वतात्तस्वपुरंहस्तिनापुरंवसंते निवसंतिशुश्रुमः श्रुतवंतोवयं ३३ दुष्टायेस्वपुत्रादुर्योधनादयस्तद्वसेनगच्छ नीतितथायतः अंधदृक्

पितर्युपरतेबालाः सहमात्रासुदुःखिताः आनीताःस्वपुरंराज्ञावसंतइतिशुश्रुम ३३
तेषुराजांबिकापुत्रोमातृपुत्रेषुदीनधीः समोनवर्त्ततेनूनंदुष्पुत्रवस्त्रौधदृक् ३४
गच्छजानीहितद्वृत्तमधुनासाध्वसाधुवा विज्ञायतद्विधास्यामोयथाशंसुहृदांभवे
त् ३५ इत्यक्रूरंसमादिश्यभगवान्हरिरीश्वरः संकर्षणोद्धवाभ्यांचततःस्वभवनं
ययौ ३६ इति श्रीभागवते महापुराणे अष्टचत्वारिंशोध्यायः ॥४८॥ श्रीकृष्णपरमात्म

अंधनेत्रोधृतराष्ट्रः ३४ ३६ ॥ अध्यायः ॥४८॥

तद्वृत्ते धृतराष्ट्रचरितं ज्ञात्वा सुहृदां पांडवानां सुखं यथा भविष्यति तथा विधास्यामो वयं ३५

त्तुनपंचाशत्तमे तु गत्वाक्रूरो गजाह्वयं राज्ञः स्वपात्पुत्रेषु लुब्धाद्वैषम्यमागमत् १ पौ
रवेंद्राणां यशोभिस्तत्कृतदेवब्राह्मणायतनादिभिरंकितं १ बाल्हीकपुत्रः सोमद

श्रीशुक उवाच ॥ सगत्वाहास्तिनपुरंपौरवेंद्रयशोंकितं ददर्शतत्रांबिकेयंसभीष्मंवि
दुरंपृथां १ सहपुत्रंचबाल्हीकंभारद्वाजंसगौतमं कर्णंसुयोधनंद्रौणिंपांडवान्सु
हृदोपरान् २ यथावदुपसंगम्यबंधुभिर्गांदिनीसुतः संपृष्टस्तैःसुहृद्वार्तांस्वयंचा
पृच्छदव्ययं ३ उवासकतिचिन्मासान्राज्ञोवृत्तविवित्सया दुष्प्रजस्याल्पसारस्यख
लछंदानुवर्तिनः ४

त्तः भारद्वाजो द्रोणः गौतमः कृपः २ अव्ययं कुशलं ३ दुष्प्रजस्य
असत्पुत्रस्य अल्पसारस्य मंदधृतेः खलानां कर्णादीनां छंदमिच्छामनुवर्तितुं शील
मस्येति तथा तस्य ४

गांदिनीसुत अक्रूरः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेजः प्रभावः ओजः शस्त्रादिनैपुण्यवीर्यं शौर्यं न सहद्भिरसहमानैश्चिकीर्षितं इतउपरि कर्तुमिष्टं ५ गरस्य विषस्य दानादि अपेशलं अन्याय्यं इत्यादि सर्वं कथयामास ६ तत्व

तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितं ५ कृतं च धार्त्तराष्ट्रैर्यद्गरदानाद्यपेशलं आचख्यौ सर्वमेवास्मै यथा विदुर एव च ६ पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तं उवाच जन्मनिलयं स्मरंत्यश्रुकुलेक्षणा ७ अपि स्म रंति नः सौम्य पितरौ भ्रातरश्च मे भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ८ भ्रात्रेयो भगवान्कृष्णः शरण्यो भक्तवत्सलः पितृष्वस्रेयान्स्मरति रामश्चांबुरुहेक्षणः ९

धनात्पूर्वतरं पृथायाः वचनमाह पृथालिति अश्रूणां कलाः लेशाः ययोस्ते ईक्षणे यस्याः सा

जन्मनिलयं स्वकीयान् जनान् स्मि:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातुः पुत्रः कृष्णः स्मरति किं

अपि किं ज्ञामयः कुलस्त्रियः ८ पितृष्वस्रेयान्मत्पुत्रान्सांत्वयिष्यति किं ९ १० हे महायो
गिन् महानुयोग उपायो मायाख्यो स्यास्तीति हे विश्वात्मन् सर्वांतर्यामिन् हे विश्वभा

सपत्नमध्ये शोचंतीं वृकाणां हरिणीमिव सांत्वयिंति मां वाक्यैः पितृहीनांश्च बालका
न् १० कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वभावन प्रपन्नां पाहि गोविंद शिशुभि
श्चावसीदतीं ११ नान्यं तव पदांभोजात्पश्यामि शरणं नृणां बिभ्यतां मृत्युसंसारादीश्व
रस्यापवर्गिकात् १२ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने योगेश्वराय योगाय त्वा
महं शरणं गता १३ श्रीशुक उ॰ इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरं प्रारुदद्दुःखिता
राजन् भवतां प्रपितामही १४

वन विश्वपालक प्रपन्ना शरणागता अवसीदतीं क्लिश्यतीं
११ आपवर्गिकात् मोक्षप्रदात् १२ शुद्धाय धर्मात्मने ब्रह्मणे अपरिछिन्नाय परमात्मने ब्रह्म
ईश्वरस्य तव हे अंतर्यामिन् पदांभोजात् अन्यं संसारिणां शरणं न पश्यामि किं मृत्युतः

ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णेज्ञीवसरवाययोगेश्वराय अणिमादियुक्ताय योगाय ज्ञानात्मने १३ प्रपितामहः पांडु
स्तस्य भार्यारुरोद १४ एषयासहसमंदुःखंचयस्यसः तस्याःपुत्राणामुत्पत्तिहेतुभिर्जन
कैर्धर्मानिलेंद्रादिभिस्तत्कथनैरित्यर्थः १५ बंधुभिःरामकृष्णादिभिः सौहृदेनउदितंउक्तं

समदुःखसुखोक्रूरोविदुरश्चमहायशाः सांत्वयामासतुःकुंतींतत्पुत्रोत्पत्तिहेतुभिः १५
यास्यत्राजानमभ्येत्यविषमंपुत्रलालसं अवदत्सुहृदांमध्येबंधुभिःसौहृदोदितं १६
अक्रूर ॥ ०॥ भोभोवैचित्रवीर्यत्वंकुरूणांकीर्तिवर्द्धन भ्रातर्युपरतेपांडावधुनासनमास्थि
तः १७ धर्मेणपालयन्नुर्वींप्रजाः शीलेनरंजयन् वर्त्तमानः समस्तेषुश्रेयंकीर्त्तिमवा
प्स्यसि १८

यत् तदवददिति १६ भ्रातर्युप रतइति पांडोःपुत्रेषुसत्सुराज्ञासनंत्वमास्थितः
तिकवासः १७ भवतुतथाप्येवंवर्त्तमानः श्रेयोवाप्स्यसीत्याह धर्मेणेति १८ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमोनरकंइहचमहद्दुखमितिभावः १९ नन्वात्मज्ञानात्मजादिषुकथंसमत्वंस्यात्तत्राह
नेहचेति अत्यंतंनित्यंसंवासः सम्यक्स्थितिः २० तत्रतावदुत्पत्तिमरणयोः सुखदुः
खयोश्चकेनापिसाहित्यंनास्तीत्याह एकइतिकिंचयदासहवसंतितदापिक्लेशोपा

अन्यथात्वाचरल्लोकेगर्हितोयास्यसेतमः तस्मात्समत्वेवर्तस्वपांडवेष्वात्मजेषुच १
नेहचात्यंतसंवासः कर्हिचित्केनचित्सह राजन्स्वेनापिदेहेनकिमुजायात्मजादिभिः
एकः प्रसूयतेजंतुरेकएवप्रलीयते एकोनुभुंक्तेसुकृतमेकएवचदुष्कृतं २१ अध
र्मोपचितंवित्तंहरंत्यन्येल्पमेधसः संभोजनीयापदेशैर्जला नीवजलौकसः २२ र्जितवि

त्तापहारितयापुत्रानामशत्रवएवज्ञेयाइत्याह अधर्मेति संभोजनीयाः पोष्याः पुत्राद
य इतिव्यपदेशैः अल्पमेधसोमूढस्य वित्तंहरंतिजलौकसोमत्स्यस्यजीवनभूतानिज
लानियथातत्पुत्राहरंतितद्वदिति २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच यानेवंपुष्णातितेधनमादायम्रताजीवंतोवातंपरित्यजंतीत्याह पुष्णाती
ति स्वबुध्यास्त्रीयाइत्याभिमा नेनरायोअर्थाःअव्हृतार्थंअप्राप्तभोगं २३ सपुनः

पुष्णातियानधर्मेणस्वबुध्यातमपंडितं तेव्हृतार्थंप्रहिण्वंतिप्राणारायःसुता
दयः २३ स्वयंकिल्बिषमादायतैस्त्यक्तोनार्थकोविदः असिद्धार्थोविशत्यंधंस्व
धर्मविमुखस्तमः २४ तस्माल्लोकमिमंराजन्स्वप्नमायामनोरथं वीक्ष्यायम्या
त्मनात्मानंसमःशांतोभवप्रभो २५
पापैकपाथेयोनरकंविशतीत्याहस्वयमि
तिअसिद्धार्थोपूर्णमनोरथः २४ स्वप्नस्वमायाचमनोरथश्चतत्तेनतुल्यंआय
म्यशांतःसन्समोभव २५

तिमम्य स्सन्नरःतमोनरकंविशतियतःस्वधर्मविमुखः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवान्कल्याणीमनःप्रीणंतीवाचंवदसि अनया

हेदानपते अक्रूरं नतृप्यामि अलमिति नमन्ये २६ सूनृताप्रियावाक् चले अस्थिरे हृदि नस्थीयते नतिष्ठतीत्यर्थः सुदामापर्वतः तत्रभवाविद्युत्तस्मिन् स्फटिक शिलामये सहसैवातिस्फुरिताविद्यु यथालीयते तद्वदित्यर्थः यद्वासुदामामालात्

धृतराष्ट्र उवाच यथावदसि कल्याणींवाचं दानपते भवान् तथानया नतृप्या मिमर्त्यः प्राप्ययथामृतं २६ तथापिसूनृतासौम्यहृदिनस्थीयते चले पुत्रानुराग विषमे विद्युत्सौदामिनीयथा २७ ईश्वरस्यविधिंकोनुविधुनोत्यन्यथापुमान् भूमे र्भारावताराययोवतीर्णोयदोःकुले २८

स्याः इयंसौदामिनीमालाकारेत्यर्थः २७ नन्वेवंजानतोपिकथमयंमोहइतिचेत्तत्राह ईश्वरस्येतिविधिर्विधानंमामितियाव त् २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतस्त्वमेवनमस्यामि यइति दुर्विमर्शपथयाअवितर्कमार्गयागुणान्कर्माणितत्
फलानि चविभजतेविविच्यददाति दुरवबोधो योविहारस्तस्य क्रीडासएवतंत्रं

योदुर्विमर्शपथयानिजमाययेदंसृष्ट्वागुणान्विभजतेतदनुप्रविष्टः तस्मैनमो
दुरवबोधविहारतंत्रसंसारचक्रगतयेपरमेश्वराय २९ श्रीशुकउवाच इत्यभि
प्रेत्यनृपतेरभिप्रायंसयादवः सुहृद्भिःसमनुज्ञातःपुनर्यदुपुरीमगात् ३० श
शंसरामकृष्णाभ्यां धृतराष्ट्रविचेष्टितं पांडवान्प्रतिकौरव्ययदर्थंप्रेषितःस्व
यं ३१ इति श्रीभागवते महापुराणेदशमस्कंधेएकोनपंचाशत्तमोध्यायः ॥४९॥

प्रधानंमुख्यंकारणंयस्यसंसारचक्रस्यअतएवतद्गतिर्यस्मात्तस्मैनमइति २९
अभिप्रेत्यज्ञात्वा ३० ३१ ॥अध्यायः ॥४९॥

स्यग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू०
३७८

इति श्रीभागवते भावार्थदीपिकायां टीकायां दशमस्कंधे एकोनपंचाशत्तमोध्यायः ॥ इति दशमपूर्वार्द्ध संपूर्णं श्रीकृष्णार्पणमस्तु ॥ शुभंभवतु ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰
१

ॐ

ॐ नमो भगवते वासुदेवाय नमः ततः पंचाशत्तमे तु जरासंधभयादिव कारयि
त्वांबुधौ दुर्गं तस्मिन्नानयनिजं जनं १ कृष्णादनकपट्टैरेव हत्वादैत्यानयत्ततः अज

श्रीशुक उवाच॥ अस्तिः प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ मृते भर्त्तरि दु
ःखार्त्ते ईयतुः स्म पितुर्गृहान् १ पित्रे मगधराजाय जरासंधाय दुःखिते
वेदयांचक्रतुः सर्वमात्मवैधव्यकारणं २ स तदप्रियमाकर्ण्य शोकाम
र्षयुतो नृपः अयादवीं महीं कर्त्तुं चक्रे परममुद्यमं ३ पत्र्व जरासंधध

र्म्मेणैव तु धार्म्मिकं २ अस्ति प्राप्तिसंज्ञिके ईयतुः जग्मतुः १ २ कंसे शोकः कृष्णे
अमर्षः ताभ्यां पुतः ३ कंसस्य भार्ये जरासंधस्य गृहान्

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषमेवायुधंयस्यसः ग्रस्य भ्रमयात्तूयोद्धुं प्रतिजग[illegible] उच्छ्रितनैकमस्तकः उन्नमितानेकफणः दद्रायुधः दंतायुधः करालजिह्वश्वासावुच्छ्वसितोग्रलोचनश्वउच्छ्वसितानि

तमापतंतंतरसाविषायुधः ग्रस्य भ्रमयाउच्छ्रितनैकमस्तकः दद्भिः सुपर्णंव्य
दशद्दद्रायुधः करालजिह्वोच्छ्वसितोग्रलोचनः ६ तंतार्क्ष्यपुत्रः सनिरस्यमन्यु
मान्प्रचंडवेगोमधुसूदनासनः पक्षेणसव्येनहिरण्यरोचिषाजघानकद्रूसु
तमुग्रविक्रमः ७ सुपर्णपक्षाभिहतः कालियोऽतीवविह्वलः ह्रदंविवेशकालिंद्यास्तदगम्यंदुरासदं ८

उज्जृंभितान्युग्राणिलोचनानियस्यसः ६ तार्क्ष्यपुत्रोगरुडः मधुसूदनस्यासनंयस्मिन्सः ७ तस्यगरुडस्यअगम्यंअगाधतयादुरासदं ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदगम्यत्वेकारणमाह तत्रेति निवारितोपि ९ ॥ लेलिहः सर्प्पः अत्रस्तत्रावात्सीत्

तत्रैकदाजलचरंगरुडोमत्स्यमीप्सितं निवारितः सौभरिणाप्रसह्यक्षुधितोहरत्
१ मीनान्सुदुःखितान्दृष्ट्वादीनान्मीनपतौहते कृपयासौभरिः प्राहतत्रत्यंक्षेम
माचरन् १० अत्रप्रविश्यगरुडोयदिमत्स्यान्सखादति सद्यःप्राणैर्वियुज्येतसत्य
मेतद्ब्रवीम्यहं ११ तंकालियःपरंवेदनान्यः कश्चनलेलिहः अवात्सीद्गरुडाद्भीतः
कृष्णेनचविवासितः १२ कृष्णंह्रदाद्विनिष्क्रांतंदिव्यस्रग्गंधवाससं महामणि
गणाकीर्णंजांबूनदपरिष्कृतं १३ उपलभ्योत्थिताःसर्वेलब्धप्राणाइवासवः प्रमोद
निभृतात्मानोगोपाः प्रीत्याभिरेभिरे १४

१२ जां[illegible]सुवर्णेनालंकृतं १३ असवः
इंद्रियाणिप्रमोद[illegible]पूर्णमनसः १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लब्धेहाः लब्धचेष्टाः १५ नगाः रक्षाः अपिपूर्वंसुष्का[illegible]नः सघएवनिरूढाऽस्त्यर्थः १६

यशोदारोहिणीनंदोगोप्योगोपाश्चकौरव कृष्णंसमेत्यलब्धेहाआसन्लब्धम
नोरथाः १५ रामश्चाच्युतमालिंग्यजहास्तास्यानुभाववित् नगागावोवृषाव
त्सालेभिरेपरमांमुदं १६ नंदंविप्राःसमागत्यगुरवःसकलत्रकाः ऊचुस्तेकालि
यग्रस्तोदिष्ट्यामुक्तस्तवात्मजः १७ देहिदानंद्विजातीनांकृष्णनिर्मुक्तिहेतवे
नंदःप्रीतमनाराजन्गाःसुवर्णंतदादिशत् १८ यशोदापिमहाभागानष्टल
ब्धप्रजासती परिष्वज्यांकरोमोप्यमुमोचाश्रुकलांमुहुः १९ श्रीगोपालकृष्णा

तेविप्राऊचुः १७ १८ नष्टलब्धप्रजानष्टप्रायापुनर्लब्धाप्रजाययासा १९ रामराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रमेणचकर्षिताः उपकूलतः कूल प्रांते २० २३ कालाग्नेः मृत्युरूपादग्नेः नमस्यो

तांरात्रिंतत्रराजेंद्रक्षुत्तृड्भ्यांश्रमकर्षिताः ऊषुर्व्रजौकसोगावः कालिंद्याउपकू
लतः २० तदाशुचिवनोद्भूतोदवाग्निःसर्वतोव्रजं सुप्तंनिशीथआवृत्यप्रदग्धु
मुपचक्रमे २१ ततउत्थायसंभ्रांतादह्यमानाव्रजौकसः कृष्णंययुस्तेशरणं
मायामनुजमीश्वरं २२ कृष्णकृष्णमहाभागहेरामामितविक्रम एषघोरतमो
वन्हिस्तावकान्ग्रसतेहिनः २३ सुदुस्तरान्नःस्वान्पाहिकालाग्नेःसुहृदःप्रभो
नशक्नुमस्त्वच्चरणंसंत्यक्तुमकुतोभयं २४

विभीमः किंतुत्वच्चरणवियोगादित्याह नशक्नुमइति २४ हरेरामरामरामहरेहरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमोह्य नहि दंडेन ततः स्वं शरणं गतान् गोपान् पा[illegible]तो सावनंतवँबहितः २५ इ न
ती दशमे रीकायांस सद शोध्या याः ॥ १७ ॥ अष्टादशे न ततो ग्रीष्मे वसंत गुणलासि
इत्थं स्वजन वैक्लव्यं निरीक्ष्य जगदीश्वरः तमग्निमपिबत्तीव्रमनंतोऽनंतश
क्तिधृक् २५ इती श्री भागवते माहापुराणे दशमस्कंधे कालीय दमनो नाम सप्त
दशोऽध्यायः ॥ १७ ॥ ॥ शुक उवाच ॥ अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः अनुगीयमानोन्यविशद्व्रजं गोकुलमंडितं १ व्रजे विक्रीडतोरेवं गोपालच्छद्ममायया
ते अयात यद्धले नालं प्रलंबं लीलया हरिः १ कृत्वा नृत्यं फणाग्रेषु कालियस्य सकौतुकं बलं प्रलंबं तुंगांस मारोहयदरातिहा गोपालच्छद्ममायया गोपालनमेव च्छद्मयस्यांतया १

२ वसंतसाम्यमाह चतुर्भिः यत्रग्रीष्मोपिनिर्झराणांनिर्ह्रादेनघोषेणनिरस्तस्वना
छन्नध्वनयोझिल्लिकाः कठोरध्वनिसूक्ष्मकीटायस्मिंस्तथाभूतंवृंदावनंभवति

व्रजेविक्रीडतोरेवंगोपालछद्ममायया ग्रीष्मोनामर्तुरभवन्नातिप्रेयाञ्
शरीरिणां २ सचवृंदावनगुणैर्वसंतइवलक्षितः यत्रास्तेभगवान्सा
क्षाद्रामेणसहकेशवः ३ यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं शश्व
त्तच्छीकरर्जीषद्रुममंडलमंडितं ४

किंच शश्वत्तेषांनिर्झराणांशीकरैरंबुकणैःऋजीषाः स्निग्धायेद्रुमास्तेषांमंडलैर्मंडि ६५

यत्रग्रीष्मेवनेवानिदाघोग्रीष्मस्तेनतत्कालीनवन्हेः [illegible]र्ष्मांचभवति योदवस्तापः
अतिशाड्वले अतिहरिततॄणाकीर्णे यद्वाअतिक्रांतशाड्वलेपिस्थाने ५ ननुशाड्वल

सरित्सरः प्रश्रवणोर्मिवायुनाकल्हारकंजोत्पलरेणुहारिणा नविद्यतेयत्रव
नौकसांखोनिदाघवन्ह्यर्कभवोतिशाड्वले अगाधतोयाह्रदिनीतटोर्मिभि
र्ईवत्सुरीषाःपुलिनैःसमंततः नयत्रचंडांशुकराविषोल्बणाभुवोरसंशाड्वलि
तंचगृण्हते ६

मेवकुतस्त्यंतत्राह अगाध [illegible] ति अगाधानितोयानियासांतासां
ह्रदिनीनांतटस्पर्शिभिरूर्मिभिःपुलिनैःसहद्रवत्सुरीषंपंकोयस्यास्तस्याभुवः
रसंशाड्वलितंशाड्वलरूपतांचविषवदुल्बणाअपिसूर्यरश्मयोनगृण्हतेनहरंति ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वनमविशदित्युत्तरेणान्वयः नदंतः श्चित्रामृगाद्विजाश्चयास्मिन् गायंतोमयूराभ्र

वनंकुसुमितंश्रीमन्नदच्चित्रमृगद्विजं गायन्मयूरभ्रमरंकूजत्कोकि
लसारसं ७ क्रीडिष्यमाणस्तत्कृष्णोभगवान्बलसंयुतः वेणुंविरणय
न्गोपैर्गोधनैः संवृतोविशत् ८ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः
रामकृष्णादयोगोपाननृतुर्युयुधुर्जगुः ९ कृष्णस्यनृत्यतः केचिज्जगुः
केचिदवादयन् वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे १०

मराश्चयास्मिन्कूजंतः कोकिलाः सारसाश्चयास्मिन् तत् अविशत् ७ ८ ९ १०

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ काकपक्षाः चूडाकरणात्प्राक्तनकेशाः भ्रमणादिप्रकारैर्नियुद्धेन बाहुयुद्धेन चिक्री

गोपजातिप्रतिछन्नौ देवौ गोपालरूपिणौ ईडिरे कृष्णरामौ च नटा इव नटं नृप ११
भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्व
चित् १२ क्वचिन्नृत्सत्सु चान्येषु गायकौ वादकौ स्वयं शशंसतुर्महाराज साधु साध्विति वादिनौ १३ क्वचिद्बिल्वैः क्वचित्कुंभैः क्व चामलकमुष्टिभिः अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया १४

उक्तुः १२ कुंभैः कुंभवृक्षफलैः अस्पृश्यं अस्पृश्यत्वं नेत्रबंधश्च तदाद्यैर्मृगाणां खगानां

श्रीभा॰ द॰

दर्दुरप्लावैः मंडूकप्लुतिभिः स्यंदोलिकयादोलालंबनेनन्नृपाणामिवलीलया १५ नयः

क्वचिच्चर्दुरप्लावैर्विविधैरुपहासकैः कदाचित्स्यंदोलिकयाकर्हिचिन्नृपचेष्ट
या १५ एवंतौलोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने नद्यद्रिद्रोणकुंजेषुकाननेषुस
रस्सुच १६ पशूंश्चारयतोगोपैस्तद्वनेरामकृष्णयोः गोपरूपीप्रलंबोगादसुरस्तज्जि
हीर्षया १७ तंविद्वानपिदाशार्हो भगवान्सर्वदर्शनः अन्वमोदततत्सख्यंवधंतस्य
विचिंतयन् १८ तत्रोपहूयगोपालान्कृष्णःप्राहविहारवित् हेगोपाविहरिष्या
मोद्वंद्वीभूययथायथं १९

अद्रिद्रोणयःकुंजानिच एतेषु १६ चारयतोःसतोःतद्व
नेतास्मिन्ननेनयोर्जिहीर्षया १७ १८ यथायथंवयोबलाद्यनुरूपंद्वंद्वीभूय १९ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिवृढौ नायकौ तत्र केचन कृष्णसंघट्टिनः कृष्णपक्षीयाः २० वाह्यमानाः पृष्ठेनोह्य

तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे २०
आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः यत्रारोहंति जेतारो वहंति च पराजिताः
वहंतो वाह्यमानाश्च चारयंतश्च गोधनं भांडीरकं वटं नाम जग्मुः कृष्णपुरोगमाः २२
रामसंघट्टिनो यर्हि श्रीदामवृषभादयः क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप
उवाह कृष्णो भगवान्श्रीदामानं पराजितः वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसु
रामं तं २४ अविषह्यं मन्यमानः कृष्णं दानवपुंगवः वहन्द्रुततरं प्रागादवरोहणतः प
रं २५

मानाः २१ कृष्णदृष्टिवंचनाय अवरुह्यते यस्मिन्नित्यवरोहणं मर्यादा ततः परं दू
रं अगात् २५

भा.द.पू.
१६८

धरणि धरेंद्रवद्गौरवंपस्यंतं निजमासुरंवपुरास्थितः पुरटपरिछदःसुवर्णालंकारःत
डित्द्युमान्‌विद्युद्दीप्तिमानित्यलंकारोपमाउडुपतिवाडितिरामोपमाउडुपतिवह
तीसुडुपतिवाह्‌ यद्दियथोचितस्थानेषु स्थिताविद्युतोभवंति उपरिचउडुपतिस्त

न तमुद्वहंधरणि धरेंद्रगौरवंमहासुरोविगतरयोनिजंवपुः सआस्थितःपुरटपरिछदोबभौ
तडित्द्युमानुडुपतिवाडिवांबुदः २६ निरीक्ष्यतद्वपुरलमंबरेचरत्प्रदीप्तदृक्भ्रकुटि
तटोग्रदंष्ट्रकं ज्वलछिखंकटककिरीटकुंडलात्विषाद्भुतंहलधरईषदत्रसत्‌ २७ दासों

बुदोयथाभवातितद्वद्भाविस्पर्धः २६ अलमतिवेगेनप्रदीप्तेदृशौयस्मिन्‌व पुषि
तत्‌भ्रकुटितटं लग्नाउग्रादंष्ट्रायस्मिन्‌ तत्‌प्रदीप्तदृक्‌ भ्रकुटीतटमुग्रादंष्ट्रायस्मि १६८
सं न्तत्थ्व तथ्वेतिवाज्वलंत्यःशिखाकेशायस्मिन्‌तत्‌ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आगतस्मृतिरभयइवआत्मनः सार्थंगोपसमूहंविहायहरंतंरिपुमहनत् यद्वाविहा
यसाआकाशमार्गेणात्मनः प्राप्तमर्थमिवहरंतमिति वज्ररंहसावज्रवेगेनमुष्टि

अथागतस्मृतिरभयोरिपुंबलोविहायसार्थमिवहरंतमात्मनः रुषाहनच्छिरसि
दृढेनमुष्टिनासुराधिपोगिरिमिववज्ररंहसा २८ सआहतःसपदिविशीर्णमस्त
कोमुखाद्वमन्रुधिरमपस्मृतोःसुरः महारवंव्यसुरपतत्समीरयन्गिरिर्यथाम
घवतआयुधाहतः २९ दृष्ट्वाप्रलंबंनिहतंबलेनबलशालिना गोपाःसुविस्मिता
आसन्साधुसाध्वितिवादिनः ३० आशिषोभिगृणंतस्तंप्रशशंसुःस्तदर्हणं प्रेत्या
गतमिवालिंग्यप्रेमविह्वलचेतसः ३१

ना २८ अपस्मृतःगतस्मृ तिःमहारवंसमीरय
न् २९ ३० तदर्हणंप्रशंसार्हं ३१ नमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३२ इतिश्रीमेटीकायामष्टादशोध्यायः ॥१८॥ तुनर्विशे निविष्टं तु गोपगोकुलमच्युतः
मुंजारण्यमरण्यग्नेररक्षत्तान्निपानतः १ दूरचारिण्यः वनाद्वनांतरं निर्विशंत्योदा

पापेप्रलंबेनिहतेदेवाःपरमनिर्वृताः अभ्यवर्षन्बलंमाल्यैः शशंसुःसाधु
साध्विति ३२ इती श्रीभागवते महापुराणे दशमस्कंधे प्रलंब वधोनामाष्टादशो
ध्यायः ॥१८॥ ८ क्रीडासक्तेषु गोपेषु तद्गावोदूरचारिणीः स्वैरंचरंत्योविवि
शुस्तृणलोभेनगह्वरं १ अजागावोमहिष्यश्च निर्विशंत्योवनाद्वनं ईषि
काटवींविविशुः क्रंदंत्योदावतर्षिताः २

वेन तर्षितास्तृषिताः क्रंदंत्यः ईषिकाटवी अस्पृष्टच्छिद्रघनतृणविशेषारण्यं निर्विवि ६१
शुः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णरामावादिर्येयांते नतुतौतासांगवांखुरैः दलितैश्छिन्नैस्तृणैर्गोष्पदैरंकितैश्च
भूप्रदेशैस्तृणैर्वागवांमार्गमन्वगमन् नष्टाजीव्यागतजीविकासाधनाः ४ मुंजाट

तेपश्यंतःपश्यन्गोपाः कृष्णरामादयस्तदा जातानुतापानविदुर्विचिन्वंतोगवांगतिं
३ तृणैस्तत्खुरदछिन्नैर्गोष्पदैरंकितैर्गवां मार्गमन्वगमन्सर्वेनष्टाजीव्याविचेतसः
४ मुंजाटव्यांभ्रष्टमार्गंक्रंदमानंस्वगोधनं संप्राप्यतृषिताःश्रांतास्ततस्तेसंन्यवर्त
यन् ५ ताआहूताभगवतामेघगंभीरयागिरा स्वनाम्नांनिनदंश्रुत्वाप्रतिनेदुःप्रह
र्षिताः ६ ततःसमंताद्वनधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसां समीरितःसारथि
नोल्बणोल्मुकैर्विलेलिहानःस्थिरजंगमंमहान ७

व्यपिसेव ५ ६ ईषिकाटवींगोपानांनाशहे
तुर्वनवह्निःसर्वतःप्रादुरभूत्सारथिनावायुना ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ ९ १० ११ तत् क्षणमेव भांडीरं नीत्वा तान मोचयदित्यर्थः॥

कृछ्रात् गह्वरं प्रवेश्य क्षुत्तृट्श्रमादिजनितार्तं ८ ९ १० ११ १२ क्षणेनैव भांडीरं प्रापि

तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः उचुश्च कृष्णं सबलं प्रप
न्नाय थाहरिं मृत्युभयार्दिताजनाः ८ कृष्णकृष्णमहावीर्य हेरामामितविक्रम
दावाग्निना दह्यमानान् प्रपन्नान् त्रातुमर्हसि ९ नूनं त्वद्बांधवाः कृष्णनचार्हंत्यव
सीदितुं वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः १०॥ श्रीशुक उवाच॥ वचो निशम्य कृ
पणं बंधूनां भगवान् हरिः निमीलयत माभैष्ट लोचनानीत्यभाषत ११ तथेति
मिलिताक्षेषु भगवानग्निमुल्बणं पीत्वा मुखेन तान् कृछ्राद्योगाधीशो व्यमोचयत् १२
ततश्च तेक्षीण्युन्मील्य पुनर्भांडीरमापिताः निशम्य विस्मिता आसन्नात्मानं गाश्च

मोचिताः १३

तास्ततः अक्षीण्युन्मील्य विस्मि ता: १३ श्रीकृष्णपरमात्मने नमो नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हा श्रीँमादिस्वगोपानांस्वांगमारुत्थलदृष्यतां स्वैश्वर्यमाविश्करोत्तूबनवन्हिनिपानतः १६

कृष्णस्ययोगवीर्यंतद्योगमायानुभावितं दावाग्नेरात्मनः क्षेमंवीक्ष्यतेमेनि
रेऽमरं १४ गाःसन्निवर्त्यसायान्हेसहरामोजनार्द्दनः वेणुंविरणयन्गोष्ठम
गाद्गोपैरभिष्टुतः १५ गोपीनांपरमानंदआसीद्गोविंददर्शने क्षणंयुगशत
मिवयासांयेन विनाभवत् १६ इतिश्रीभागवतेमाहापुराणेदशमस्कंधेदा
वाग्नि ना मैकोनविंशोध्यायः ॥१९

इतिश्रीभागवतेमाहापुराणेदशमस्कंधेटीकायां ॥एकोनविंशतितमोध्यायः॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विंशेप्रावृट्शरच्छोभावर्णनेनवनोचिताः प्रावृट्क्रीडानिरूप्यंतेगोपरामयुजोहरेः
१ हेयादेयोपमानेनप्रावृट्शरदृतुश्रियोः वर्णनंत्वद्भुतैश्वर्यकृष्णलीलाविवक्षया
१२ तत्रप्रावृड्वर्णनंततआदिद्वाविंशत्या सर्वेषांप्राणिनांसमुद्भवउत्पत्ति

श्रीशुकउवाच तयोस्तदद्भुतंकर्मदावाग्नेर्मोक्षमात्मनः गोपाःस्त्रीभ्यःसमाच
ख्युःप्रलंबवधमेवच १ गोपवृद्धाश्चगोप्यश्चतदुपाकर्ण्यविस्मिताः मेनिरेदेव
प्रवरौकृष्णरामौव्रजंगतौ २ ततःप्रावर्त्ततप्रावृट्सर्वसत्वसमुद्भवा विद्योतमा
नपरिधिर्विस्फूर्जितनभस्तला ३

तोजीवनंश्चयस्यांसाप्रावृट्विद्योतमानाःपरि त
धयःपरिवेषादिशोवायस्यांसा विस्फूर्जितंसंक्षुभितंनभस्तलंयस्यां ३ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सांद्रैर्निबिडैर्नीलांबुदैर्विद्युद्गर्जितसहितैराछन्नंसद्गुणंगुणैराछन्नंजीवारम्यंविद्यु
द्गर्जितांबुदांसत्वरजस्तमोभिरुपमा ४ पर्जन्यः स्वगोभिः रश्मिभिः कालेयथो
चितसमयेअत्रराजोपमाकरादानतः समयेपुनर्दानतश्चसूचिता ५ अस्यवि

सांद्रनीलांबुदैर्व्योमसविद्युत्स्तनयित्नुभिः अस्य छन्ज्योतिराछन्नंब्रह्मेवसगुणं
बभौ ६ अष्टौमासान्निपीतंयद्भूम्याश्चोदमयंवसु स्वगोभिर्मोक्तुमारेभेपर्जन्यः
कालआगते ५ २ तपः कृशादेवमीढा आशीद्दृष्टीपसीमही यथैवकाम्यतपसस्त
नुः संप्राप्यतत्फलं ६
श्वस्यप्राणनआप्यायनक र जीवनमुदकंमुमुचुः कृपालवो
यथातमंजनंनिरीक्ष्यानुकंपमानाः तदाप्यायंस्वजीवनमपित्यजंतितद्वन्महांतो

नाप

नां

ब्रह्मे
सूर्य
२

भा० द० पू०
१२

मेघास्तडिन्नेत्रैर्विश्वं नष्टं निरीक्ष्य वायुभिर्वेपिता जीवनं मुमुचुरिति ६ तपसा श्री
ष्मेण कृशा देवमीढा पर्ज्जन्यासिक्तावर्षीयसी उद्धूना पुष्टा काम्यं तपो यस्य तस्य त

तडित्वंतो महामेघाश्चंडश्वसनवेपिताः प्राणनं जीवनं ह्यस्य मुमुचुः करुणा इव
७ निशामुखेषु खद्योतास्तमसा भांति न ग्रहाः यथा पापेन पाखंडा न हि वेदाः कलौ
युगे ८ श्रुत्वा पर्ज्जन्यनिनदं मंडूकाः व्यसृजन् गिरः तूष्णीं शयानाः प्राग्यद्वद्ब्राह्म
णा नियमात्यये ९ आसन्नुत्पथवाहिन्यः क्षुद्रनद्योनुशुष्यतीः पुंसो यथास्वतंत्र
स्य देहद्रविणसंपदः १०

…ुः कामान्संप्राप्य यथोति ७ नित्यकर्मावसाने आचार्येण निन
दं श्रुत्वा तच्छिष्याः यथाधीयंते तद्वदिति ९ अनुशुष्यतीः अनुशुष्यंत्यः अस्वतंत्रस्य
इंद्रियपरतंत्रस्य [illegible] निरंकुशस्येति १०

वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिभिर्नीलैः शष्पैर्बालतृणैः नीलवर्णैः क्वचित् क्वचिदिंद्रगोपैः कीटविशेषैर्लोहितानि तत्र
तत्र उच्छिलींध्रैः छत्राकारैरुद्भिन्नैः कृतच्छायाकृणं राज्ञां श्रीः सेनासंपदिव ११ क्षेत्रा
णीति तदाद्विश्लिष्टेरविच्छेदेलसंतः प्रियंवादयो मुदं ददति विच्छेदे शुष्यंतोनुतापं चे दुरि

॥ हरिताहरिभिः शष्पैरिंद्रगोपैश्च लोहिता उच्छिलींध्रकृतच्छायानृणां श्रेरिवाभ
रम्भत् ११ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः धनिनामुपतापं च ददे वाधी
नमजानतां १२ जलस्थलौकसः सर्वे नववारिनिषेवया अविभ्रम् रुचिरं रूपं यथा
हरिनिषेवया १३
ति १२ अविभ्रत् अबिभरुः यथा हरिनिषेवयेति हरिसेवायां
प्रवृत्ता हि सद्य एव सर्वे रुचिरा भवंति तस्याः परमधर्मत्वात्परमसुखत्वाच्च तद्वदि
ति १३

कामाक्तंकामवासनायुक्तमिति श्वसनोर्मिसाम्यंगुणैर्विषयैर्युज्यतइतिनयासरि
त्संगतिसाम्यं १४ अधोक्षजएवचेतोयेषांते १५ असंस्कृताअक्षुण्णानाभ्यस्यमा

॥सरिद्भिःसंगतःसिंधुश्चुक्षुभेश्वसनोर्मिमान् अपक्वयोगिनश्चित्तंकामाक्तंगुण
युग्यथा १४ गिरयोवर्षधाराभिर्हन्यमानानविव्यथुः अभिभूयमानाव्यसनैर्यथाऽधो
क्षजचेतसः १५ मार्गाबभूवुःसंदिग्धास्तृणैश्छन्नाह्यसंस्कृताः नाभ्यस्यमानाःश्रु
तयोद्विजैःकालहताइव १६ लोकबंधुषुमेघेषुविद्युतश्चलसौहृदाः स्थैर्यंनचक्रुः
कामिन्यःपुरुषेषुगुणिष्विव १७

नाइत्यसंस्कृतसाम्यं कालेनवाहताइति तृणाछादनसाम्यं १६ यथाकामिन्यःपुंश्च
ल्यः १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्गुणंज्यारहितमपिगुणिनिगर्ज्जितशब्दवतिअभात् अशोभत गुणव्यतिकरात्मके
व्यक्तेप्रपंचेअगुणवान्निर्गुणः पुरुषोयथेति १८ स्वभासाभासितयाअहंमत्येतिरु

धनुर्विययतिमाहेंद्रं निर्गुणंचगुणिन्यभात् व्यक्तेगुणव्यतिकरेगुणवान्पुरुषोयथा
१८ नरराजोरुपच्छन्नः स्वज्योत्स्नाराजितैर्घनैः अहंमत्याभासितयास्वभासापुरु
षोयथा १९ मेघागमोत्सवाहृष्टाः प्रत्यनंदन्शिखंडिनः गृहेषुतप्तानिर्विण्णयथा
च्युतजनागमे २० पीत्वापः पादपाः पद्भिरासन्नानात्ममूर्तयः प्राक्क्षामास्तप
साश्रांतायथाकामानुसेवया २१

चैतन्येनैवप्रकाशिनेनाहंकारेणछन्नोजीवोयथा
यद्वाहंविहाराद्दत्तावेतान्स्वरइतिस्वैर्नित्यैवारोपितयारति १९ मेघागमेनोत्सवोयेषां
अतोहृष्टाः २० नानात्ममूर्तयः अनेकरूपदेहाः २१

प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अशांतानिपंककंटकादियुक्तानिरोधांसितदानियेषांतेष्वपिन्मूषुः नितरामवसन्नस
रसाः चक्रवाकाः अशांतानिघोराणिअनुपरतानिवाक्यानियेषुतेष्वपिग्रहेषु २२

सरस्वशांतरोधस्सुन्मूषुरंगापिसारसाः ग्रहेष्वशांतकृत्येषुयाम्याश्ववुराशयाः
२२ जलौघैर्निरभिद्यंतसेतवोवर्षतीश्वरे पाखंडिनामसद्वादैर्वेदमार्गाः कलौ
यथा २३ व्यमुंचन्वायुभिर्नुन्नाभूतेभ्योः थामृतंघनाः यथाशिषोविश्यतयःका
लेकालेद्विजेरिताः २४ एवंवनंतद्वर्षिष्ठंपक्कखर्जूरजंबुमत् गोगोपालैर्वृतोरंतु
सबलः प्राविशद्धरिः २५ ईश्वरेइंद्रे २३ नुन्नाः प्रेरिताः आशिषः कामान् विश्यत
योराजानः वणिजांपतयोवाद्विजेरिताः पुरोहितैरुक्ताः २४ भाद्रपिक्कतांकीडांवर्ण
यति एवंवनमिति सप्तभिः वर्षिष्ठंसमृद्धं २५ १०४

२६ वनौकसः पुलिंदीः प्रमुदिताः भगवान् ददृशे तथा वनराजीः मधुच्युतः मधुस्रवाः
ददृशे गिरेः सकाशाज्जलधाराश्रितासांनादात् आसन्नानिकटवर्त्तिनीगुहाश्चयद्वा

धेनवोमंदगामिन्यऊधोभारेणभूयसा ययुर्भगवताहूताद्रु
तंप्रीत्यास्नुतस्तनीः २५ वनौकसःप्रमुदितावनराजीर्मधुच्यु
तः जलधारागिरेर्नादानासन्नाददृशेगुहाः २७

वनौकसः प्रमुदिताआसन् तथावनराजीर्वनराजयोवनपरंपराः मधुच्युतः आसन्
गिरेर्जलधारा आसन् तानेवंभूतान् आददृशे सर्वतोददर्श भगवान् तथा धाराणांना
दान् गुहाश्चेति २७

जल

अशांतानिपंककंटकादियुक्तानिरोधांसितटानियेषांतेष्वपिन्मूषुः नितरामवसन्सा
रसाः चक्रवाकाः अशांतानिघोराणिअनुपरतानिवाक्यानियेषुतेष्वपिग्रहेषु २२

सरस्वशांतरोधस्सुन्मूषुरंगापिसारसाः ग्रहेष्वशांतकृत्येषुग्राम्याश्वबुराशया
२२ जलौघैर्निरभिद्यंतसेतवोवर्षतीश्वरे पाखंडिनामसद्वादैर्वेदमार्गाः कलौ
यथा २३ व्यमुंचन्वायुभिर्नुन्नाभूतेभ्योः थामृतंघनाः यथाशिषोविश्यतयः का
लेकाले द्विजेरिताः २४ एवंवनंतद्वर्षिष्ठंपक्वखर्जूरजंबुमत् गोगोपालैर्वृतोरंतुं
सबलः प्राविशद्धरिः २५ ईश्वरेइंद्रे २३ नुन्नाः प्रेरिताः आशिषः कामान् विश्पत
योराजानः वणिजांपतयोवाद्विजेरिताः पुरोहितैरुक्ताः २४ मारूषिक्रतांक्रीडांवर्ण
यति एवंवनमिति सप्तभिः वर्षिष्ठंसमृद्धं २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६ वनौकसः पुलिंदीः प्रमुदिताः भगवान् ददृशे तथावनराजीः मधुस्रुतः मधुस्रवाः
ददृशे गिरेः सकाशाज्जलधाराश्रितासांनादात् आसन्नानिकटवर्त्तिनीगुहाश्चयद्वा

धेनवोमंदगामिन्यऊधोभारेणभूयसा ययुर्भगवताहूताद्रु
तंप्रीत्यास्नुतस्तनीः २५ वनौकसःप्रमुदितावनराजीर्मधुच्यु
तः जलधारागिरेर्न्नादानासन्नाददृशेगुहाः २७

वनौकसः प्रमुदिताआसन्तथावनराजीर्वनराजयोवनपरंपराः मधुस्रुतः आसन्
गिरेर्जलधाराआसन् तानेवंभूतान्आददृशेसर्वतोददर्श भगवान्तथाधाराणांना
दान्गुहाश्चेति २७

सेल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ ३१ शरदं वर्णयति एवं निवसतोरित्यष्टादशभिः विगतानि अभ्राणि यस्यां सा स्व

क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति निर्विश्य भगवान् रेमे कंदमूलफलाशनः २८
दध्योदनं समानीतं शिलायां सलिलांतिके संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः
२९ शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान् तृप्तान् वृषान् वत्सतरान् गाश्च स्वो
धोभरश्रमाः ३० प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहां भगवान् पूजयांचक्रे
आत्मशक्त्युपबृंहितां ३१ एवं निवसतोस्तस्मिन् रामकेशवयोर्व्रजे शरत्समभ
वद्व्यभ्रा स्वच्छांबु परुषानिला ३२ शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः भ्रष्टा
नामिव चेतांसि पुनर्योगनिषेवया ३३

च्छानि अंबूनि यस्यां सा अपरुषः शांतो निलोय
स्यां सा च सा च ३२ नीरजानामुत्पत्तिर्यस्यां यया तया शरदा कृत्वा नीरजानामुत्पत्त्या वा ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाहि भम्रमं

व्योम्नोऽंबरं इति व्योमादीनां चतुर्णां चतुरो मलान् शरद्धरत् आश्रमिणां चतुर्णां कृष्णे जा
ता भक्तिर्यथा शुभमसुखं हरति ब्रह्मचारिणो गुर्वर्थोदकाहरणकुं यथाभक्तिर्हरति
तथा पूर्णस्य तेनानुपयोगात् गुरुभिरपि कृतार्थस्य तस्यानियोगात् एवं व्योम्नोऽंबरं

॥ ५२ ॥ व्योम्नोऽंबं भूतशाबल्यं भुवः पंकमपांमलं शरज्जहाराश्रमिणां कृ
ष्णे भक्तिर्यथाशुभं ३४

शरज्जहार यथा च गृहि णोपत्यादि सांकर्यं भक्तिर्हरति विविक्तवासरुच्युमस्तेन तथाभू
तानां शाबल्यं सांकर्यं शरद्वर्षासु वृष्टिभिया संकुलानि वसंति यथा च वनस्थस्य मल
धारणक्लेशं भक्तिर्हरति एवं भुवः पंकं शरत् यथा च यतीनां कामादिवासनामलं श्री
कृष्णभक्तिर्हरति एवमपां मलं शरदिति ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यक्तैषणाः त्यक्ताः पुत्रवित्तलोकैषणा यैस्ते ३५ गिरयइति अयंभावः नस्युपाध्यायाः कर्मविद्यामिवज्ञानिनोज्ञानाम् तंसर्वतोवितरंति अपितुकृपयाक्वचिदेव एवंगिरयः

सर्वस्वंजलदाहित्वाविरेजुःशुभ्रवर्चसः यथात्यक्तैषणाः शांतामुनयोमुक्तकिल्बिषाः
३५ गिरयोमुमुचुस्तोयंक्वचिन्नमुमुचुःशिवं यथाज्ञानामृतंकालेज्ञानिनोददतेनवा
३६ नैवाविदन्क्षीयमाणंजलंगाधजलेचराः यथायुरन्वहंक्षय्यंनराम्मूढाःकुटुंबि
नः ३७ गाधवारिचरास्तापमविंदन्शरदर्कजं यथादरिद्रःकृपणःकुटुंब्यवि
जितेंद्रियः ३८

शिवंनिर्मलंतोयंक्वचिन्मुमुचुः क्वचिन्नपुनःप्रावरषीवसर्वतइति ३६ गा
धेक्षुद्रेजलेचरंतीतितथातेमीनादयः अविंदन्लेभिरे ३७ ३८ श्रीकृष्णपरमात्म

वारिणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स

शनैःशनैरिति तत्र ममतामिव पंकं अहंतामिवाममतां अपक्वतां जहुरिति ३९ आत्मन्युप
रतेऽल्पक्तक्रियो मुनिरिव निश्चलांबुः एवमुपरतागमः निरस्तवेदघोषइव तूष्णीमभू

शनैःशनैर्जहुः पंकं स्थलान्यामं च वीरुधः यथाहंममतां धीराः शरीरादिष्वनात्म
सु ३९ निश्चलांबुरभूत्तूष्णीं समुद्रः शरदागमे आत्मन्युपरते सम्यक् मुनिर्व्युपर
तागमः ४० केदारेभ्यस्त्वपोगृह्णन् कर्षका दृढसेतुभिः यथा प्राणैः स्रवज्ज्ञानं त
न्निरोधेन योगिनः ४१ शरदर्कांशुजांस्तापान् भूतानामुडुपोहरत् देहाभिमानजं
बोधो मुकुंदो व्रजयोषितां ४२

सेतु दिति ४० केदारेभ्यो बहूंशा लिक्षेत्रेभ्यो दृढैः सेतुभिर
पोगृह्णन् ततः परं वृष्ट्यभावात् प्राणैरिंद्रियैस्तन्निरोधेन इंद्रियप्रत्याहारेण ४१ देहा
भिमानजं बोधरवव्रजयोषितां मुकुंद इवेत्यर्थः ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरदाविमलातारकायस्मिन्तत् शब्दब्रह्मणोवेदस्यार्थान् पूर्वोत्तरमिमांसानिर्णीता
न्दर्शयति तथातद्वत् ४३ ४४ समः अन्यूनाधिकः शीतश्चोष्णश्चतंनतुगोप्यः कृष्णाप

खमशोभत्तनिर्मेघंशरद्विमलतारकं सत्वयुक्तंयथाचित्तं शब्दब्रह्मार्थदर्शनं ४३
अखंडमंडलोव्योम्निरराजोडुगणैः शशी यथायदुपतिः कृष्णोवृष्णिचक्रावृतोभुवि
४४ आश्लिष्यसमशीतोष्णंप्रसूनवनमारुतं जनास्तापंजहुर्गोप्योनकृष्णहृतचे
तसः ४५ गावोमृगाःखगानार्यःपुष्पिण्यःशरदाभवन् अन्वीयमानाःस्ववृषैःफलै
रीशक्रियाइव ४६
हृतचेतस्त्वेनतासांतापोऽःस हइति यद्वानकारउपमार्थः तदाकृष्णहृ
तचेतस इतिचेतसाकृष्णमाश्लिष्येयथेत्यर्थः ४५ पुष्पिण्यः गर्भिण्यः अन्वीयमानाः स्व
वृषैः स्वपतिभिरनिच्छंतोपिबलादनुगम्यमानाईश्वराराधनार्थाःक्रियाबलात्फलैरनुग

आलिंग्य

समानाः [illegible] ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमुत्कुमुदंकुत्सितामुत्तूयस्येतिदस्युसाम्यं ४७ आग्रयणैर्नवान्नप्राशनार्थैर्वैदि
कैर्योगैरिंद्रियैरिंद्रियार्थैर्लौकिकैश्चमहोत्सवैः कलाभ्यांरामकृष्णाभ्यांदर्शनादिमहो
त्सवाभ्यां ४८ वणिजोयतयोनृपाः स्नातकाश्चदृष्टादृष्टाभ्यांवर्षरुधाः संतोनिर्गम्य

उदहृष्यन्वारिजगनिसूर्योत्थानेकुमुद्विना राह्वानुनिर्भयालोकायथादस्यून्विना
नृप ४७ पुरग्रामेषाग्रयणैरिंद्रियैश्चमहोत्सवैः बभौभूः पक्वसस्याढ्याकलाभ्यां
नितरांहरेः ४८ वणिग्मुनिनृपस्नातानिर्गम्यार्थान्प्रपेदिरे वर्षरुधायथासिद्धाःस्व
पिंडान्कालआगते ४९

र्थान्वाणिज्यस्वाध्यंयदिग्विजय विद्यादीन्प्रपेदिरेप्रापयंत य
थामंत्रयोगादिसिद्धाः आयुषारुधाः कालेआगतेस्वपिंडान्योगादिप्राप्यान्देवादिदे
हानिति ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति दशमे टीकायां विंशतितमोध्यायः॥२०॥ एकविंशे शरद्रम्यवृंदावनगतो हरिः तद्वेणुस्व
नमाकर्ण्य गोपीभिर्गीतमीर्यते १ इत्थमेवंभूतं वनं तद्देवाह शरदा स्वच्छानि जलानि य

इति श्रीभागवते महापुराणे दशमस्कंधे शरद्वर्णनं नाम विंशतितमोध्यायः॥२०॥ श्रीशुक उ
॥वाच इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना न्यविशद्वायुना वातं सगोगोपाल
कोच्युतः १ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रं मधुप
तिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुं २

स्मिन् तत् वायुना वातं अ
वनं नरेक नुगतं व्याप्तमित्यर्थः १ ततश्च कुसुमितवनराजिषु शुष्मिणो मत्ताः भृंगाः द्विजाः खगा
श्च तेषां कुलानि तैर्जुष्टाः सरांसि सरितः महीध्राश्च यस्मिन् तद्वनं कृष्णोवगाह्य प्रवि १७८
श्य वेणुमवादयत् २
घुष्टाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्कृष्णवेणुगीतंस्मरस्यहृदयोयस्मात्तत्स्मृत्यस्मृत्वापुरोक्षंयथाभवति २ व्रजेस्त्रि

तद्व्रजस्त्रियआस्मृत्यवेणुगीतंस्मरोदयं काश्चित्परो
क्षंकृष्णस्यस्वसखीभ्योन्ववर्णयन् ३ तद्वर्णयितुमा
रब्धाः स्मरंत्यः कृष्णचेष्टितं नाशकन्स्मरवेगेनविक्षि
प्तमनसोन्टप ४

तत्वात् विक्षिप्तमनसः व्याकुलचित्ताः ४ श्रीकृष्णपरमात्मनेनमोनमः श्रीराम ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यादृशंकृष्णस्मरणंतासांमनसः क्षोभकंजातंतदाह बर्हापीडमिति नटवत्वरंवपु
र्बिभ्रत् वृंदावनंप्राविशत् कथंभूतंवनंस्वपदैरंकितैः रमणंरतिजनकंगोपवृंदैर्गी
तकीर्तिः तथाबर्हमयमापीडंशिरोभूषणंबिभ्रत् बर्हमापीडोयस्मिन्निति वपुषो

बर्हापीडंनटवरवपुः कर्णयोःकर्णिकारंबिभ्रद्वासः कनककपिशंवैजयंतींचमालां
रंध्रान्वेणोरधरसुधयापूरयन्गोपवृंदैर्वृंदारण्यंस्वपदरमणंप्राविशद्गीतकीर्तिः ५
इतिवेणुरवंराजन्सर्वभूतमनोहरं श्रुत्वाव्रजस्त्रियः सर्वावर्णयंत्योऽभिरेभिरे ६

विशेषणंवा वेणुवादनमुत्प्रेक्ष्यतेरंध्रान्वेणोरिति अतोन्यन्नमधरसुधैवपूर्णाद्वेणो
रुच्छलंतीगीतवत्प्रसर्पितुमर्हतीतिभावः ५ अभिरेभिरेवर्णयंत्यः पदेपदेपरमानं
दमूर्तिंकृष्णंपरिरब्धवत्यः ६ १७९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुवर्णनमेवाह अक्षण्वतामितित्रयोदशाभिः अक्षण्वतांचक्षुष्मतांतावदिदमेव
फलंप्रियदर्शनंपरमन्यन्नविदामः नाविभरस्त्यर्थः तच्च फलंसखिभिःसहपशून्वनं
प्रवेशयतोरामकृष्णयोर्वक्त्रंयैर्निपीतंतैरेवजुष्टंसेवितंनान्यैरित्यर्थः कथंभूतंवक्त्रंअ

गोप्य उ चुः॥ अक्षण्वतांफलमिदंनपरंविदामःसख्यःपशूननुविवेशयतो
र्वयस्यैः वक्त्रंव्रजेशसुतयोरनुवेणुजुष्टंयैर्वानिपीतमनुरक्तकटाक्षमोक्षं ७

नुवेणुवेणुमनुवर्त्तमानंतंवादयत्तथाअनुरक्तकटाक्षमोक्षंस्निग्धकटाक्षविसर्गं
अथवायैर्निपीतंतयोर्वक्त्रंतैर्जुष्टंइदमेवाक्षण्वतामक्ष्णोःफलमिति ७ श्रीकृष्णपर

यंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्याआहुः चूतेति चूतप्रवालादीनां चित्राभिर्मालाभिः अनुरक्तेईषदंतरांतःसं तर
युक्तेपरिधानेनीलपीतांबरेताभ्यांविचित्रोवेषोययोस्तौक्वचकदाचित्पशुपालगोष्ठ्यां

चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्र
वेषौ मध्येविरेजतुरलंपशुपालगोष्ठ्यांरंगेयथानटवरौक्वच
गायमानौ ८

गोपालसभायांमध्येअलमत्यर्थंविरेजतुः अहोगोपानांपुण्यमितिभावः ८ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यान्नुचुः हेगोप्यः अयंवेणुः किंस्म पुण्यमाचरत् कृतवान् कथंयत् यस्मात् गोपि
कानामेवभोग्यांसतीमपिदामोदराधरसुधांस्वयंस्वातंत्र्येणयथेष्टंभुंक्तेकथंअवशि
ष्टरसंकेवलमवशिष्टंरसमात्रंयथाभवति यतोयासांह्रदिनीनांपयसापुष्टः ताःमा तथा

गोप्यः किमाचरदयंकुशलंस्मवेणुर्दामोदराधरसुधामपिगोपिकानां।
भुंक्तेस्वयंयदवशिष्टरसंह्रदिन्योहृष्यत्त्वचोऽश्रुमुमुचुस्तरवोयथार्याः ९

ततुल्याह्रदिन्यंहृष्यत्त्वचः विकासितकमलवनमिषेणरोमांचितालक्ष्यंते येषांवंशे
जातस्तेतरवोपिमधुधारामिषेणआनंदाश्रुमुमुचुः यथाआर्याःकुलवृद्धाःस्ववंशेभग
वत्सेवकंदृष्ट्वाहृष्यत्त्वचोऽश्रुमुंचंतितद्वदिति ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काश्चिदाहुः हेसखिवृंदावनंभुवः कीर्त्तिंस्वर्गादपिविशेषेणवितनोति कथंभूतंयद्देवकी
सुतपदांबुजाभ्यांलब्धालक्ष्मीः शोभासंपद्येनतत् किंचगोविंदस्यवेणुमनुवेणुना
दंश्रुत्वानंतरंमंदगर्ज्जितंनीलमेघंतंमत्वामत्तायेमयूरास्तेषांनृत्यंप्रेक्ष्यसंघश

वृंदावनंसखिभुवोवितनोतिकीर्त्तिंयद्देवकीसुतपदांबुजलब्धलक्ष्मि गो
विंदवेणुमनुमत्तमयूरनृत्यंप्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्वं १० श्रीराम

स्तत्रतत्रअद्रिसानुषुअपरतानि उपरतक्रियाणिअन्यानिसमस्तानिसत्वानियस्मि
न्नतत्तूनैदंते न्येषुलोकेषुविद्यते अतोभुवःकीर्त्तिं वितनोतीत्यर्थः १० श्रीकृष्णपर०

१०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपराआहुः हेसखि मूढमतयस्तिर्यगादयोऽपिएताहरिण्योधन्याः कृतार्थाःयावेणु
रणितंवेणुनादमाकर्ण्यनंदनंदनंप्रतिप्रणयसहितैरवलोकनैर्विरचितांपूजांसन्मानं

धन्याःस्ममूढमतयोपिहरिण्यएतायानंदनंदनमुपात्तविचित्रवेषं आ
कर्ण्यवेणुरणितंसहकृष्णसारैःपूजांदधुर्विरचितांप्रणयावलोकैः ११

दधुः कृतवत्यःकिंचकृष्णसारैःस्वपतिभिःसहिताएवदधुः अस्मत्सुतनयस्तुगोपाःसु
ज्ञाःसमक्षंतन्नसहंतरतिभावः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्याऊचुः हेगोप्यः आश्चर्यंशृणुत वनितानामुत्सवोयस्मात्तद्रूपंशीलंचयस्यतं
कृष्णंनिरीक्ष्यतेनवादितवेणोरसंकीर्णगीतंचश्रुत्वाविमानैर्गच्छंत्योदेव्योदेवानामं

कृष्णंनिरीक्ष्यवनितोत्सवरूपवेषंश्रुत्वाचतत्क्वणितवेणुविचित्रगीतं दे
व्योविमानगतयःस्मरनुन्नसाराभ्रश्यत्प्रसूनकबरामुमुहुर्विनीव्यः १२

केषुस्थिताअपिस्मरेणनुन्नसाराः परिक्षिप्तधैर्यामुमुहुः मोहेलिंगमाहुः भ्रश्यत्प्रस
नाःपुष्पाणिकबराश्चचूडायासांताः विगतानीव्योयासांताः अत्रसर्वत्रचक्र भेदान्नाती
वसंगतिर्वक्तव्या १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षरणशंकयैवोत्तंभितैरुन्नमितैः कर्णपुटैः पिबंत्यः सत्यः नयाशावाश्चवत्साश्चस्त
नपानेप्रवृत्ताः समनंतरमेवगीतंश्रुत्वातदेवपीयूषमुत्तंभितकर्णपुटैः पिबंत्यः
स्नुतस्तनपयः कवलाः केवलंस्तनेभ्यः क्षरितक्षीरस्यासामुखेषुयेषांतेतस्थुः वि

गावश्चकृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबं
त्यः शावाः स्नुतस्तनपयः कवलाःस्मतस्थुर्गोविंदमात्मनिदृशा
श्रुकलाः स्पृशंत्यः १३

स्मतत्क्रियावभूवुरित्यर्थः तत्र हेतुः गोविंदंदृशामार्गेणआत्म
निमनसिस्पृशंत्यआलिंगंत्यः अतएवअश्रूणांकला वेषाः लोचनयोर्यासांताः गाव
स्तेचशावाःवत्साः १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोऽंबमातः अस्मिन्वनेयेविहंगाः पाक्षिणस्तेप्रायेणमुनयोभवितुमर्हंति कुतः कृष्णे
क्षितं कृष्णदर्शनंपुष्पफलाद्यंतरंविनायथाभ वतितथारुचिराः प्रवालायेषांतान्
द्रुमभुजान्वृक्षाणांशाखाआरुह्यतेनश्रीकृष्णेनउदितंप्रकटितंकलवेणु गीतंके

प्रायोबतांबविहगामुनयोवनेस्मिन्कृष्णेक्षितंतदुदितंकलवेणुगीतं आरु
ह्ययेद्रुमभुजान्रुचिरप्रवालान्शृण्वंतिमीलितदृशोविगतान्यवाचः १४

नापिसुखेननिमीलितदृशस्त्यक्तान्यवाचःसंतः येशृण्वंतीतितथाहिमुनयः श्रीकृष्णद
र्शनंयथाभवतितथावेदोक्तकर्मफलपरित्यागेनवेदद्रुमशाखारूढाःरुचिरप्रवालस्था
नीयानिकर्माण्येवोपाददानाःसुखिनःसंतः श्रीकृष्णगीतमेवशृण्वंति अतस्तएवेतेभ
वितुमर्हंतिइतिभावः येभगवद्गीतंभागवतंशृण्वंतितेवासुदेवरूपाभवंति १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आस्तांचेतनानांकथा नद्योपिआवर्त्तैःपरिभ्रमैर्लक्षितेनसूचितेनमनोभवेनकामेनभग्नो
वेगोयासांताः आलिंगनेनस्थगितमा छादितंयथाभवतितथाउर्मयएवभुजास्तैःकमलो

नद्यस्तदातदुपधार्यमुकुंदगीतमावर्त्तलक्षितमनोभवभग्नवेगाः आलिंगनस्थगि
तमूर्मिभुजैर्मुरारेर्गृण्हंतिपादयुगलंकमलोपहाराः १५ दृष्ट्वातपेव्रजपशून्सहरा
मगोपैःसंचारयंतमनुवेणुमुदीरयंतं प्रेमप्रवृद्धउदितःकुसुमावलीभिःसखुर्व्य
धात्स्ववपुषांबुदआतपत्रं १६

पहाराःकमलान्युपहर ...पः मुरारेः पादयुगलंगृण्हंति
धारयंति १५ लोकार्त्तिहरणशीलत्वादिसाम्यात्सख्युःश्रीकृष्णस्यअंबुदस्तदुपरि
उदितःपुनःप्रेम्णाप्रवृद्धःसन्कुसुमावलीभिःपुष्पसमूहैः तत्तुल्यैस्तुषारैर्वासिहव
पुषाछत्रंविहितवान् १६ ७ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰
१८४

साहंकारमाकुः पूर्णाः हृतार्थाः पुलिंध्यः शबरांगनाः कथमित्यत आह प्रथमंदयितानां
स्तनेषुमंडितेन अनुलिप्तेन पुनश्चरातिसमपेतउरुगायस्य श्रीकृष्णस्य पदाब्जयोः औ
रुण्येन रागेनश्रीः कांतिर्यस्यतेन कुंकुमेनतस्य वृंदस्थलीषुचंक्रमणेनतृणेषुरूषिते
पुनः न

पूर्णाः पुलिंध्यउरुगायपदाब्जरागश्रीकुंकुमेनदयितास्तनमंडितेन त
द्दर्शनस्मररुजस्तृणरूषितेन लिंपंत्यआननकुचेषुजहुस्तदाधिं १७

त
नलग्नेनतद्दर्शनेनतथा भूतस्यकुंकुमस्यदर्शनेनस्मरकृतारुक्तापोयासांताः तेन
कुंकुमेनआननेषुकुचेषुचकामतप्तेषुलिंपंत्यः तदाधिंकामव्यथांजहुः अतस्ताःकृ
तार्थाः धिगस्माःमादृशाःयाएवंभूतमप्याधिशमनंनलभंतइतिभावः १७ श्रीकृष्ण १८४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंतेतिहर्षेहेसख्यः अयमद्रिर्गोवर्धनोध्रुवंहरिदासेषुश्रेष्ठः कुतइत्यतआहुः यस्मा
द्रामकृष्णयोश्चरणस्पर्शेनप्रमोदोयस्यसः तृणाद्युद्गममिषेणरोमहर्षदर्शनात्

हंतायमद्रिरबलाहरिदासवर्योयद्रामकृष्णचरणस्पर्शप्रमोदः मानंतनो
तिसहगोगणयोस्तयोर्यत्पानीयसुयवसकंदरकंदमूलैः १८ श्रीराम

किंचयत्यस्मान्मानंतनोतिसहगोभिर्गणेनसखिसमूहेनचवर्त्तमानयोस्तयोः कैः
पानीयैः सुयवसैः शोभनतृणैः कंदरैः कंदमूलैश्चयथोचितं अतोयमतिधन्यइत्य
र्थः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे सख्य इदं त्वतिचित्रं गोपैः सह वनेवने गाः संचारयतोस्तयोः रामकृष्णयोर्मधुरपदैर्म
हावेणुनादैः शरीरिषु ये गतिमंतस्तेषामस्पंदनं स्थावरधर्मः तरूणां पुलकः जंगमध

गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः अ
स्पंदनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रं १९

र्म इति नियुज्यंते गावः आभिरिति निर्योगाः पादबंधनरज्जवः अथवा गवाकर्षणा
र्थाः पाशाश्च तैः कृतं लक्षणं चिन्हं ययोः शिरसि निर्योगवेष्टनेन स्कंधस्थपाशेन च
गोपपरिवृढश्रिया विराजमानयोरित्यर्थः १९

नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोपीनांकामतः कृष्णोनिः सीमप्रेमसंगमः कात्यायन्यर्च्चनोद्भूतनत्प्रसादमहोदयः २०
इतिद्वामेएकविंशतितमोध्यायः ॥२१॥ द्वाविंशेगोपकन्यानांवस्त्राहरणलीलयावरं

एवंविधाभगवतोयावृंदावनचारिणः वर्णयंसोमिथोगोप्यः क्रीडास्तन्मय
तांययुः २० इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकविंशतितमोध्यायः ॥२१
श्रीशुकउवाच हेमंतेप्रथमेमासिनंदव्रजकुमारिकाः चेरुर्हविष्यंभुंजानाः
कात्यायन्यर्च्चनव्रतं १ आप्लुत्यांभसिकालिंद्याजलांतेचोदितेरुणे कृत्वाप्र
तिकृतिंदेवीमानर्च्चुर्नृपसैकतीं २

इत्यागतः कृष्णोयत्रशालामितीर्यते १ प्रथमेमासिमार्गशीर्षे १ २ श्रीकृष्णप०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पू॰
१८

३ महामायेसादिसंबोधनैस्तवनकिंचिदशक्यमितिसूचयंत्यः प्रत्येकंप्रार्थयंते ४
कृष्णचेतस्त्वमेवाह भूयान्नंदसुतःपतिरितिजानन्भुरितिव्रतस्यपूर्वांगमाह उषसी

गंधैर्माल्यैःसुरभिभिर्बलिभिर्धूपदीपकैः उच्चावचैश्चोपहारैःप्रवालफलतंदुलैः
३ कात्यायनिमहामायेमहायोगिन्यधीश्वरि नंदगोपसुतंदेविपतिंमेकुरुतेनमः
इतिमंत्रंजपंत्यस्ताःपूजांचक्रुःकुमारिकाः एवंमासंव्रतंचेरुःकुमार्यःकृष्णचेतसः
५ भद्रकालींसमानर्चुर्भूयान्नंद सुतःपतिः उषस्युत्थायगोत्रैःस्वैरन्योन्याबद्धबाह
वः ६ कृष्णमुच्चैर्जगुर्यांत्यःकालिंद्यांस्नातुमन्वहं नद्यांकदाचिदागत्यतीरेनिक्षिप्यपूर्व

वत ७

तिगोत्रैर्नामभिः अन्योन्याबद्धबा ववः परस्परंगृहीतपाणयः ६ योगेश्वराणामीश्व
र इतिप्रत्येकंतादृक्मनोरथपूरणसामर्थ्यंदर्शयति ७ ८६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासांकर्मणः सिद्धये फलदानायेति ८ नीपंकदंबं ९ बालैः सहँ [illegible] अबलाः १० नोनर्म
न परिहासः यस्माद्यूयं परिश्रांताः ११ एकैकशो वा आगत्य स्वीकुरुत सहैवँ न तत्र

वासांसि कृष्णं गायंत्यो विजहुः सलिले मुदा भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्व
रः ८ वयस्यैरागतस्तत्र वृतस्तत्कर्मसिद्धये तासां वासांस्युपादाय नीपमारुह्य स
त्वरः ९ हसद्भिः प्रहसन् बालैः परिहासमुवाच ह अत्रागत्या बलाः कामं स्वं स्वं वासः
प्रगृह्यतां १० सत्यं ब्रुवाणि नो नर्म यद्यूयं व्रतकर्शिताः न मयोदितपूर्वं वा अनृतं त
दिमे विदुः ११ एकैकशः प्रतीच्छध्वं सहैवोत सुमध्यमाः तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः
प्रेमपरिप्लुताः १२

स्माकमाग्रहहरत्यर्थः क्ष्वे लितं परिहासः प्रेमपरिप्लुताः प्रेमरससम
ग्नाः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रमुग्धाऊचुः अंगभोःकृष्णअनयमन्याय्यंमाकृथाः १४ भोःदाऊचुः नोचेद्राज्ञेनंदाय

व्रीडिताः प्रेक्ष्यचान्योन्यंजातहासानर्निर्ययुः एवंब्रुवतिगोविंदेनर्मणाक्षिप्तचे
तसः आकंठमग्नाःशीतोदेवेपमानास्तमब्रुवन् १३ मानयंभोःकृथास्त्वांतुनंदगो
पसुतंप्रियं जानीमोंगव्रजश्लाघ्यंदेहिवासांसिवेपिताः १४ श्यामसुंदरतेदास्यः
करवामतवोदितं देहिवासांसिधर्मज्ञनोचेद्राज्ञेब्रुवामहे १५ श्रीभगवानुवाच
भवंत्योयदिमेदास्योमयोक्तंवाकरिष्यथ अत्रागत्यस्ववासांसिप्रतीछंतुशुचि
स्मिताः १६

कंसायवाब्रुवामहेकृष्णेतिवा १५ १६ श्रीरामरामहरेहरेहरेरामहेरामरामराम १८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पोत्तेरुः निर्गताः १७ आहताः ईषदक्षतयोनीर्वीक्ष्य १८ धृतव्रताः सत्योविवस्त्राः अ
पोव्यगाहत अस्मुत्स्नाताइतियत्तदेतत्तुएव देवहेलनं अरोपेध एवेत्यर्थः व्रतवै

ततोजलाशयात्सर्वादारिकाः शीतवेपिताः पाणिभ्यांयोनिमाछाद्यप्रोत्तेरुः शी
तकर्शिताः १७ भगवानाहतावीक्ष्यशुद्धभावप्रसादितः स्कंधेनिधायवासां
सिप्रीतः प्रोवाचसस्मितं १८ यूयंविवस्त्रायदपोधृतव्रताव्यगाहतैतत्तुदेवहे
लनं बध्वांजलिंमूर्ध्न्यपनुत्तयेंहसः कृत्वानमोधोवसनंप्रगृह्यतां १९

गुण्यभीतानांप्रा
याश्चित्तमिवाह अस्यांहसः पापस्यनिरत्तयेमूर्ध्निअंजलिंबध्वाधोनमः प्रणामंकृत्वेति १

इतिदोषत्वेनाच्युतेनाभिहितंविवस्त्राप्लवनंव्रतस्यच्युतिहेतुंमत्वातस्यव्रतस्यपूर्तिका

इत्यच्युतेनाभिहितंव्रजाबलामत्वाविवस्त्राप्लवनंव्रतच्युतिं तत्पूर्तिका
मास्तदशेषकर्मणांसाक्षात्कृतंनेमुरवद्यमृग्यतः २० तास्तथावनताद्
ष्ट्वाभगवान्देवकीसुतः वासांसिताभ्यः प्रायच्छत्करुणस्तेनतोषितः
२१

माः तदशेषकर्मणांतस्यव्रतस्यअन्येषामशेषकर्मणांचसाक्षात्कृतंफलभूतं
तमेववनेमुः सएवावद्यमृक्पापमार्जकः २१ श्रीगोपालकृष्णायनमः ॥ ७ ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदमस्यार्थं प्रलब्धा वंचिताः यूयं विवस्त्रा इत्यादिना त्रपया लज्जया हापिता रूपाजिता अ
नागत्य स्ववासांसि इत्याग्रहेण प्रस्तोभिताः उपहसिताः सत्यं ब्रुवाणि नोनर्मेत्यादिना क्री
डनवत्कारिता स्वबध्यांजलिमित्यादिप्रायश्चित्तछलेन ताः नाभ्यसूयन् दोषदृष्ट्या नापश्यन्

दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः वस्त्राणि चैवाप
हृतान्यथाप्यमुं ता नाभ्यसूयन् प्रियसंगनिर्वृताः २२ परिधाय स्ववासांसि प्रेष्ठ
संगमसज्जिताः गृहीतचित्ता नो चेलुस्तस्मिन् लज्जायितेक्षणाः २३

२२ प्रेष्ठसंगमेन सज्जिताः वशीकृताः अतो गृहीतचित्ताः सत्यो नो चेलुः गृहीतचि
त्तत्वमाह तस्मिन् कृष्णे लज्जायितेक्षणाः लज्जाविलसितम् ईक्षणं यासां ता इत्यर्थः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति

दामोदरइँभक्तवात्सल्यंदर्शयाति अबलाःप्रति २४ भोसाध्व्यः भवतीनांमदर्चनमे
वसंकल्पोमनोरथः सचलज्जयायुष्माभिरकथितोपिमयाविदितः समयानुमोदि

तासांविज्ञायभगवान्स्वपादस्पर्शकाम्यया धृतव्रतानांसंकल्पमाह
दामोदरोबलाः २४ संकल्पोविदितःसाध्व्योभवतीनांमदर्चनं मया
नुमोदितःसोसौसत्योभवितुमर्हति २५

तः अतःसत्योभवितुमर्तिर्हि अर्हतीतिसंभावनोक्ता आत्यंतिकोनभविष्यती
तिसूचितं शीघ्रमिहैवतासांसायुज्यादितिभावः २५ नमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्कुलइत्यतआह नमइति कामायपुनः कामभोगाय विषयमहिम्नाकामस्यापिशांति
हेतुत्वादितिभावः कामाप्ररोहेदृष्टांतः भर्ज्जिता दग्धा क्वथिता पक्वाधानायवारि

नमय्यावेशितधियांकामःकामायकल्पते भर्ज्जिता क्वथिता धाना
प्रायोबीजायनेष्यते २६ यातावलाव्रजंसिद्धामयेमारंस्यथक्षपाः
यदुद्दिश्यव्रतमिदंचेरुरार्यार्च्चनंसतीः २७

बीजाय अंकुरोद्गमाय प्रायइति स्वेछयापुनः प्ररोहमपिसूचयति भ्रूवादीनांतथादर्श
नात् २६ सिद्धाः पूर्णमनोरथाः तदाह इमाआगामिनीःरात्रीः मयारंस्यथेतिआर्याका
त्यायनीसतीःसत्यः २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्त्यानुकंपयकन्यास्तास्तद्विवर्जितयज्ञ्वनां पत्न्यनुग्रहतस्तेषामहत्कर्ममहामदं २१ वि
प्रभार्यानुग्रहायज्ञवादं गच्छन्निमाणांकाठिन्यमाप्तिप्रेत्यतेभ्योपिद्रुमाः श्रेष्ठाइतिता

शुक॰ उ॰ इत्यादिष्टाभगवतालब्धकामाः कुमारिकाः ध्यायंतस्तत्पदांभोजंकृच्छ्रान्निर्वि
विशुर्व्रजं २८ अथगोपैः परिवृतोभगवान्देवकीसुतः वृंदावनाद्गतोदूरंचारयन्गाःस
हाग्रजः २९ निदाघार्कातपेतिग्मेछायाभिःस्वाभिरात्मनः आतपत्रायितान्वीक्ष्य
द्रुमानाहव्रजौकसः ३० हेस्तोककृष्णहेअंशोश्रीदामन्सुबलार्जुन विशालर्षभतेज
स्विन्देवप्रस्थवरूथप ३१ पश्यतैतान्महाभागान्परार्थैकांतजीविनः वातवर्षातप
हिमान्सहंतोवारयंतिनः ३२

नभिनंदातिचतुर्भिः पश्यतेति हेस्तोककृष्णादयोगोपाःए
तान्द्रुमान्पश्यतपरार्थमेवएकांतेनजीवनंयेषांतान् तदाह वातवर्षादीन्स्वयंसहंतः सहमा॰ ना ९०
अस्माकंवारयंति ३२

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुजनस्यहूपाल्लोरार्थिनइव ३३ निर्यासोघनरसः तोक्माः पल्लवाद्यंकुराः ३४ ३५ इत्यमि

अहोएषांवरंजन्मसर्वप्राण्युपजीवनं सुजनस्येवयेषांवैविमुखायांतिना
र्थिनः ३३ पत्रपुष्पफलछायामूलवल्कलदारुभिः गंधनिर्यासभस्मास्थि
तोक्मैःकामान्वितन्वते ३४ एतावज्जन्मसाफल्यंदेहिनामिहदेहिषु प्राणै
रर्थैर्धियावाचाश्रेयएवंचरेत्सदा ३५ इतिप्रवालस्तबकफलपुष्पद
लोत्करैः तरूणांनम्रशाखानांमध्येनयमुनांगतः ३६

नंदनप्रवालादिसमूहैर्नतशाखानांमध्येनयमुनांप्राप्तः ३६ श्रीकृष्णपरमात्मने०

तरूणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥शुकउवाच॥ तत्रगत्वोपविश्यासौगोपालायमुनानरे॥ ऊचुर्बुभुक्षिताराजन् रामकृष्णौजग त्सखौ॥१॥

कुमारिकाभ्यः पूर्वमेवतंनर्मकुलतयाअग्रहीतभोज्यानामेवनिर्गमात् क्षुधार्त्ताइ

तत्रगाःपाययित्वापःसुमृष्टाःशीतलाःशिवाः ततोनृपस्वयंगोपाःका
मंस्वादुपपुर्जलं ३७ तस्याउपवनेकामंचारयंतःपशून्नृप कृष्णरामावु
पागम्यक्षुधार्त्ताइदमब्रुवन् ३८ इतिश्रीभागवतेमहापुराणेदशमस्कंधे
द्वाविंशोध्यायः॥२२॥ गोपाऊचुः रामराममहावीर्यकृष्णदुष्टनिब
र्हण एषावैबाधतेक्षुन्नस्तच्छांतिंकर्तुमर्हथः १

त्युक्तं ३८ इति० द्वाविंशोध्या
यः॥२२॥ त्रयोविंशेततोगोपैरन्नयाच्ञापदेशतः तत्पत्न्यनुग्रहात्कृष्णोदीक्षितानन्व
तापयत् १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तायाइत्येकवचनंसयः सायुज्याभिप्रायेण २३ अस्मद्विसर्ज्जिताः आवाभ्यांप्रहि

श्रीशुक उ० ॥ इतिविज्ञापितोगोपैर्भगवान्देवकीसुतः भक्तायाविप्रभार्यायाः प्रसी
दन्निदमब्रवीत् २ प्रयातदेवयजनंब्राह्मणाब्रह्मवादिनः सत्रमांगिरसंनामह्यासतेस्वर्गकाम्यया ३ तत्रगत्वौदनंगोपायाचतास्मद्विसर्जिताः कीर्त्तयंतोभगव
तआर्यस्यममचाभिधां ४ इत्यादिष्टाभगवतागत्वायाचंततेतथा कृतांजलिपुट
विप्रान्दंडवत्पतिताभुवि ५ हेभूमिदेवाः शृणुतकृष्णस्यादेशकारिणः प्राप्तान्जा
नीतभद्रंवोगोपान्नोरामचोदितान् ६

ताः संतोयाचध्वंयुष्माकंकातत्रलज्जाननुत
थाप्यपात्रत्वादसमर्थ्यं किमितिदास्यंतीतिचेत् तत्राह कीर्त्तयंतइति ५ ६ श्रीरामचं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल

अविदूरेवर्त्तमानौ संतौवोयदन्नंतल्लषतः अभिषतः वः ओदनंश्रथायपयस्तितर्हिय
छतेति ७ दीक्षितावयमभोज्यान्नाइतिवदिष्यंतीतिस्वयमेवाशंक्याहुः दीक्षायाः
गाश्वारयंतावविदूरओदनंरामाच्युतौवोलषतोबुभुक्षितौ तयोर्हिजाओदनमर्थि
नोर्यदिस्यश्रद्धाच्चवोयछतधर्मवित्तमाः ७ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च
सत्तमाः अन्यत्रदीक्षितस्यापिनान्नमश्नन्हिदुष्यति ८ इतितेभगवद्यांज्ञांश्च
एवंतोपिनसुश्रुवुः क्षुद्राशाभूरिकर्माणोबालिशावृद्धमानिनः ९ आरभ्याग्नी
षोमीयपश्वालंभनात्पूर्वंदोषः नतनो [illegible] न्यत्र तथासौत्रामण्या
श्चान्यत्रअन्यदा ८ क्षुद्रेस्वर्गादावाशामात्रंयेषां भूरीणिक्लेशाधिकानिकर्म्माणिये
षां अतोः स्तावयाज्ञानवृद्धाइतिमानवंतः ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतुकर्मैकर्ममुल्लंघ्यदेशाकालेअन्यार्थमन्यस्मैकथंदेयंनहेत्यो देशाइति पृथक्चरु
पुरोडाशादिद्रव्यंतंत्रंप्रयोगः धर्मोपूर्वं १० मनुष्योयमितिद्दष्ट्यामर्त्यात्मानोब्रात्मणा

देशकालपृथक्द्रव्यंमंत्रतंत्रर्त्विजोग्नयः देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः
१० तंब्रत्मपरमंसाक्षाद्भगवंतमधोक्षजं मनुष्यदृष्ट्याउष्प्रज्ञामर्त्यात्मानोमेनिरे
ततेयदोमि ‸ तिप्रोचुर्न्नेतिचपरंतप गोपानिराशाःप्रत्येत्यतथोचुःकृष्णरा
मयोः १२ तदुपाकर्ण्यभगवान्प्रहस्यजगदीश्वरः व्याजहारपुनर्गोपान्दर्शय
न्लौकिकींगतिं १३

वयंमहांतइतिमन्यमानाः ११ १२ लौकिकींगतिमितिनहि
कार्यार्थिनोनिर्विघ्नंते कोवायाचकोनपराभूयइतेत्यादिलोकस्थितिंदर्शयन् १३

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केवलंदेहेनगृहेवसंति धियावमय्येवोषिताः यतोमयिस्निग्धाअतोदास्यंतीति१४
ईषिताःप्रेषिताः १५ सकृष्णोगोपालैःसह १६ १७ तत्कथाक्षिप्तमनसस्त्वद्दर्शनो

मांज्ञापयतपत्नीभ्यः ससंकर्षणमागतं दास्यंतिकाममन्नंवः स्निग्धामय्युषिताधि
या १४ गत्वाथपत्नीशालायांदृष्ट्वासीनाःस्वलंकृताः नत्वाद्विजसतीर्गोपाःप्रश्रि
ताइदमब्रुवन् १५ नमोवोविप्रपत्नीभ्योनिबोधतवचांसिनः इतोविदूरेचरता
कृष्णेनेहेषितावयं १६ गाश्चारयन्सगोपालैःसरामोदूरमागतः बुभुक्षितस्यत
स्यान्नंसानुगस्यप्रदीयतां १७ श्रुत्वाच्युतमुपायांतंनित्यंतद्दर्शनोत्सुकाः तत्कथा
क्षिप्तमनसोबभूवुर्जातसंभ्रमाः १८ त्सुकाःअतएवतमुपागतंश्रुत्वाजातसं
भ्रमावभूवुः १८

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधं बहुगुणं संस्कारविशेषैर्बहवो गुणा रससौर
भ्यादयो यस्मिन् तद्भाजनैः अमत्रैर्भांडैर्वा पत्यादिभिर्वार्यमाणा अपि प्रियं श्रीकृ

चतुर्विधं बहुगुणमन्नमादाय भाजनैः अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्न
गाः १९ निषिध्यमानाः पतिभिर्भ्रातृभिर्बंधुभिः सुतैः भगवत्युत्तमश्लोके दीर्घ
श्रुतधृताशयाः २० यमुनोपवनेऽशोकनवपल्लवमंडिते विचरंतं वृतं गोपैः सा
ग्रजं ददृशुः स्त्रियः २१

ष्णं अभिसस्रुः अभिजग्मुः अप्रतिबंधे दृष्टांतः समुद्रं निम्नगा नद्य इवेति १९ अत्र हे
तुः भगवतीति दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो याभिस्ताः २० तथागताः स
तोददृशुः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरण्मयवस्त्रपरिधिः परिधानं यस्य तं पीतांबरमित्यर्थः वनमाल्यैर्बर्हैर्धातुभिः प्रवालैश्च नटवद्वेषो यस्य तं अनुव्रतस्य सख्युः अंसे विन्यस्तो निहितो हस्तो येन तं इतरेण

श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासं २२

हस्तेन लीलयाब्जं धुनानं भ्रामयंतं कर्णयोरुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तं च २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्तेरपिलयेनसामरस्यमाह प्रायश्शनिबकुशः श्रुतायेप्रियतमस्यउदयाःउत्कर्षीतं
एवकर्णपूराः कर्णौपूरयंतीति कृतार्थौकुर्वंतीतितयातैः कर्णाभरणैरितिवाय
स्मिन्कृष्णेनिमग्नमनसः आविष्टचेतसस्तंलोचनद्वारैरंतः प्रवेश्यसुचिरसुपगु

प्रायः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः अंतः
प्रवेश्यसुचिरंपरिरभ्यतापंप्राज्ञंयथाभिमतयोविजहुर्नरेंद्र २३ श्रीकृष्ण

ह्यतापंजहुः अभिमतयोहंवत्तयः प्राज्ञंसुषुप्तिसाक्षिणंपरिरभ्यतस्मिन्लयंयथा
प्ययथेति २३ हरेरामहरेरामरामरामहरेहरे हरेकृष्णकृष्णकृष्णहरेहरे॥ ७॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अखिलदृक्द्रष्टासर्वबुद्धिसाक्षीतास्तथाप्राप्ताविज्ञायापितथेत्येतद्विवृणोति
त्यक्तसर्वाशाः त्यक्ताः सर्वाशायाभिस्ताः केवलमात्मनः स्वस्यैवदिदृक्षयेति

तास्तथात्यक्तसर्वाशाः प्राप्ताआत्मदिदृक्षया विज्ञायाखि
लदृग्द्रष्टाप्राहप्रहसिताननः २४ स्वागतंवोमहाभागाआ
स्यतांकरवामकिं यन्नोदिदृक्षयाप्राप्ताउपपन्नमिदंवोहि २५

२४ हेमहाभागाः वः स्वागतंशुभमागमनं तदेवाह यत्तुयस्मात्प्रतिबंधतिरस्का
रेणअस्माकंदिदृक्षया प्राप्ताइति इदंवःउपपन्नंसंपन्नंयुक्तमितिवा २५ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयि

युक्तत्वमाह नन्विति आत्मप्रिये आत्माचप्रियश्चतस्मिनुकुलाः कुशला विवेकिनोऽतएव स्वस्यात्मनोऽर्थं पुरुषार्थं पश्यंतियेतेयथावद्भक्तिं कुर्वंति यथात्वमाह अद्धासाक्षा

नन्वद्धामयिकुर्वंतिकुशलाःस्वार्थदर्शनाः अहेतुक्यव्यवहितांभक्तिमात्मप्रियेयथा २६ प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः यत्संपर्कात्प्रियाआसनततःकोन्वपरःप्रियः २७

तत्रहेतुः अहैतुकीफलाभिसंधिरहितांअतएवअव्यवहितांनिरंतरां २६ आत्मनःसर्वतःप्रेष्ठत्वमुपपादयति प्राणेति स्वाआत्मादयः आत्मादेहःएतेसर्वेयत्संपर्कात्प्रियाध्यासेनउपकरणत्वे

नचा २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तस्मात्कृतार्थायूयंयातदेवयजनं यज्ञवाटंगछत ननुकृतार्थाःकिमितियास्या
मइतिचेदतआह पतयइतिपारयिष्यंतिसमापयिष्यंति पत्नीनामनुग्रहायेत्यर्थः

तद्यातदेवयजनंपतयोवोद्विजातयः स्वसत्रंपारयिष्यंतियुष्माभिर्गृह
मेधिनः २७ पत्न्यऊचुः नैवंवंचोर्हतिभवान्गदितुंनृशंसंसत्यंकुरुष्व विभो
निगमंतवपादमूलं प्राप्तावयंतुलसिदामपदावसृष्टंकेशैर्निवोढुमतिलं
घ्यसमस्तबंधून् २८

२८ नृशंसंपरुषंनिगमंप्रतिज्ञां नमेभक्तःप्रणश्यतिइतिवेदंवानस
पुनरावर्ततइतिपदावसृष्टंअवज्ञयापिदत्तंबहुमानेनकेशैर्निवोढुंदासीभवितुं २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचनगच्छंति नोऽस्मान् हे अरिंदम कामलोभपापादिदमन भवतः पादाग्रयोर्निप
तित ॰ देहानां अन्यास्वर्गादिगतिरपि न भवेन्माभूत्स्वतत्तस्माद्दास्यमेव विधेहीति

न

गच्छंतिनोऽपतयः पितरौ सुतावान भ्रातृबंधुसुहृदः कुत एव चान्ये तस्माद्भव
त्पदयोः पतितात्मनां नोनान्याभवेद्गतिररिंदमतद्विधेहि ३० श्रीभगवानुवाच
पतयोनाभ्यसूयेरन् पितृभ्रातृसुतादयः लोकाश्च ये मयोपेता देवा अप्यनुम
न्वते ३१ नप्रीतयेनुरागाय ह्यंगसंगो नृणामिह तन्मनो मयि युंजाना अचिरान्मा
मवाप्स्यथ ३२

३० मयाउपेता अनुज्ञाताः प्रत्यक्षं देवान् प्रदर्श्याह देवा अपीति ३१
तथापि त्वां त्यक्तुं न शक्नुम इति चेत्तत्राह नेति प्रीतये सुखाय अनुरागाय स्नेहवृद्धये अं

गसंगः अंगाध्यासंगः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनसूयवः अदोषदृष्टयः ३३ देहमितितदीयंदेहंतत्रविप्रं हंचैतन्येनभगवंतंप्राप्ते
त्यर्थः ३४ अनुशीलयन्ननुकुर्वन्गोगोपगोपीनामितिकर्मणिषष्ठी रूपवाक्कृत्ये

श्रुकउवाच इत्युक्तामुनिपत्न्यस्तायज्ञवाटंपुनर्गताः तेचानसूयवःस्वा
भिःस्त्रीभिःसत्रमपारयन् ३३ तत्रैकाविधृताभर्त्राभगवंतंयथाश्रुतं
हृदोपगुह्यविजहौदेहंकर्मानुबंधनं ३४ भगवानपिगोविंदस्तेनैवान्नेन
गोपकान् चतुर्विधेनाशयित्वास्वयंचबुभुजेप्रभुः ३५

तैः रूपेणवाचाकृत्यैश्चरितैश्चरमयन्तान्रमयितुंरेमइत्यर्थः ३५ श्रीकृष्णपरम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुस्मृतिप्रकारमाह नरानुकरणवतोर्विश्वेश्वरयोर्याञ्चां यत् अहन्म हतवंतः तत्कृतागसो वयमित्यनुस्मृत्येत्यर्थः ३६ ३७ तदा च भार्यागुरूनिवमानयंतो भगवद्भक्तिरहितमा

एवंलीलानरवपुर्न्नलोकमनुशीलयन् रेमेगोगोपगोपीनांरमयन् रूपवाक्कृतैः ३६ अथानुस्मृत्यविप्रास्तेअन्वतप्यन्कृतागसः यद्विश्वेश्वरयोर्याञ्चामहन्मनृविडंबयोः ३७ दृष्ट्वास्त्रीणांभगवतिकृष्णेभक्तिमलौकिकीं आत्मानंचतयाहीनमनुतप्ताव्यगर्हयन् ३८

त्मानंव्यनिंदन्नित्याहुः दृष्ट्वेति अलौकिकींलोकातीतां ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिवृत् शौक्रं सावित्रं दैक्ष्यमिति त्रिगुणितं जन्मवृत्तं ब्रह्मचर्यं क्रियाः कर्माणि दास्यं चक्रि
पादास्यामित्येकं वा परं धिग्गित्य धिपैः सेवयं तथोक्ष जे विमुखास्तेषां जन्मादि तत्सर्वं धि

धिक्जन्म नस्त्रिवृद्विद्यां धिक्व्रतं धिग्बहुज्ञतां धिक्कुलं धिक्क्रियादाक्ष्यं विमुखा ये
त्वधोक्षजे ३९ नूनं भगवतो मायायोगिनामपि मोहिनी यद्वयं गुरवो नृणां स्वार्थे मु
ह्यामहे द्विजाः ४० अहो पश्यत नारीणामपि कृष्णे जगद्गुरौ दुरंतभावं यो विध्यन्मृत्यु
पाशान् गृहाभिधान् ४१ नासां द्विजातिसंस्कारो न निवासो गुरावपि न तपो नात्ममी
मांसा न शौचं न क्रियाः शुभाः ४२

ग्धिग्गितिव्यगर्हयन्नित्य र्यः ३९ ४० यो भावो विध्यत्
अच्छिनत् तं दुरंतं भावं भक्तिं पश्यतेति ४१ द्विजातिसंस्कार उपनयनं क्रियाः संध्योपा
सनादयः ४२

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२ ४४ आत्मदोषापवर्गेणचांचल्यगर्वादित्यागेन ४६ ४० इत्यश्रृण्वन्‌एवंसर्वत्रश्रु

तथापिह्युत्तमश्लोकेकृष्णेयोगेश्वरेश्वरे भक्तिर्दृढानचास्माकंसंस्कारादिमतामपि
ननुस्वार्थविमूढानांप्रमत्तानांगृहेहया अहोनस्मारयामासगोपवाक्यैःसतांगतिः ४४
अन्यथापूर्णकामस्यकैवल्याद्याशिषांपतेः ईशितव्यैःकिमस्माभिरीशस्यैतद्विडंब
नं ४५ हित्वान्यान्भजतेयंश्रीःपादस्पर्शाशयासकृत्‌ आत्मदोषापवर्गेणयद्याच्ञा
जनमोहिनी ४६ देशःकालःपृथक्‌द्रव्यंमंत्रतंत्रर्त्विजोग्नयः देवतायजमानश्चक्रतु
धर्मश्चयन्मयः ४७ सएषभगवान्साक्षाद्विष्णुर्योगेश्वरेश्वरः जातोयदुष्वित्यश्रृण्म
ह्यपिमूढानविग्महे ४८
वयं तवंतोहि तथापीति ४९ श्रीकृष्णपरमात्मनेनमः नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४९ ५१ नचाचलन् तयोर्दर्शनायनजग्मुः ५२ इतिश्रीदशमेटीकायांत्रयोविंशो

अहोवयंधन्यतमायेषांनस्तादृशीः स्त्रियः भक्त्यायासांमतिर्जाताअस्माकंनि
श्चलाहरौ ४९ नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे यन्मायामोहितधियो
भ्रमामः कर्मवर्त्मसु ५० सर्वैनआद्यः पुरुषः स्वमायामोहितात्मनां अविज्ञाता
नुभावानांक्षंतुमर्हत्यतिक्रमं ५१ इतिस्वायमनुस्मृत्यकृष्णेतेकृतहेलनाः दिदृक्ष
वोव्ययुतयोः कंसाद्भीतानचाचलन् ५२ इतीश्रीभागवतेदशमस्कंधेपूर्वार्धे
रणंनामत्रयोविंशोध्यायः ॥२३॥ श्रीकृष्णार्पणमस्तु श्रीरामजयरामजयजयरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्विंशे महेंद्रस्य मखं व्यावर्त्य हेतुभिः कृष्णः प्रवर्तयामास गोवर्द्धनमखोत्सवं १ भ
सुराणां क्रियागर्वनिरस्यस्वः सुरेषु च मघवन्मदभंगाय तन्मखं समवारयत् २ ब्रा

श्रीशुक उ ॥ भगवानपि तत्रैव बलदेवेन संयुतः अपश्यन्निवसन् गोपानिंद्रया
गकृतोद्यमान् १ तदभिज्ञोपि भगवान् सर्वात्मा सर्वदर्शनः प्रश्रयावनतोपृच्छ
द्वृद्धान्नंदपुरोगमान् २ कथ्यतां मे पितः कोयं संभ्रमो व उपागतः किं फलं क
स्य चोद्देशः केन वा साध्यते मखः ३

त्मणाः कंसादीनाः स्वाश्रमस्था एव भगवंत
मभजन् भगवानपि तत्रैव निवसन्निंद्रयागकृतोद्यमान् गोपानपश्यदिति संबंधः
व्यथासंभ्रमो न भवति मखोयमिति एवं चेत् किमत्र फलं का देवता केनाधिकारिणा
केन वा साधनेन साध्यते ३

एतद्ब्रूहि महान्कामो मम श्रवणे वर्त्तते यद्वा तव महान्कामो दृश्यत इति तूष्णीं स्थि
तं प्रत्याह नेति सर्वात्मनां सर्वत्रात्मदृष्टीनां ४ अत एव न विद्यते स्वः पर इति दृष्टि
र्येषां इति स्वपरदृष्ट्यभावादेव न त ऊदामित्रादयोपि येषां न संतीत्याह अमित्रेति

एतद्ब्रूहि महान्कामो मह्यं शुश्रूषवे पितः नहि गोप्यं हि साधूनां कृत्यं सर्वात्म
नामिह ४ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां उदासीनोरिवद्वर्ज्य आ
त्मवत्सुहृदुच्यते ५

नामित्रं उदास्त उदासीनो विद्विट् येषां कृत्यं सर्वं कर्म न गोप्यं किं
चिदस्तीत्यर्थः सत्यपि भेददर्शने उदासीनः शत्रुवद्वर्ज्यः आत्मतुल्यत्वात् सुहृन्मंत्रे
षु न वर्ज्जनीय इत्याह उदासीन इति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचसुहृद्भिः सहविचार्यज्ञात्वैवकर्मकर्त्तव्यंनतुगतानुगतिकमात्रेणेत्याह ज्ञात्वेतिअ
ज्ञात्वाचतत्रविदुषोयथावत्कर्मफलंस्यात् तथानाविदुषः ६ भवतामयंक्रियायोगः

ज्ञात्वाज्ञात्वाचकर्माणिजनोयमनुतिष्ठति विदुषःकर्मसिद्धिःस्यात्तथानाविदुषो
भवेत् ६ तत्रतावत्क्रियायोगोभवतांकिंविचारितः अथवालौकिकस्तन्मेपृष्ठतः
साधुभण्यतां ७ ॥नंद उवाच॥ पर्जन्योभगवानिंद्रोमेघास्तस्यात्ममूर्तयः तेभि
वर्षंतिभूतानांप्राणनंजीवनंपयः ८

शास्त्रतःकिंविचारितःप्रवृत्तोलौकिकआ
चारमात्रोवेतिसाधुसोपपत्तिकंभण्यतां कथ्यतामिति ७ आचारमात्रएवेतिसहे
तुकमाह पर्जन्यइति आत्ममूर्त्तयःप्रियामूर्त्तयः ८ श्रीरामचंद्रायनमः ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः किमत आह तमिति तमिंद्रं वार्मुचां मेघानां तद्रेतसा तद्वृष्टिपयसा ९ उपजीवं
ति उपजीविकां कल्पयंति धर्मार्थकामसिद्धये ननु कृष्यादिभिर्जीवंति किमिंद्रेणत

तं तात वयमन्ये च वार्मुचां पतिमीश्वरं द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभिर्नराः ९
तच्छेषेणोपजीवंति त्रिवर्गफलहेतवे पुंसां पुरुषकाराणां पर्जन्यः फलभावनः १०
य एवं विसृजेद्धर्मं पारंपर्यागतं नरः कामाल्लोभात् भयाद्द्वेषात् स वै नाप्नोति
शोभनं ११

त्राह पुंसामिति फलभावनः फलसाधकः पर्जन्यं विना कृष्यादि वैफल्यादित्यर्थः १० ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रायमन्युंजनयन्नितिकोपजननद्वारागर्वपर्वतादिंद्रमवतारयितुंदेवतानिराकरणं

श्रीशुकउवाच वचोनिशम्यनंदस्यतथान्येषांव्रजौकसां इंद्रायमन्युंजनय
न्पितरंप्राहकेशवः १२ ॥श्रीभगवानुवाच॥ कर्मणाजायतेजंतुः कर्मणैव
विलीयते सुखंदुःखंभयंक्षेमंकर्मणैवाभिपद्यते १३

नलयमेवाभिप्रायइत्यर्थः १२ प्रथमंतावत्कर्मवादेनदेवान्निराकरोति कर्मणेति १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुजडात्कर्मणः केवलात्कथंफलसिद्धिःस्यादितिचेत् अहोअशीलितमीमांसानां
स्वमतिविलसितश्रद्धायतकर्मणांफलकारणत्वेवचनतोवगते किंतत्तोनुपपन्नंनाम
केचित्पुनरतिसाहसभीताःकर्मपरतंत्रंपरमीश्वरंमन्यंतेतन्मतमनूद्यनिराकरो

अस्तिचेदीश्वरःकश्चिफलरूप्यन्यकर्मणां कर्त्ता
रंभजतेसोपिनस्यकर्त्तुःप्रभुर्हिसः १४ राम

ति अस्तिचेदिति स्वयंकर्म्माभिरलिप्तोन्येषांजीवानांकर्मणांफलरूपीफलदातातत्
कर्त्तारंभजतेतत्तत्कर्मफलदानेन १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भतः कर्मण एव फलसिद्धेस्तस्यारतंत्र्येण अजागलस्तनतुल्यत्वात् न देवतयाह्न
यमित्याह किमिंद्रेणेति ननु कर्मणोपि प्ररवृत्तिरंतर्याम्यपेक्षैव कथं सर्वथा देवता
या अनुपयोग इत्याशंक्याह स्वभावविहितमिति स्वभावेन प्राक्तनसंस्कारेणैव

किमिंद्रेणेह भूतानां स्वस्वकर्मानुवर्त्तिनां अनीशेनान्यथाकर्त्तुं स्वभाववि
हितं नृणां १५ स्वभावतंत्रो हि जनः स्वभावमनुवर्त्तते स्वभावस्थमिदं
सर्वं सदेवासुरमानुषं १६

विहितं यत्कर्म तदन्यथाकर्त्तुमनीशेन १५ एतद्विवृणोति स्वभावतंत्र इति प्रवृत्तेः सं
स्काराधीनत्वात्किमंतर्यामिणेत्यर्थः १६ श्रीराम राम जयराम जय जय ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्स्वभावतो निष्पन्नस्य कर्मण एव सर्वकारणत्वात्कर्मैव पूज्यमित्याह देहानिति सार्धेन १७ संपूजयेत् संमानयेत् ननु देवतोद्देशेन द्रव्यत्यागात्मकत्वात्कर्मणः कथं

देहानुच्चावचान्जंतुः प्राप्योत्सृजति कर्मणा शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः १७ तस्मात्संपूजयेत्कर्म स्वभावस्थः स्वकर्मकृत् अंजसा येन वर्त्तेत तदेवास्य हि दैवतं १८ आजीव्यैकतरं भावं यस्त्वन्यमुपजीवति न तस्माद्विंदते क्षेमं जारं नार्यसती यथा १९

देवतां विना सिद्धिरित्याशंक्य कर्मांगमात्रं देवतेति पक्षमुपसंहरन् स्वहेतुवादमाश्रित्यास्यामेव शैलगवादिरूपां देवतां समर्थयते अंजसेति १९ हेतुबलेनैव विपक्षे दोषमाह आजीव्येति उपजीवति सेवते १९

राम
२०३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्वृत्तिं वक्तुं दृष्टांतत्वेन वर्णानां वृत्तिभेदमाह वर्त्तेतेति ब्रह्मणा वेदाध्ययनादिना २० वै
श्यवृत्तेश्चातुर्विध्यमाह कृषीति कृषिवाणिज्यसहिता गोरक्षा एवं त्रयं कुशीदं वृद्धि

वर्त्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः वैश्यस्तु वार्त्तया जीवेच्छूद्रस्तु द्विजसे
वया २० कृषिवाणिज्यगोरक्षाकुशीदं तुर्यमुच्यते वार्त्ता चतुर्विधा तत्र वयं
गोवृत्तयोनिशं २१ सत्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः रजसोत्पद्य
ते विश्वमन्योन्यं विविधं जगत् २२

जीवनं चतुर्थं २१ ननु गवामपि वृत्तिर्महेंद्राधीनैवेत्याशंक्य निरीश्वरसांख्यमताश्र
येण निराकरोति सत्त्वमिति श्लोकद्वयेन अन्योन्यं स्त्रीपुरुषयोगेन २२ कृष्णाय ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वंनइति समुद्रशिलोच्चयादिष्वपिवृष्टिदर्शनान्नप्रेक्षावत्पूर्वकत्वंवृष्टेरितिभावः तै
रेवमेघैरेवसिध्यंतिजीवंति २३ तथापियोगक्षेमार्थंदेवतापेक्षेतिचेदनआह ननः
पुरइति पुरःपत्तनानि जनपदादेशाः अस्माकंयोगक्षेमहेतवेवनशैलादयएवेति

रजसाचोदितामेघावर्षंत्यंबुनिसर्वतः प्रजास्तैरेवसिध्यंतिमहेंद्रः किंकरि
ष्यति २३ ननःपुरोजनपदानग्रामानगृहावयं नित्यंवनौकसस्तातवन
शैलनिवासिनः २४ तस्माद्गवांब्राह्मणानाम द्रेश्चारभ्यतांमखः यइं
द्रयागसंभारास्तैरयंसाध्यतांमखः २५

भावः २४ ब्राह्मणानपि संगृह्णन्निगम
यति तस्मादिति स्वयमुत्प्रेक्षितयागप्रयोगकल्पनामाह यइंद्रमखसंभाराइति
सार्द्धपंचभिःसंभाराःसाधनानि २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूपंमोद्गंपायसंकेवलेपयसिपक्वंसंयावादयोगोधूमादिविक्रियाः क्रमश्चसूपपा
यसयोः श्चुसादोहस्यार्थतोऽन्येषांपाठतः २६ यथापश्यतितथाक्रमः यागशोभार्थं

पच्यंतांविविधाः पाकाः सूपांताः पायसादयः संयावापूपशष्कुल्यः सर्वदो
हश्चगल्वतां २६ हूयंतामग्नयः सम्यक्ब्राह्मणैर्ब्रह्मवादिभिः अन्नंबहु
विधंतेभ्योदेयंवोधेनुदक्षिणाः २७ अन्येभ्यश्चाश्वचांडालपतितेभ्योय
थार्हतः यवसंचगवांदत्वागिरयेदीयतांबलिः २८ स्वलंकृताभुक्तवंतः
स्वनुलिप्ताः सुवाससः प्रदक्षिणंकुर्वंतुगोविप्रानलपर्वतान् २९

श्रद्धोत्पादनार्थंचाह हूयंतामिति धेनुदक्षिणाः धेनुसहिताः दक्षिणाः तांववाद
क्षिणाः वः युष्माभिः २७ यवसंतृणं २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वान्शिरःकंपेनानुमोदयन्नाह गोब्राह्मणाद्रीणामिति मत्यंममच ३१ ३० तद्द्रव्येण
एतन्ममतंतातक्रियतांयदिरोचते अयंगोब्राह्मणाद्रीणांमह्यंचदयितो
मखः ३० ॥श्रीशुकउवाच॥ कालात्मनाभगवताशक्रदर्पजिघांसया प्रो
क्तं निशम्यनंदाद्याःसाध्वगृण्हंतनद्वचः ३१ तथाचव्यदधुःसर्वंयथाह
मधुसूदनः वाचयित्वास्वस्त्ययनंतद्द्रव्येणगिरिद्विजान् ३२ उपहृत्यब
लीन्सर्वानादृतायवसंगवां गोधनानिपुरस्कृत्यगिरिंचक्रुःप्रदक्षिणं ३३
तेनमहेंद्रद्रव्येणगोगिरिद्विजान्प्रतिपथायथंबलीनुपहृत्यदत्वाआदृताःसादराः
३२ ३३

मरवद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनडुद्युक्तानिवृत्तमानडुद्भिर्युक्तानिसद्द्विजाशिषः द्विजाशीर्भिःसहिताः ३४ गोपवि
श्रंभणंगोपानांविश्वासजनकंरूपंगतःप्राप्तः सच बलिमुपहारंआदत्तअभक्ष

अनांस्यनडुद्युक्तानितेचारुह्यस्वलंकृताः गोप्यश्चकृष्णवीर्याणिगायंत्यःसद्द्विजा
शिषः ३४ कृष्णस्त्वन्यतमंरूपंगोपविश्रंभणंगतः शैलोस्मीतिब्रुवन्भूरिबलिमाद
द्बृहद्वपुः ३५ तस्मैनमोव्रजजनैःसहचक्रेआत्मनात्मने अहोपश्यतशैलोसौरूपीनो
नुग्रहंव्यधात् ३६ एषोवजानतोमर्त्यान्कामरूपीवनौकसः हंतिह्यस्मैनमःस्या
मः शर्मणे आत्मनोगवां ३७

यत् ३५ तस्मैआत्मनेआ त्मनास्वयंव्रजजनैःसहनमश्च
क्रे अहोइतिसार्द्धश्लोकंपठन् ३६ कामरूपीसर्पादिरूपःअस्मैअद्ययेशर्मणेक्षेमाय

३७

कर्मैवालंप्राकृस्वभावोगुणोवाकर्मांगंवातद्दशोवामहेशः वार्त्ताकर्त्रीदैवतेतेयमुका
देवक्षोभेषण्मतीनत्वभीष्टा ३८ इतिचतुर्विंशोध्यायः ॥२४॥ पंचविंशेरुषाश

इत्यद्रिगोद्विजमखंवासुदेवप्रणोदिताः यथाविधायतेगोपाः सहकृष्णाव्रजंय
युः॥३८॥ इतिश्रीभागवतेमाहापुराणेदशमस्कंधेचतुर्विंशतितमोध्यायः ॥२४॥
श्रीशुकउवाच इंद्रस्तदात्मनः पूजांविज्ञायविहतांनृप गोपेभ्यः कृष्णनाथेभ्यो
नंदादिभ्यश्चुकोपसः १

केव्रजनाशायवर्षति उध्यस्यगिरिमासारादरक्षद्गोकुलंप्रभुः १ कृष्णोनाथोयेषांते
भ्यः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुध्यः सन्निंद्रः सांवर्त्तकंनामसंवर्त्तःप्रलयस्तत्कर्त्तारंमेघानांप्रसिद्धंगणंप्राचोदयत्
मेषयामास ननुकथंकृष्णनाथानांघातेप्रवृत्तइत्यत्राहंक्यात्मसंभावनयानिरस्तवि
वेकत्वादित्याशयेनाह वाक्यंचाहेत्यादिपंचभिः ईशमानीअहमेवेश्वरइतिगर्ववा

गणंसावर्त्तकंनाममेघानांचांतकारिणां इंद्रःप्राचोदयत्क्रुद्धोवाक्यंचाहेशमान्युत
२ अहोश्रीमदमाहात्म्यंगोपानांकाननौकसां कृष्णंमर्त्यमुपाश्रित्ययेचक्रुर्देवहेल
नं ३ यथाऽदृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः विद्यामान्वीक्षिकींहित्वातितीर्षंति
भवार्णवं ४

नं २ देवहेलनंदेवस्यममावज्ञां ३ अदृढैः असमर्थैः कर्ममयैः क्रियानिर्व
र्त्यैः अतएवनाममात्रेणयानौःइतिव्यवह्रियतेनलत्सदृशैः आन्वीक्षिकीमा
त्मानुसंधानरूपां ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानं

तथा वाचालं बहुभाषिणं बालिशं शिशुं पंडितमानिनं पंडितंमन्यं अतस्तब्धम विनीतमि
ति निंदायां योजितापींद्रस्य भारती श्रीकृष्णं स्तौति तथाहि वाचालं शास्त्रयोनिं बालिशं
एव मपि शिशुवन्निरभिमानिनं स्तब्धं अन्यस्य वंद्यस्याभावादनम्रं अज्ञं नास्ति ज्ञेय

वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रि
यं ५ येषां श्रियावलिप्तानां कृष्णेन ध्मायितात्मनां धुनुत श्रीमदस्तंभं पशून्न
यत संक्षयं ६

स्मात्तं सर्वज्ञमित्यर्थः पंडितमानिनं बहुमाननीयं कृष्णं सदानंदरूपं परब्र
ह्म मर्त्यं तथापि भक्तवात्सल्येन मनुष्यतया प्रतीयमानमिति ५ अवलिप्तानामत्तानां
ध्मायितात्मनां बृंहितदेहानां धुनुत अपनयत श्रीमदेन यस्तंभो गर्वस्तं ६ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्यतस्तान्प्रत्याह अहंचेति अनुव्रजे अनु अनंतरमेवागमिष्यामि मरुद्गणैर्देवगणैः सह ७ मघवताइंद्रेणनिर्मुक्तंबंधनंयेषांतेप्रलयाभिप्रायेणबद्धाआसन्तदानि

॥ अहंचैरावतंनागमारुह्यानुव्रजेव्रजं मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ७ ॥ऋषिरुवाच॥ इत्थंमघवताज्ञप्तामेघानिर्मुक्तबंधनाः नंदगोकुलमासारैः पीडयामासुरोजसा ८ विद्योतमानाविद्युद्भिः स्तनंतः स्तनयित्नुभिः तीव्रैर्मरुद्गणैर्नुन्नाववृषुर्जलशर्कराः ९

मुक्तबंधनाःसंतः आसारैर्धारासंपातैः पीडयामासुः स्तनयित्नुभिरशनिभिः स्तनंतः गर्जंतः मरुद्गणैः आवहप्रवहादिवायुसमूहैः नुन्नाः प्रेरिताः जलशर्कराः जलोपलान् ९ श्रीकृष्णपरमात्मनेनमोनमः ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थूणावत्स्थूलाः अभ्रेषु मुंचत्सु सत्सु नतं निम्नं उन्नतं तद्विपरीतं यथा भवति तथा भू
र्नादृश्यत १० जातवेपनाः जातकंपाः ११ तत्र पश्चूनां यानं विशिनष्टि शिरइति १२

स्थूणास्थूलावर्षधारामुंचत्स्वभ्रेष्वभीक्ष्णशः जलौघैः प्लाव्यमानाभूर्नादृश्य
तनतोन्नतं १० अत्यासारातिवातेन पशवोजातवेपनाः गोपागोप्यश्चशीता
र्ताःगोविंदंशरणंययुः ११ शिरः सुतांश्चकायेन प्रच्छायासारपीडिताः वेपमाना
भगवतः पादमूलमुपाययुः १२ कृष्णकृष्णमहाभागत्वन्नाथंगोकुलंप्रभो
त्रातुमर्हसिदेवान्नः कुपिताद्भक्तवत्सल १३

गोपगोपीनां प्रार्थनमाह कृष्णेति त्वमेव नाथो यस्य तद्गोकुलं गवां कुलं वंशं नो अस्मां
श्चदेवादिंद्रात्त्रातुं रक्षितुमर्हसि १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञापनात्पूर्वमेवकुपितेनइंद्रेणकृतंतद्वर्षंमेने १४ कथंमेनेतदाहअपर्लितिति अपग
तकृतुर्यस्यतद्वर्षंअतिशयितोवातोयस्मिन्ततअभिवान्तंशिलामयंशिलाप्रचुरं १५

शिलावर्षनिपातेनहन्यमानमचेतनं निरीक्ष्यभगवान्मेनेकुपितेनेंद्रकृतंहरिः
१४ अपर्त्वत्युल्बणंवर्षमतिवातंशिलामयं स्वयागेनिहतेस्माभिरिंद्रो ना
शायवर्षति १५ तत्रप्रतिविधिंसम्यगात्मयोगेनसाधये लोकेशमानिनां
मौढ्याद्धरिष्येश्रीमदंतमः १६

तत्रप्रतिज्ञापूर्वंगोवर्द्धनोद्धरणमाह तत्रेति
प्रतिविधिंप्रतीकारंस्वसामर्थ्येनसाधयिष्यामितेनचमौढ्यात् लोकेशमानिनांश्री
मदलक्षणंतमोहरिष्यामिबहुवचनेनवरुणादीनपिप्रस्येति १६ श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुदेवाः सात्विकास्तद्भक्ताश्चकुतस्तेषांनमस्तत्राह नहीति सद्भावः सत्वंमद्भक्ति
र्वातद्युक्तानांसुराणामीशावयमितिविस्मयोगर्वोहियस्मान्नघटते अतोसंतस्ते

नहिसद्भावयुक्तानांसुराणामीशविस्मयः मत्तोसतांमानभंगः प्रशमा
योपकल्पते १७ तस्मान्मच्छरणंगोष्ठंमन्नाथंमत्परिग्रहं गोपायेस्वात्म
योगेनसोयंमेव्रतआहितः १८ इत्युक्त्वैकेनह स्तेनकृत्वागोवर्द्धनाचलं
दधारलीलयाकृष्णश्छत्राकमिवबालकः १९

किंचतेषांमानभंगोऽनुग्रहएवे
त्याह मत्तइतिगोपायेरक्षिष्यामिकिंचसोयंमेमयाव्रतोनियमः संकल्पोवाआ
हितंधृतः इत्यर्थः कृत्वाउत्पाट्यउद्धृत्यछत्राकं [illegible] १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथोपजोषंयथासुखं २० २१ सव्रजाः शकटमंडलसहिताः सोपजीविनः भृत्यपुरोहि

अथाहभगवान्गोपान्हेंबतातव्रजौकसः यथोपजोषंविशतगिरिगर्त्तं
सगोधनाः २० नत्रासइहवःकार्योमद्धस्ताद्रिनिपातने वातवर्षभयेनालं
तत्त्राणंविहितंहिवः २१ तथानिर्विविशुर्गर्त्तंकृष्णाश्वासितमानसाः यथा
वकाशंसधनाःसव्रजाःसोपजीविनः २२ क्षुत्तृड्व्यथांसुखापेक्षांहित्वातै
र्व्रजवासिभिः वीक्ष्यमाणोदधावद्रिंसप्ताहंनाचलत्पदात् २३ कृष्णयो
गानुभावंतंनिशम्येंद्रोतिविस्मितः निःस्तंभोभ्रष्टसंकल्पः स्वान्मेघान्संन्य
वारयत् २४

तादिसहिताः २२ पदात्स्थानात् २३ क्षुदभावाः विगतोदकभावाः स्वल्पज
लाः इत्यर्थः २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवन्तितथा

२५ २६ शकटोढोपकरणंशकटैरूढ[illegible]मुपकरणंयथा २७ निर्झरताः पूर्णाः यथायथोनि

खंव्यभ्रमुदितादित्यंवातवर्षंचदारुणं निशाम्योपरतंगोपानोवर्धनधरोब्र
वीत् २५ निर्यातत्यजतत्रासंगोपाःसस्त्रीधनार्भकाः उपारतंवातवर्षंव्यु
दप्रायाश्चनिम्नगाः २६ ततस्तेनिर्ययुर्गोपाःस्वंस्वमादायगोधनं शकटो
ढोपकरणंस्त्रीबालस्थविराःशनैः २७ भगवानपितंशैलंस्वस्थानेपूर्व
वत्प्रभुः पश्यतांसर्वभूतानांस्थापयामासलीलया २८ तंप्रेमवेगान्नि
भृताव्रजौकसोयथासमीयुःपरिरंभणादिभिः गोप्यश्चसस्नेहमपूजयन्
मुदादध्यक्षताद्भिर्युयुजुःसदाशिषः २९

तंपरिरंभणाशिभिः समीयुः उपजग्मुःसदाशिषः

श्रेष्ठानाशीर्वादान् २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० ततोगोवर्द्धनस्थानात् अस्यश्रीकृष्णस्यतथाविधस्तनिगोवर्द्धनोधरणादिरूपाणि
कृतानिकर्माणिगायंत्यः ईयुः ययुः कथंभूताः एवंप्रेम्णा हृदिस्पृशः यद्वाकथंभूत

यशोदारोहिणीनंदोरामश्चबलिनांवरः कृष्णमालिंग्ययुयुजुराशिषः स्नेहकातराः
३० दिविदेवगणाः साध्याः सिद्धगंधर्वचारणाः तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि
पार्थिव ३१ शंखदुंदुभयोनेदुर्दिविदेवप्रणोदिताः जगुर्गंधर्वपतयस्तुंबरुप्रमुखा
नृप ३२ ततोनुरक्तैःपशुपैःपरिश्रितोराजन्स्वगोष्ठंसबलोव्रजद्धरिः तथाविधान्य
स्यकृतानिगोपिकागायंत्यईयुर्मुदिताहृदिस्पृशः ३३ इति श्री दे०म०॥०पंचवि
शतितमोध्यायः॥२५॥

स्यप्रेष्ठत्वेनतासांहृदिस्पृशंतीतिहृदिस्पृक्तस्य ३३ इतिश्र
मेटीकायांपंचविंशः॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षड्विंशे विस्मितान् गोपान् कृष्णस्याद्भुतकर्मभिः नंदो गर्गोक्तिभिस्साश्वासयतदैश्वर्यमवर्णयत् १
समभ्येत्य नंदमभिगम्य यदूचुस्तदाह बालकस्येति यद्यस्मादद्भुतानि कर्माणि तस्माद्धा

श्रीशुक उवाच॥ एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते अतद्वीर्यविदः
प्रोचुः समभ्येत्य सुविस्मिताः १ बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै
कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितं २ यः सप्तहायनो बालः करेणै
केन लीलया कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ३

म्येषु गोपालेषु कथं जन्मा
र्हति आत्मजुगुप्सितं आत्मानर्हं २ अद्भुतानि कर्माण्याहुः द्वादशभिः यः सप्तहाय
नः इति कथं बिभ्रत् उस्थितः इति पुष्करं पद्मं गजराट् महागजः इव ३ श्रीरामाय नमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek.Collection

महौजसः महाबलायाः तनोर्वयः आयुः यौवनं वा कालेनस्वयापीतं तेतद्धत् ४ कथमित्य
नुवर्त्तते अनसः अधः शयानस्य मास्यस्य मासास्रयः परिछेदकायस्य गद कवुर्ध्वं ५

तोकेनामीलिताक्षेण पूतनाया महौजसः पीतः स्तनः सह प्राणैः कालेनेव
वयस्तनोः ४ हिन्वतोधः शयानस्य मास्यस्य चरणावुदक् अनोऽपतद्विपर्यस्तं
रुदतः प्रपदाहतं ५ एकहायन आसीनो ह्रियमाणो विहायसा दैत्येन यस्तृ
णावर्त्तमहत्कंठग्रहातुरं ६ श्रीराम

चरणौ हिन्वतः चालयतः प्रपदेन पदाग्रेण हतं विपर्यस्तं अनः कथमपतत् ५ यः कृ
ष्णः दैत्येन ह्रियमाणः सन् तं तृणावर्त्तं दैत्यं कथं अहन्नित्यर्थः ६ श्रीकृष्णपरमात्मने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हैयंगवस्तैन्येन नवनीतचौर्ये बाहुभ्यां गच्छन् रिंगन्नित्यर्थः ७ मुखलो हंतुंकामो यस्य तं बक

कं विधेक्षं गवस्तैन्ये मात्रा बद्धं उलूखले गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ७
वने संचारयन्वत्सान्स रामो बालकेर्वृतः हंतुकामं बकं दोर्भ्यां मुखतोरिमपाटयत् ८
वत्सेषु वत्सरूपेण प्रविशंतं जिघांसया हत्वान्यपातयत्तेन कपित्थानि च लीलया ९ ह
त्वा रासभदैतेयं तद्बंधूंश्च बलान्वितः चक्रे तालवनं क्षेमं परिपक्वफलान्वितं १० प्र
लंबं घातयित्वोग्रं बलेन बलशालिना अमोचयद्व्रजपशून् गोपांश्चारण्यवह्नितः ११
आशीविषतमाहींद्रं दमित्वा विमदं ह्रदात् प्रसह्योद्वास्य यमुनां चक्रे सौ निर्विषोदकां १२

वेषमरिं बाहुभ्यां मुखतः कथमपाटयत् ८९ आशीविषतमः अतिक्रूरविषः अतिक्रूरवि
षश्वासावहींद्रश्चतं १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

औत्पत्तिकः स्वाभाविकः कथमितिकिंसर्वेषामात्मायं स्यादितिशंका १३ उक्तमपिअति
विस्मयेनाभिनयेनवदंति कंसमहायनशति १४ श्रीकृष्णमेवगर्गाचार्यवाक्यंतच्चरि

तस्मन्सक्तानुरागोऽस्मिन्सर्वेषांनोव्रजौकसां नंदनेतनयेऽस्मासुनस्यापौत्पत्ति
कः कथं १२ कंसमहायनोबालः कमहाद्रिविधारणं नतोनोजायतेशंकाव्रज
नाथनवात्मजे १४॥ नंदउवाच ॥ श्रूयतांमेवचोगोपाव्येतुशंकाभवोर्भके एनंकु
मारमुद्दिश्यगर्गोमेयदुवाचह १५ वर्णास्त्रयः किलास्यासन्गृण्हतोनुयुगंतनूः
शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः १६

नपरिशीलनेननंि रत्तासंभावनस्यनंदस्य
कृष्णतत्वावबोधकंजातंसइदानींतेनैववाक्येनगोपाननुपदिशति श्रूयतामिति १५ १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पु॰
२१३

प्रागयंवसुदेवस्यक्कचिज्जातस्तवात्मजः वासुदेवइतिश्रीमानभिज्ञाःसंप्र
चक्षते १७ बहूनिसंतिनामानिरूपाणिचसुतस्यते गुणकर्मा[illegible]नुरूपाणि
तान्यहंवेदनोजनाः १८ एषवः श्रेयआधास्यत्गोपगोकुलनंदनः अनेनस
र्वदुर्गाणियूयमंजस्तरिष्यथ १९ पुरानेनव्रजपतेसाधवोदस्युपीडिताः अ
राजकेरक्षमाणाजिग्युर्दस्यून्समेधिताः २० यएतस्मिन्महाभागाः प्रीतिं
कुर्वंतिमानवाः नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः २१ श्रीराम

राम
२१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्तस्यकर्मसुविस्मयोनास्तीतिनंदस्योक्तिः २२ २२ इत्यस्य...सासात् मांप्रतिसमा

तस्मान्नंदात्मजोयं तेनारायणसमोगुणैः श्रियाकीर्त्यानुभावेनतत्कर्मसुनवि
स्मयः २२ इत्यद्धामांसमादिश्यगर्गेचस्वगृहंगते मन्येनारायणस्यांशंकृ
ष्णमक्लिष्टकारिणं २३ इतिनंदवचःश्रुत्वागर्गगीतंव्रजौकसः दृष्टश्रुतानु
भावास्तेकृष्णस्यामिततेजसः मुदितानंदमानर्चुःकृष्णंचगतविस्मयाः २४

दिश्यगर्गेस्वगृहंगतेसतिनदानींतथामन्यमानोपि इदानींकृष्णंनारायणस्यांशंमन्ये
अत्रहेतुः अक्लिष्टकारिणमिति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोवर्द्धनोद्धरणंसपरिकरमनुस्मरन्प्रकटितैश्वर्यस्यश्रीकृष्णस्यप्रीतिंप्रार्थयते देवर
ति यज्ञविप्लवेनयारुट्तयादेवेंद्रेवर्षतिसतिवज्राश्मरूपेषानिलैः अशनिजल
शर्करातीव्रवायुभिः सीदत्पालपशुस्त्रीसीदंतः पालाः पशवस्त्रियश्चयस्मिन् तत्त प
था आत्मास्वयमेवशरणंयस्य तत्गोष्ठंदृष्ट्वानुकंपीउत्स्मयन्नैश्वर्योद्गमाविष्कुर्वन्शै हसन्

देवेवर्षतियज्ञविप्लवरुषावज्राश्मवर्षानिलैः सीदत्पालपशुस्त्रिआत्मशरणंदृ
ष्ट्वानुकंप्युत्स्मयन् उत्पाट्यैककरेणशैलमबलोलीलोच्छिलींध्रंयथाबिभ्रद्गोष्ठ
मपान्महेंद्रमदभित्प्रीयान्नइंद्रोगवां २५

लमुत्पाट्य अबलोबालोलीलायमुच्छिलींध्रं
यथातथा एकेनकरेणबिभ्रत् दधत् गोष्ठमपात् पालितवान् एवंमहेंद्रमदभित् गवामिं
द्रस्सुतराध्यायार्थंचस्मरतिस एवंभूतः श्रीकृष्णोनः [illegible] प्रीयतामिति षड्विंशोदश
मेव्यक्तः षड्विंशोदशमोहरिः व्यनक्तुपंचत्रिंशांमांचतुर्विंशतितः पृथक् २५ २१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिदशमेटीकायांषड्विंशः ॥२६॥ सप्तविंशेततदाल्लस्य कृष्णस्य प्रभवंपरं वर्ण्यतेसुर
भीन्द्राभ्याममभिषेकमहोत्सवः १ गोवर्धनेधृतेशैलेइतिशक्रस्यभयेनागमनेहेतुः

इतिश्रीभागवतेमहापुराणेदशमस्कंधेषड्विंशतितमोध्यायः ॥२६॥ श्रीशुक
उवाच गोवर्द्धनेधृतेशैलेआसाराद्रक्षितेव्रजे गोलोकादाव्रजत्कृष्णंसुरभिः
शक्रएवच १ विविक्तउपसंगम्यव्रीडितःकृष्णहेलनः पस्पर्शपादयोरेनंकि
रीटेर्केनोवर्चसा २

आसाराद्रक्षितेव्रजेइतिसुरभे हर्षेणागमनंतत्रेंद्रआगत्यकिंकृतवांस्त
दाह विविक्तउपसंगम्येत्यादिना अथात्सुरभिरित्यतः प्राक्तनेनग्रंथेनविविक्तएकांतेपा
दयोःपस्पर्शनमस्कार २ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यकृष्णस्यप्रभुतत्वसावनुभावश्च दृष्टः श्रुतानुभावोयेनसइंद्रः नष्टः त्रिलोकेशो
हंइतिमदोयस्यसः१तत्रममापराधंक्षमस्वेतिवक्तुं तच्चतावदपराधोनास्त्येव त
याअनुग्रहएववृत्तइत्याह चतुर्भिः विशुद्धसत्वमिति धामस्वरूपंशांतंएकरूपं
अतश्चतपोमयंप्रचुरज्ञानंसर्वज्ञमित्यर्थः ध्वस्तरजस्तमस्कं ध्वस्तेअविद्यमाने

दृष्टश्रुतानुभावोस्यकृष्णस्यामिततेजसः नष्टत्रिलोकेशमदइंद्रआहकृतांजलिः
१॥ इंद्र उ॰॥ विशुद्धसत्वंतवधाम शांतंतपोमयंध्वस्तरजस्तमस्कं मायामयोयं
गुणसंप्रवाहो नविद्यतेतेग्रहणानुबंधः ४

र्थः अज्ञानसंबंधोवा ४

रजस्तमसीयस्मिन्अतएवायंअस्म
दादिषुदृश्यमानः मायाकार्यरूपः गुणसंप्रवाहः गुणैः संप्रोक्ष्यतइतितथासंसारइत्यर्थः
सः तेतवनविद्यतेयतः अग्रहणेनाज्ञानेनानुबध्यतइतितथासः सर्वज्ञस्यतेनास्तीत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदाअज्ञानतत्कृतदेहसंबंधौनस्तः तदातत्कृतानां[illegible]भा[illegible]नांकावार्त्तेत्याह कु
तोन्विति तत्कृतादेहसंबंधकृताः तद्धेतवःपुनर[illegible]न्यस्यदेहस्यहेतवः ननुज्ञानिना

कुतोनुधैर्तेतवईशतत्कृतालोभाद्योयेबुधलिंगभावाः तथापिदं
भगवान्बिभर्त्तिधर्मस्यगुप्त्यैखलनिग्रहाय ५ श्रीरामचंद्राय

मपितेदृश्यंतेअतआह अबुधलिंगभावांअज्ञानिनांगमकाः यावद्रागादिमत्वं
तावत्ज्ञानित्वमेवनासिद्धमित्यर्थः लोभाद्यभावेपिमन्मानभंगोदंडार्थमित्याह त
था[illegible]पीति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰प॰
२१६

तुनेत्वदंडेचममगोपपुत्रस्यकाशक्तिः किंचकारणंकोवादंडोमयाकृतइत्यतआ
हपितेति त्वंपिताजगतांजनकः गुरुरुपदेष्टा अधीशः नियंताइतिदंडधार

पितागुरुस्त्वंजगतामधीशोदुरत्ययः कालउपात्तदंडः हिता
यस्वेच्छातनुभिः समीहसेमानंविधुन्वन्जगदीशमानिनां ६

णेहेतुत्वयंकालस्त्वात्समर्थः तस्मादुपात्तदंडोहिताय(णा)कल्पायस्वेच्छातनुभिर्लीलाव
तारैः समीहसे नवसमीहालीलैवजगदीशमानिनामस्माकंमानधूननमित्यर्थः

२१६

कथमेतदित्यतआह यइति मद्विधाश्चतेअज्ञाश्चयेअतोजगदीशमानिनः काले
भयकालेपियथाधुनैवातिरक्षैत्वामभयँमर्गयंतंवीक्ष्यआश्रुतन्मदं जग भय
दीशाइतिमदंहित्वाविगतगर्वाःसंतः आर्यमार्गत्वद्भक्ति लक्षणंभजंति अतस्त

येमद्विधाज्ञाजगदीशमानिनस्त्वांवीक्ष्यकालेभयमाश्रुतन्मदं हित्वार्य
मार्गंप्रभजंत्यपस्मयास्तेहाखलानामपितेनुशासनं ७ सत्वंममैश्वर्य
मदप्लुतस्यकृतागसस्तेविदुषः प्रभावं क्षंतुंप्रभोथार्हसिमूढचेतसोमै
वंपुनर्भून्मतिरीशमेसती

वरहैवखलानांअनुशासनंदंड इत्यर्थः ७ एवंभवत्स्व ग
पंरुहे अभिप्रायंचानुवर्ण्यक्षमापयति सत्वमिति एवंभूताअसतीमतिर्मेपुनर्माभू
दिप्रार्थनांतरं
ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महानयमपराधः कथंक्षंतव्य इतिचेदतआह नवेतिस्वयं भराणांपुनश्चउरुभारजन्म
नांबहूनांभाराणांजन्मयेभ्यस्तेषामभवायनाशाययुष्मच्चरणसेविनांतुभवायअ
तोममत्वत्सेवकत्वादस्यंतापराधिनोपिक्षंतव्यमितिभावः ९ क्षमापयन्नमस्करो

स्वयं
नवावतारोयमधोक्षजेहं भराणामुरुभारजन्मनां चमूपतीनाम
भवायदेवभवाययुष्मच्चरणानुवर्त्तिनां ९ नमस्तुभ्यंभगवतेपुरुषा
यमहात्मने वासुदेवायकृष्णायसात्वतांपतयेनमः १० नमोभगवते

ति नमइति तुभ्यंभगवतेकृष्णायनमः पुरुषा सर्वांतर्यामिणेमहात्मनेअंतस्य
त्वेप्यपरिछिन्नायकुतः वासुदेवायसर्वनिवासायि सात्वतांयादवानांपतये १०

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हिकिमहंयारव: नस्वछंदोपात्तदेहायस्वेषां भक्तानाछंदेनइछयास्वीकृतदेहाय
तत्रापिविशुद्धज्ञानमेवमूर्तिर्यस्यतस्मैमाययासर्वस्मैकुतः सर्वस्यबीजायकार

स्वछंदोपात्तदेहायविशुद्धज्ञानमूर्तये सर्वस्मैसर्वबीजायसर्व
भूतात्मनेनमः ११ मयेदंभगवन्गोष्ठनाशायासारवायुभिः
चेष्टितंविहतेयज्ञेमानिनातीव्रमन्युना १२

णायअतएवसर्वभूतात्मनेनमः इति ११ कृतागसइत्यनेनोक्तमपराधंनिवेद
यति मयेदमिति आसारवायुभिः गोष्ठनाशायमयेदमकुसंचेष्टितंकृतं १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथापिभोईशात्वयानुग्रहीतोस्मिअनुग्रहंदर्शयति ध्वस्तस्तंभइतिदर्थोद्यमइति १३
इंद्रेणस्वाभिप्रायेनिवेदितेभगवानँतथैवाह १४ मयेति इंद्रश्रियादेवराज्येन १६ वः

पि

त्वयेशानुग्रहीतोस्मिध्वस्तस्तंभोवृथोद्यमः ईश्वरंगुरुमात्मानंत्वामहंशरणंगतः
१३॥शुक॰उ॰॥एवंसंकीर्त्तितः कृष्णोमघोनाभगवानमुं मेघगंभीरयावाचाप्रहसन्नि
दमब्रवीत् १४॥भगवानु॰॥मयातेकारिमघवन् मखभंगोनुगृह्णता मदनुस्मृत
येनित्यंमत्तस्येंद्रश्रियाभृशं १५ मामैश्वर्यश्रीमदांधोदंडपाणिंनपश्यति तंभ्रंशया
मिसंपद्भ्योयस्यचेच्छाम्यनुग्रहं १६ गम्यतांशक्रभद्रंवः क्रियतांमेनुशासनं स्थीयतां
स्वाधिकारेषुयुक्तैर्वःस्तंभवर्जितैः १७ युष्माभिर[illegible]वचनंवरुणाभिप्रायेणद्धकगंतव्यं
स्वर्गोपिनवैवरईश्वरत्वादितिचेत्तत्राह क्रियतामिति मदनुशासनयथापूर्वंतत्रस्थीयतां

[illegible] निरंकुशैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्पष्टवर्त्मनांपुंसांअलोकपथमीयुषामितियदुक्तंतदपितथैवेत्साहत्वत्सादे
तिन्दपशुभिर्निराकारैःपशुभिःकिंपुनर्वक्तव्यंतववर्त्मास्फुटमितिकिंचयस्माद्ये

त्वत्पादपद्ममकरंदजुषांमुनीनांवर्त्मास्फुटंननुपशुभिर्ननुदुर्विभाव्यं २
यस्माददलौकिकमिवेहितमीश्वरस्यभूमंस्तवेहितमथोअनुयेभवंतं

भवंतमनुवर्त्ततेतेषामपीहितमलौकिकमिवाथोकिमुवक्तव्यंतवेश्वरस्येहि
तमलौकिकमित्यर्थः आस्थिताःपदवींसुमत्युप्रायःसीदंतियोषितइत्यस्यपरिहा
रंवक्ष्यतियद्वांछयेतिपंचमश्लोके २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी०
८३

निःकिंचनावयंशश्वन्निःकंचनजनप्रियाः तस्मात्प्रायेणनस्याढ्यामांभजंतिसुमध्यम
इत्येतश्लोकोक्तंदोषत्रयंपरिहरति निःकंचनइति दरिद्रतालक्षणंनिःकिंचनत्वंतुन
घटतइत्याह यस्मादिति अन्यतोबलिभुजः पूज्याअपिब्रह्मादयोयस्मैभगवतेबलिंह
रंतितस्यसर्वेश्वरस्यभवतोदरिद्रतानघटतइत्यर्थः निःकिंचनजनप्रियाइत्यत्रतत्पुरुषे

निःकिंचनोननुभवान्नयतोस्तिकिंचिद्यस्मैबलिंबलिभुजोपिहरंत्यजाद्याः
नत्वाविदंत्यसुतृपोंतकमाढ्यतांधाःप्रेष्ठोभवान्बलिभुजामपितेपितुभ्यं
२७

णबहुव्रीहिणावानिंदास्यादितिस्वयमप्युभयथास्तोतिप्रेष्ठोभवानिति बलिभुजांब्र
ह्मादीनांलोकेश्वराणामहंप्रेष्ठः तेपितुभ्यंनचेतितस्मात्प्रायेणनस्याढ्यामांभ[illegible]तीत्यस्यो
त्तरंनत्वांविदंतीतिआढ्यतयांधाः त्वांत्वामंतकंनविदंतिअतस्ते असुतृपःअसून्नेवतर्प
यंतिनत्वांभजंतीत्यर्थः २७

राम
८३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलिभुजामपिभवान्प्रेष्टइत्यत्रहेतुंवदंती ययोरेवसमंचित्तमित्यनेनोक्तमनो
वित्तंपरिहरतित्वंवाइतिफलात्मापरमानंदरूपः एतस्यैवानंदस्यात्वानिभूता

त्वंवैसमस्तपुरुषार्थमयःफलात्मायद्वांछयासुमतयोविसृजंतिकृत्स्नं
तेषांविभोसमुचितोभवतःसमाजःपुंसःस्त्रियाश्चरतयोःसुखदुःखि
नोर्न ३८

रत्नं

निमात्राउपजीवंतीतिश्रुतेःसमाजःसेव्यसेवकलक्षणसंबंधःनतुपुंसःस्त्रियाश्चमि
थोरतयोःअतएवतत्कृतसुखदुःखिनोःतदाकुलयोरित्यर्थः ३८ श्रीरामोजयति॥७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिक्षुभिः श्लाघितामुधेत्यस्यपरिहारः त्वमिति भिक्षुपदव्याख्यानंन्यस्तदंडैर्मुनिभि
रितिमुधेत्यस्यपरिहारः आत्मेति यदर्थंसर्वंप्रियंतस्यजगतामात्मनस्त्वंवरणंन
वर्थेत्यर्थः किंचआत्मदृश्इतिवेदस्पेनतदविज्ञायत्वयादीर्घसमीक्षयेतितत्वास्मिन्नुक्तं

त्वंन्यस्तदंडमुनिभिर्गदितानुभावआत्मात्मदृश्ञ्जगतामितिनिर्वृतोसि
हित्वाप्रभकद्भुवउदीरितकालवेगध्वस्ताशिषोज्झभवनाकपतीन्कुतोन्ये

दोषद्वयपरिहरतीतिश्रुतिज्ञात्वैवमेमयाप्रवृत्तोसीत्यज्ञानपरिहारः हित्वेत्यदीर्घस
मीक्षापरिहारः भवतोभ्रुवः सकाशादुदीरितोयः कालस्यवेगस्तेनध्वस्ताआ
शिषोयेषांतान्ब्रह्मादीनपिविहायकुतोन्येवराकाः शिशुपालादयइत्यर्थः ३३

राम
२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वात्मानंपरित्यज्यपुरुषांतरगुणवर्णनप्रदीप्तकोपसंरंभेणतास्मिन्नेवात्मानमापा
दयति जाद्यमितिसिंहोयथापशून्विद्राव्यस्वबलिंहरतितथाशार्ङ्गधनुर्निनादेने

आद्यंवचस्तवगदाग्रजयस्तुभूपान् विद्राव्यशार्ङ्गनिनदेनजहर्थमांत्वं
सिंहोयथास्वबलिमीशपशून्स्वभागंतेभ्योभयाद्यदुदधिंशरणंप्रपन्नः
४०

वजरासंधादीनृविद्राव्यमांस्वभागंश्रियंपुरस्त्वंहृतवानसितस्यतवराजभ्योभयादु
दधिंप्रपन्नइतियद्वचोभाषणंतज्जाद्यं मांयंनघटतइत्यर्थः ४० श्रीकृष्णपरमात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रान्यदस्पृष्टवर्त्मनामित्यादिनार्थात्त्वां भजंतः सीदंतीत्यवसादनं भ्रमावहं मु
क्तं तदपि मंदमेवेत्याह यद्वांछयेति यस्य तव भजनवांछया नृपोत्तमाः अंगो वेनस्य

यद्वांछया नृपशिखामणयोंग वैन्यजायंतनाहुषगयादय ऐकपसं
राज्यं विसृज्य विविशुर्वनमंबुजाक्ष सीदंति तेनु पदवीं त इहास्थिताः किं
४१

पिता वैन्यः पृथुर्जयंतो भरतः नाहुषो ययातिः गयश्चादिर्येषां ते य एते तव पदवीं
मार्गमाश्रितास्ते किं सीदंति न सीदंत्येव अपि तु त्वत्पदं प्राप्ता इत्यर्थः एवं च कोपा
वेशेनावसादनस्य परिहारादस्पृष्टवर्त्मनामित्येतदानंतर्यं विहाय अत्रोत्कर्षः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यच्चोक्तं अथात्मनोनुरूपमितितत्राह कान्यमिति श्लोकद्वयेन गुणानामालय
स्य तव पादसरोजगंधं जनतायाअपवर्गमोक्षरूपं लक्ष्म्याआलयंतत्सेवंमहद्भि

कान्यं श्रयेत तव पादसरोजगंधमाघ्राय सन्मुखरितं जनतापवर्गे ल
क्ष्म्यालयं त्वविगणय्य गुणालयस्य मर्त्यः सदोरुभयमर्थविविक्तदृष्टिः

४२

मुखरितं वर्णितं आघ्राय तमविगणय्य मर्त्यो मरणधर्मिकः सदा उरुभयं यस्य तम
न्यं कः स्त्रीश्रयेन सेवेत अर्थे विविक्ता दृष्टिर्यस्याः सा गुणालयस्येत्यनेन गुणैर्हीनाद
ति यदुक्तं तदपास्तं ४८

अतस्त्वामेवाहमभजमित्याह तं त्वेति प्रार्थयते स्यादिति अरणं शरणं स्त्रतिभिर्दे
वतिर्यगादिभिर्जन्मभिः पाठांतरे त्वर्थवादबहुलकर्मश्रवणैरित्यर्थः कथंभूत

तं त्वानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च कामपूरं स्या
न्मे तवांघ्रिररणं स्रतिभिर्भ्रमंत्या यो वै भजंतमुपयात्यनृपापवर्गः ४७

स्य तव यस्त्वं अनृतस्य संसारस्य अपवर्गो नाशो यस्मात्सः भजंतमुपयाति आ
त्मसात्करोति तस्य तवांघ्रिरिति भीतस्य हि शरणमेवानुरूपं भजनयोग्यं अत
स्त्वामहमभजमित्यर्थः ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत्वोक्ताराज्ञांबहवोगुणाराजपुत्रीस्मितांभूपैर्लोकपालविभूतिभिरित्यादिना
तत्रसेर्ष्यसशापंसांगुलिभंगंचाहद्वाभ्यां तस्याःस्युरिति खराइव केवलंभा

तस्याःस्युरच्युतनृपाभवतोपदिष्टाःस्त्रीणांगृहेषुखरगोश्वबिडालभृ
त्याः यत्कर्णमूलमरिकर्षणनोपयायाद्युष्मत्कथामृडविरिंच्यसभासु
गीता ४५

खवाहाःगावोबलिवर्दाइवनिस्त्यव्यापाराक्लिष्टाःश्वानइवावमताबिडालाइवक्रूप
ण्याहिंस्त्राश्चभृत्याइवकिंकराः नृपास्तस्याडुर्भगायाःपतयःस्युः यस्याःकर्णपथं
त्वत्कथानप्राप्नुयादिति ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.टी.स.
८७

तयाहिनेपदाब्जमकरंदमज्जीघ्रतीसतीयास्त्रीविमूढासाकांतोयमितिर्यस्याःसा मति

त्वक्श्मश्रुरोमनखकेशापिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफपित्तवा
तं जीवच्छवंभजतिकांतमतिर्विमूढायातेपदाब्जमकरंदमजिघ्रतीस्त्री
॥५॥

कांतमतिःजीवच्छवंभजति त्वगादिभिर्बहिःपिनद्धंछन्नंअंतर्मांसादि[illegible]यमिति
॥५॥

राम
८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदुक्तमुदासीनावयमित्यादिनातत्राह अस्त्विति यद्यपित्वंनिरपेक्षः तथापि
ममतेचरणानुरागोस्तुममपिचमय्यपिनअतिरिक्ताअतिशयवतीदृष्टिर्यस्यत

अस्त्वंबुजाक्षममतेचरणानुरागआत्मन्रतस्यमयिचानतिरिक्तदृष्टेः
यर्ह्यस्यवृद्धयउपात्तरजोतिमात्रोमामीक्षसेतदुहनःपरमानुकंपा ४६

स्यतेआत्मन्येवरतस्यतर्हितेनतवकोलाभः त्वच्चरणानुरागएवमहान्लाभः किं
चयर्हिअस्यविश्वस्यवृद्धयेउपात्तरजसोतिमात्राऔत्कंठ्यंयेनसः तथाभूतःस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंनउक्तंसर्वंप्रतिव्याख्यायप्रसन्नचित्तामंत्रमुपदिशंत्याह द्वाभ्यां नैवेति अ
थात्मनोनुरूपमित्यादिनेवचः अलीकंमिथ्येतिनैवमन्येयतोलोकेकन्यायाएवद्धं

नैवालीकमहंमन्येवचस्तेमधुसूदन अंबायाइवहिप्रायः
कन्यायाःस्याद्रतिःक्वचित् ४७ ऊढायाश्चापिपुंश्चल्यामनो
ध्येतिनवंनवं बुद्धोसतींनबिभ्रयात्तांबिभ्रदुभयच्युतः ४८

धो

चिद्रतिर्भवतियथाकाशिराजकन्यानांअंबांबालिकांबिकानांतिसृणांमध्येअं
बायाःकन्यायाएवशाल्वेरतिर्जातातद्वत् ४७ ऊढायाःपरिणीतायाअपीतिअस्मय
स्मादिहपरलोकद्वयाच्च्युतःभ्रष्टइति ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रलंभिताउपहसितासि अन्वास्यअन्वाख्यानवती ४९ मयिएकांतभक्तायास्ते
कामाः संत्येव आकामायकामनिवृत्तयेमोक्षपर्यवसायिनइत्यर्थः ५० अनुवा

भगवानुवाच साध्व्येन श्रोतुकामेनराजपुत्रीप्रलंभिता मयोदितंयदन्वा
त्यसर्वंतत्सत्यमेवहि ४९ यान्यान्कामयसेकामान्मय्यकामायभामिनि
संतित्येकांतभक्तायास्तवकल्याणिनित्यदा ५० उपलब्धंपतिप्रेमपातिव्र
त्यंचतेनघे यद्वाक्यैश्चास्ममानायानधीर्मय्यपकर्षिता ५१

देनवरानदत्वातामभिनंदति उपलब्धमितियद्यस्मान्मयिवर्त्तमानाधीः नापकर्षिता
नान्यविषयाजाता ५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकांतभक्तिमभिनंयन्नामेवदृढीकर्तुंसकामान्भक्तान्निंदति येमामिति दांपत्ये
दंपत्युपभोगसुखार्थे ५२ मायामोहितत्वमेवोपपादयतिमांप्राप्येतिअपवर्गे
णसहसंपदोयस्मिंस्तंमांप्राप्यप्रसाद्ययेकेवलंसंप दएवविषयान्वांछंतिनिन्त

येमांभजंतिदांपत्येतपसाव्रतचर्यया कामात्मानोपवर्गेशंमोहितामम
मायया ५२ मांप्राप्यमानिन्यपवर्गसंपदंवांछंतियेसंपदएवतत्पतिं
तेमंदभाग्यानिरयेपियेन्नृणांमात्रात्मकत्वान्निरयःसुसंगमः ५३

मांतत्पतिं
तासांसंपदामपियोहमेवपतिस्तंयेविषयानिरयेपिभांतिनिकृष्टस्थानावपिसुः
तान्किंच तेषांपुंसांमात्रात्मकत्वान्विषयात्मकत्वान्निरयःसुसंगमःशोभन
संगमःशोभनसंगमएवस्यादतोमंदभाग्याइत्यर्थः ५३ श्रीकृष्णायनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्गृहेश्वरि त्वया मयि भवमोचनी निःकामानुवृत्तिः कृता एतद्दिष्ट्या मद्गं कथं
भूता खलैः सुदुराशिषो दुरभिप्रायायाः अत एव असुंभरायाः प्राणतर्पणपरायाः
निकृतिं जुषो वंचनपरायाः स्त्रियाः सुतरामसावनुवृत्तिर्दुष्करेति ५४ किंच संति

दिष्ट्या गृहेश्वर्यसकृन्मयि त्वया कृतानुवृत्तिर्भवमोचनी खलैः सुदुःष्करासौ सु
तरां दुराशिषो ऽसुंभराया निकृतिं जुषः स्त्रियाः ५४ न त्वादृशीं प्रणयिनीं गृहि
णीं गृहेषु पश्यामि मानिनि यया स्वविवाहकाले प्राप्तानृपानवगणय्य रहो ऽर्हे ते
मेघस्यापितो द्विज उपश्रुतसत्कथस्य ५५

निःकामाः प्रेम्णैवम प्यनुवर्त्तमानाब
ध्वः किंतु त्वयां दृशीं क्वापि न पश्यामी ति नस्याभक्तिं बहुमानेनाभिनंदति न त्वादृशी
मिति त्रिभिः उपश्रुताः सत्यः कथायस्यमे ५५

स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰
२०

प्रोद्वाहपर्व्वणि अत्रानिरुद्धविवाहे अक्षगोष्ठ्यां द्यूतसभायां यस्य भ्रातुर्वधं त
स्मिन्कालांतरे तदनुस्मरणतः पुनः समुत्थं दुःखं अस्माभिरयोगो वियोगस्तद्भी

भ्रातुर्विरूपकरणं युधि निर्ज्जितस्य प्रोद्वाहपर्व्वणि च तद्वधमक्षगो
ष्ठ्यां दुःखं समुत्थमहह सोऽस्मदयोगभीत्या नैवाब्रवीः किमपि तेन व
यं जितास्ते ५९

त्या असहः सोढवत्यसि अनेनैवानिरुद्धविवाहानंतर्यमस्य ज्ञातव्यं ५९ श्रीगो

राम॰
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपिवदूतइतिआत्मलभनेमत्वाप्यर्थे मयिचिरायतिग्धोमाविनिविवाहेआ
गंतव्यमितिक्ष्वनेसमयेकथंचिदप्राप्तवतिसतिएतद्विधंशून्यंमत्वाइदमनन्य
योग्यमंगंजिहासेत्यक्तुमिछामित्यस्मामीत्येवंदूतः प्रस्थापितः तथात्युक्तंत्व

दूतस्त्वयात्मलभनेसुविविक्तमंत्रः प्रस्थापितोमयिचिरायतिशून्यमेत
त् मत्वाजिहासइदमंगमनन्ययोग्यंतिष्ठेनतत्वयिवयंप्रतिनंदयामः

५७

यायर्व्यंबुजाक्षनलभेयभवत्प्रसादजत्याम सूनव्रतक्लशान्शतजन्मभिः
स्यादिति यद्वाअजिहासइतिछेदःत्यक्तुमैछंइत्यर्थः नत्तवकर्मत्वयेवतिष्ठेत्
ननत्प्रतिकर्त्तुंशक्यमित्यर्थः किंतुकेवलंत्वांप्रतिनंदयामोहर्षयामइति ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द०
६१

सौरतसंलापैः सुरतनर्मगोष्ठीभिः ५८ ५९ ॥ इति दशमे षष्टितमः ॥ ६० ॥ एकषष्टि
तमे शौरेः पुत्रपौत्रादिसंततिः अनिरुद्धविवाहे च रुक्मिणो रामतो वधः १ अष्टा

श्रीशुक उवाच एवं सौरतसंलापैर्भगवान्जगदीश्वरः स्वरतो रमया रेमे नर
लोकं विडंबयन् ५८ तथान्यासामपि विभुर्गृहेषु गृहवानिव आस्थितो गृह
मेधीयान्धर्मांल्लोकगुरुर्हरिः ५९ इति श्री भा० द० रुक्मिणिसंवादः षष्टित
मोध्यायः ६० ॥ श्रीशुक उवाच ॥ एकैकशस्ताः कृष्णस्य पुत्रान्दशदशाबलाः
अजीजनन्ननवमान्पितुः सर्वात्मसंपदा १

धिकशतद्वयष्टसहस्रस्त्रीसमुद्भवा
न् कोदिशः पुत्रपौत्रादीन्हरिर्हरिरयोजयत् १ तदेतद्वक्तुमाह एकैकश इति कृष्ण
स्य अबला भार्याः सर्वा या आत्मनि संपत्तत्या पितुः सकाशादनवमान् १ श्रीराम

राम
६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रेष्ठंन्य मंसत अच्युतस्यप्रियतमंप्रत्येकंस्वंस्वंमेनिरेनतस्यतत्वमात्माराम
त्वंविदंतिताः २ आत्मारामत्वंव्यनक्तिद्वयेन चार्विति चार्वब्जकोशवद्वदनंच

गृहादनपगंवीक्ष्यराजपुत्र्योऽच्युतंस्थितं प्रेष्ठंन्यमंसतस्वंस्वमनतत्त्ववि
दःस्त्रियः २ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितव
ल्गुजल्पैः संमोहिताभगवतोनमनोविजेतुंस्वैर्विभ्रमैःसमशकन्वनि
ताविभूम्नः ३

आयतानिबाहुनेत्राणिचससप्रे म्णाहासरसेनवीक्षितानिचव
ल्गुजल्पाश्चभगवतएतैःसम्मोहितावनिताःस्वैरनेकैर्विभ्रमैस्तस्यमनोविजे
तुंहर्तुंनसमशकन्नशक्ताबभूवुः विभूम्नःपरिपूर्णस्य ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासांबिभ्रमान्वर्णयन्नेतद्विरणोतिस्मायेति स्मायोगूढहसितंतनयुक्तः अवलो
कलवः कटाक्षस्तेनदर्शितः सूचितोभावोभिप्रायः तेनहारिमनोहरणशीलंयत्

स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः प
त्यस्तुषोडशसहस्रमनंगबाणैर्यस्येंद्रियंविमथितुंकरणैर्नशेकुः ४

भ्रूमंडलंतेनप्रहिताः प्रस्थापिताः येसौरताः मंत्राः तेषुशौंडैः प्रगल्भैः अनंगस्य
बाणैः शरैरन्यैश्चकरणैः कामशास्त्रप्रसिद्धैः यस्येंद्रियंमनोविमथितुंषोडशस
हस्रमपिपत्न्योनशेकुरिति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुरागेणहासोवलोकश्चनवसंगमेल्लालसंऔत्सुक्यंचतेंआढ्यायस्यविभ्र
मकदंबस्यतंभेजुः अनुरागहासावलोकनवसंगमलालसात् यंभेजुः तस्यम

इत्थंरमापतिमवाप्यपतिंस्त्रियस्ताब्रह्मादयोपिनविदुःपदवींयदीयां भे
जुर्मुदाविरमेतेधितयानुरागहासावलोकनवसंगमलालसाढ्यं ५ प्रत्यु
द्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः केशप्र
साधशयनस्नपनोपहार्यैर्दासीशताअपिविभोर्विदधुःस्मदास्यं ६ श्री

नोविजेतुंनशेकुरितिवा ५ किंतुप्रत्युद्गमादिभिर्विभोस्तस्यदास्यंनित्यंविदधुरि
तिप्रौढभावेपिनवसंगमायघ्नि धानंअगतसारत्वेनोत्सौक्येनचतथाप्रतीतेःतेषा
मेवश्लोकानांप्रस्तावांतरेपुनःपुनरावृत्तिरितिसौंदर्यात् ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
१२

प्रासंगिकमुक्त्वाप्रस्तुतमाह तासामितिदशदशपुत्राया सांतासांमध्येअष्टौमहि

तासांयादशपुत्राणांकृष्णस्त्रीणांपुरोदिताः अष्टौमहिष्यस्तत्पुत्रान्प्रद्यु
म्नादीन्गृणामिते ७ चारुदेष्णःसुदेष्णश्चचारुदेहश्चवीर्यवान् सुचारुश्चा
रुगुप्तश्चभद्रचारुस्तथापरः ८ चारुचंद्रोविचारुश्चचारुश्चदशमोहरेः
प्रद्युम्नप्रमुखाजातारुक्मिण्यांनात्मजाःपितुः ९ भानुःसुभानुःस्वर्भा
नुःप्रभानुर्भानुमांस्तथा चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः १० श्रीभानुः
प्रतिभानुश्चसत्यभामात्मजादश सांबःसुमित्रःपुरुजिच्छतजिच्चसह
स्रजित् ११

ष्योयाःप्रागुक्तास्तत्पुत्रानिति ७ ८ ९ १० ११ श्रीकृष्णप०

प्रभानु

राम
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ श्रीमानितिवसोर्कुंतेर्वाविशेषणं १३ भद्रोनामएकःएकलःसोमकःअ[illegible]ःक

विजयश्चित्रकेतुश्चवसुमानद्रविडःक्रतुः जांबवत्यासुतात्येतेसांबाद्याःपितृसंम
ताः १२ वीरश्चंद्रोश्वसेनश्चचित्रगूर्वेगवान्वृषः आमःशंकुर्वसुःश्रीमान्कुंति
र्नाग्निजितीसुताः १३ सुतःकविर्वृषोवीरःसुबाहुर्भद्रएकलः शांतिर्दर्शःपूर्णमा
सःकालिंद्याःसोमकोवरः १४ प्रघोषोगात्रवान्सिंहोबलःप्रबलऊर्ध्वगः माद्र्याः
पुत्रामहाशक्तिःसहओजोपराजितः १५ वृकोहर्षोनिलोगृध्रोवर्द्धनोन्नादएव
च महीशःपवनोवन्हिर्मित्रविंदात्मजाःक्षुधिः १६

नियान्एतेकालिंद्याःसुता

इति १४ माद्र्याःलक्ष्मणायाः १५ क्षुधिश्चदशमःएतेमित्रविंदात्मजाः १६ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संग्रामजित्प्रमुखाः सत्यकांताभद्रायाः सुताः शैब्यानामापि सैव रोहिण्याः सुताना
मुक्तिरन्यासामुपलक्षणार्थं १७ १८ एतेषांचेति अन्येषांचेति अन्येषामपिस्त्री

॥ संग्रामजिद्बृहत्सेनः शूरः प्रहरणोरिजित् जयः सुभद्रो भद्राया वाम आयु
श्च सत्यकः १७ दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः प्रद्युम्नाच्चा
निरुद्धोभूद्रुक्मवत्यां महाबलः १८ पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजक
टेपुरे एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप मातरः कृष्णजातानां सहस्रा
णि च षोडश १९

कृष्णपुत्राणां शतसंख्यस्त्रीषु पु त्राः पौत्राश्च कोटिशो बभूवुः त
त्र हेतुत्वेन श्रीकृष्णप्रीत्लीनां बाहुल्यमनुस्मारयति मातरः कृष्णजातानां मिति चरा
द्वेनाधिकाद्येसुक्तं १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः कृष्णं हंतुं रंध्रं प्रतीक्षते स कथं प्रादादिति वैवाहिकं विवाहनिमित्तं २० रुक्मिणो
ऽभिप्रायं कथं जानीम इति चेदत आहानागतमिति अतींद्रियमस्मदादींद्रियागोच

राजोवाच ॥ कथं रुक्मरिपुत्राय प्रादाद्दुहितरं युधि कृष्णेन परिभूतस्तं हंतुं रंध्रं प्र
तीक्षते एतदाख्याहि मे विद्वन्द्विषोर्वैवाहिकं मिथः २० अनागतमतीतं च
वर्त्तमानमतींद्रियं विप्रकृष्टं व्यवहितं सम्यक्पश्यंति योगिनः २१ शुक उवाच
वृतः स्वयंवरे साक्षादनंगोंग युतस्तया राज्ञः समेतान्निर्जित्य जहारैकरथो
युधि २२ यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः व्यतरद्भागिनेयाय सुतां कु
र्वन्स्वसुः प्रियं २३

रं विप्रकृष्टं दूरस्थं व्यवहितं कुड्याद्यंतरितं २२ तत्रोत्तरं स्वयंव
रे रुक्मवत्या वृतः सन्राज्ञो निर्जित्य जहारेति २२ यद्यपि श्रीकृष्णावमानितः तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिवैरमनुस्मरन्नपिव्यतरन् अन्वमोदतेत्यर्थः २३ सर्वासामप्येकैकाकन्यानत्सर्वविवाहे
पलक्षणार्थेत्यष्टकन्याविवाहमाहरुक्मिण्याइति २४ यो नंविवाहस्तयोनंअधर्मंजा

रुक्मिण्यास्तनयांराजन्कृतवर्मसुतोबली उपयेमेविशालाक्षींकन्यांचारुमतीं
किल २४ दौहित्रायानिरुद्धायपौत्रींरुक्म्यददाधरेः रोचनांबद्धवैरोपिस्वसुःप्रि
यचिकीर्षया २५ जानन्नधर्मंतयोर्नंस्नेहपाशानुबंधनः ।तस्मिन्नभ्युदयेराजन्
रुक्मिणीरामकेशवौ २६ पुरंभोजकटंजग्मुःसांबप्रद्युम्नकादयः तस्मिन्निवृत्त
उद्वाहेकालिंगप्रमुखान्नृपाः दृप्तास्तेरुक्मिणंप्रोचुर्बलमक्षैर्विनिर्जय २७ श्री

नन्विति द्विषदन्नंनभोक्तव्यंद्विषतंनैवभोजयेदितिलोकविरोधात् अस्वर्ग्यंलोक
विद्विष्टंधर्ममप्याचरेन्नत्वितिनिषेधाच्चेत्यर्थः २५ २६ लोकविरुद्धाचरणफलंवक्तुमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अदीव्यत्क्रीडितवान् २८ निष्काणां लक्षं ग्लहं पणं कृतवान् कैतवं कपटं ३० न्यर्बु

अनक्षज्ञोप्ययं राजन्नपि तद्व्यसनं महत् इत्युक्तो बलमाहूय तेनाक्षैरुक्ममदीव्यत
२८ शतं सहस्रमयुतं रामस्तत्राददे पणं तं तु रुक्म्यजयत्तत्र कालिंगः प्राहसद्बलं
दंतान्संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः २९ ततो लक्षं ग्रहक्मग्रह्णाद्ग्लहं तत्राज
यद्बलः जितवानहमित्याह रुक्मी कैतवमाश्रितः ३० मन्युना क्षुभितः श्रीमान्
समुद्र इव पर्वणि जात्यारुणाक्षोतिरुषा न्यर्बुदं ग्लहमाददे ३१ तं चापि जितवान्
रामो धर्मेण छलमाश्रितः रुक्मी जितं मयात्रेमे वदंतु प्राश्निका इति ३२ तदाब्रवी
न्नभोवाणी बाणेनैव जितो ग्लहः धर्मतो वचनेनैव रुक्मी वदति वै मृषा ३३ ददश

कोटिः ग्लहः क्षुभितो राम आददे ३१ छलमाश्रितो रुक्मी मया जितमित्याह ३२ ३३

तामनादृत्यवैदर्भोदुष्टराजन्यचोदितः संकर्षणंपरिहसन्बभाषेकालचोदितः
३४ नैवाक्षकोविदायूयंगोपालावनगोचराः अक्षैर्दीव्यंतिराजानोबाणैश्चनभ
वादृशाः ३५ रुक्मिण्यैवमधिक्षिप्तोराजभिश्चोपहासितः क्रुद्धःपरिघमुद्यम्य
जघ्नेतंन्रपसंसदि ३६ कलिंगराजंतरसागृहीत्वादशमेपदे दंतानपातयत्क्रु
द्धोयोहसद्विवृधैर्द्विजैः ३७ अन्येनिर्भिन्नबाहूरुशिरसोरुधिरोक्षिताः राजानो
दुद्रुवुर्भीताबलेनपरिघार्दिताः ३८ निहतेरुक्मिणिश्यालेनाब्रवीत्साध्वसाधु
वा रुक्मिणीबलयोराजन्स्नेहभंगभयाद्धरिः ३९ श्रीगोपालकृष्णायनमः

३४ ३५ न्रमणसंसदिमंगलसभायां ३६ ३७ ३८ - ३९ श्रीकृष्णपरमात्मने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्यंयानवोटया सिद्धाअखिलाअर्थाअभ्युदयशत्रुवधाद्योयेषांते ४० इतिद्रामे
कायांएकषष्टितमोध्यायः॥६१॥ द्वियुकषष्टितमेप्रोक्तमनिरुद्धस्यरोधनं कन्यया

ततोनिरुद्धंसहसूर्यंयावरंरथंसमारोप्ययुयुःकुशस्थलीं रामाद्योभोजकद्वाद्द
शार्हाःसिद्धाखिलार्थामधुसूदनाश्रयाः ४० इतिश्री भागवतेमाहापुरापेद
रामस्कंधेः रुक्षविवाहे रुक्मिवधोनामेकषष्टितमोध्यायः॥६१॥ राजोवाच बाण
स्यतनयामूषामुपयेमेयद्वत्तमः तत्रयुद्धमभूद्धोरंहरिशंकरयोर्महत् एतत्सर्वं
महायोगीन्समाख्यातुंत्वमर्हसि १ रममाणस्यबाणेनबहुबाहुना १ अनि
रुद्धोद्वहेन्यास्मिनबाणयादवसंयुगे श्रीकृष्णः श्रीहरंजित्वाबाणबाहुनथाछिनत्
श्रीकृष्णपरमात्मने २१ नमः श्रीरामचंद्रायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ग॰
२१

२ ३ पुराधिपं पुरपालकं ४ ५ कामान्पूरयतीति कामपूरः स चासावमरांघ्रिपः

शुक उवाच बाणः पुत्रशतज्ज्येष्ठो बलेरासीन्महात्मनः येन वामनरूपाहरये दायि
मेदिनी १ तस्यौरसः सुतो बाणः शिवभक्तिरतः सदा मान्यो वदान्यो धीमांश्च
सत्यसंधो दृढव्रतः २ शोणिताख्ये पुरे रम्ये स राज्यमकरोत्पुरा तस्य शंभोः प्र
सादेन किंकरा इव ते ऽमराः सहस्रबाहुर्वाद्येन तांडवे तोषयन्मृडं ३ भगवान्स
र्वभूतेशः शरण्यो भक्तवत्सलः वरेण छंदयामास स तं वव्रे पुराधिपं ४ स एकदा
ह गिरिशं पार्श्वस्थं वीर्यदुर्मदः किरीटेनार्कवर्णेन संस्पृशंस्तत्पदांबुजं ५ नम
स्ये त्वां महादेव लोकानां गुरुमीश्वर पुंसामपूर्णकामानां कामपूरामरांघ्रिपं ६

कल्पतरुः तं त्वां ६

राम
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेआयनिघ्नैर्भैरितैर्दोर्भिरद्रींश्चूर्णयनअंत्रियांअमछं ८१ स्ववीर्यस्यक्षेशा

॥ दोःसहस्रंत्वयादत्तंपरंभारायमेभवत् त्रिलोक्यांप्रतियोद्धारंनलेभेत्वदृतेस
मं ७ कंडूत्यानिभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहं अन्वियांचूर्णयन्नद्रीन्भीतास्ते आद्य
किरीटजुष्टेनसांजलिरचीविशदासनेस्वे १४

नानिगुणरूपवयांसिसुवेषोलं
कारश्चयस्यतेनदासीसहस्त्रेणयुतयागृहीण्यासह १३ श्रियःरुक्मिण्याःपर्यं
कतः अवीविशत् उपवेशयामास १४

राम
१३४

अविघ्नतअविघ्नः दधारेत्यर्थः विघ्नदितिशात्रंतंवा तदाचसंप[illegible]भाष्यवप्राहे
त्युत्तरेणान्वयः कथंभूतः यस्यचरणशौचंगंगाअशेषतीर्थंसः अतएवजगद्गुरु

तस्यावनिज्यचरणौतदपःस्वमूर्ध्नाविघ्नज्जगद्गुरुनरोपिसतांपतिर्हि ब्रह्मण्य
देवइतियद्गुणनामयुक्तंतस्यैवयच्चरणशौचमशेषतीर्थं १५ संपूज्यदेवऋषिव
र्यमृषिःपुराणोनारायणोनरसखोविधिनादितेन वाण्याभिभाष्यमितयामृ
तमिष्टमातंप्राहप्रभोभगवतेकरवामहेकिम् १६

नरोपिसतांधर्मप्रवृत्तांपाति
त्वादेवमकरोदित्यर्थःसतांपतित्वेहेतुः ब्रह्मण्यदेवइति
यद्गुणकृतंनामतस्यैवयतोयुक्तंसमंजसंअतस्तद्धर्मप्रवर्त्तनायैवमाचरणमित्यर्थः
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ रू
१२

अभिभाष्य दिष्ट्यात्वदागमनमित्यादिप्रियमुक्त्वा १६ भगवतास्वस्यार्हणमनर्हणंमन्य
मानस्तत्संभावयन्नाह नैवेति सर्वमित्रत्वादेव महर्हणंनतुममगौरवात् तर्हिकथंकंसा

नारद उवाच नैवाद्भुतंत्वयिविभोखिललोकनाथेमैत्रीजनेषुसकलेषुदमः
खलानां निःश्रेयसायहिजगत्स्थितिरक्षणाभ्यांस्वैरावतारउरुगायविदा
मस्सुष्ठु १७

द्विषमैत्रीतत्राह खलानांदमस्त्वन्नैवाद्भुतमितिकुतः जगतःस्थितिर्धा
रणंरक्षणंपालनंताभ्यांसहतस्यनिःश्रेयसायतवायंस्वेछावतारइतिसुष्ठुसम्यक्
विद्मः अतःखलदमःसाधुसन्माननंयुक्तमितिभावः १७ श्रीकृ[illegible]गात्मनेनमः

राम
१२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदुक्तं प्रभो किंकरवामेति तत्राह दृष्टमिति भक्तजनतायाः अपवर्गरूपं किंच अति
दुर्लभतया ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिंत्यं किंच संसारकूपे पतितानां उत्त

दृष्टं तवांघ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाधबो
धैः संसारकूपपतितोत्तरणावलंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृ
तिः स्यात् १८ ततोऽन्यदा विशद्गेहं कृष्णपत्न्याः स नारदः योगेश्वरेश्वरस्यां
गयोगमायाविवित्सया १९

रणाय अवलंबं आश्रयं एवंभूतं तव अंघ्रियुगलं मया दृष्टं अतः कृतकृत्योस्मि तथापि
त्वत्स्मृतिर्यथा स्यात्तथानुगृहाण ततस्त्वद्ध्यायन्नेव निसंचरामीति १८ १९ श्रीकृष्ण

॥ शुक उवाच ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
१३६

अक्षैर्दीव्यंतमित्यादौ ददर्शेति ज्ञातव्यं २० २१ २२ २३ वितानाग्निनाहवनीयादीन् अ

दीव्यंतमक्षैस्तत्रापि प्रियया चोद्धवेन च पूजितः परया भक्त्या प्रत्युत्थानासनादि
भिः २० पृष्टश्चाविदुषेवासौ कदायातो भवानिति क्रियते किंनु पूर्णानामपूर्णै
रस्मदादिभिः २१ अथापि ब्रूहि नो ब्रह्मन् जन्मैतच्छोभनं कुरु स तु विस्मित उ
त्थाय तूर्णमन्यदगाद्गृहं २२ तत्राप्यचष्ट गोविंदं लालयंतं सुतान् शिशून् त
तोन्यस्मिन् गृहे पश्यन् मज्जनाय कृतोद्यमं २३ जुह्वंतं च वितानाग्नीन् यजंतं पं
चभिर्मखैः भोजयंतं द्विजान् क्वापि भुंजानमवशेषितं २४ श्रीकृष्णपरमात्मने

ग्निहोत्रेण पंचभिर्महायज्ञैर्यजंतं २४ ७ श्रीसीताकांताय नमः ॥७॥

राम॰
१३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृ

क्वापिसंध्यामुपासीनंजपंतंब्रह्मवाग्यतं एकत्रवासिचर्मभ्याचरंतमासिवत्म
सु २५ अश्वैर्गजैरथैः क्वापिविचरंतंगदाग्रजं क्वचिछयानंपर्यंकेस्तूयमानंच
बंदिभिः २६ मंत्रयंतंचकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः जलक्रीडारतंक्वापि
वारमुख्याबलावृतं २७ कुत्रचिद्द्विजमुख्येभ्योददतंगाःस्वलंकृताः इतिहास
पुराणानिशृण्वंतंमंगलानिच २८ हसंतंहास्यकथयाकदाचित्प्रिययागृ
हे क्वापिधर्मंसेवमानमर्थकामौचकुत्रचित् २९ ध्यायंतमेकमात्मानंपुरु
षंप्रकृतेःपरं शुश्रूषंतंगुरून्क्वापिकामैर्भोगैःसपर्यया ३० कुर्वंतंविग्रहंकै
श्चित्संधिंचान्यत्रकेशवं॥ कुत्रापिसहरामेणचिंतयंतंसतांशिवं ३१ श्रीरामज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा

कालेतत्तत्समयेतत्तत्तनमसमयेविधिनोप यापनंप्रापणंविवाहमित्यर्थः कल्पयंतंघ
टयंतंविभूतिभिः विभवैः ३२ प्रस्थापनंदुहितॄजांत्रादीनांस्वगृहात्तद्गृहंप्रतिनयनं

पुत्राणांदुहितॄणांचकालेविध्युपयापनं द्वारैवरैस्तत्तत्स्पृहैः कल्प
यंतंविभूतिभिः ३२ प्रस्थापनोपानयनैरपत्यानांमहोत्सवान्
वीक्ष्ययोगेश्वरेशस्ययेषांलोकाविसिस्मिरे ३३ श्रीरुक्मिणीकां

तायनमः

तद्गृहात्पुनरा यनंतैर्महोत्सवान्कल्पयंतंयोगेश्वरेशस्य येषामपत्यानांमहोत्सवा
न्वीक्ष्यलोकाः सर्वेविसिस्मिरेस्मयंचक्रुः तथाभूतानकल्पयंतं ३३ रामरामसीता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४ ३५ अव्यक्तलिंगंवेषांतरेणछन्नं ३६ ३७ हेयोगेश्वरआत्मन [illegible] निमनसित

यजंतंसकलान्देवान् क्वचित्क्रतुभिरूर्ज्जितैः पूर्त्तयंतंक्वचिद्धर्मंकूपारा
मालयादिभिः ३४ चरंतंमृगयांक्वापिहयमारुह्यसैंधवं घ्नंतंततःपशून्
मेध्यान्परीतंयदुपुंगवैः ३५ अव्यक्तलिंगंप्रकृतिष्वंतःपुरगृहादिषु क्वचि
च्चरंतंयोगेशंतत्तद्भावबुभुत्सया ३६ अथोवाचहृषीकेशंनारदःप्रहसन्नि
व योगमायोदयंवीक्ष्यमानुषामीयुषोरतिं ३७ विदामयोगमायास्तेदुर्द
शाअपिमायिनां योगेश्वरात्मन्निर्भाताभवत्पादनिषेवया ३८ श्रीरामकृष्ण

वस्वरूपेवानिर्भाताःप्रतीतास्तवयोगमायाःकेवलंविदामविप्रःननुतत्परमार्थमि
तिभावः ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
१२९

त्वन्मानुषनाट्येनमुह्यामिअतोमांप्रस्थापयेत्याह अनुजानीहीति तत्तस्माल्लोकं
शिक्षयन्निमंधर्ममास्थितः ननुतत्त्वतः हेपुत्रमाखिदमोहंमायाप्रभुरीति ४० इति

अनुजानीहिमांदेवलोकांस्तेयशसापुनान् पर्यटामितवोद्गायन्लीलाभुवनपाव
नीः ४१ ॥भगवानुवाच॥ ब्रह्मन्धर्मस्यवक्ताहंकर्त्तातदनुमोदिता तच्छिक्षयल्लो
कमिममास्थितःपुत्रमाखिद ४० ॥शुकउवाच॥ इत्याचरंतंसद्धर्मान्पावनान्गृह
मेधिनां तमेवसर्वगेहेषुसंतमेकंददर्शह ४१ कृष्णस्यानंतवीर्यस्ययोगमाया
महोदयं मुहुर्दृष्ट्वाऋषिरभूद्विस्मितोजातकौतुकः ४२ श्रीसीतारामचंद्रायनमः

एवमनुगृहीतस्तमेकमेवसंतंददर्शेति ४१ मुहुर्मुहुर्दृष्ट्वाजातकौतुकोमुनिर्विस्मितोभू
दिति ४२

दशम
१२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अद्धितः श्रद्धायुक्तः आत्मा यस्य तेन ४३ नारदहृष्टां श्रीकृष्ण[illegible]गमयति ए
वमिति अखिलस्य भवाय उद्भवाय गृहीताः शक्तयो नाना मूर्त्तयो येन सः सक्रीडंच तसौ

इत्यर्थकामधर्मेषु कृष्णेन श्रधितात्मना सम्यक्सभाजितः प्रीतस्तमेवानुस्मरन्ययौ
४३ एवं मनुष्यपदवीमनुवर्त्तमानो नारायणोखिलभवाय गृहीतशक्तिः रेमेंगषो
डशसहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः ४४ यानीह विश्वविल
योद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार यस्त्वंगगायति शृणोत्यनुमो
दते वा भक्तिर्भवेद्भगवती ह्यपवर्गमार्गे ४५ इति श्री भा० द० एकोनसप्ततितमोध्यायः

हृदंच तेन निरीक्षणं हासश्च ताभ्यां जुष्टः ४४ अनन्यविषयाणि असाधारणानि अ
पवर्गमार्गे मोक्षप्रदे ४५ ॥ अध्यायः ॥ ६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननस्तुसप्ततितमेकृष्णस्याह्निककर्म्मणि दूतनारदयोः कार्येकार्यमंत्रविचारणं १ जग
न्मंगलचारित्रमाह्निकंजगदीशितुः नारदेनचकिंकिंचिदृष्टमाहयथाक्रमं २ इत्यर्थ
धर्मकामेषुकृष्णेनश्रद्धितात्मनेतिप्रस्तुतस्यश्रीकृष्णाह्निकस्याधिकारोऽथशब्दः उपव

श्रीशुकउवाच अथोषस्युपवृत्तायांकुक्कुटानकूजतोशपन् गृहीतकं
ठ्यःपतिभिर्माधव्योविरहातुराः १ वयांस्यरोरुवन्कृष्णंबोधयंतीवबं
दिनः गायत्स्वलिष्वनिद्राणिमंदारवनवायुभिः २ श्रीरामकृष्णपरमात्म

त्तायामासन्नायांपतिभिः श्रीकृष्णैःमाधव्योमाधवस्यभार्याः १ बंदिजनइवश्रीकृष्णंबो
धयंतिवयांसिपक्षिणोरोरुवन् अतिशयेनाकूजन्मंदारवनवायुभिर्गायत्स्वलिष्वनिद्राणि
वयांसि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैदर्भीं तु पलक्षणं परिरंभणविश्लेषात् तं पर्यालोच्य २४ एकमखंडं अत्र हेतुः अ
नन्यं निरुपाधिं अत एवाव्ययं नित्यं स्वयंज्योतिः द्वे हेतुः नित्यनिवृत्तं कल्मषमविद्या
यस्मात्तं उपलक्षणमाह अस्येति विश्वस्य लक्षितो भावश्वासो निवृत्तिश्व भावः स

मुहूर्त्तं तं तु वैदर्भीं नामृष्यदपि शोभनं परिरंभणविश्लेषात् प्रियबाहंतरंगता ३
ब्राह्मे मुहूर्त्ते उत्थाय वार्युपस्पृश्य माधवः दध्यौ प्रसन्नकरण आत्मानं तमसः परं
४ एकं स्वयंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषं ब्रह्माख्यमस्योद्भ
वनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृत्तिं ५ भावनिर्वृत्तिरानंदः तथा हि गुण
क्षोभात् पूर्वं सत्तामात्रं यः सदेव सौम्येदमग्र आसीदित्यादिश्रुतेः स एव आनंदश्च विज्ञान
मानंद मित्यादिश्रुतेः तं सदानंदमित्यर्थः ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आप्लुतः स्नातः संध्यायाउपगमउपासनं आदिर्यथा भवति तथा क्रियाकलापं चकार

अथाप्लुतोंभस्यमले यथाविधि क्रियाकलापं परिधाय वाससी चका
र संध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ६ उपस्थाया
र्कमुद्यंतं तर्पयित्वात्मनः कलाः देवान्रषीन्पितॄन्वृद्धान् विप्रानभ्यर्च्य
चात्मवान् ७ धेनूनां रुक्मशृंगीणां साध्वीनां मौक्तिकस्त्रजां पय
स्विनीनां गृष्टीनां सवत्सानां सुवाससां ८ श्रीरुक्मीणीकांताय नमः

उदयात्पूर्वमेव हुतानलः ब्रह्म गायत्रीं जजाप ६ कलाः अंशान् देवान्रषीन्पितॄं
श्च तर्पयित्वा ७ गृष्टीनां प्रथमप्रसूतानां ८ श्रीरामजयराम जयजयराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बद्वमिति हिरण्येनपरिरक्तान् कृष्णान् शुक्लदतो मृगान् मष्णारे भरतो ददाछतंव
द्वानिसप्तचेति श्चुसुक्तानिसप्तोत्तरशतंबद्वान्येकीकृत्यपुराणेचतुर्दशलक्षत्वे
नगणितानि यथोक्तं भरतमेवाधिकृत्यनवमस्कंधेमृगानशुक्लदत्तः कृष्णान्सु

ददौरूप्यखुराग्राणांक्षौमाजिनतिलैःसह अलंकृतेभ्योविप्रेभ्योबद्वंबद्वंदिने
दिने १ गोविप्रदेवतावृद्धगुरून्भूतानिसर्वशः नमस्कृत्वात्मसंभूतिर्मंगला
निसमस्पृशत् १०
वर्णेनपरिछन्नान् आरात्कर्माणिमष्णारेनियुतानिचतुर्दशेति
ततश्चैवंबहुसंख्याश्लोकेनसंगृह्यते चतुर्दशानांलक्षाणांससाधिकशतांशाकः ब
द्वंचतुरशीत्ययसहस्राणित्रयोदशेति दिनेदिनेप्रतिग्रहंचेति १ आत्मसंभूतीःस्ववि
भूतीःमंगलानिकपिलादीनि १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरलोकस्यविभूषणरूपमात्मानं स्वीयैः पीतांबरकौस्तुभादिभिः ११ कामानभि

आत्मानंभूषयामासनरलोकविभूषणं वासोभिर्भूषणैःस्वीयैर्दिव्यैस्त्रगनुलेपनैः
११ अवेक्ष्याज्यंतथादर्शंगोवृषद्विजदेवताः कामांश्चसर्ववर्णानांपौरांतःपुरचारिणां
१२ प्रदाप्यप्रकृतीःकामैःप्रतोष्यप्रत्यनंदत १२ संविभज्याग्रतोविप्रान्स्रक्तांबूला
नुलेपनैः सुहृदःप्रकृतीर्दारानुपायुंक्ततःस्वयं १३ तावत्सुतउपानीयस्यंदनंप
रमाद्भुतं सुग्रीवाद्यैर्हयैर्युक्तंप्रणम्यावास्थितोग्रतः १४ श्रीरामचंद्रायनमःनमो १५

लषितार्थान् १२ विप्रादीन्स्रगादिभिःसंविभज्यतेभ्यःतानिदत्वेस्यर्थःउपायुंक्तसो
ग्रार्थमग्रहीत् १३ १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाणीह्लुतेंजलौग्रहीत्वा १५ सव्रीडप्रेमवीक्षितैरीक्षितः क्षणंस्थितस्ताभिरेव

ग्रहीत्वापाणिनापाणीसारथेस्तमथारुहत् सात्यक्युद्धवसंयुक्तःपूर्वाद्रिमिवभा
स्करः १५ ईक्षितोंतःपुरस्त्रीणांसव्रीडप्रेमवीक्षितैः कृछ्राद्विसृष्टोनिरगाज्जात
हासोहरन्मनः १६ सुधर्माख्यांसभांसर्वैर्वृष्णिभिःपरिवारितः प्राविशद्यन्निवि
ष्टानांनसंत्यंगषडूर्मयः १७ तत्रोपविष्टःपरमासनेविभुर्बभौस्वभासाककुभो
वभासयन् वृतोनृसिंहैर्यदुभिर्यदूत्तमोयथोडुराजोदिवितारकागणैः १८ ७

वीक्षितैः कृछ्राद्विसृष्टोनिरगादिति १६ एवंसर्वगृहेभ्यःपृथक्पृथक्निर्गत्यानंत
रंएकएवसन्सुधर्मांप्राविशत् यन्निविष्टानांयत्रप्रविष्टानां १७ नृसिंहैः नृषुश्रेष्ठैः
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपमंत्रिणः परिहासकाः पृथक्पृथक्स्वसमुदायैः १८ मृदंगादयः प्रसिद्धाः दरः शं

तत्रोपमंत्रिणो राजन्नानाहास्यरसैर्विभुं उपतस्थुर्नटाचार्या नर्त्तक्यस्तांडवैः पृथक्
१९ मृदंगवीणामुरजवेणुतालदरस्वनैः ननृतुर्जगुस्तुष्टुवुश्च सूतमागधवंदिनः
तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः पूर्वेषां पुण्ययशसां राज्ञां चाकथय
न्कथाः २१ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः विज्ञापितो भगवते प्रतीहारैः
प्रवेशितः २२ स नमस्कृत्य कृष्णाय परेशाय कृतांजलिः राज्ञामावेदयद्दुःखं जरासं
धनिरोधजं २३

खः सूतादयस्तुष्टुवुः २० ब्राह्मणाः ब्रह्मवेदमाहुः मंत्रान्व्याचक्षते इत्यर्थः वादिनः वाद
नचतुराः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिरिव्रजेतत्संज्ञकेदुर्गेनिरुद्धाआसन्तेषांचदुःखमावेदयतीत्यन्वयः २४ श्रीकृष्ण

येचदिग्विजयेतस्यसन्नतिंनययुर्नृपाः प्रसह्यरुद्धा
स्तेनासन्नयुतेद्वेगिरिव्रजे २४ कृष्णकृष्णाप्रमेयात्म
न्प्रपन्नभयभंजन वयंत्वांशरणंयामोभवभीताःपृ
थग्धियः २५

कृष्णेतिराज्ञांषट्श्लोकीविज्ञप्तिः तत्रप्रथमेनशरणाश्रयणंत्रिभिर्भयानुवादः द्वा
भ्यांप्रार्थनमिति २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृग्दर्शिनो लोकस्य भवभयं विरण्वं नोनमंते लोकइति विकर्मी[illegible]षिधंकाम्यंत
स्मिन्नितरां वृक्षस्वेकुशले धर्मे भवतोर्चने त्वयोदितेउक्तेपंचरात्रेसामान्यतस्व

लोकोविकर्मनिरतः कुशले प्रमत्तः कर्मण्ययंत्वदुदितेभवदर्चनेस्वे
यस्तावदस्यबलवानिहजीविताशांसद्यश्छिनत्यनिमिषायनमोस्तु
तस्मै २६

गीतासु यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंते
यतत्कुरुष्वमदर्पणमिति प्रमत्तोऽनवहितोयावदयंलोकस्तावदेवास्ययःसद्योजीविता
शांछिन्नत्तितस्मैतुभ्यंअनिमिषायकालात्मनेनमइति २६ श्रीकृष्णपरमात्मने

१४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्येयंलोकस्यगतिः वयंतुत्वद्भक्ताः अतोस्माकंकुत एवदुःखमापन्नमिपयाश्चर्येणा
हुःलोकइतिभोईशजगतः इनईश्वरः त्वपिसद्रक्षणार्थमवतीर्णोपिचेदस्माकंदुः

लोकेभवान्जगदिनःकलयावतीर्णःसद्रक्षणायखलनिग्रहणायचा
न्यः कश्चित्त्वदीयमतियातिनिदेशमीशकिंवाजनःस्वकृतमिछति
तन्नविघ्नः २७

खंस्यात्तर्हिकिमन्य [illegible] कश्चिज्जरासंधादिस्त्वदाज्ञामपिलंघयतिकिंवात्वयारक्ष
माणोपिजनःस्वकर्मजंदुःखंप्राप्नोत्येवेतिनविघ्नः नचैतदुभयमपियुक्तमितिभावः
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंडुःखंतदाहुः स्वमायिनमितिस्वमवज्ञातंन्टपसुखंनपोषितंसुखंयतः परतंत्रंवि
षयसाध्यंकिंचसंप्रतिशम्बङ्कयंयास्मिन्तेनमृततुल्येनशरीरेणधुरंपुत्रदारादिचिं

स्वमायितंन्टपसुखंपरतंत्रमीशशम्बङ्कयेनमृतकेनधुरंवहामः हित्वा
नदात्मनिसुखंत्वदनीहलभ्यंक्लिश्यामहेतिह्लपणास्तवमाययेह २८

तांकेवलंवहामः अहोकष्टंनःयेवयमितःपूर्वमेवानैःकामाःसंतः त्वांनाश्रिताइत्याहुः
हित्वेतित्वत्त्वतःयत् अनीहैः निष्कामैःलभ्यंआत्मनिस्वतःसिद्धंसुखंतद्धित्वाक्लि
श्यामः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वन्मा पाहृतं कर्मबंधं त्वमेव निवारयेति प्रार्थ्यंते तेन त्वं इति वियुंक्ष्व विमोचय मगधो
जरासंधः तत्संज्ञकात् कर्मपाशात् भवद्भिरेव विक्रम्यत ततो निर्गम्यनामिति निवेदत आ

तन्नो भवान् प्रणतशोकहरांघ्रियुग्मो बद्धान्वियुंक्ष्व मगधाह्वयकर्म
पाशात् यो भूभुजो युतमतंगजवीर्यमेको बिभ्रद्रुरोध भवने मृगरा
ड्विवावीः २९

हुः य इति य एक एवायुतमत्तंगजानां वीर्यं बिभ्रत् सन् स्वभवने भूभुजो ऽस्मान् रु
रोध सिंहो मेषीरिव २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰रु॰
१५५

किंचयुष्मदीयावयमिस्यस्मानधिकंबाधनइत्याहुर्योबाहितिहेतुदात्तचक्रउयतसुदर्श
न योवैद्विनवक्लत्वः अष्टादशवारान्त्वयासहमृधेवर्त्तमानेनत्र संमदर्शहत्वःत्व

योवैत्वयाद्विनवक्लत्वउदात्तचक्रभग्नोमृधेखलुभवंतमनंतवीर्यं जित्वा
न्लोकनिरतंसक्लत्हृदर्पोयुष्मत्यजारुजानिनोजिततनद्विधेहि ३०

याखलुभग्नः पराजितःपश्चादनंतवीर्यमपिनलोंकेनिरतंरशरीरविनोदंभगवंतं
सक्लाञ्जित्वाद्गुदःदर्प्पःप्राप्तगर्वोयुष्मत्प्रजानःरुजतिपीडयतितत्रययुक्तंतद्विधेही
त्यर्थः ३०

राम
१५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूतआहइतीति ३१ ३२ ३३ ३४ भूयान्महान्गुणोलाभोयंअस्माकंयत्सर्वलोकव

इतिमागधसंरुद्धाभवद्दर्शनकांक्षिणः प्रपन्नाःपादमूलंतेदीनानांशंविधीयतां ३१
राजदूतेब्रुवत्येवंदेवर्षिःपरमद्युतिः बिभ्रत्पिंगजटाभारंप्रादुरासीद्यथारविः ३२
तंदृष्ट्वाभगवान्कृष्णःसर्वलोकेश्वरेश्वरः ववंदउत्थितःशीर्ष्णाससभ्यःसानुगो
मुदा सभाजयित्वाविधिवत्कृतासनपरिग्रहं बभाषेसूनृतैर्वाक्यैःश्रद्धयातर्प्प
यन्मुनिं ३४ अपिस्विदद्यलोकानांत्रयाणामकुतोभयं ननुभूयान्भगवतोलोका
न्पर्यटतोगुणः ३५ नहितेविदितंकिंचिल्लोकेष्वीश्वरकर्त्तृषु अथपृच्छामहेयुष्मान्पां
डवानांचिकीर्षितं ३६

तांनज्ञानमिति ३५ ईश्वरःकर्त्तायेषांतेषु ३६ श्रीकृष्णपरमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमविदुषेवसर्वज्ञेनजरासंधवधार्थमेवपांडवचिकीर्षितंपृष्टो॰ ॰रदोमाययेयामि
तिज्ञात्वाहहृष्टाइतित्रिभिः विश्वसृजश्चब्रह्मणोपिमायिनोमोहकस्यतेस्वशक्ति
भिर्विद्यादिभिर्भूतेषुंतर्यामितयाचरतोवर्त्तमानस्य यद्यहंभूतेषुवर्त्तेतर्हिभू

नारदउवाच दृष्टामयातेबहुशोदुरत्ययामायाविभोर्विश्वसृजश्चमा
यिनः भूतेषुभूमंश्चरतः स्वशक्तिभिर्वन्हेरिवछन्नरुचोनमेद्भुतं ३७

तानिमांकिंनपश्यंतितत्राहवन्हेरिवछन्नरुचइतिस्वशक्तिभिरेवछन्नारुकूप्रकाशो
यस्यतस्य अतस्तवेदंप्रश्नादिनमेद्भुतं ३७ श्रीरामकृष्णपरमात्मनेनमः नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदंजगत्कथंभूतंअसदेवयत्तवमाययाविद्यमानात्मतयावभासतेतज्जगत्स्रजतःकिं
तुकेवलंतेतुभ्यंनमनमेवशक्यमित्याहतस्मैनमइतिकुतःस्वेनस्वरूपेणसर्वतोवि
लक्षणात्मनेअचिंसायेत्यर्थः ३८ नन्वेवंभूतस्यकिंमायाचेष्टितैरित्यतआह जी

तवेहितंकोर्हतिसाधुवेदितुंस्वमाययेदंसृजतोनियच्छतः यद्विद्यमानात्मतयाव
सीयतेतस्मैनमस्तेस्वविलक्षणात्मने ३८ जीवस्ययःसंसरतोविमोक्षणंनजा
नतोनर्थवहाच्छरीरतः लीलावतारैःस्वयशःप्रदीपकंप्राज्वालयत्त्वातमहंप्रप
द्ये ३९

वस्येतिअविद्यातमसावृतत्वेनअनर्थप्रापकाच्छारीरात्संसरतस्तेनैवतम
सातस्माच्छरीराद्विमोक्षोपायमजानतःप्राज्वालयत्प्रदीपितवा[illegible]त्तावांयशःश्र
वणादिभिर्जीवस्यमोक्षार्थमित्यर्थः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आश्रावये श्रावयिष्यामि नरलोकविडंबनं ब्रह्मन्निति पाठेपि हे ब्रह्मन् परमात्मन् नरलो
कानुकारिणं त्वां श्रावयिष्यामिति ४० ४१ नचात्रैवानुमोदनं कार्यं किं तु तत्रागंतव्य

अथाप्याश्रावये ब्रह्मन् नरलोकविडंबनं राज्ञः पैतृष्वस्रेयस्य भक्तस्य च चिकीर्षि
तं ४० यक्ष्यति त्वाम खेंद्रेण राजसूयेन पांडवः पारमेष्ठ्यकामो नृपतिस्तद्भवा
ननुमोदतां ४१ तस्मिन् देवक्रतुवरे भवंतं वै सुरादयः दिदृक्षवः समेष्यंति राजा
नश्च यशस्विनः ४२ श्रवणात्कीर्तनाद्ध्यानात्पूयंतेंतेवसायिनः तव ब्रह्ममय
स्येश किमुतेक्षाभिमार्शिनः ४३ मित्याशयेनाह तस्मिन्निति ४२ तत्रागतानां श्वस
चैत्वद्दर्शनादिना पूता भविष्यंतीत्याह श्रवणादिति अंतेवसायिनः श्वपचा अपि
ब्रह्ममयस्य ब्रह्मघनमूर्त्तेः ईक्षा च अभिमर्शनं स्पर्शनं च ते विद्यते येषां ते ॥ ४३॥ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कैमुत्यमतिशयेनाह्यस्येतिहेभुवनानांमंगलरूपदिविपाताले भूमौच प्रथितंयस्य
यशोविश्वंपुनाति कथंप्रथितंदिग्वितानंदिग्भवनानांवितानवदलंकरणंतथाच
रणांबुचप्रथितंदिविमंदाकिनीति अधश्चभोगवतीतिइहभूमौगंगेति तस्यतवा

यस्यामलंदिवियशः प्रथितंरसायांभूमौचतेभुवनमंगलदिग्वितानं मंदाकिनी
तिदिविभोगवतीतिचाधोगंगेतिचेहहरणांबुपुनातिविश्वं ॥ शुकउवाच ॥ तत्र
तेष्वात्मपक्षेष्वगृण्हत्सुविजिगीषया वाचः पेशैः स्मयन्भृत्यमुद्धवंप्राह केशवः

॥

गमनात्सर्वंमंगलंपवित्रंभविष्यतीतिभावः ॥ तत्रैवंनारदेनोक्तेतेषुतत्रवर्तमाने
षुआत्मीयपक्षेषुयादवेषुजरासंधस्यजिगीषयाअगृण्हत्सुभ्रमन्यमानेषुवाचःपेशैः
पेशलवाग्भिरित्यर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
१४८

चक्षुस्त्वेहेतुः मंत्रार्थानांमंत्रसाध्यानांअर्थानांतत्त्वबित्परिपाकवेदिता ४६.४७ इति
श्रीभागवतेमाहापुराणेदशमस्कंधेटीकायांसप्ततितमोध्यायः॥७०॥अथैकसप्तति

त्वंहिनः परमंचक्षुः सुहृन्मंत्रार्थतत्त्ववित् तथात्रब्रूह्यनुष्ठेयंश्रद्दध्मःकरवामतत्
४६ इत्युपामंत्रितोभर्त्रासर्वज्ञेनापिमुग्धवत् निदेशंशिरसाधायउद्धवःप्रत्य
भाषत ४७ इतिश्रीभागवतेमाहापुराणेदशमस्कंधेभाग घा सप्ततितमोः ध्यायः ७०
शुकउवाच॥ इत्युदीरितमाकर्ण्यदेवर्षेरुद्धवोब्रवीत् सभ्यानांमतमाज्ञायकृष्ण
स्यचमहामतिः १
तमेउद्धवस्यतुमंत्रतः इंद्रप्रस्थंगतेकृष्णेपार्थानापरमोत्स
वः १ राजसूयमिषंकृत्वाभीमदुर्योधनादिषुकलिमुत्पाद्यतद्वाराभूभारमहरत्प्रभुः
२ देवर्षेर्मतंराजसूयगमनंसभ्यानांमतंराजरक्षाकृष्णस्यतूभयं १ श्रीकृष्ण॥१॥

रामः
१४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यक्ष्यतःयागंकरिष्यतः पैतृष्वस्रेयस्यपितृष्वसुः पुत्रस्यसात्विय्यंसाहाय्यंतत्त्वका
र्यंतथाशरणार्थिनांराज्ञांरक्षाचकार्या २ तत्रप्रथमंराजसूयार्थंगंतव्यं ततोराज

उद्धवउवाच यदुक्तम्रषिणादेवसाविय्यंयक्ष्यतस्त्वया कार्यंपैतृष्वस्त्रेयस्यरक्षा
चशरणैषिणां २ यष्टव्यंराजसूयेनदिक्चक्रजयिनाविभो अतोजरासुतजय
उभयार्थोमत्तोमम ३ अस्माकंचमहानर्थोह्येतेनैवभविष्यति यशश्चतवगो
विंदराज्ञोबंधान्विमुंचतः ४ श्रीरामकृष्णपरमात्मनेपरमात्मनेनमःनमो ५

रक्षाकर्त्तव्येत्साहयष्टव्यामित्यष्टभिः अतःदिग्विजयहेतोःउभयार्थः शरणागतरक्ष
णार्थश्च ३ ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.द.त.
१४

असुत्सुकतयास्य एव जरासंधं हंतुमिच्छतो यादवानालक्ष्यार्ह एवाइति अन्येषां
ततो बलिनामपि यद्यपि स बल एव भीमस्तथापि तं विना भीमादेव तस्य मृत्युर्विहि
तइति भावः ५ ननु स्वबलसाम्येपि सेनाबलं तस्याधिकमिति चेदत आह द्वैरथइति

सर्वेदुर्विषहो राजा नागायुतसमो बली॥ बलिनामपि चान्येषां भीमं समब
लं विना ५ द्वैरथे स तु जेतव्यो मा शताक्षौहिणीयुतः ब्रह्मण्योऽभ्यर्थितो वि
प्रैर्न प्रत्याख्याति कर्हिचित् ६

द्वंद्वयुद्धे शतेनाक्षौहिणीभिर्युतो मा न जेतव्य इ
त्यर्थः नन्वसौ स्वसैन्यमेव युद्धाय नियुंजीत कुतस्तेन द्वैरथमिति तत्राह ब्रह्मण्य इति न
प्रत्याख्याति न निराकरोति ६ ७

राम
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिक्षेन द्वंद्वयुद्धं याचतां तथापि समबलत्वात्साम्यमेव स्यादत आह तवसंनिधावि
अ ति ७ ननु किंचित्कुर्वतो मम संनिधानात्किं स्यादत आह निमित्तमिति अयमर्थः

ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः हनिष्यति न संदेहो द्वैरथेन वसान्निधौ ७
निमित्तं परमीशस्य विश्वसर्गनिरोधयोः हिरण्यगर्भः शर्वश्च कालस्यारूपिण
स्तव ८ गायंति ते विशदकर्म्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च
गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं च ९ श्री

यथा तवारूपस्य कालात्मनो विश्वसर्गे निमित्तं केवलं हिरण्यगर्भस्तथा शर्वश्च तन्नि
रोधे तथात्र त्वमेव सन्निधिमात्रेण हंता भीमो निमित्तमात्रमिति ८ अतोनेनोपायेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
१५०

त्वयासशीघ्रंहंतव्यइत्याशयेनाहगायंतीतिजरासंधधृतानांराज्ञांदेव्यःपत्न्यः
तेविशदंकर्मस्वगृहेषुबालकदोलनेनगायंतिकिंतत्कर्मस्वशत्रोर्जरासंधस्यव
धंआत्मनांपतीनांविमोक्षणंचवत्समारोहीः श्रीकृष्णएवंकरिष्यतीतिअत्रदृष्टां
ताः गोप्यश्चेत्यादयः यथागोप्यः शंखचूडवधंस्वमोक्षणंचगायंतितेऽवतारांतरग
तंचकुंजरपतेर्नक्रान्नृजनकात्मजायाश्चरावणात्पित्रोश्चकंसगृहान्मोक्षंमुन
योपितेविशदकर्मगायंति शत्रुवधआत्मविमोक्षंशत्रोः क्रोधस्यवधंआत्मनांजी
वानांसंसाराद्विमोक्षणंच वयंतुसात्वताभक्तायस्यतवविशदचरित्रगानंकुर्मःय
त्श्रीकृष्णःस्मृतःकीर्तितएवसंसारसागराद्उत्तारयति अतएवंभूतानांतासांकृप
यात्वयात्वयातथैवकर्त्तव्यमितिभावः ९ श्रीगोपालकृष्णपरमात्मनेनमः ९

राम
१५०

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचजरासंधवधइति भूर्य्यर्थायेति ततःशिशुपालवधादयोऽपिसुखसाध्याभवि
ष्यंतीतिभावः एतच्चसर्वंभाविष्यस्येवेतिसंभावयन्नाहप्रायइतिपच्यतइतिपाकः
कर्म्मतस्यविपाकःफलंतेनराज्ञांपुण्यविपाकेनजरा संधादीनांपापविपाकेनपा

जरासंधवधःकृष्णभूर्य्यर्थायोपकल्पते प्रायुःपापविपाकेनत्वचाभिमतः
क्रतुः १० इत्युद्धववचोराजन्सर्वतोभद्रमच्युतं देवर्षिर्यदुवृद्धाश्चकृष्णाश्च
प्रत्यपूजयत् ११

फेनपाशांतरेजरासंधस्यपापविपाकेनेतितेनायंक्रतुस्तवाभिप्रेतःत
वगलेत्वयिसर्वंभविष्यतीत्यर्थः १० अच्युतंउपपत्त्याप्युक्तंयदुवदतइतिवदन्तनिरूद्ध
इयस्तथानपूजयन्नितिसूचितं ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुज्ञाप्यानुज्ञांप्रार्थ्य गुरून्वसुदेवादीन् १२ अवरोधान्दारान्निर्गमय्य प्रयाणंका
रयित्वा १२ भटाः पदातयः सादिनः अश्वारोहाः रथादिनायकैः करालैर्यानीर्वयाआत्म

अथादिशत्प्रयाणाय भगवान्देवकीसुतः भृत्यान्दारुकजैत्रादीननुज्ञाप्य गु
रून्विभुः १२ निर्गमय्यावरोधान्स्वान्ससुतान्सपरिच्छदान् संकर्षणमनुज्ञाप्य य
दुराजंच शत्रुहन् १२ सूतोपनीतं स्वरथमारुह्य गरुडध्वजः १३ ततो रथद्विपभ
टसादिनायकैः करालया परिवृत आत्मसेनया मृदंगभेर्यानकशंखगोमुखैः
प्रघोषघोषककुभो निराक्रमत् १४

सेनया परिवृतो निराक्रमत् कुतः सकाशात्
मृदंगादिभिर्वाद्यैः प्रघोषेण घोषिता याः ककुभः १४ श्रीकृष्णजयकृष्णजयजयकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्त्वाजीति नरयानैः अश्वैः कांचनशिविकाभिश्चाच्युतं पतिमनुययुः सुव्रताः पतिव्रताः
वराण्यंबरादीनियासांताः १५ नरोष्ट्रादिभिर्यानैः अश्वतरीगर्दभ्यां अश्वाज्जाता अ
नः शकटं करेणुर्गजी परिजनयोषितो वारयोषित श्वकटकुट्यः उशीरादितृणनिर्मित

न्त्वाजिकांचनशिबिकाभिरच्युतं सहात्मजाः पतिमनुव्रतायुयुः वरांबराभरणवि
लेपन स्त्रजः सुसंस्कृतान्नाभिरासिचर्मपाणिभिः १५ नरोष्ट्रगोमहिषखराश्वतर्यनः
करेणुभिः परिजनवारयोषितः स्वलंकृताः कटकुटिकंबलांबराद्युपस्करायुयुरधि
ज्यसर्वतः १६

गृहाः कंबलांबरादयश्चोप स्काराः कुंभादिरूपायासांताः अधियु
ज्यबलीवर्द्दादिषुतानुपस्करान् ऊढं संनत्य १६ श्रीसांबसदाशिवा[illegible]नमोनमः १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रवैरंशुभिश्च तद्बलं दिवाव भौ कथंभूतं तुमुलरवं आकुलस्वनं क्षुभितैस्तिमिंगिलैः उ

बलं बृहद्ध्वजपटछत्रचामरैर्वराद्युधाभरणकिरीटवर्मभिः दिवांशुभिस्तुमुलरवं
बभौ रवेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः १७ अथोमुनिर्यदुपतिना सभाजितः
प्रणम्य तं हृदि विदधद्विहायसा निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शन
निर्वृतेंद्रियः १८ राजदूतमुवाचेदं भगवान् प्रीणयन् गिरा माभैष्ट दूत भद्रं वो
घातयिष्यामि मागधं १९ इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान् तेपि संदर्श
नं शौरेः प्रत्यैक्षन् यन्मुमुक्षवः २०

र्मिभिः १७ मुनिर्नारदो विहायसा ययौ वितिश
षः १८ माभैष्टेति बहुत्वं राजाभिप्रायेण १९ प्रत्यैक्षन् प्रत्यैक्षंत यद्यस्मान्मुमुक्षवः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनर्त्तादयोमार्गस्थादेशाःतीर्त्वाऽतिक्रम्यविनशनंकुरुक्षेत्रमतीतायअतिक्रम्य

आनर्त्तसौवीरमरूंस्तीर्त्वाविनशनंहरिः गिरीन्नदीरतीयायपुरग्रामव्रजाकरान् २१
ततोदृषद्वतींतीर्त्वामुकुंदोथसरस्वतीं पंचालानथमत्स्यांश्चशक्रप्रस्थमथागम
त् २२ तमुपागतमाकर्ण्यप्रीतोदुर्दर्शनंनृणां अजातशत्रुर्निरगात्सोपाध्यायःसु
हृद्वृतः २३ गीतवादित्रघोषेणब्रह्मघोषेणभूयसा अभ्ययात्सहृषीकेशंप्राणाः
प्राणमिवादृतः २४ दृष्ट्वाविक्लिन्नहृदयःकृष्णंस्नेहेनपांडवः चिराद्दृष्टंप्रियतमं
सस्वजेथपुनःपुनः २५

ययौ २१ शक्रप्रस्थंइंद्रप्रस्थं २२ २३ प्राणाःइंद्रियाणिप्राणं
मुख्यंप्राणमिव २४ सस्वजेपरिरेभे २५ नमोनमस्तेकृष्णायगोविंदायनमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.द.उ.
१५३

रमायामेअलंनि दोर्षमालयंविस्मृतोलोकविभ्रमोलोकव्यवहारोयेनसः २६ २७ अ

दोर्भ्यांपरिष्वज्यरमामलालयंमुकुंदगात्रंनृपतिर्हताशुभः लेभेपरांनिर्वृतिमश्रु
लोचनोहृष्यत्तनुर्विस्मृतलोकविभ्रमः २६ तंमातुलेयंपरिरभ्यनिर्वृतोभीमःस्म
यन्प्रेमजवाकुलेंद्रियः यमौकिरीटीचसुहृत्तमंमुदाप्रवृद्धबाष्पाःपरिरेभिरे
च्युतं २७ अर्ज्जुनेनपरिष्वक्तोयमाभ्यामभिवादितः ब्राह्मणेभ्योनमस्कृत्यवृद्धे
भ्यश्चयथार्हतः २८ मानिनोमानयामासकुरुसृंजयकेकयान् सूतमागधगं
धर्वान्वंदिनश्चोपमंत्रिणः २९

र्जुनेनसमत्वात्परिष्वक्तएवकेवलंपादौनमस्कुर्व
न्नर्ज्जुनः कृष्णेनभुजाभ्यांधृतइतिभावः यमाभ्यांतुअभिवादितश्चेति २८ चित्रध्व
जादिभिर्विराजमानं २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृदंगशंखपटहवीणापणवगोमुखैः ब्राह्मणाश्चारविंदाक्षंतुष्टुवुर्नन्नृतुर्जगुः ३०
एवंसुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः संस्तूयमानोभगवान् विवेशालंकृ
तंपुरं ३१ संसिक्तवर्त्मकरिणांमदगंधतोयैश्चित्रध्वजैःकनकतोरणपूर्णकुंभैः
मृष्टात्मभि नवदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्चविराजमानं ३२ उद्दी
प्तदीपबलिभिः प्रतिसद्मजालनिर्यातधूपरुचिरंविलसत्पताकं मूर्धन्यहेमक
लशैरजतोरुशृंगैर्जुष्टंददर्शभवनैः कुरुराजधाम ३३ प्राप्तंनिशम्यनरलोचन
पानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः सद्योविसृज्यगृहकर्मपतींश्च
तल्पेद्रष्टुंययुर्युवतयः स्मनरेंद्रमार्गे ३४

३० ३१ ३२ ३३ प्रतिसद्मगृहेद्वारे
दीपैर्बलिभिः पुष्पादिप्रकरैश्चजुष्टं जालेभ्योगवाक्षेभ्योनिर्गतैर्धूपैरुचिरंविलसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०उ०
१५४

स्यः पताकास्मिन्तत् मूर्द्धन्याः मूर्धिभवाः हेमकलशा येषां तैः रजतमयानि रूप्यम
यानि पुरूणि स्थूलानि शृंगाणि कलशाधस्तन भूमिका येषां तैर्भवनैर्जुष्टं कुरुराजस्य
धाम पूरं ददर्श नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं किंपुन

तस्मिन्सुसंकुल इभाश्वरथद्विपङ्क्तिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः नार्यो
विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन ३५ ऊचुः स्त्रि
यः पथि निरीक्ष्य मुकुंदपत्नीस्तारा यथोडुपसहाः किमकार्यमूभिः यच्चक्षु
षां पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ३६

नारीणामित्य
र्थः ३४ सुष्टु स्वागतं प्रश्नादिकं प्रियमुत्स्मयवीक्षितेनैव विदधुः ३५ उडुपसहाः चंद्र
सहचराः इत्यर्थः अमूभिः किं पुण्यमकारि ३६

राम
१५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७

श्रेण्यः एकशिल्पोपजीविनांसंघाः तेषुमुख्यांश्च ३७ अभ्युपेतः अभिगमनेनसत्क

तत्रतत्रोपसंगम्यपौरामंगलपाणयः चक्रुःसपर्यांकृष्णायश्रेणीमुख्याहतेन
सः ३७ अंतःपुरजनैःप्रीत्यामुकुंदःफुल्ललोचनैः ससंभ्रमैरभ्युपेतःप्राविश
द्राजमंदिरं ३८ पृथाविलोक्यभ्रात्रेयंकृष्णंत्रिभुवनेश्वरं प्रीतात्मोत्थायपर्यंका
त्सस्नुषापरिषस्वजे ३९ गोविंदंगृहमानीयदेवदेवेशमादृतः पूजायांनाविदत्कृ
त्यंप्रमोदोपहतोनृपः ४० पितृष्वसुर्गुरुस्त्रीणांकृष्णश्चक्रेऽभिवादनं स्वयंचकृ
ष्णयाराजन्भगिन्याचाभिवंदितः ४१

तः ३८ सस्नुषाद्रौपदीसहिता ३९ कृत्य
प्रकारविशेषंप्रमोदेनोपहतोऽभिभूतः गुरुस्त्रीणां(च)कृष्णयाद्रौपद्याभगिन्यासुभद्रया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनर्त्तअर्चितवती ४२ अन्याश्चयाः कृष्णपत्न्योभ्यागताः ताअपि ४३ प्रत्यहंनवंय
थाभवतितथासुखंनिवासयामास ४४ कथंभूतंयः प्रेम्णानित्यंफाल्गुनेनसंयुतः

स्वस्त्रासंचोदिताकृष्णाकृष्णपत्नीस्तुसर्वशः आनर्च्चरुक्मिणींसत्यांभद्रांजां
बवतींतथा ४२ कालिंदींमित्रविंदांचशैब्यांनाग्नजितींसतीं अन्याश्चाभ्याग
तायास्तुवासःस्रग्मंडनादिभिः ४३ सुखंनिवासयामासधर्मराजोजनार्दनं
ससैन्यंसानुगामात्यंसभार्यंचनवंनवं ४४ तर्पयित्वाखांडवेनवह्निंफाल्गुन
संयुतः मोचयित्वामयंयेनराज्ञेदिव्यासभाकृता ४५ अतएवतस्यसहाय
नसत्तायेनखांडवेनवह्निंतर्पयित्वातत्रचमयंमोचयित्वातंमयंप्रयुज्ययुधिष्ठिराय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिव्यासभाह्लनातंश्रीजनार्द्दनं अनेनराज्ञः कृष्णोपकारानुस्मरणंदिव्यत्वात्सभाया
यथामनोरथंसर्वावकाशसंपादनंचदर्शितं ४४ ४५ इतिदशमेटीकायांएकसं०॥७१॥

उवासकतिचिन्मासान्राज्ञः प्रियचिकीर्षया विहरन्रथमारुह्यफाल्गुणेनभ
टैर्वृतः ४५ इतिश्रीभागवतेमहापुराणेदशमस्कंधे इंद्रप्रस्थगमनेएकसप्ततित
मोऽध्यायः॥७१॥ शुकउवाच॥ एकदातुसभामध्ये आस्थितोमुनिभिर्वृतः
ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्चयुधिष्ठिरः १

ततोऽद्विसप्ततितमेराज्ञाकार्य्येनिवेदिते दुर्जयंमागधंबुध्वाभीमेनाघातयद्धरिः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०उ०
१५६

आस्थितः आसनमितिशेषः शृण्वतामेवेतियत्प्रसन्नः कृष्णः करोतिनतदन्यः क

आचार्यैः कुलवृद्धैश्चज्ञातिसंबंधिबांधवैः शृण्वतामेववचै
तेषामाभाष्येदमुवाचह २ ॥युधिष्ठिरउवाच॥ क्रतुराजे
नगोविंदराजसूयेनपावनीः यक्ष्येविभूतीर्भवतस्तत्सं
पादयनः प्रभो ३

श्चिदपिकर्तुंसमर्थइतिनिश्चित्यसर्वानेवताननादृत्यकृष्णमुवाचेत्यर्थः आभा
ष्यभोभोकृष्णभक्तवत्सलेत्येवंसंबोध्य २ विभूतीः अंशान् ३ श्रीकृष्णपरमात्म

भाग
१५६

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषचक्रवर्त्तिनांमनोरथः कथंत्वयाक्रियतइतिचेत् अतआहत्वत्पादुकेइति
परियेचरंतीतियछब्दव्यवधानमार्षंयेपरिचरंतिदेहेनध्यायंतिमनसाअभद्र

त्वत्पादुकेअविरतंपरियेचरंतिध्यायंत्यभद्रनशनेशुचयोगृ
णंति विंदंतितेकमलनाभभवापवर्गमाशासतेयदितआ
शिषईशनान्ये ४

स्यनशनेनाशकेगृणंतिवाचातेभवस्यापव र्गंमोक्षंविंदंति यद्याशासतेतर्हि
आशिषोपितएवविंदंतिनान्येचक्रवर्त्तिनोपि ४ श्रीकृष्णपरमात्मनेनमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰
१५१

भगवतोभक्तपक्षपात[illegible]माविष्कारयन् आह तद्देवदेवेति तत्रस्मात्पश्यतुसाक्षा
देवंनिश्चितापियेकर्मादिप्रधानाः केचित्कुरुसंजयाभगवद्भक्तिंनबहुमन्यंतेते

तद्देवदेवभवतश्चरणारविंदसेवानुभावमिहपश्यतुलोकएषः
येत्वांभजंतिनभजंत्युतचोभयेषांनिष्ठांप्रदर्शयविभोकुरुसृं
जयानां ५

षांमोहनिरस्तयेयेत्वांभजंतियदिवानभजंतितेषामुभयेषांनिष्ठांस्थितिंप्रदर्शय
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुरागादिरहितेमय्यिकथमिदंवैषम्यंस्यात्तत्राह नेति स्वःपरइतिभेदमतिस्त
वनस्यादेवकुतः ब्रह्मणोनिरुपाधेः किंच सर्वस्यात्मनः अतःसमदृशः किंच स्वसु

२७ नब्रह्मणःस्वपरभेदमतिस्तवस्यात्सर्वात्मनःसमदृशःस्वसुखा
नुभूतेः संसेवतांसुरतरोरिवतेप्रसादःसेवानुरूपमुदयोनविपर्ययो
त्र ६

स्वानुभूतेः अतोरागाद्यभाव इतिभावः तथापिसंसेवमानानामेवतवप्रसादोना
न्येषांतत्रापिसेवानुरूपमुदयः फलंनत्वत्रविपर्ययोन्यथाभावः यथाकल्पद्रुमस्यरा
गादिराहित्येसेवकेष्वेव फलजनकत्वंनान्येषु ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यंमकृत्स्नानामेवकैवल्यादिनान्येषामित्यनुमोदनेनाह सम्यगितिशत्रुकर्श
नेतिसंबोधयन्सर्वराजविजयशक्तिंसंचारयतिअनुभविष्यतिद्रक्ष्यतिसर्वलो

श्रीभगवानुवाच॥ सम्यग्व्यवसितंराजन्भवताशत्रुकर्शन कल्याणीयेनतेकीर्त्तिर्लोकाननुभविष्यति ७ ऋषीणांपितृदेवानांसुहृदामपिनःप्रभो सर्वेषामपिभूतानामीप्सितःक्रतुराड्यं ८ विजित्यनृपतीन्सर्वान्कृत्वाचजगतींवशेसंभृत्यसर्वसंभारानाहरस्वमहाक्रतुं ९

कव्यातात्भविष्यतीत्यर्थः ७८ किमत्र
मयान्येनवासंपादनीयंनसुकरएवराजसूयस्तस्माह विजित्येति जगतींसर्वांपृथ्वीं
संभारान्यज्ञोपस्करान्संभृत्यसंपाद्यआहरस्व अनुतिष्ठेत्यर्थः ९ श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु नृपति विजयादि कथं शक्यं स्यादत आह एत इति किंच आत्मवता जितेंद्रियेण ते
त्वया अहं च जितोस्मि वशीकृतोस्मि अकृतात्मभिः अजितेंद्रियैः १० आस्तां तावदे

एते तेभ्यांतरो राजन्लोकपालांशसंभवाः जितोस्म्यात्मवता ते
हं दुर्जेयो योऽकृतात्मभिः १० न कश्चिन्मत्परं लोके तेजसा यश
सा श्रिया विभूतिभिर्वा ऽभिभवेद्देवोपि किमु पार्थिवः ११ ७

वं भूतस्य तव परेरभिभवशंका अकिंचनमपि मत्परं कोपि नाभिभवितुं प्रभवतीत्याह
न कश्चिदिति तेजसा प्रभावेन विभूतिभिः सैन्यादिसामग्रीभिः ११ श्रीरामचंद्रपरमा०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०उ०
१५९

अयुंक्तनियुक्तवान् तथाविष्णोस्तेजसात्उपबृंहितान् संवर्द्धितान् तेजोपबृंहितानि
तिसंधिरार्षः १२ नकुलादीनांमत्स्यादिभिःसहायैर्यथासंख्येनसंबंधः १३ कथं

श्रीशुकउवाच निशाम्यभगवद्गीतंप्रीतःफुल्लमुखांबुजः भ्रातॄन्दिग्विज
येयुंक्तविष्णुतेजोपबृंहितान् १२ सहदेवंदक्षिणस्यामादिशत्सहसृंजयैः
दिशिप्रतीच्यांनकुलमुदीच्यांसव्यसाचिनं १३ प्राच्यांवृकोदरंमत्स्यैःकैकेयैः
सहमद्रकैः तेविजित्यनृपान्वीरा आजह्रुर्दिग्भ्यओजसा अजातशत्रवेभू
रिद्रविणंनृपयक्ष्यते १४ श्रुत्वाजितंजरासंधंनृपतेर्ध्यायतोहरिः अहोपायंत
मेवाद्यउद्धवोयमुवाचह १५

भूतायय यस्यत्ते यागंकरिष्यते १४ अथोहरिःश्रीकृ
ष्णः १५ रामकृष्णपरमात्मने

१५९

ब्रह्मलिंगधराः ब्राह्मणलिंगधारिणः यतः यत्र बृहद्रथसुतो जरासंधः १५ गृहेषु

भीमसेनोर्ज्जुनः कृष्णो ब्रह्मलिंगधरास्ततः जग्मुर्गिरिव्रजं तान बृहद्रथसुतोय
तः १६ ते गत्वातिथ्यवेलायां गृहेषु गृहमेधिनां ब्रह्मण्यं समयाचेरन् राज
न्या ब्रह्मलिंगिनः १७ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् तन्नः प्र
यच्छ भद्रं ते यद्वयं कामयामहे १८ श्रीरामकृष्णपरमात्मनेनमः नमोनमः॥

वर्तमानं समयाचेरन् सम्यग्याचन्ते स्मेत्यर्थः १७ १८ नमो श्रीकृष्णाय परमात्मने १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्विदं कामयामहरतिविशेषो निर्दिश्यतां अन्यथा यस्य पुत्रादेर्वियोगे दुःसहः सक
यं देयः तथा राजमंडनं किरीटाद्यदेयं यत्ताङ्घ्रिक्षुभ्यः कथं देयं तथा निरम्यं रत्नाभरणा
दि पुत्रादि योग्यं कथं परस्मै देयमिति चेदत्र आहुः किं दुर्मर्षमित्यादि अत्र दृष्टांतत्वे
नार्थांतरमाहुः किमकार्यमिति यथा साधूनामकार्यं नास्ति तथा तितिक्षूणां दुर्मर्षं

किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः किं न देयं वदान्यानां कः परः समदर्शिनां
यो नित्येन शरीरेण सतां गेयं यशो ध्रुवं नाचिनोति स्वयं कल्पः स वाच्यः शोच्य एव

सः २०

दुःसहं नास्ति वदान्यानामत्युदाराणां अदेयं नास्ति समदर्शिनां परश्च नास्ति
अतः किं विशेषनिर्देशनेनेत्यर्थः १९ किंच आर्थिने धीरेण मुत्कलादिवत् प्राणा अपि
न वंचनीया इत्याशयेनाहुः यो नित्येनेति नाचिनोति न संपादयति स वाच्यः निंद्यः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वामित्रास्यानृण्यायहरिश्चंद्रोभार्यात्मजादिसर्वंविक्रियस्वयंचंडालतांप्राप्तोप्यनिर्वि
ण्णः सहायोध्यावासिभिर्जनैः स्वर्गंगतः रंतिदेवः सकुटुंबोष्टाचत्वारिंशदहान्युपलब्धोद
कोपिकथंविलब्धान्नोदकार्थिभ्योदत्वाब्रह्मलोकंगतः उंछवृत्तिर्मुद्गलः षण्मासं
सीदत्कुटुंबोप्यातिथ्यदानेनब्रह्मलोकंगतः शिबिः शरणागतकपोतरक्षणायस्व

हरिश्चंद्रोरंतिदेवउंछवृत्तिः शिबिर्बलिः व्याधः कपोतोबहवोप्यध्रुवेणध्रुवंग
ताः २१

मांसंश्येनायदत्वादिवंगतः बलिः सर्वस्वंब्राह्मणवेषधारिणेहरयेदत्वात्मनमेवात्म
सात्कारकपोतश्चातिथयेव्याधायकपोत्यासहात्ममांसंदत्वाविमानेनदिवंगतः
व्याधस्तयोः सत्वंवीक्ष्यस्वयमपिनिर्विण्णोमहाप्रस्थानेवनाग्निदग्धदेहोनिःकल्म
षोदिवमारुरोहएवमन्येचबहवोध्रुवेणध्रुवंलोकंगताइति २१ श्रीकृष्णपरमात्म

CC-0. Jn Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्याहतैः ज्याघातकिणांकितैः दृष्टपूर्वान्द्रौपदीस्वयंवरादिषु २२ २३ इंद्रस्यश्रियंजि
हीर्षताविप्रव्याजेनविष्णुनाभ्रंशितस्यापिबलेर्नुअहोनेतिपाठेनश्रूयतेकिमपितु

शुकउवाच॥ स्वैरैराहूतिभिस्तांस्तुप्रकोष्ठेर्ज्याहतैरपि राजन्यबंधून्विज्ञायदृष्टपू
र्वानचिंतयत् २२ राजन्यबंधवोत्येतेब्रह्मलिंगानिबिभ्रति ददामिभिक्षितंतेभ्य
आत्मानमपिदुस्त्यजं २३ बलेर्नुश्रूयतेकीर्त्तिर्वितताद्दिक्ष्वकल्मषा ऐश्वर्याद्भ्रंशितस्यापिविप्रव्याजेनविष्णुना २४ श्रियंजिहीर्षतेंद्रस्यविष्णवेद्विजरूपिणे
जानन्नपिमहींप्रादाद्वार्यमाणोपिदैत्यराट् २५ श्रीगोपालहरयेकृष्णायनमः॥

श्रूयतइति २४ तंश्लाघयन्तेविष्णवइतिशुक्रेणवार्यमाणोपिअतएवविष्णुरितिजा
नन्नपि २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतमानेन पतता क्षत्रबंधुना देहेन ब्राह्मणार्थाय विपुलं यशो नेहताः नेहताः नेहमानेन

॥ जीवता ब्राह्मणार्थाय को न्वर्थः क्षत्रबंधुना देहेन पतमानेन नेहता विपुलं यशः २६
एवमुदारमतिः प्राह कृष्णार्जुनवृकोदरान् हे विप्राः प्रियतां कामो ददाम्यात्मशिरोपि वः
२७ श्रीभगवानुवाच ॥ युद्धं नो देहि राजेंद्र द्वंद्वशो यदि मन्यसे युद्धार्थिनो वयं प्राप्ता राज
न्यानान्नकांक्षिणः २८ ॥ जरासंध उवाच ॥ किं देवा वोतगं धर्वाः किन्नरोरगराक्षसाः
ईदृशं ब्राह्मणेतजो न दृष्टं न मया श्रुतं २९ न विप्राणां मया दृष्टं धनुर्ज्याचिह्नितं भुजं
इति श्रुत्वाह भगवान् प्रहस्य मगधाधिपं ३० श्रीकृष्णपरमात्मने नमः नमो नमः

नासंपादयता को न्वर्थः न कोपीत्यर्थः २६ एवं निश्चित्य प्राह हे विप्रा इति २७ २८ ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजन्यतामेवप्रपंचयति असाविति ३१ ३२ यतोमद्भियासमुद्रंशरणंगतः ३३ वयसा

असौवृकोदरःपार्थस्तस्यभ्राताऽर्जुनोप्ययं अनयोर्मातुलेयंमांकृष्णंजानीहिते
रिपुं ३१ एवमावेदितोराजाहासोच्चैःसमागधः आहचामर्षितोमंदायुद्धंतर्हि
ददामिवः ३२ नत्वयाभीरुणायोत्स्येयुधिविक्लवचेतसा मथुरांस्वपुरींत्यक्त्वासमु
द्रंशरणंगतः ३३ अयंतुवयसातुल्योनातिसत्वोनमेसमः अर्ज्जुनोनभवेद्योद्धा
भीमस्तुल्यबलोमम ३४ इत्युक्त्वाभीमसेनायप्रादायमहतींगदां द्वितीयांस्वय
मादायनिर्जगामपुराद्बहिः ३५

ष्यातुल्यः नातिसत्वः अनतिबलश्चनचदेहेनम
यासमः अतोऽर्ज्जुनोयोद्धानभवेद्भीमस्तुभवतु यतोममतुल्यबलः ३४ ३५ श्रीग

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राहायदत्वेत्यर्थः समेखलेयुद्धांगणे ३६ मंडलानिगदायुद्धगतिभेदान्सव्यंदक्षि
णंचयथाभवतितथारंगिणोः रंगगतयोः नटयोरिवेतिनिर्भयतेनोपमा ३७ चटच

ततःसमेखलेवीरौसंयुक्तावितरेतरौ जघ्नतुर्वज्रकल्पाभ्यांगदाभ्यांरण
दुर्मदौ ३६ मंडलानिविचित्राणिसव्यंदक्षिणमेवच चरतोःशुशुभेयुद्धंनट
योरिवरंगिणोः ३७ ततश्चटचटाशब्दोवज्रनिष्पेषसंनिभः गदयोःक्षि
प्तयोराजन्दंतयोरिवदंतिनोः ३८

टेतिगदयोः परस्पराघातशब्दानुकरणंवज्रनिःपेषःपातस्तत्सदृशः युद्धतोर्दंतिनो
दंताघातशब्दइवेतिशुशुभे ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंसकघातादीनुपेत्यदीप्तोमन्युर्ययोस्तयोर्गजयोरर्कशाखाभ्यांसमंयुध्यतोर्द्दंतिनोस्ते

तेवैगदेषुजञ्जवेननिपात्यमानेअन्योन्यतोंसकटिपादकरोरुजत्रून् चूर्णीबभूवतुरुपे
त्ययथार्कशाखेसंयुध्यतोर्द्विरदयोरिवदीप्तमन्य्वोः ३९ इत्थंतयोःप्रहतयोर्गदयोर्न्नृ
वीरौक्रुद्धौस्वमुष्टिभिरयःस्पर्शैरिपिष्टां शब्दस्तयोःप्रहरतोरिभयोरिवासीन्निर्घा
तवज्रपरुषस्तलताडनोत्थः ४० तयोरेवंप्रहरतोःसमशिक्षाबलौजसोः निर्विशेष
मभूद्युद्धमक्षीणजवयोर्न्नृप ४१ एवंतयोर्महाराजयुध्यतोःसप्तविंशतिः दिनानिनि
रगंस्तत्रसुहृद्वन्निशितिष्ठतोः ४२ यथाचूर्णीभूतास्तद्वत् ३९ अपिष्टांचूर्णीकृतुः ४०
४० शिक्षाअभ्यासः बलंसत्वमोजः प्रभावःसमानितानिययोस्तयोः ४१ ४२ श्रीराम

१६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४३ जन्मशकलरूपंस्मृतिः पुनःशकलीभावः तेविद्वान्ज्ञाननूजरानामराक्षसीतत्कृत
मचिंतयत्कथमसौशकलीभवेदिति ४४ शाखांकरेविटपंगृहीत्वाहस्तिभीमस्यय

एकदामातुलेयंवैप्राहराजन्वृकोदरः नशक्तोहंजरासंधंनिर्जेतुंयुधिमाधव ४३
शत्रोर्जन्ममृती विद्वान्जीवितंचजराकृतं पार्थमाप्याययस्त्वेनतेजसाचिंतयद्धरिः ४४
संचिंत्यारिवधोपायंभीमस्यामोघदर्शनः दर्शयामासविटपंपाटयन्निवसंज्ञया ४५
तद्विज्ञायमहासत्वोभीमः प्रहरतांवरः गृहीत्वापादयोः शत्रुंपातयामासभूतले
४६ एकंपादंपदाक्रम्यदोर्भ्यामन्यंप्रगृह्यसः गुदतःपाटयामासशाखामिवमहागः

जः ४७

याहंविटपंपाटयामितथात्वमेनंविपाटयेतिसंज्ञयासंकेतेनारिवधोपायंदर्शया
मासेत्यर्थः ४५ ४६ ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰
१६४

एकैकः पादोदर्य्योस्तेशकले ४८ ४९ दुर्वृत्तत्वादसौ हतः नराज्ञाभिलाषेणेतिदर्शय

एकपादोरुवृषणकटिपृष्ठस्तनांसके एकबाह्वक्षिभ्रूकर्णेशकले ददृशुः प्र
जाः ४८ हाहाकारो महानासीन्निहते मगधेश्वरे पूजयामासतुर्भीमं परिर
भ्य जयाच्युतौ ४९ परिरभ्य स तु कृष्णेन विरुजोभूद्वृकोदरः सहदेवं तत्तन
यं भगवान्भूतभावनः ५० अभ्यषिंचदमेयात्मा मगधानां पतिं प्रभुः
मोचयामास राजन्यान्संरुद्धा मागधेन ये ५१ इति श्रीभागवते महापुराणे
दशमस्कंधे द्विसप्ततितमोध्यायः ॥ ७२ ॥

भाह सहदेवमिति ५० ५१ ॥ इति दशमे द्विसप्ततितमोध्यायः ॥ ७२ ॥ श्रीकृष्णार्पणमस्तु

राम
१६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्त्रिसप्ततितमेमोचयित्वान्नृपान्हरिः राजार्हभोगैःस्वान्देशान्प्रस्थाप्यपुरमागम
त् १ अस्युन्नद्धजरासंधवधात्तद्बुद्धभूपतीन् विमोक्ष्यत्कृपयाकृष्णोनिजरूपमदर्शय

शुकउवाच ॥ अयुतेद्वेशतान्यष्टौलीलयायुधिनिर्जिताः तेनिर्गतागिरिद्रोण्यामलि
नामलवाससः १ क्षुत्क्षामाःशुष्कवदनाः संरोधपरिकर्शिताः ददृशुस्तेघनश्या
मंपीतकौशेयवाससं २ श्रीवत्सांकंचतुर्बाहुंपद्मगर्भारुणेक्षणं चारुप्रसन्नवद
नंस्फुरन्मकरकुंडलं ३

त् २ येनिर्ज्जिताजरासंधे ननिरुद्धाश्चगिरिद्रोण्यांतेततोनि
र्गताःसंतोघनश्यामंददृशुरित्युत्तरेणान्वयः १ क्षुधाक्षामाःकृशाःसंरोधेनपरिकर्शिताः
क्लेशिताः २ ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰उ॰
१६

४ भ्राजत्भ्राजमानोवरमणिःकौस्तुभोययासाग्रीवायस्यतं निवीतंकंठलंबितयाव्य
ग्रंपिबंतइवेत्यादीनांहरेःपादयोःप्रणेमुरित्युत्तरेणान्वयःरंभंतःपरिरंभमाणाइव ५

पद्महस्तंगदाशंखरथांगैरुपलक्षितं किरीटहारकटककटीसूत्रांगदांचितं ४ भ्राज
द्वरमणिग्रीवंनिवीतंवनमालया पिबंतइवचक्षुर्भ्यांलिहंतइवजिह्वया ५ जिघ्रंतइव
नासाभ्यांरंभंतइवबाहुभिः प्रणेमुर्हतपाप्मानोमूर्द्धभिःपादयोर्हरेः ६ कृष्णसंद
र्शनाल्हादध्वस्तसंरोधनक्लमाः प्रशशंसुर्हृषीकेशंगीर्भिःप्रांजलयोनृपाः राजा
न ऊचुः नमस्तेदेवदेवेशप्रपन्नार्तिहराव्यय प्रपन्नान्पाहिनःकृष्णनिर्विण्णान्घोर
संसृतेः ७

श्रीकृष्णदर्शनाल्हादेनध्वस्तःसंरोधनक्लमोयेषांते संरोधाद्वक्षिलान
स्मान् घोरायाःसंसृतेरपिपाहिमोचय ७

राम
१६५

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुभवंतोजरासंधास्तूयाविष्टाइहामुत्रभोगासक्ताश्चकथंसंसृतेसौचनूत्तामित्याशं
क्यसंप्रतिनवयंतथाभूतास्स्याहुः नैनमित्यष्टभिः हेनाथवयमेनेनानुसूयामअनु
नुदोषदृष्ट्यानपश्यामः कुतइत्यतआहुः अनुग्रहइतियद्यस्मात् ८ एतदेवव्यतिरे

नैनंनाथानुसूयामोमागधंमधुसूदन अनुग्रहोयद्भगवतोराज्ञांराज्यच्युतिर्विभो
८ राज्यैश्वर्यमदोनद्धोनश्रेयोविंदतेनृपः त्वन्मयामोहितोनित्यामन्यतेसंपदो
चलाः ९

केणैवोपपादयंतिराज्यैश्वर्येति राज्यैश्वर्याभ्यांमदस्तेनोन्नद्धउच्छृंखलोनित्याअच
लाश्चसंपदोमन्यंतेयद्वाअनित्याःसतीःअचलाःशाश्वतीर्मन्यंते ९ श्रीकृष्णपरमात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचावस्तुसद्वस्तुनयापश्यंतीत्याह मृगतृष्णामितिवैकारिकींसख्यादिविकारापन्नांअयु
क्ताःअविवेकिनः १० राज्यस्ययोगवियोगयोरनर्थार्थावहत्वमस्मास्वेवदृष्टमित्याहुः

मृगतृष्णांययाबालामन्यंतउदकाशयं एवंवैकारिकींमायामयुक्तावस्तु
चक्षते १० वयंपुराश्रीमदनष्टदृष्टयोजिगीषयास्याइतरेतरस्पृधः घ्नंतःप्र
जाःस्वाअतिनिर्घृणाःप्रभोमृत्युंपुरस्त्वाविगणय्यदुर्मदाः ११ श्रीरामकृष्ण

वयमितिद्वाभ्यांश्रीमदेननष्टादृष्टिर्येषांतेअस्याःपृथिव्याःतैरेतरस्पृधःपरस्परंस्प
र्द्धमानाःपुरःपुरस्तःत्वांमृत्युमविगणय्य ११ श्रीगणेशायनमोनमः श्रीरामचंद्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरायेदुर्मदावयं हेकृष्णनएववयंअथविनष्टदर्पास्तेचरणौस्मरामः स्मर्त्तुमाशास्महे
कथंभूताः भवतस्तन्वामूर्त्याकालेनश्रियोविचालिताः विभ्रंशिताः अतोराज्यच्युतिर्भव
दनुग्रहएवेत्यर्थः १२ अतएवाथोनंतरंमृगतृष्णिसदृशंराज्यंशश्वत्पततांप्रतिक्षणं

तदेवकृष्णाद्यगभीररंहसादुरंतवीर्येणविचालिताःश्रियः कालेनतन्वाभवतोनुकंप
याविनष्टदर्पाश्चरणौस्मरामते १२ अथोनराज्यंमृगतृष्णिरूपितंदेहेनशश्वत्पतता
रुजांभुवा उपासितव्यंस्पृहयामहेविभोक्रियाफलंप्रेत्यचकर्णरोचनम् १२ ७

क्षीयमाणेनतथारुजांरोगाणांभुवाजन्मक्षेत्रेणदेहेनउपासितव्यंसेव्यंनस्पृहयामहे
प्रेत्यपरलोकेचयाफलंस्वर्गादिभोगंउपासितव्यंनस्पृहयामहेकथंभूतंकर्णयोःरोच
नंरुचिजनकमात्रंतत्रगतस्यस्पर्द्धाद्यनपगमेनसुखाभावादित्यर्थः १३ श्रीकृष्णपरम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ययेवंभूतायूयंतर्हिममचरणौस्मरत ततोऽनायासेनमुक्तिर्भविष्यतीतिकिंमदपेक्षये
तिचेदत्तआहुः तन्नइतित्वच्चरणस्मृतिरपित्वत्प्रसादफलमेवेत्यर्थः १४ १५ श्लक्ष्णया

तन्नःसमादिशोपायंयेनतेचरणाब्जयोः स्मृतिर्यथानविरमेदपिसंसरतामिह १४
कृष्णायवासुदेवायहरयेपरमात्मने प्रणतक्लेशनाशायगोविंदायनमोनमः १५
शुकउवाच संस्तूयमानोभगवान्राजभिर्मुक्तबंधनैः तानाहकरुण स्तातशर
ण्यःश्लक्ष्णयागिरा १६ श्रीभगवानुवाच॥ अद्यप्रभृतिवोभूपामय्यात्मन्यखि
लेश्वरे सुदृढाजायतेभक्तिर्बाढमाशंसितंतथा १७

मंजुलया १८ यथाभवद्गिरा
शंसितंतथाबाढंनिश्चितं वोमयिभक्तिर्जायतेजायतामित्यर्थः ॥ श्रीकृष्णपरमा०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेभूपाः मद्भजनमेवकर्त्तव्यमितिभवद्भिर्व्यवसितंसंकल्पितंतद्दिष्ट्याभद्रंभवद्भिरुक्तं
चसत्यमेवेत्याहभवंनइतिश्रीश्चऐश्वर्यंचताभ्यांमदस्तेनोन्नाहतेद्धधनंस्वैरचारमि
त्यर्थः पश्येपश्यामि १८ तदेवाहहैहयइति हैहयःकार्त्तवीर्यःचक्रवर्त्तीनरेश्वरः पितुः
दिष्ट्याव्यवसितंभूपाभवंतऋतभाषिणः श्रियैश्वर्यमदोन्नाहंपश्यन्उन्मादकारणं
१८ हैहयोनहुषोवेनोरावणोनरकोपरे श्रीमदाभ्रंशिताःस्थानाद्देवदैत्यनरेश्वराः १९
कामधेनुहरणात्परशुरामेणसपुत्रोहतः नहुषोदेवेंद्रतांप्राप्तःउन्मत्तःशच्यौसंगायब्रा
ह्मणान्शिविकांवाहयन्तैरेवततोभ्रंशितोऽजगरत्वमवाप वेनोपिउन्मत्तोब्राह्मणान
धिक्षिपंस्तैरेवहुंकृतैर्हतः रावणोराक्षसेश्वरःसीतामभिलषन्राघवेण हतः नरकोदैत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰रू॰
१६

श्वरोदितिकुंडलाद्याहरणान्मयैवहृतः अपरोपिश्रीमदाख्यानाङ्कशिनाः १९ यदुत्पाद्यं
देहादितदंतवत्तविज्ञायपुत्राअप्रमत्तारक्षथरक्षतेइत्यर्थः २० प्रजातंतूनप्रजादिसं

भवंनएतद्विज्ञायदेहाद्युत्पाद्यमंतवत् मांयजंतोध्वरैर्युक्ताःप्रजाधर्मेणरक्षथ
२० संतन्वंतःप्रजातंतूनसुखंदुःखंभवाभवौ प्राप्तंप्राप्तंचसेवंतोमच्चित्ताविच
रिष्यथ २१ उदासीनाश्चदेहादावात्मारामाधृतव्रताः मय्यावेश्यमनःसम्यग्मा
मंतेब्रह्मयास्यथ २२ शुक उवाच इत्यादिश्यनृपान्कृष्णोभगवान्भुवनेश्वरः ते
षांन्ययुंक्तपुरुषान्स्त्रियोमज्जनकर्मणि २३ नतीःप्राप्तंप्राप्तंसमत्वेनसेवमानाः २१
मांब्रह्मयास्यथ २२ स्त्रियश्चतेषांमज्जनकर्मणिअभ्यंगस्नानादिन्ययुंक्त २३ ७

रामः
१६

२४ सुस्नातान्सम्यगलंकृतान् भोगैश्चयुक्तान् २५ वरेणान्नेनभोजयित्वापुनस्तेषां

सपर्यांकारयामाससहदेवेनभारत नरदेवोचितैर्वस्त्रैर्भूषणैःस्रग्विलेपनैः २४
भोजयित्वावरान्नेनसुस्नातान्समलंकृतान् भोगैश्चविविधैर्युक्तांस्ताम्बूलाद्यैर्नृपो
चितैः २५ तेपूजितामुकुंदेनराजानोमृष्टकुंडलाः विरेजुर्मोचिताःक्लेशात्प्रावृडंते
यथाग्रहाः २६ रथान्सदश्वानारोप्यमणिकांचनभूषितान् प्रीणयसूनृतैर्वाक्यैः
स्वदेशान्प्रत्ययापयत् २७ तएवंमोचिताःकृच्छ्रात्कृष्णेनसुमहात्मना ययुस्तमे
वध्यायंतःकृतानिचजगत्पतेः २८ जगदुःप्रकृतिभ्यस्तेमहापुरुषचेष्टितं यथा
न्वशासद्भगवांस्तथाचक्रुरतंद्रिताः २९

सपर्यांसहदेवेनकारयामासग्रहाश्चंद्रादयो
यथा २६ प्रीणयन्नंदयित्वा २७ २८ जगदुःऊचुः २९ श्रीकृष्णपरमात्मनेनमः रामराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰द॰उ॰
१६९

प

३० खांडवप्रस्थंइंद्रप्रस्थं ३१ शांतंमूतं ओ मनोरथोबभूव ३२ ३४ इतिद्वामे

जरासंधंघातयित्वाभीमसेनेनकेशवः पार्थाभ्यांसंस्तुतःभायासहदेवेनपूजितः
३० गत्वातेखांडवप्रस्थंशंखानूद्ध्मुर्जिनारयः हर्षयंतःस्वसुहृदांचासुखा
वहाः ३१ तच्छ्रुत्वाप्रीतमनसइंद्रप्रस्थनिवासिनः मेनिरेमागधंशांतंराजाप्राप्त
मनोरथः ३२ अभिवंद्याथराजानंभीमार्जुनजनार्दनाः सर्वमाश्रावयांचक्रुराल
नायदनुष्ठितं ३३ निशम्यधर्मराजस्तत्केशवेनानुकंपितं आनंदाश्रुकला
मुंचन्प्रेम्णानोवाचकिंचन ३४ इतिश्री ०द० द्विज येजरासंधवधस्त्रिसप्ततिमो
ध्यायः ॥७३॥

कायांत्रिससतितमोध्यायः ॥७३॥ श्रीकृष्णार्पणमस्तु ॥रामराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्युक्तसप्ततिनमेराजसुयक्रियाद्विजैः अग्रपूजाप्रसंगेनचैद्यघातादिवर्ण्यते १
राज स्तूयमुखेहत्वाराजरासंधंतदंतरे चैद्यंतदंतेकुर्वंतेबीजंकलिमिवावपत् २ कृष्ण
स्यचानुभावमितिचकारात्तस्यस्वाज्ञानुविधायित्वंचालक्ष्येत्यर्थः १ तदाहयेस्यु

श्रीशुकउवाच॥ एवंयुधिष्ठिरोराजाजरासंधवधंविभो कृष्णस्यचानुभावं
तंश्रुत्वाप्रीतस्तुमब्रवीत् १ युधिष्ठिरउवाच॥ येस्युस्त्रैलोक्यगुरवःसर्वेलो
कमहेश्वराः वहंतिदुर्लभंलब्ध्वाशिरस्यैवानुशासनं २

रितियेत्रैलोक्यस्यापि
गुरवः स्युः सनकादयः सर्वेलोकपालाश्चतेशिरसैवतवानुशासनंवहंति दुर्लभंलब्ध्वे
तिभाग्येनैतल्लब्धमितिबहुमानेनेत्यर्थः २ श्रीकृष्णपरमात्मनेनमः नमोनमः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सभवान्परमेश्वरोस्माकमनुशासनं धत्तेतदत्यंतविडंबनं अननुरूपमनुकरणं
स्वतेजोहानिप्रसंगादित्यर्थः ३ अथवा तव परिपूर्णस्याज्ञापनाज्ञाधारणाभ्यां नते

सभवानरविंदाक्षोदीनानामीशमानिनां धत्तेनुशासनं भूमंस्तदत्यंतविडंबनं
३ नत्येकस्याद्वितीयस्यब्रह्मणः परमात्मनः कर्मभिर्वर्द्धनेतेजोह्रसनेचयथार
वेः ४

नसोहानिवृधी अतः कृपयासर्वसंगच्छन इत्याह नत्येकस्याद्वितीयस्येतिसमा
नरहितस्यब्रह्मणस्तवोभयंमायापरमात्मन इतिसर्वजीवनियंतुस्तवनियम्यत्वंसु
तरांनवास्तवं अतः परमानुग्रहार्थैरेतैः कर्मभिस्तवतेजोनवर्द्धते नचह्रसतिरवे
रिवत्रुदयास्तमयादिकर्मभिरित्यर्थः तथाचश्रुतिः नकर्मणावर्द्धते नोकनीयानिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

नन्वेवमप्यहं परमेश्वरः ममेदं नीचं कर्मायोग्यमिति मनसि कथं न भवेदत आह नचै
तइति हे अजित तव भक्तानामेव तावदियं नानाधीर्भिदमतिनो[illegible]त्त यथापश्वूनाम

नवैतेजितभक्तानांममाहमितिमाधव त्वंतवेतिचनाना
धीःपश्वूनामिववैकृता ५ शुकउवाच॥इत्युक्त्वायज्ञियेका
लेववेयुक्तान्सऋत्विजः कृष्णानुमोदितःपार्थोब्राह्मणान्
ब्रह्मवादिनः ६

ज्ञानांवैकृताशरीराविषयातवतु नास्तीतिकिंपुनर्वक्तव्यमित्यर्थः
५ यज्ञियेयज्ञोचितेवसंतादिकालेयुक्तान्सयुधिष्टिरः ऋत्विजोहोतृप्रमुखान्वव्रेब्र
तवान् ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानाहद्वैपायनइतित्रिभिः ७८ अकृतव्रणांतानेतान्रात्विगुपद्रष्टादिभेदेनवव्रे १ अ

द्वैपायनोभरद्वाजःसुमंतुर्गौतमोसितः वसिष्ठश्च्यवनःकाण्वोमैत्रेयःकवषास्त्रि
तः ७ विश्वामित्रोवामदेवःसुमतिर्जैमिनिःक्रतुः पैलःपराशरोगर्गो
७ वैशंपायनएवच ८ अथर्वाकश्यपोधौम्योरामोभार्गवआसुरिः वीतिहो
त्रोमधुछंदावीरसेनोकृतव्रणः ९ उपहूतास्तथाचान्येद्रोणभीष्मकृपादयः धृ
तराष्ट्रःसहसुतोविदुरश्चमहामतिः १० ब्राह्मणाःक्षत्रियावैश्याःशूद्रायज्ञदिदृ
क्षवः तत्रेयुःसर्वराजानोराज्ञांप्रकृतयोनृप ११ श्रीकृष्णपरमात्मनेनमः ॥७॥

न्येचोपहूतायज्ञदिदृक्षवस्तत्रेयुरित्यन्वयः ७८।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवयजनंयज्ञभूमिंदृष्ट्वाकर्षणादिभिः संशोध्यदीक्षयांचक्रिरेदीक्षासंस्कारयुक्तंअ
कुर्वन् १२ उपकरणान्नुपस्कराःवरुणस्यराजसूयेय थाआसन्नि[illegible]रेपः १२ किंचहं

ततस्तेदेवयजनंब्राह्मणाःस्वर्णलांगलैः दृष्ट्वातत्रयथान्यायंदीक्षयांचक्रिरेनृपं १२
हैमाकिलोपकरणावरुणस्ययथापुरा इंद्रादयोलोकपालाविरंच्यभवसंयुताः १३
सगणाःसिद्धगंधर्वाविद्याधरमहोरगाः मुनयोयक्षरक्षांसिखगकिंनरचारणाः
राजानश्चसमाहूताराजपत्न्यश्चसर्वशः १४ राजसूयंसमीयुःस्मराज्ञःपांडुसुत
स्यवै मेनिरेकृष्णभक्तस्यसूपपन्नमविस्मिताः १५

इंद्रादयइति येइंद्रादयोदेवगणाः
येचराजादयःसमाहूताः तत्रसमीयुःस्मतेसर्वेकृष्णभक्तस्यपांडुसुतस्यराज्ञोराज
सूयमविस्मिताःसंतः सूपपन्नंसुसंपन्नंमेनिरइत्यन्वयः १३ १४ १५ श्रीकृष्णपर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याजकाऋत्विजः १६ सुत्येहनिसोमाभिषवदिने १७ अथार्हणमग्र्यपूजातस्यार्हयो

अथायेजेन्महाराजंयाजकादेववर्च्चसः राजसूयेनविधिवत्प्राचेतसमिवामराः

१६ सुत्येहन्यवनीपालोयाजकान्सदसस्पतीन् अपूजयन्महाभागान्यथाव

त्सुसमाहितः १७ सदस्याग्र्यार्हणार्हंवैविमृशंतःसभासदः नाध्यगछन्ननै

कांत्यात्सहदेवस्तदाब्रवीत् १८ अर्हतिह्यच्युतःश्रैष्ठ्यंभगवान्सात्वतांपतिः

एषवैदेवताःसर्वादेशकालधनादयः १९ यदात्मकमिदंविश्वंक्रतवश्चयदात्म

काः अग्निराहुतयोमंत्राःसांख्ययोगश्चयत्परः २०

ग्र्यंअनैकांत्यात्तद्योग्यानांबहुत्वेनैकस्यानिश्चयात् १८ १९ सांख्य[illegible]ानंयोगउपासना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सांख्यं केवलपरं योगः सविशेषणपरः कथमुभयोरेकपरत्वं तत्राह एकएवा
द्वितीयोसौ अतः सांख्यस्यैतत्परत्वं युक्तं विशेषणभूतस्य च सप्रपंचस्य तन्मय
त्वात्सविशेषणविषयस्य योगस्यापि युक्तमद्वितीयपरत्वमित्याह एतदात्म्यमिति

एकएवाद्वितीयोसावेतदात्म्यमिदं जगत् आ
त्मनात्माश्रयः सभ्याः सृजत्यवति हंत्यजः २१

एषः श्रीकृष्णः आत्मा यस्य तत् एतदात्म्यं तस्य भाव ऐतदात्म्यं भवितर्येव भावनि
र्देशः एतदात्म्यमिदं सर्वमिति श्रुतेः अत्र हेतुः आत्मनेति हे सभ्याः आत्माश्रयः
वसुत्रप रिचरः प्रह्लादनारदवसवः प्रमुखामुख्यायेषांतैः परंदैवतमितिश्रेष्ठैर्व
चोभिः पृथग्भावैर्वचोभिरितिवा ५४ विद्याअविद्येजीवानांमुक्तिसंसृतिहेतू

प्र

प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः स्तूयमानंपृथग्भावैर्वचोभिरमलात्म
भिः ५४ श्रियापुष्ट्यागिराकांत्याकीर्त्यातुष्ट्येलयोर्जया विद्ययाविद्ययाशक्त्या
माययाचनिषेवितं ५५ विलोक्यसुभृशंप्रीतोभक्त्यापरमयायुतः हृष्यत्तनूरु
होभावपरिक्लिन्नात्मलोचनः ५६ गिरागद्गदयास्तौषीत्सत्वमालंब्यसात्वतः प्र
णम्यमूर्ध्नावहितः कृतांजलिपुटः शनैः ५७

मायातयोः कारणंशक्तिर्ह्लादिनीसंवि
त्ज्ञानंआभिरन्याभिश्चनिषेवितं ५५ विलोक्यसुभृशंप्रीतःअस्मत्कृष्णोसावेवंभग
वतःपरमेश्वरइतिज्ञात्वेति ५७ ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्री ॥ ० दशमे टीकायां एकोनचत्वारिंशोध्यायः ॥ ३९ ॥ चत्वारिंशे ततोक्रूरः कृष्णं म
त्वेश्वरेश्वरं प्रणम्य भक्त्या तुष्टाव सगुणागुणभेदतः १ श्रीकृष्णं प्रणमति नतो
स्मीति हे कृष्ण त्वा त्वां नतोस्मि त्वमस्मत् पितृव्यः कुतो मां बालं नतोसि तत्राह आ

इतिश्रीभागवते म० ० अक्रूर ॥ ति ॥ ने एकोनचत्वारिंशोध्यायः ॥ ३९ ॥ अक्रूर उवाच
नतोस्म्यहं त्वाखिलहेतुहेतुं नारायणं पुरुषमाद्यमव्ययं यन्नाभिजातादरविंदकोशाद्ब्रह्माविरासीद्यत एष लोकः १

द्यं पुरुषं अव्ययं चानादिनिधनमित्यर्थः कुत एतदखिलहेतूनां हेतुः स तु नारायणो
नाहमिति चेत् न नारायणं त्वां किं नारायणं हि तिमां स्तौषि का त्र स्तुतिः सत्यमेवेसा
ह यन्नाभिजातादिति यतो ब्रह्मणः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेतु

अखिलंहेतुत्वंप्रपंचयतिभूरिति खस्यादिरहंकारः अजामायातस्याआदिःपुरु

भूस्तोयमग्निःपवनःखमादिर्महानजादिर्मनइं
द्रियाणि सर्वेंद्रियार्थाविबुधाश्वसर्वेयेहेतवस्ते
जगतोंगभूताः २

षःएतेयेजगतोहेतवस्तेसर्वेतव अंगभूताःअंगानत्वंश्रीमूर्तेर्भूताःउपसर्ज्जनभूता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वतिस्तुतिः कथंक्रियते अहमेवात्मन उत्पन्नस्तत्परतंत्रश्चेति चेदित्याशंक्यतवै
षामायात्वत्सारसामर्थ्यंतु न कोपि वेदेत्याह नैत इति एते अजआदिर्येषां ते आत्मनस्ते
स्वरूपं न विदुः अनात्मतया जडत्वेन कारणेन जडत्वहेतुर्गृहीताः प्रत्यक्षादिभिर्दृष्टाः

नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो नात्मतया गृहीताः अजो॑नुबद्धः स गुणैरजाया
गुणात्परं वेद न ते स्वरूपं ३ न त्वजडोहं गोचर इति भावः ननु जडामीमा जानंतु
जीवस्तु ज्ञास्यतीत्यत आह अज इति स अजो ब्रह्मा अपि अजायां गुणैरनुबद्धः
आवृतः गुणातीतं ते स्वरूपं न वेद अन्यः कुतो ज्ञास्यतीति यद्वा प्रकृत्यादयः आ
त्मनः स्वरूपं तव स्वरूपं च न विदुः जडत्वादेव जीवस्तु तान् आत्मानं च वेत्ति न पुनस्त्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वरूपमिति यथोक्तंहंसगुह्येदेहोसवोक्षामनवोभूतमात्रानात्मानमन्यंचवि
दुः परं यत् सर्वंपुमान् वेदगुणांश्चतज्ज्ञोनवेदसर्वज्ञमनंतमीडेइति ३ ननुयदि
केपिनजानंतिकथंतर्हिसंसारनिवृत्तिर्जीवानामित्याशंक्यसाक्षाद्गोचरत्वेपि

त्वांयोगिनोयजंत्यद्धामहापुरुषमीश्वरं सा
ध्यात्मंसाधिभूतंचसाधिदैवंचसाधवः ४

येनकेनापिमार्गेणभजंतांत्वंगम्योसीत्याह त्वांयोगिनइतिहैरण्यगर्भादयोध्यात्मा राम
धिभूताधिदैवसाक्षिणंमहापुरुषंतदंतर्यामिस्वरूपमीश्वरंनियंतारंचयजंति ४ ३१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंसांख्ययोगावेकीकृत्योक्तौ त्रयीमार्गंकर्मज्ञानभेदेनदर्शयति त्रय्याचेति
श्लोकद्वयेनवैतानिकाःकर्मयोगिनःत्वांवैत्वामेवयजंते ननुतेइंद्रवरुणवाय्वादी
न्यजंतेनतुमामितिअतआह नानावज्रहस्तादिरूपाणियेषांतेयेअमरास्तेषा

त्रय्याचविद्ययाकेचित्त्वांवैवैतानिकाद्विजाः य
जंतेविततैर्यज्ञैर्नानारूपामराख्यया ५७

माख्ययानाम्नात्वामेवयजंतइतिअयंभावः ऐंद्रवारुणादिसूक्तैरिंद्रादयःसर्वैश्व
र्येणप्रकाश्यंते नचसर्वेश्वराबहवः संभवंति अतोनामभेदेनत्वामेवयजंत
इति तथाचश्रुतिःसप्रथमःसप्रकृतिर्विश्वकर्मासप्रथमोमित्रावरुणयोरग्निःस
प्रथमोबृहस्पतिश्चिकित्वांस्तस्माइंद्रायहविराजुहोति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानयज्ञेनसमाधिनासांख्ययोगत्रयीमार्गाउक्ताः वैष्णवशैवमार्गावाहद्वयेन अ
न्येचेति संस्कृतात्मानः वैष्णवशैवदीक्षयादीक्षिताःसंतः तेत्वयाभिहितेनपंच

एकेत्वाखिलकर्म्माणिसंन्यस्योपशमंगताः ज्ञानिनोज्ञानयज्ञेनयजंतिज्ञानविग्र
हं ६ अन्येचसंस्कृतात्मानोविधिनाभिहितेनते यजंतित्वन्मयास्त्वांवैबहुमूर्त्येक
मूर्त्तिकं ७ त्वामेवान्येशिवोक्तेनमार्गेणशिवरूपिणं बह्वाचार्यविभेदेनभगव
न्समुपासते ८

दि रात्रौविधिनात्वन्मयाः त्वन्मयत्वेनात्मानंचिंतयंतः त्वदेकप्रधानाइतिवा वासु
देवसंकर्षणप्रद्युम्नानिरुद्धभेदेनबहुमूर्त्तिंनारायणरूपेणेकमूर्त्तिकंचत्वामेवय राम
जंति ७ बह्वाचार्यविभेदेनेतिनानाभेदशैवपाशुपतादिमार्गेण ८ श्रीरामचंद्र ३१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प

वस्तु येपिक्षुद्रदेवताभक्तास्तेपित्वामेवंयजंतीत्याह सर्वएवेति हेसर्वदेवमयनन्वेतेपर
स्परदेवताधिक्षेपकलहव्याकुलचित्ताः कथमेकंयजंतीत्युच्यतेतत्राह यद्यप्य
न्यधिपइतिबुद्धिमात्रभेदोनंभेदस्त्वपर्यः ९ तस्मात्सर्वेमार्गास्त्वय्येवपर्यवस्यंती मेव

सर्वएवयजंतित्वांसर्वदेवमयेश्वरं येप्यन्यदेवताभक्तायद्यप्यन्यधियः प्रभो ९
यथाद्रिप्रभवानद्यः पर्जन्यापूरिताःप्रभो विशंतिसर्वतःसिंधुंतद्वत्वांगतयोततः
१०

तिसदृष्टांतमाह यथेति अद्रेःसकाशात्सर्वतःप्रभवंतियानद्यः स्ताः पुनःपर्जन्येनना
पूरिताःबहुस्रोतसः सत्यःसर्वतःसिंधुमेवविशंतियथा तद्वदेतागतयोमार्गाअं
ततस्त्वामेवाविशंतीति १०
स्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रहेतुमाह सत्वमिति भवतःशक्तिर्याप्रकृतिस्तस्याः सत्वादयोगुणाः अतःप्रा
कृताः प्रकृतिकार्य्योपाधयोब्रह्मपर्य्यंताःस्थावरादयोजीवाःस्वोपाधिद्वारातेषु

सत्वंरजस्तमइतिभवतःप्रकृतेर्गुणाः तेषुहिप्राकृ
ताःप्रोताआब्रह्मस्थावरादयः ॥ ७ ॥

गुणेषुप्रोताःप्रविष्टाःतेचप्रकृतौसान्वत्वयीति अतःक्रमेणोपाधिलयंत्सर्वेपि
त्वामेवविशंतीति यद्वाभवतःप्रकृतेर्गुणेषुप्रोताःब्रह्मादयोभवद्व्यतिरिक्ता
नसंति अतस्त्वमेवसर्वदेवमयइति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वात्मनस्तस्यनेनोक्तंसगुणंस्तोति अग्निर्मुखमितिद्वाभ्यां अग्न्यादीनन्दृष्ट्येस्वरावयवता
विधीयतेयोयमग्निः सतवमुखमित्यादिवचनव्यक्त्या ईक्षणंचक्षुः श्रुतिः श्रवणेंद्रियं
कंमूर्द्धाप्राणाश्चबलंचतत्र मुखादिं दृष्ट्याग्निश्चपद्भ्यांभूमिर्दिशः श्रोत्राच्चक्षोः सूर्योअ

अग्निर्मुखंतेऽवनिरंघ्रिरीक्षणंसूर्योनभोनाभिरथोदिशःश्रुतिः द्यौःकंसु
रेंद्रास्तवबाहवोर्णवाः कुक्षिर्मरुत्प्राणबलंप्रकल्पितं १३ रोमाणिवृक्षौष
धयः शिरोरुहामेघाः परस्यास्थिनखानितेद्रयः निमेषणंरात्र्यहनीप्रजा
पतिर्मेढ्रस्तुवृष्टिस्तववीर्यमिष्यते १४

जायतनाभ्याआसीदंतरिक्षं शीर्ष्णो द्यौःस
मवर्त्ततबाहूराजन्यः प्राणाद्वायुरजायतेतिश्रुतेः १३ अद्रयः परस्यतेऽस्थिनखानि १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु भवतः प्रकृतेरितिवदन्मामपि प्रकृतिसंबंधं ब्रवीषि नतस्यास्तेषां च मम च को विशे
षः स्यादित्याशंक्य विशेषमाह [illegible] तुभ्यमिति अविषक्तदृष्टये अलिप्तबुद्धये कु
तः सर्वात्मने स्वव्यतिरिक्ताभावादविषक्तदृष्टित्वमित्यर्थः किंच सर्वधियां साक्षिणे सा

स तुभ्यं नमस्ते स्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे गुणप्र
वाहोयमविद्ययाकृतः प्रवर्त्तते देवनृतिर्यगात्मसु १२

क्षित्वान्नकोपि बुद्धिलेप इत्यर्थः इतरे तु संसरंतीत्याह गुणप्रवाह इति देवनृतिर्यंच
आत्मानो येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः त्वदविद्ययाकृतोयं गुणप्रवाहः प्र
वर्त्तते अतो महान्विशेष इत्यर्थः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकेवलमेतावत्किंतुसर्वोप्ययंप्रपंचस्त्वदवयवभूतएवेतिवदन्नेवंसत्यपिप्रपंच
स्यषड्जन्मादयोविकारास्त्वयिनप्रसज्यंते तस्यत्वयिकल्पितत्वादित्याह त्वयी
ति अव्ययात्मनिपुरुषेपूर्णेलोकादयःसंजिहतेप्रलंचे ति हेअव्ययात्मन्निति वा

त्वय्यव्ययात्मन्पुरुषेप्र कल्पितालोकाःसपालाबहुजीवसंकुलाः य
थाजलेसंजिहतेजलौकसोप्युदुंबरेवामशकामनोमये १५ ७

कथंभूतेत्वयिमनोमयेमनःप्रधानेमनोरत्तिव्यंग्येहृश्यतेतस्ययाबुद्ध्यामनसैवा
नुद्रष्टव्यमित्यादिश्रुतेः जलेयथाजलौकसःसूक्ष्मप्राण्यंडराशयः यथाचउदुंबरां
तःकेसरेषुमशकाःपरस्परंवार्त्तानभिज्ञाएवमनंतानिब्रह्मांडानित्वयिसंचरंतीत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादेवंप्रस्तंतनवस्वरूपंउरुगाहमिति त्वद्भवनारकथामृतमेवसंतः सेवंतइत्साह या
नियानीति आम्नष्टापरिमार्ज्जिताश्रुकूपेषांते १६ अतः स्वयमप्यवतारान्नमस्यतिन

यानियानीहरूपाणिक्रीडनार्थंबिभर्षिहि तैरामृष्टशुचोलोकामुदागायं
तितेयशः १६ नमः कारणमत्स्यायप्रलयाब्धिचरायच हयशीर्ष्णेनमस्तु
भ्यंमधुकैटभमृत्यवे १७ अकूपारायबृहतेनमोमंदरधारिणे क्षित्युद्धार
विहारायनमः शूकरमूर्तये १८ नमस्तेद्भुतसिंहायसाधुलोकभयापह
वामनायनमस्तुभ्यंक्रांतत्रिभुवनायच १९

मत्स्यइतिहयशीर्ष्णेहय ग्रीवायमधुकैटभ
योर्मृत्यवेहंत्रे १७ अकूपाराय कूर्मायक्षित्युद्धारोविहारोयस्यतस्मै १८ १९ राम

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

भृगूणांपतयेपरशुरामाय २० संकर्षणेरामः चतुर्व्यूहरूपेणप्रणमतिनमस्तेवासु
देवायेति २१ एवंस्तुत्वाबंधमोक्षंप्रार्थयितुमाह भगवन्निति असतिदेहादौ

नमोभृगूणांपतयेदृप्तक्षत्रवनच्छिदे नमस्तेरघुवर्यायरावणांतकरायच २० नम
स्तेवासुदेवायनमःसंकर्षणायच प्रद्युम्नायानिरुद्धायसात्वतांपतयेनमः २१ न
मोबुद्धायशुद्धायदैत्यदानवमोहिने म्लेच्छप्रायक्षत्रहंत्रे नमस्तेकल्किरूपिणे २२ भ
गवन्जीवलोकोयंमोहितस्तवमायया अहंममेत्यसद्ग्राहोभ्राम्यतेकर्मवर्त्मसु २३
अहंचात्मात्मजागारदारार्थस्वजनादिषु भ्रमामिस्वप्नकल्पेषुमूढःसत्यधियाविभो

ग्राहः आग्रहोयस्यसः असद्ग्रहोयस्येतिवा २३ नकेवलमयंलोकः अहमपितथैवे
त्याह अहंचेति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूढत्वमेवप्रकटयति विपर्यय मतिरिति अनित्येकर्मफलेनित्यमिति अनात्म
निदेहेआत्मेति दुःखरूपेगृहादौसुखमितिविपरीतमतिरित्यर्थः द्वंद्वेषुसुख
दुःखादिषुआरमतेक्रीडतीति तथासः ननुदुःखेकुतोरतिस्तत्राह तमोविष्टः

अनित्यानात्मदुःखेषुविपर्ययमतिर्ह्यहं द्वंद्वारामस्तमोविष्टोनजानेत्वा
त्मनःप्रियं २५ यथाबुधोजलंहित्वाप्रतिछन्नंतदुद्भवैः अभ्येतिमृगतृ
ष्णांवैतद्वत्वाहंपराङ्मुखः २६

तमसाव्याप्तःआत्मनःप्रियंप्रेमास्पदं
त्वात्वांनजानेइत्यर्थः २५ सदृष्टांतमाह यथेति तस्माज्जलादुद्भवंतीतितदु
द्भवानितृणादीनितैस्तथामाययाछन्नंत्वामहंहित्वापराङ्मुखोदेहाभिमुखो
वर्त्तइति २६

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंजानतः कुतोविषयाभिमुखतातत्राह नोत्सह इतिकृपणत्वासक्तायुक्ताधी र्यस्यसः अतएवकामकर्मभ्याहतंक्षुभितंइंद्रियैश्चबलिभिः विषयसंयुक्तैरित

नोत्सहेदंकृपणधीः कामकर्महतंमनः
रोद्धुंप्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः २७

स्ततआच्येक्षेमाणंमनोरोद्धुंनियंतुंनशक्नोमीति २७ श्रीकृष्णापरमात्मनेनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमस्वतंत्रोयः सोहं तवांघ्रिमुपगतः शरणंप्राप्तः नन्विंद्रियपरतंत्रस्यैतदपि
कुतः तत्राह तत्रापीति हे ईश अंतर्यामिन् तदंघ्र्युपगमनंचासतांदुरापमतो
भवतोऽनुग्रह एवेत्यहंमन्ये अनुग्रहेसतीतिवा ननुसतांसेवयास्तदंभवतीतिकिंम

सोहंतवांघ्र्युपगतोस्म्यसतांदुरापंतच्चाप्यहंभवदनुग्रहईशमन्ये पुंसो
भवेद्यर्हिसंसरणापवर्गस्त्वय्यब्जनाभसदुपासनयामतिःस्यात् २९

दनुग्रहेणेत्यतआह पुंसइति जीवस्यसंसारस्यापवर्गःसमाप्तिर्यदातत्कल्पयाभवे
त्संभाव नास्पदंभवति हेअब्जनाभतदासदुपासनासंपद्यते तर्ह्येवत्वयिमतिर्भवे
त् तत्कृपांविनानसत्सेवानतरांत्वन्मतिः नतमांमुक्तिरित्यर्थः २९ नमोभगवते॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादयोः पतन्प्रार्थयते नमश्चेति द्वयेन विज्ञानमेवमात्रमूर्त्तिर्य्यस्य तस्मै अत एव सर्व
प्रत्ययहेतवे समस्तज्ञानकारणाय किंच पुरुषेशप्रधानाय पुरुषस्य ये ईशाः सु
खदुःखादिप्रापकाः कालकर्मस्वभावादयस्तेषां प्रधानाय नियंत्रे कुतः ब्रह्मणे

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे पु
रुषेशप्रधानाय ब्रह्मणेनंतशक्तये २९

परिपूर्णाय किंच अनंताः शक्तयो यस्य यद्वा अनंता मायाख्या शक्तिर्यस्य तस्मै अथ
वा प्रधानं प्रकृतिः तत्प्रवर्त्तकः पुरुषः ईशः कालः एतत्त्रितयात्मने ब्रह्मणे वक्ष्यति च
भगवान्प्रकृतिर्य्यस्योपादानमाधारः पुरुषः परः सतोभिव्यंजकः कालो ब्रह्म त
त्त्रितयं त्वहमिति २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वप्रत्ययहेतुत्वमभिव्यंजयन्स्तौति नमस्तेइति वासुदेवायचित्ताधिष्ठात्रेसर्व
भूतक्षयायक्षयः आश्रयः अहंकारश्चप्राणिनामाश्रयः ततश्चाहंकाराधिष्ठात्रे

नमस्तेवासुदेवायसर्वभूतक्षयायच हृषीकेश
नमस्तुभ्यंप्रपन्नंपाहिमांप्रभो ३० इतिश्रीभाग
वतेमहापुराणेद० मस्कंधेचत्वारिंशोध्यायः॥४०॥

संकर्षणायेत्यर्थः हृषीकेशेतिबुद्धिमनसोरधिष्ठात्रेप्रद्युम्नानिरुद्धयोरेकीकृत्य
ग्रहणंशरणागतंमांपाहीतिप्रार्थना॥३०॥इतिदशमेटीकायांचत्वारिंशोध्यायः॥४०॥ ३२०

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकचत्वारिंशकेऽह नृरजकं प्रविशन्पुरीं ततो वरानदात्तुष्टः सुदाम्नो वायकस्य च
१ स श्वफल्कमक्रूरमनःप्रमोयस्वधामसंदर्शनसत्कपातः स्वराजधानीं मथुरामपश्य

शुकउवाच स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः भूयः समाहरत्कृष्णो नटो
नाट्यमिवात्मनः १ सोपि चांतर्हितं वीक्ष्य जलादुन्मज्य सत्वरः कृत्वा चावश्यकं स
र्वं विस्मितो रथमागमत् २ तमपृच्छद्धृषीकेशः किं ते दृष्टमिवाद्भुतं भूमौ वियति तो
ये वा तथा त्वां लक्षयामहे ३ ॥अक्रूरउवाच॥ अद्भुतानीह यावंति भूमौ वियति वा ज
जले त्वयि विश्वात्मके तानि किं मे दृष्टं विपश्यतः ४

इत्यलंकृतानंतमहोत्सवाख्यां २ भू
मौ वियति जले वा यावंत्यद्भुतानि तानि त्वय्येव संति तं च त्वां पश्यतो मे किमद्भुतमदृ
ष्टं अपि तु सर्वं दृष्टमित्यर्थः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुमत्प्रासेः पूर्वमेवत्वं विस्मितमुखोलक्षितोसि अतो भूमौ वियति जले वा किमद्भुतं
दृष्टंवदेति अतआह यत्राद्भुतानीति यत्रत्वयि सर्वाण्यद्भुतानि संति तंत्वामिह पश्य

यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले तंत्वानुपश्यतो ब्रह्मन् किंमे दृष्टमिहाद्भुतं
५ इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः मथुरामनयद्रामं कृष्णं चैव दिनात्यये
६ मार्गे ग्रामजना राजंस्तत्रतत्रोपसंगताः वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः
७

तो मे अन्यत्र भूम्यादौ किमद्भुतं दृष्टं त्वां विना न तत्र किंचिदद्भुतमित्यर्थः ब्रह्मन् हे पर
मेश्वरे त्यर्थः ब्रह्मेति वा पाठः ५ गांदिनीसुतोऽक्रूरः ६ दृष्टिं नाददुः पश्यंत एव स्थि
ताइत्यर्थः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामकृष्णागमनं प्रतीक्षमाणाः स्थिता इत्यर्थः ८ प्रश्रितं नीविनीतं ९ स्वगृहं च प्रविशातं

तावद्व्रजौकसस्तत्र नंदगोपादयोऽग्रतः पुरोपवनमासाद्य प्रतीक्षंतोऽवतस्थिरे ८ ता
न्समेत्याह भगवान् अक्रूरं जगदीश्वरः गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ९
भवान्प्रविशतामग्रे सहयानः पुरीं गृहं वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीं १०
अक्रूर उवाच ॥ नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो त्यक्तुं नार्हसि मां नाथ भक्तं ते
भक्तवत्सल ११ आगच्छ याम गेहान्नः सनाथान् कुर्वधोक्षज सहाग्रजः सगोपालैः
सुहृद्भिश्च सुहृत्तम १२ पुनीहि पादरजसा गृहान्नो गृहमेधिनां यच्छौचेनानुतृप्यंति पि
तरः साग्नयः सुराः १३

अवमुच्य उत्तार्य विश्राम्येत्यर्थः १० ११ साग्रजः सहगोपालैरित्य
र्थः १२ यच्छौचेन यस्य पादरजसः क्षालनोदकेन गृहांगणस्थितेन १३ रामकृष्णपरमा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰पु॰
३२२

श्लोक्यः पुण्यकीर्त्यर्हः एकांतभक्तानां या गतिस्तां च लेभे १४ अथ पुनन् पवित्रितव
स्यः याभिरङ्गैः स्वर्गे प्राप्ताः १५ प्रार्थयमानो नमस्करोति देवदेवेति अतः पर मंत्रस्थे

अवनिज्यांघ्रियुगलमासीत् श्लोक्यो बलिर्महान् ऐश्वर्यमतुलं लेभे गतिं चैकांति
नां तु या २४ आपस्तेंघ्रवने जन्यस्त्रीँल्लोकाञ्शुचयो पुनन् शिरसाधत्तयाः शर्वः स्व
र्याताः सगरात्मजाः २५ देवदेवजगन्नाथ पुण्यश्रवणकीर्त्तन यदुत्तमोत्तमश्लोक
नारायण नमोस्तु ते १६ श्रीभगवानुवाच आयास्ये भवतो गेहमहमार्यसमन्वितः
यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं ॥ योनास्तीति मत्वा बहुधा संबोधयति १६
आहोतावयदुचक्रायद्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा सुहृदां प्रियं वितरिष्यामि

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामकृष्णावानीताविति स्वकृतंकर्मविधेयसमर्प्यैति १८ गोपैःपरिवारितःप्राविशत् १९
श्रीकृष्णदृष्टांपुरीमनुवर्णयति चतुर्भिःददर्शतामिति स्फाटिकानितुंगानिगोपुरा
णिपुरद्वाराणिचयस्यांतां बृहंतिहेममयानिकपाटानितोरणानिचयस्यांतां ताम्रंच

एवमुक्तोभगवतासोक्रूरोविमनाइव पुरींप्रविश्यकंसायकर्मावेद्यगृहंययौ १८ अ
थापराह्णेभगवान्कृष्णःसंकर्षणान्वितः मथुरांप्राविशद्गोपैर्दिदृक्षुःपरिवारितः १९ पै२
ददर्शतांस्फाटिकतुंगगोपुरद्वारांबृहद्धेमकपाटतोरणां ताम्रारकोष्ठांपरिखादुरास
दामुद्यानरम्योपवनोपशोभितां २०

आरःआरकूटश्चतन्मयाःकोष्ठाधान्यागाराश्च
शालादयोयस्यांतां परिखाःपरितःखातगर्त्तास्ताभिर्दुरासदांदुर्गमां उद्यानानिदू
रस्थानिवनानिरम्याण्युपवनानिचनिकटानितैरुपशोभितां २० नमोभगवतेवासु॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०स्क०
३२३

सौवर्णाः शृंगाटकाश्चतुष्पथाः हर्म्याणि धनिनां गृहाणि च निष्कुटा गृहोच्चिता आरामा
श्चैतैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिः उपवेशनस्थानैरन्यैश्च भवनैः
गृहैरुपस्कृतां अमलः स्फटिकः हरितः मरकतः वैडूर्यादिरत्नैर्जुष्टेषु वलभ्यादिषु आ

सौवर्णशृंगाटकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां वैडूर्यव
ज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु २१ श्रीरामकृष्ण ७

विष्टैः उपविष्टैः पारावतैर्बर्हिभिश्च नादितां तत्र वलभ्यः गृहपुरोभागेषु वक्रदा
रुच्छादनानि वेदयः वलभीनां अधोदेशो विरचिता वद्धंभवेदिकाः २१ श्रीकृष्णाय

राम
३२३

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

जालामुखरंध्राणिगवाक्षछिद्राणि कुट्टिमानिमणिबद्धाभूमयः तेषुपरिरथ्यारा

सुष्टेषुजालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादितां सं
सिक्तरथ्यापणमार्गचत्वरांप्रकीर्णमाल्याकुरलाजतंडुलां २२

जमार्गाः आपणाः पण्यवीथयः मार्गाअन्येचत्वराणिअंगणानिसंसिक्तानिर
थ्यादीनियस्यांतां प्रकीर्णमाल्यादयोयस्यांतां २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ दू॰
३२४

तथास्वलंकृतानिद्वाराणियेषांतेगृहायस्यांतां कैः आपूर्णैः कुंभैर्दधिचंदनेनचउक्षि
तैः सिक्तैः प्रसूनानांदीपानांचावलयोयेषुतैः वृंदैः फलगुच्छैरुपलक्षितारंभाः क्रमुका
स्तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिकाविनास्ति विस्तारपट्टवस्त्राणित

आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः सरं
दरंभाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहांसपट्टिकैः २३

ता॰ त्सहितैस्तत्रेयंरीतिः द्वारेषुभयस्तंडुलानांउपरिकुंभास्तदुपरितः प्रसूनावलयः कंठे
पट्टिकामुखेचूतादिपल्लवाः तदुपरिपात्रांतरेदीपावलयस्तत्संनिधौरंभाः क्रमुकाः
केतवस्तोरणानिचेति २३ ३२४

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरदेवानांवर्त्मनाराजमार्गेणतांपुरींप्रविष्टौद्वितीयांतं २४ औत्सुक्यमेवाह द्वयेनका
श्चिदितिविपर्यक्रविपरीतंधृतान्यानिवस्त्राणिभूषणानिचयाभिस्ताःयुगलेषुधार्येषु

तांसंप्रविष्टौवसुदेवनंदनौवृतौवयस्यैर्नरदेववर्त्मना द्रष्टुंसमीयुस्त्वरिताः
पुरस्त्रियोहर्म्याणिचैवारुरुहुर्नृपोत्सुकाः २४ काश्चिद्विपर्यक्धृतवस्त्रभूष
णाविस्मृत्यचैकंयुगलेषुयापराः कृतैकपत्रश्रवणैकनूपुरानाक्ताद्वितीयं
त्वपराश्चलोचनं २५

कुंडलकंकणादिषुएकंविस्मृत्यसमीयुःकृतमेकमेवपत्रंययोस्तेश्रवणेयासांमेकमे
वनूपुरंचरणाभरणंयासांताश्चताश्चेनांक्ताअनंक्ताएकस्मिन्नेवलोचनेअंजनंकज्ज
लंनिधायैव २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्भोजनंस्यक्ता अभ्यज्यमानाः सखिभिः क्रियमाणतैलाभ्यंगाः अकृतस्नानाः अपोह्य
निरस्य २६ प्रगल्भाः याः लीलास्ताभिर्हसितानि अ बलोकनानि निरीक्षणानि

अस्नांत्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः स्व
पंत्यउत्थाय निशाम्य निःस्वनं प्रपाययंत्योर्भमपोह्य मातरः २६ मनां
सितासामरविंदलोचनः प्रगल्भलीलाहसितावलोकनैः जहारमत्त
द्विरदेंद्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवं २७ ५

चैतैः श्रियं रमयतीति श्रीरमणः तेनात्मना वपुषा तासां दृशां उत्सवं ददन्मनांसि जहार २७

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुहुःश्रुतत्वात्प्रुतचेतसःसधरंतंदृष्ट्वातस्यप्रेक्षणंचोत्स्मितंचतदेवसुधातयाउक्षणंसे
चनंतेनलब्धोमानोयाभिस्ताः दृशाउद्घाटितेननेत्रद्वारेणआत्मनिमनसिलब्धंप्राप्तंपरिष

दृष्ट्वामुहुःश्रुतमनुद्रुतचेतसस्तंत॰प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः आनंदमूर्त्ति
मुपगुह्यदृशात्मलब्धंहृष्यत्त्वचोजहुरनंतमरिंदमाधिं २८ प्रासादशिखरारूढाःप्रीत्यु
त्फुल्लमुखांबुजाः अभ्यवर्षन्सौमनस्यैःप्रमदाबलकेशवौ २९ दध्यक्षतैःसोदपात्रैः
स्रग्गंधैरभ्युपायनैः तावानर्चुःप्रमुदितास्तत्रतत्रद्विजातयः ३

ज्यतदप्राप्ति जनित
मनंतमाधिंव्यथांजहुः हेअरिंदमनिर्जितकामेतिसंबोधनंश्रृंगाररसेनिमग्नोमाभूदि
ति २८ २९ सौमनस्यैःशोभनकुसुमसमूहैःशोभनमनोभावैर्वा ३० नमोभगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौराः पुरस्त्रियः ३१ रजकोवस्त्रनिर्णेजकः सएववस्त्राणांरंगमपिकुर्वन्‌रंगकारः ३२

॥ ऊचुःपौराअहोगोप्यस्तपःकिमचरन्महत्‌ यावेतावनुपश्यंतिनरलोकमहोत्स
वौ ३१ रजकंकंचिदायांतंरंगकारंगदाग्रजः दृष्ट्वायाचतवासांसिधौतान्युत्तमानि
च ३२ देह्यावयोःसमुचितान्यंगवासांसिचार्हतोः भविष्यतिपरंश्रेयोदातुस्तेना
त्रसंशयः ३३ सयाचितोभगवतापरिपूर्णेनसर्वतः साक्षेपंरुषितःप्राहभृत्योराज्ञः
सुदुर्मदः ३४ ईदृशान्येववासांसिनित्यंगिरिवनेचराः परिधत्तकिमुद्वृत्ताराजद्रव्या
ण्यभीप्सथ ३५

रुषितः कुपितः ३३ ३४ हेउद्धताःगिरौवनेचरथनित्यंतेयूयंपरिधत्तेतिसंभावना
यांलोट्‌ अभीप्सथप्रार्थयध्वं ३५ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजकुलानिराजकीयाः लुंपंतिनिःस्वंकुर्वंति ३६ ३७ वासःशोकोन्वस्त्रपुटका

॥ यातास्शुबालिशगमैवंप्रार्थ्यंयदिजिजीविषा बध्नंतिघ्नंतिलुंपंतिदृप्तंरा
जकुलानिहि ३५ एवंविकत्थमानस्यकुपितोदेवकीसुतः रजकस्यकराग्रेण
शिरःकायादपातयत् ३७ तस्यानुजीविनःसर्वेवासःकोशान्विसृज्यवै दुद्रुवुः
सर्वतोमार्गंवासांसिजगृहेच्युतः ३८ वसित्वात्मप्रियेवस्त्रेकृष्णःसंकर्षण
स्तथा शेषाण्यादत्तगोपेभ्योविसृज्यभुविकानिचित् ३९ ततस्तुवायकःप्रीत
स्तयोर्वेषमकल्पयत् विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ४० ६

न् ३८ ३९ वायकः तंतुवायविशेषः वेषंअलंकारंचैलेयैर्वस्त्रमयैराकल्पैर्भूष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्वणिउत्सवे ४१ इहलोकेपरमांश्रियंचबलंचऐश्वर्यंचस्मृतिंचइंद्रियंचतस्याद्वं

नानावेषणलक्षणाभ्यांकृष्णरामौविरेजतुः स्वलंकृतौबालगजौपर्वणीवसितेत
रौ ४१ तस्यप्रसन्नोभगवान्प्रादात्सारूप्यमात्मनः श्रियंचपरमांलोकेबलै
श्वर्यस्मृतींद्रियं ४२ ततःसुदाम्नोभवनंमालाकारस्यजग्मतुः तौदृष्ट्वासससमु
त्थायननामशिरसाभुवि ४३ तयोरासनमानीयपाद्यंचार्घ्यार्हणादिभिः पूजां
सानुगयोश्चक्रेस्रक्तांबूलानुलेपनैः ४४ प्राहनःसार्थकंजन्मपावितंचकुलं
प्रभो पितृदेवर्षयोमह्यंतुष्टाह्यागमनेनवां ४५ भवंतौकिलविश्वस्यजगतः
कारणंपरं अवतीर्णाविहांशेनक्षेमायचभवायच ४६ ४२ ४३ ४४ ४५

प्रादात्॥

क्षेमायअभयायभवायउद्भवाय ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगतात्मनोरिति च॥

रजकवधेनवायकानुग्रहेणचयुवयोर्विषमदृष्टितयाअनीश्वरतानाशंकनीयेत्या
हनहिवामिति अत्रहेतुःसमयोरितिअत्रापिहेतुद्वयंसुहृदोरिति ४७ इत्यभिप्रे

नहिवांविषमादृष्टिःसुहृदोर्जगदात्मनोः समयोःसर्वभूतेषुभजंतंभज
तोरपि ४७ तावाज्ञापयतांभृत्यंकिमहंकरवाणिवां पुंसोत्यनुग्रहोह्येष
भवद्भिर्यन्नियुज्यते ४८ इत्यभिप्रेत्यराजेंद्रसुदामाप्रीतमानसः श
स्तैःसुगंधैःकुसुमैर्मालांविरचितांददौ ४९ ताभिःस्वलंकृतौप्रीतौकृष्ण
रामौसहानुगौ प्रणतायप्रपन्नायददतुर्वरदौवरान् ५०

त्यइत्येवंविज्ञापयन्नभिप्रेत्यतन्मतंज्ञात्वा ४९ ५० श्रीरामचंद्रायनमः श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५१ अन्वयवर्धिनीं वंशोवृद्धिमतीमित्यर्थः अप्रार्थितं श्रीप्रभृतिकं च दत्वा ततो
निर्जगामेति स्वैरं चरन्मधुपुरे रजकं निहत्य कृष्णः प्रदाय च वरानथ वायकाय

सोपि वव्रे चलां भक्तिं तास्मिन्नेवाखिलात्मनि तद्भक्तेषु च सौहार्दं भूतेषु च
दयां परां ५१ इति तस्मै वरं दत्वा श्रियं चान्वयवर्धिनीं बलमायुर्यशः की
र्त्तिं निर्जगाम सहाग्रजः ५२ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे
रवे नामएकचत्वारिंशोध्यायः ॥ ४१ ॥

मालाकृते समनुकंप्य च कारकुब्जामज्जीं धनु
श्च सहसा नमयन् बभंज ५२ इति श्रीभागवते ॥ १० ॥ कायां एकचत्वारिंशोध्याय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीकृष्ण॥

द्विचत्वारिंशके कुब्जोन्नमनं धनुषो भिदा वधस्तद्रक्षिणां कंसारिष्टेरंगोत्सवादिच

१ अंगविलेपाश्चंदनादयो गृहीतान्यंगविलेपभाजनानि यया तां रसप्रदः सुखप्रदः

श्रीशुक उवाच अथ व्रजन्राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनां

विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन्रसप्रदः १ कात्वं वरोर्वे

तदु हानुलेपनं कस्यांगने वा कथयस्व साधु नः देह्यावयोरंगविलेपमु

त्तमं श्रेयस्ततस्ते न चिराद्भविष्यति २

१ हे अंगने हे वरोरु इति सोपहासं संबोध्य पृच्छति त्वं का एतदनुलेपनं कस्य वा

गृह इति निपातो भ्रूविक्षेपयुक्ते वितर्के अस्मत्सेवा सद्यः फलेत्याह न चिरादिति २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिस्त्रः ग्रीवोरःकटयः वक्राइति च त्रिवक्रेति नाम यस्याः सा अनुलेपसाधनक्रिया यां कंसस्य बहुमता दास्यस्मि ३ रूपं च अंगसौष्ठवं पेशलं च सौकुमार्यं माधुर्यं च

सैरंध्र्युवाच दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि। मद्भावितं भोजपतेरतिप्रियं विना युवां कोन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसितालापवीक्षितैः धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनं ४

रसिकता हसितं च आलापाश्च वीक्षितं च तैः धर्षितात्मा मोहितचित्ता सांद्रं घनं ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ववर्णेतरशोभिना रामकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णस्तेन शोभितुं शीलं
यस्य तेन संप्राप्तपरभागेन संप्राप्तः परो नाभेरुपरितनो भागो येन सः संप्राप्त
परभागः शोभातिशयो येनेति वा तेनानुरंजितौ ५ स्वदर्शनस्य यः फलं दर्शयन्

ततस्तावंगरागेण स्ववर्णेतरशोभिना संप्राप्तपरभागेन शुशुभातेऽनुरंजितौ ५
प्रसन्नो भगवान्कुब्जां त्रिवक्रां रुचिराननां ऋज्वीं कर्तुं मनश्चक्रे दर्शयन्दर्शने फलं ६
पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्युत्तानपाणिना प्रगृह्य चुबुकेऽध्यात्ममुदनीनमदच्युतः

६ तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीड्य द्वे अंगुल्यावुत्ताने उन्नते यस्मिन्पाणौ ते
न चुबुके मुखस्याधोभागे धृत्वाऽध्यात्मं देहमुन्नमयामास ७ नमो भगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदेवऋज्जुसमानमंगंयस्याः वृहत्यौश्रोणीपयोधरौचयस्याःसामुकुंदस्पर्शना
दिति मुख्यंकारणं ८ आधिकर्षणं मनःपीडाशमनंकंसवधेनसाधितः अर्थः

सातदृज्जुसमानांगीबृहछ्रोणिपरोधरा मुकुंदस्पर्शनात्सद्योबभूवप्रमदोत्तमा
८ ततोरूपगुणोदार्य्यसंपन्नाप्राहकेशवं उत्तरीयांतमाकृष्यसमयंतीजातहृछ्रया
९ एहिवीरगृहंयामोनत्वांसक्तुमिहोत्सहे त्वयोन्माथितचित्तायाःप्रसीदपुरुष
र्षभ १० एवंस्त्रियायाच्यमानःकृष्णोरामस्यपश्यतः मुखंवीक्ष्यानुगानांचप्रह
सस्तामुवाचह ११
सुहृदांप्रयोजनंयेनसः अगृहाणामकृतदाराणांपांथानांप्रवासिनांपरंअयनमा
श्रयस्तं ११

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुरयागिरातांप्रस्थाप्यव्रजनवणिक्पथैः वणिग्भिरर्चितः १२ लेख्याश्चित्रन्यस्ताख
मूर्त्तयोयासांताः १४

एष्यामितेगृहंसुभ्रुपुंसामाधिविकर्षणं साधितार्थोगृहाणां
नः पांथानांलंपरायणं १२ विसृज्यमाध्व्यावाण्यातांव्रजनुमार्गेवणिक्पथैः नानोपा
यनतांबूलस्रग्गंधैः साग्रजोर्च्चितः १३ तद्दर्शनस्मरक्षोभादात्मानंनाविदन्स्त्रियः
विस्रस्तवासः कबरवलयालेख्यमूर्त्तयः १४ ततः पौरान्पृच्छमानो धनुषःस्थानम
च्युतः तस्मिन्प्रविष्टोदद्दृशे धनुरैंद्रमिवाद्भुतं १५ पुरुषैर्बहुभिर्गुप्तम र्चितंपरमर्द्धि
मत् वार्यमाणोनृभिः कृष्णः प्रसह्य धनुराददे १६ करेणवामेनसलीलमुद्धृतंस
ज्यंचकृत्वा निमिषेणपश्यतां नृणांविकृष्य प्रबभंजमध्यतोयथेक्षुदंडं मदकर्युरुक्रमः

धनुर्मखशालांपृच्छन् १५ प्रसह्यबलात् १६ निमिषेणातिशीघ्रंमदकरीमत्तहस्ती १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृह्यतांवध्यतामिति वदंतोजिघृक्षंतः आवृतवंतः १९ नकेवलंक्रुद्धौकिंतुभग्न

धनुषोभज्यमानस्यशब्दःखंरोदसीदिशः पूरयामासयंश्रुत्वाकंसस्त्रासमु
पागमत् १८ तद्रक्षिणःसानुचराःकुपिताआततायिनः गृहीतुकामाआव
व्रुर्गृह्यतांवध्यतामिति १९ अथतान्दुरभिप्रायान्विलोक्यबलकेशवौ क्रु
द्धौधनुषआदायशकलेतांश्चजघ्नतुः २० बलंचकंसप्रहितंहत्वाशा
लामुखात्ततः निष्क्रम्यचेरतुर्हृष्टौनिरीक्ष्यपुरसंपदः २१

स्यधनुषःशकलेगृहीत्वाजघ्नतुश्चेति २० परतःप्रातर्गंतव्यमितिशालामुखादे
वपुनःनिष्क्रम्य २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेजः प्रभावंप्रागल्भ्यंधृष्टतां २२ शकटंशकटावमोचनस्थानं २३ मुकुंदस्यविग
मेव्रजान्निर्गमनसमयेयाआशिषः आशासतसुखप्रभातारजनीयंअयध्रु
वं तत्रदृशोभविष्यतरसादिचयउक्तवत्यः ताःकृताःसत्याःबभूवुःपुरुष

तयोस्तदद्भुतंवीर्यंनिशम्यपुरवासिनः तेजःप्रागल्भ्यंरूपंचमेनिरेविबुधोत्तमौ
२२ तयोर्विचरतोःस्वैरमादिसोस्तमुपेयिवान् कृष्णरामौवृतौगोपैःपुराच्छक
टमीयतुः २३ गोप्योमुकुंदविगमेविरहातुरायाआशासताशिषकृताम्मधुपू
र्यभूवन् संपश्यतांपुरुषभूषणगात्रलक्ष्मींहित्वेतरान्नुभजेतश्चकमेऽयनंश्रीः २४ ज

भूषणस्यश्रीकृष्णस्यगात्रस्यदेहस्यलक्ष्मीशोभांकथंभूतस्यगात्रस्यतुअहोरं

तरान्ब्रह्मादीन्हित्वायदपतंआश्रयंश्रीःकामयामासयांगात्रलक्ष्मींइतिवा॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवनि
क्तं क्षालितं अंघ्रियुगलं ययोस्तौ क्षीरमिश्रमन्नं भुक्त्वा सुखं न्यवसतां २५ परं
केवलं गोविंदरामयोर्विक्रीडितं तत्तु न तु पराक्रमः कश्चित् २६ उभय यथास्वप्न

अवनिक्तांघ्रियुगलौ भुक्त्वा क्षीरोपसेचनं ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंस
चिकीर्षितं २५ कंसस्तु धनुषो भंगं रक्षिणां स्वबलस्य च वधं निशम्य गोविंद
रामविक्रीडितं परं २६ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः बहून्यचष्टो
भयथा मृत्योर्दौत्यकराणि च २७

जागरितभेदेन प्रत्येकं मृत्योर्दौत्यकराणि च
तथा च मंत्रः इक्ष्वाउँक [illegible] आप [illegible] हिरण्याक्षो अयोमुखः रक्षसां दूत आगत
इत्यादि तथा यदेतद्भ्रातान्यद्वा विश्वदेवीं वाचं वदसी सारिश्व २७

ल्

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानिदर्शयतिश्लोकद्वयेन जलादौप्रतिरूपेदृश्यमानेपिस्वशिरसस्तत्रादर्शनं
असत्यपिद्वितीयेचक्षुषोंनथानेअंगुल्यादौज्योतिषांचंद्रादीनांद्वित्वं २८ छा

अदर्शनंस्वशिरसःप्रतिरूपेचसत्यपि असत्यपिद्वितीये
चद्वैरूप्यंज्योतिषांतथा २८ छिद्रप्रतीतिश्छायायांप्राण
घोषानुपश्रुतिः स्वर्णप्रतीतिर्वृक्षेषुस्वपदानामदर्शनं २९

यायांप्रतिबिंबेछिद्रप्रतीतिःपिहितकर्णपुटस्ययोःतः श्रूयमाणोध्वनिःसप्रा
णघोषस्तस्याश्रवणं वृक्षेषुस्वर्णवर्णप्रतीतिःरजःकर्दमादिषुस्वपदानामदर्श
नं २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतानिजागरितानिदुर्निमित्तानिस्वप्नान्याह स्वप्नइति प्रेतैर्मृतैः परिष्वंगः स्व
रमारुह्ययानं विषभक्षणं नलदमाली जपाकुसुममालीयायात्इतियत् नद

स्वप्नेप्रेतपरिष्वंगः खरयानंविषादनं यायान्नलदमाल्येकस्तैलाभ्यक्तो
दिगंबरः ३० अन्यानिचेत्थंभूतानिस्वप्नजागरितानिच पश्यन्मरण
संत्रस्तोनिद्रांलेभेनचिंतया ३१ व्युष्टायांनिशिकौरव्यसूर्येचाद्भ्यःस
मुत्थिते कारयामाससवैकंसोमल्लक्रीडामहोत्सवं ३२

ध्येकं दुर्निमित्तमिति ३०
कष्टेनकथंचिल्लभ्यमानायांपुनःसूर्येचाद्भ्यःसमुत्थितेइति तथाचश्रुतिः यत्रह्या
न्महतोर्णवात् विभ्राजमानःसलिलस्यमध्यात्समाम्रषभोलोहिताक्षःसूर्योवि
पश्चिन्मनसापुनात्विति यथोपजोषंयथासुखं ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ भिन्नोविदीर्णोंजनचयःउपमायस्यतंअतिकृष्णमित्यर्थः तप्ततामवत्छिखाश्मश्रु

ततोमेध्यमयंवर्षंवल्वलेनविनिर्मितं अपश्यद्यज्ञशालायांसोन्वद्दश्यतस्मूलधृक्
२ तंविलोक्यबृहत्कायंभिन्नांजनचयोपमं तप्ततामृशिखाश्मश्रूदंष्ट्रोग्रभ्रुकु
टीमुखं ३ सस्मारमुशलंरामःपरसैन्यविदारणं हलंचदैत्यदमनंतेतूर्णमुपत
स्थतुः ४ तमाकृष्यहलाग्रेणबल्वलंगगनेचरं मुशलेनाहनत्क्रुद्धोमूर्ध्निब्रह्म
द्रुहंबलः ५ सोपतद्भुविनिर्भिन्नललाटोसृक्समुत्सृजन् मुंचन्नार्त्तस्वरंशैलोय
थावज्रहतोरुणः ६ संस्तुत्यमुनयोरामंप्रयुज्यावितथाशिषः अभ्यषिंचन्म
हाभागावृत्रघ्नंविबुधायथा ७ णिचयस्यतं दंष्ट्राभिउग्रंमुखंयस्यतं २ अरुणोरुधि
रेणदैत्यःशैलोधातुभिः ६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीयोधामानि अम्लानिपंकजानियस्यांतां न

८ किंतत्सरः यतइति आस्रवत्उद[गा]त १ अनुस्रोतेअनुलोमतः पुलहाश्रमंहरि

वैजयंतींददुर्मलांश्रीधामाम्लानपंकजां रामायवाससीदिव्येदिव्यान्याभरणा
निच ८ अथतैरभ्यनुज्ञातःकौशिकीमेत्यबाल्मणैः स्नात्वासरोवरमगायतःसर
युरास्रवत् १ अनुस्रोतेनसरयूंप्रयागमुपगम्यसः स्नात्वासंतर्प्यदेवादीन्जगा
मपुलहाश्रमं १० गोमतींगंडकींस्नात्वाविपाशांशोणआप्लुतः गयांगत्वापितॄनि
ष्ट्वागंगासागरसंगमं ११ उपस्पृश्यमहेंद्राद्रौरामंदृष्ट्वाभिवाद्यच सप्तगोदावरीं
वेणांपंपांभीमरथींततः १२

ष्टत्रं १० गोमत्यांगंडक्यांविपाशायांचस्नात्वाशोणेचआप्लुतः इष्ट्वासंपूज्य ११ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीं

श्रीशैलंश्रीपर्वतं १३ ... कांचीपु १४ १७

स्कंदंदृष्ट्वाययौरामः श्रीशैलंगिरिशालयं द्रविडेषुमहापुण्यंदृष्ट्वाद्रिवेंकटंप्रभुः १२ का
मकोष्णीपुरींकांचींकावेरींचसरस्वतीं श्रीरंगारव्यंमहापुण्यंयत्रसंनिहितोहरिः १४
ऋषभाद्रिंहरेःक्षेत्रंदाक्षिणांमथुरांतथा सामुद्रंसेतुमगमत्महापातकनाशनं १५
तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्योहलायुधः कृतमालांताम्रपर्णीमलयंचकुलाचलं
तत्रागस्त्यंसमासीनंनमस्कृत्याभिवाद्यच योजितस्तेनचाशीर्भिरनुज्ञातोगतोर्ण
वं १७ दाक्षिणंतत्रकन्याख्यांदुर्गांदेवींददर्शसः ततःफाल्गुनमासाद्यपंचाप्सर
समुत्तमं १८

दाक्षिणमर्णवं फाल्गुनं अनंतपु रंपंचाप्सरसं १८ श्रीकृष्णपरमा

सरः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्पृशत् अस्पर्शयत् केरलादीन्देशान् १९ द्वीपं अयनं यस्याः तां २० २२ विनशनं

विष्णुः सन्निहितो यत्र स्नात्वाऽस्पर्शद्दिवा युतं ततोऽभिव्रज्य भगवान्केरलांस्तु त्रिगर्त्त
कान् १९ गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धुर्जटेः आर्यां द्वैपायनीं दृष्ट्वा सूर्पारिकं स्म
गाद्बलः २० तापीं पयोष्णीं निर्विंध्यां उपस्पृश्याथ दंडकं अविश्य रेवां अगमत् यत्र मा
हिष्मती पुरी २१ मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत् श्रुत्वा द्विजैः कथ्यमानं कु
रुपांडवसंयुगं २१ सर्वराजन्यनिधनं भारं मेने हृतं भुवः २२ स भीमदुर्योधनयोर्गदा
भ्यां युध्यतोर्मृधे २२ वारयिष्यन्विनशनं जगाम यदुनंदनः २३ युधिष्ठिरस्तु तं दृष्ट्वा य
मौ कृष्णार्जुनावपि अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः २४

कुरुक्षेत्रं २६ विवक्षुः वक्तुमिच्छुः किं वदिष्यतीति भियात् तूष्णीं आसन्निति २४ श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५ २६ अन्यःपराजयोवारणःसंग्रामः २७ अर्थवद्वाक्यं २८ दिष्टंप्राचीनंकर्म स

गदापाणीउभौदृष्ट्वासंरब्धौविजयैषिणौ मंडलानिविचित्राणिचरंताविदमब्रवीत्
२५ युवांतुल्यबलौवीरौहेराजन्हेवृकोदर एकंप्राणाधिकंमन्यउतैकंशिक्षयाधि
कं २६ तस्मादेकतरस्येहयुवयोःसमवीर्ययोः नलक्ष्यतेजयोन्योवाविरमत्वफलो
रणः २७ नतद्वाक्यंजगृहतुर्बद्धवैरौनृपार्थवत् अनुस्मरंतावन्योन्यंदुरुक्तंदुःकृता
निच २८ दिष्टंतदनुमन्वानोरामोद्वारवतींययौ उग्रसेनादिभिःप्रीतैर्ज्ञातिभिःसमुपा
गतः २९ तंपुनर्नैमिषंप्राप्तमृषयोयाजयन्मुदा क्रत्वंगंक्रतुभिःसर्वैर्निवृत्ताखिलवि
ग्रहं ३० तेभ्योविशुद्धंविज्ञानंभगवान्व्यतरद्विभुः येनैवात्मन्यदोविश्वमात्मानंविश्वगं १५
विदुः ३१

मुपागतःसंगतः २९ क्रत्वंगंयज्ञमूर्तिं ३० आत्मनिअधिष्ठानेविश्वगंसर्वानुस्यूतंयेन
वविदुःपरस्यंतितद्विशुद्धविज्ञानंव्यतरत्‌अदात् ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

३२ ३४ इतिएकोनाशीतितमः ॥७९॥ अथाशीतितमेऽध्यायः श्रीदामानंगृहागतं संपूज्या एच्छदर्थेसुगुरुवासकथांमुदा १ सुरारिमारकोहरिःपुराचकारशंसतां अतःपरंविनेव

स्वपल्यावभृथस्नातोज्ञातिबंधुसुहृद्वृतः रेजेस्वज्योत्स्नयेवेंदुः सुवासाःसुष्ठ्वलंकृतः ३२ ईदृग्विधान्यसंख्यानिबलस्यबलशालिनः अनंतस्याप्रमेयस्यमायामर्त्यस्यसं तिहि ३३ योनुस्मरेत्रामस्यकर्माण्यद्भुतकर्मणः सायंप्रातरनंतस्यविष्णोःसदयि तोभवेत् ३४ इतिश्रीभा॰द॰ व थं बल्वलवधोनामैकोनशीतितमोध्यायः ॥७९॥७ राजोवाच ॥ भगवान्यानिचान्यानिमुकुंदस्यमहात्मनः वीर्याण्यनंतवीर्यस्यश्रोतुमि च्छामहेप्रभो १ नंनिर्विण्णोपकारमाचरन् २ रामचरितानिश्रुत्वापुनर्मुकुंदवीर्याणिएच्छ ति हेभगवन्श्रोतुमिच्छामीत्यन्वयः १

२०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तमश्लोकस्यसत्यः मनोहराः विषयवैलक्षण्यजनिकाः कथाविशेषज्ञः सारवित् विष
यः विषादं यासः २ कथाश्रवणं स्तुवन्दृष्टांततया ऽन्यां तार्थानाह सावागिति येनतत्कर्म

कोनुश्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः विरमेतविशेषज्ञोविषणः
काममार्गणैः २ सावाग्ययातस्यगुणान्गृणीतेकरौचतत्कर्मकरौमन
श्च स्मरेद्वसंतांस्थिरजंगमेषुश‍ृणोतितत्पुण्यकथाः सकर्णः ३

कर्तारौनावेवकरौनदेवमनः यत्स्थिरजंगमेषुवसंतंतंस्मरेत् यस्तस्यपुण्याकथाः श‍ृ
णोतिसएवकर्णः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उभयलिंगंस्थिरंजंगमंचतस्यैवंलिंगमितिमत्वाभानमेन्नदेवशिरः नदेवतस्यलिंगामि
त्येवयस्पश्यति नदेवचक्षुः तान्येवांगानियानिपादोदकंभजंतीति ४ तथाविधाकुचै

शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतितद्धिचक्षुः अंगानिविष्णोरथतज्जना
नांपादोदकंयानिभजंतीनित्यं ४ ॥सूतउवाच॥ विष्णुरातेनसंपृष्टोभगवान्बादरा
यणिः वासुदेवेभगवति निमग्नहृदयोब्रवीत् ५ ॥श्रीशुकउवाच॥ कृष्णस्यासीत्सखा
कश्चिद्ब्राह्मणोब्रह्मवित्तमः विरक्तइंद्रियार्थेषुप्रशांतात्माजितेंद्रियः ६ यदृच्छयोप
पन्नेनवर्तमानोगृहाश्रमी तस्यभार्याकुचैलस्यक्षुत्क्षामाचतथाविधा ७ श्रीकृष्णपर॰ मा

लाकिंचक्षुत्क्षामा यत्किंचित्संपन्नमन्नंतस्मैपरिविष्यस्वपंक्तुधाम्जीर्णा ७ श्रीरामजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्लायतामुष्यतासीदमानाभर्त्तुर्भोगसंपादनाशक्त्या सीदन्तीवेपमानाभये

पतिव्रतापतिंप्राहम्लायतावदनेनसा दरिद्रासीदमानासावेपमानाभिग
म्यच ८ ननुब्रह्मन्भगवतःसाक्षान्मित्रंश्रियःपतिः ब्रह्मण्यश्चशरण्य
श्चभगवान्सात्वतर्षभः ९ तमुपैहिमहाभागसाधूनांचपरायणं दास्य
तिद्रविणंभूरिसीदतेतेकुटंबिने १० आस्तेधुनाद्वारवत्यांभोजवृष्ण्यंध
केश्वरः स्मरतःपादकमलमात्मानमपियछति ११

नकंपमाना ८ ९ १० भोजवृष्ण्यंधकेश्वरइति तत्स्वीकारमात्रेणसर्वैर्नेद्दास्यंती
तिभावः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
२०२

नात्यभिष्टान्परिपाकविसरत्वात् १२ १३ अप्यास्तिकिमस्तीतिप्रश्नः १४ १५ म

किंत्वर्थकान्भजतोनात्यभीष्टान्जगद्गुरुः सएवंभार्ययाविप्रोबहुशःप्रार्थि
तोमृदु १२ अयंहिपरमोलाभउत्तमश्लोकदर्शनं इतिसंचिंत्यमनसागमना
यमतिंदधे १३ अप्यस्त्युपायनंकिंचिद्गृहेकल्याणिदीयतां याचित्वाचतुरो
मुष्टीन्ददौपृथुकतंडुलान् १४ चैलखंडेनतान्बध्वाभर्त्रेप्रादादुपायनं
सतानादायविप्राग्र्यःप्रययौद्वारकांकिल १५ कृष्णसंदर्शनंमह्यंकथं
स्यादितिचिंतयन् त्रीणिगुल्मान्यतीयायतिस्रःकक्षाश्चसद्विजः १६ राम

त्यंममगुल्मानिरक्षार्थसैन्यस्थानानिकक्षाःप्रतोलीःअतियायातिक्रम्यजग
मत्सद्विजः द्विजैःसहितः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चागम्याद्दुर्गमायेंधकावृष्णयश्च तेषांगृहेषु तथाहरेर्ष्टषष्टसहस्राणांमहि
षीणांचयेगृहाः तेषुचमध्येश्रीमदेकतमंगृहंविवेशतदाचसद्विजोब्रह्मानं

विप्रोगम्यांधवृष्णीनांगृहेष्वच्युतधर्मिणां गृहंद्व्यष्टसहस्राणांमहि
षीणांहरेर्द्विजः १७ विवेशैकतमंश्रीमॅब्रह्मानंदंगतोयथा तंविलोक्या नृ
च्युतोदूरात्प्रियापर्यंकमास्थितः सहसोत्थायचाभ्येत्यदोर्भ्यांपर्यग्र
नृ हीन्मुदा १८ सख्युःप्रियस्यविप्रर्षेरंगसंगातिनिर्वृतः प्रीतोव्यमुंच
दबिंदूनेत्राभ्यांपुष्करेक्षणः १९ श्रीरामचंद्रायनमः श्रीकृष्णपरमा

दंगतोयथाबभूवेतिशेषः १७ पर्यग्रहीत्स्पर्यरभत १८
अबिंदून नंदाश्रूणि १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समर्हणमुपायनं २० उपहृत्यसमर्प्यपादावनेजनीरपः २१ २२ धमनीभिः शिरा

अथोपवेश्यपर्यंकेस्वयंसख्युःसमर्हणं २० उपहृत्यावनिज्यास्यपादौपादाव
नेजनीः अग्रहीछिरसाराजन्भगवाल्लोकपावनः २१ व्यलिंपद्दिव्यगंधेन
चंदनागुरुकुंकुमैः धूपैःसुरभिभिर्मित्रंप्रदीपावलिभिर्मुदा २२ अर्च्चित्वावेद्य
तांबूलंगांचत्वागतमब्रवीत् कुचैलंमलिनंक्षामंद्विजंधमनिसंततं २३
देवीपर्यचरछैव्याचामरव्यजनेनवै अंतःपुरजनोदृष्ट्वाकृष्णेनामलकीर्त्ति
ना विस्मितोभूदतिप्रीत्याअवधूतंसभाजितं २४ किमनेनकृतंपुण्यमव
धूतेनभिक्षुणा श्रियाहीनेनलोकेस्मिन्गर्हितेनाधमेनच २५

भिः २३ अवधूतंमलिनं २४ विस्मयमाहद्वाभ्यांकिमनेनेति २५

२०३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संभृतः संमानितः २६ सतोः वसतोः गृह्य गृहीत्वा २७ भार्या तु गृपरिणीतानवेति गृहस्य लिंगदर्शनात् तद्भोगादर्शनाच्च संशयादिव प्रश्नः २८ अप्रतिषेधादुद्वाह

योसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः पर्यंकस्थां श्रियं हित्वा परिषक्तो ग्रजो यथा २६ कथयांचक्रतुर्गाथाः पूर्वं गुरुकुले सतोः आत्मनोर्ललिता राजन् करौ गृह्य परस्परं २७ श्रीभागवानु० ॥ अपि ब्रह्मन् गुरुकुलात् भवता लब्धदक्षिणात् समावृत्तेन धर्मज्ञ भार्योढा सदृशी न वा २८ प्रायो गृहेषु ते चित्तमकामविहतं तथा नैवातिप्रीयसे विद्वन् धनेषु विदितं हि मे २९ मनुमतमत्वाह प्राय इति ते हि ते चित्तं न नमकामविहते कामैर्विहतं न भवतीति मे विदितं तथाहि धनेषु वस्त्रादिषु नैवातिप्रीयसे हे विद्वन् इति विदुषस्तवैतद्युक्तमिति भावः २

तृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काम्हतत्त्वाभावेकिंग्रहधर्मक्लेशेनेत्साहशंक्याहकेचिदितिदेवीःईश्वरमायारचि
ताःप्रकृतीःविषयवासनाःत्यजंतःकामैरनाक्लिष्टचेतसामपिकर्मकरणेदृष्टां

केचित्कुर्वंतिकर्माणिकामैराहितचेतसः त्यजंतःप्रकृतीर्दैवीर्यथाहंलोकसंग्र
हं ३० कश्चिद्गुरुकुलेवासंब्रह्मन्स्मरासिनौयतः द्विजोविज्ञायविज्ञेयंतमसःपा
रमश्नुते ३१

नः यथाहमितिलोकसंग्रहंलोकस्यसंग्रहोग्रहणंयथाभवतितथाऽहमीश्वरोपि
कर्म्माणियथाकरोमितद्वत् ३० नौआवयोःयतोगुरोःविज्ञेयंपरमात्मतत्वंतमसःसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रात्मज्ञानप्रदगुरोरत्यंतंपूज्यत्वंवक्तुंपुरुषस्यत्रीनगुरूनाहसवाइति इहसंसा
रेयत्रसंभवोजन्ममात्रंसपितातवआद्यः प्रथमोगुरुःपूज्यःकर्मविद्याप्रदंगुरुमा
ह द्विजातेःसतःपुंसः सत्कर्मणांयतःसंभवः उपनीयवेदाध्यापकइत्यर्थः सद्वि

सर्वैसत्कर्मणांसाक्षाद्विजातेरिवसंभवः
आद्योंगयत्राश्रमिणांयथाहंसानंदोगुरुः
३२

तीयोगुरुःयथाहमीश्वरः तथाप्रथमादपिपूज्यइत्यर्थः ब्रह्मविद्याप्रदंगुरुमाह आ
श्रमिणांसर्वेषामपिज्ञानदोयःसतुसाक्षादहमेवेति ३२ श्रीकृष्णपरमात्मनेनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः ज्ञानप्रदं गुरुरूपं मामाश्रित्य ये संसारं तरंति ते बुद्धिमंत इत्याह नन्विति हे ब्रह्मन् ते
ननु वर्णाश्रमवतां मध्ये अर्थकोविदाः इह मनुष्यजन्मनि तत्रापि वर्णाश्रमत्वे सति ये
मया गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेण अंजः सुखेनैव भवं तरंति ३३ ज्ञानप्रदाद्गुरोर

नन्वर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ये मया गुरुणा वाचा तरंत्यंजो भवार्णवं ३३
नाहमिज्याप्रजातिभ्यां तपसोपशमेन च तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ३४

धिकः सेव्यो नास्तीत्युक्तं अत एव तद्भजनाधिको धर्मश्च नास्तीत्याह नाहमिति इज्या
गृहस्थधर्मः प्रजातिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्मः लक्ष्यते ताभ्यां तथा तप
सा वनस्थधर्मेण उपशमेन यतिधर्मेण वा अहं परमेश्वरस्तथा न तुष्येयं यथा सर्वभू
तात्मापि गुरुशुश्रूषयेति किंच ३४ २०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्माकंगुरुशुश्रूषणंकिमपिदैवादेवसंपन्नंतत्किंत्वयास्मर्यतइतिपृछत्यपिनइ
तिगुरौनिवसतामस्माकंपत्किं मपिवृत्तंतत्कच्चित्करावित् ३५ अपकृतौअपग

अपिनःस्मर्यतेब्रह्मन्वृत्तंनिवसतांगुरौ गुरुदारैस्मोदितानामिंध
नानयनेक्कचित् ३५ प्रविष्टानांमहारण्यमपत्तौसुमहद्विज वातवर्ष
मभूत्तीव्रंनिष्ठुराःस्तनयित्नवः ३६ सूर्यश्चास्तंगतस्तावत्तमसाचा
वृतादिशः निम्नंकूलंजलमयंनप्रज्ञायतकिंचन ३७

तेकृतौअकालेइत्यर्थःवातश्चवर्षंचतयोःसमाहारःस्तनइत्नवोगर्जितानिचाभवन्
३६ निम्नंकूलंननतमुन्नतंचस्थानं ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंबूनांसंप्लवः व्यामिश्रणंयस्मिन्नेकोदकेतास्मिन्वनेइत्यर्थः परिबभ्रिम भ्रमरणेइ
त्यस्यधातोःपरिपरितोबभ्रिमः इडागमश्छांदसः भारान्धतवंनइत्यर्थः ३८ ३९

वयंभ्रशंतत्रमहानिलांबुभिर्निहन्यमानामुहुरंबुसंप्लवे दिशोऽविदंतोथपरस्परं
वनेगृहीतहस्ताःपरिबभ्रिमातुराः ३८ एतद्विदित्वाउदितेरवौसांदीपिनिर्गुरुः॥
अन्वेषमाणोनःशिष्यानाचार्य्योपश्यदातुरान् ३९ अहोहेपुत्रकाभूयमस्मदर्थेति
दुःखिताः आत्मावैप्राणिनांप्रेष्ठस्तमनादृत्यमत्पराः ४० श्रीकृष्णपरमात्मनेनमः

उवाचकृपयाच्छोकत्रयींपयावयंकृतार्थाइत्याह अहोइति आत्मादेहः ४० श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरोर्निःकृतंप्रत्युपकारःसर्वेअर्था यस्मात्सआत्मादेहःतस्यार्पणंविनियोगः ॥१॥ अया
तयामानियातोयामोयस्यपक्वस्यान्नस्यत हृतसारंभवतितद्वदन्यदपिगतसारंगो
एतदेवहिसच्छिष्यैःकर्त्तव्यंगुरुनिःकृतं यद्वैविशुद्धभावेनसर्वथात्मार्पणंगुरौ ॥१॥
तुष्टोहंभोद्विजश्रेष्ठाःसत्याःसंतुमनोरथाः छंदांस्ययातयामानिभवंत्विहपरत्रच
॥२॥ इत्थंविधान्यनेकानिवसतांगुरुवेश्मसु गुरोरनुग्रहेणैववपुमान्पूर्णःप्रशांतये
ण्यावत्सायातयामपित्युच्यतेअगतसाराणिछंदांसिमत्तोधीयमानानिभवंत्वित्य
र्थः ॥२॥ इत्थंविधानानिएवंप्रकाराणिअनेकानिवृत्तानिकिंत्वयास्मर्यंतइतिशेषः फ
लितमुपसंहरति गुरोरिति ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्माभिः किं अनिर्वृत्तं असंपन्नं येषां अस्माकं भवता सहवासो ऽभूत् ॥ भवतस्तु स
र्व मेतद्विडंबनमात्र मित्याह यस्येति छंदोमयं वेदाख्यं ब्रह्म तथा श्रेयसां आवपनं ज्ञ

श्रीदामा उवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो भवता सत्यकामेन ये
षां वासो गुरावभूत् ॥ यस्य छंदोमयं ब्रह्म देह आवपनं विभो श्रेयसां त
स्य गुरुषु वासो ऽत्यंतविडंबनं ॥ इति श्रीभागवते महापुराणे दशमस्कंधे सु
दामोपाख्याने ऽशीतितमो ऽध्यायः ॥ ८०

स्थानं देहो मूर्तिर्यस्य तस्य तव ॥ इति दशमे टीकायां सुदामोपाख्याने अशीतितमो
ऽध्यायः ॥ ८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकाशीतितमेसख्युर्जग्ध्वापृथुकतंडुलान् श्रियंनिर्मितवानिंद्रदुर्लभांतुनदाश्रमे १
संकथयन्सुगोष्ठींकुर्वन्सर्वभूतानांमनसोभिज्ञः मदर्थेपृथुकानानीयदातुंलज्जत

श्रीशुकउवाच सइत्थंद्विजमुख्येनसहसंकथयन्हरिः सर्वभूतमनोभिज्ञःस्मय
मानउवाचतं १ ब्रह्मण्योब्राह्मणंकृष्णोभगवान्प्रहसन्प्रियं १ प्रेम्णानिरीक्षणे
नैवप्रेक्षन्खलुसतांगतिः २॥ श्रीभगवानुवाच॥ किमुपायनमानीतंब्रह्मन्मेभ
वतागृहात् अण्वप्युपाहृतंभक्तैःप्रेम्णाभूर्येवमेभवेत् २ श्रीकृष्णायनमः ७

इतिजानन्नित्यर्थः प्रहसन्स्वेलींकुर्वन् १ लज्जयाअकथयन्तस्तामँनुदन्नाह अण्व

पीतिद्वाभ्यां २

पा

भा॰दे॰
२०८

२४ सर्वभूतानामात्मदृक्अंतःकरणसाक्षी ५ अमर्त्यानांदेवानामपिदुर्लभाः

भूर्य्यप्यभक्तोपहृतंनमेतोषायकल्पते पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति
तदहंभक्त्युपहृतमश्नामिविदितात्मनः ३ इत्युक्तोपिद्विजस्तस्मैव्रीडितःपतये
श्रियः पृथुकप्रसृतिंराजन्नप्रायच्छदवाङ्मुखः ४ सर्वभूतात्मदृक्साक्षीतस्या
गमनकारणं विज्ञायाचिंतयन्नाश्रीकामोमांभजत्पुरा ५ पत्न्याःपतिव्रताया यं
स्तुसखाप्रियचिकीर्षया प्राप्तोमामस्यदास्यामिसंपदोमर्त्यदुर्लभाः ६ इत्थंवि
चिंत्यवसनाच्चीरबद्धान्द्विजन्मनः स्वयंजहारकिमिदमितिपृथुकतंडुलान् ७ न
न्वेतदुपनीतंमेपरमप्रीणनंसखे तर्पयंत्यंगमांविश्वमेतेपृथुकतंडुलाः ८ ९ः

६ अतिजीर्णत्वाद्वसनस्यपुनस्तन्मध्येचीरेणबद्धान् ७ अंगहेसखेमांविश्वंविश्वात्मानं २०८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिवदन्एकांमुष्टिंजग्ध्वा तत्परेति अयंभावः ९ एतावतापुंसः इहामुत्रचमत्क
दासविलासभृतानांसंपदांसमृद्धये अलंअतःपरंद्वितीयमुष्ट्याअदनेनमामास्मे

इतिमुष्टिंसकृज्जग्ध्वाद्वितीयांजगृधुमाददे तावच्छ्रीर्जगृहेहस्तंतत्परापर
मेष्ठिनः ९ एतावतालंविश्वात्मन्सर्वसंपत्समृद्धये अस्मिन्लोकेथवा
मुष्मिन्पुंसस्त्वत्तोषकारणं १० ब्राह्मणस्तांतुरजनीमुषित्वाच्युतमंदिरे भु
क्त्वापीत्वासुखंसुप्त्वामेनेचस्वर्गतंसुखं ११ श्रीश्रीयेनननमो ॥छ॥ छ॥

तदधीनांकुर्वितित्वत्तोषकारणंनवतोषस्यकारणंयथाभवेत्तथासर्वसंपत्संमृद्धये
यांभक्तस्यसमृद्धिंदष्ट्वात्वंतुष्येरित्यर्थः १० स्वर्गतंस्वर्गवासिनं ११ · श्रीरामचंद्राय॰

आत्मानंस्वर्गतंयथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चोभूते उदिते रवौ विश्वं भावयतीति विश्वभावः तेनेति पुरतो भावितं दुर्लभं विभवं
स्तुवयति स्वसुखेन स्वानंदपूर्णे नेति दाने दीनतां दर्शयति नं दितो विनयोक्तिभिः १२

श्वोभूते विश्वभावेन स्वसुखेनाभिवंदितः जगाम स्वालयं तात पथ्य
नुव्रज्य नंदितः १२ स चालब्ध्वा धनं कृष्णान्न तु याचितवान् स्वयं स्वगृ
हान्व्रीडितो गच्छन्महद्दर्शननिर्वृतः १३ अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्म
ण्यता मया यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि १४ श्रीराम

व्रीडितः स्वचित्तकार्पण्येन लज्जितः महतः श्रीकृष्णस्य दर्शनेन निर्वृतः १३ निर्वृतिमेवा
ह अहो रतिचतुर्भिः यतयतः लक्ष्मीमुरासि बिभ्रता आश्लिष्टोहं १४ श्रीसांबसदाशिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पापीयान्नीचः १५ १६ पूजितश्चंदनधूपादिभिः एवंसंपूज्यापिधनस्यादानेकारणंकस्य

काहंदरिद्रःपापीयान्कृष्णःश्रीनिकेतनः ब्रह्मबंधूरितिस्माहंवाहुभ्यांपरिरंभित
१५ निवासितःप्रियाजुष्टेपर्यंकेभ्रातरोयथा महीव्याविजितःश्रांतोवालव्यजनहस्त
या १६ शुश्रूषयापरमयापादसंवाहनादिभिः पूजितोदेवदेवेनविप्रदेवेनदेववत् १७
स्वर्गापवर्गयोःपुंसांरसायामपिसंपदां सर्वासामपिसिद्धीनांमूलंतच्चरणार्चनं १८
अधनोयंधनंप्राप्यमाद्यनुच्चैर्नमांस्मरेत् इतिकारुणिकोनूनंधनंमेभूरिनाददात् १९
इतितच्चिंतयन्नंतःप्राप्तोनिजगृहांतिकं सूर्यानलेंदुसंकाशैर्विमानैःसर्वतोवृतं २०

यति १७ १८ स्वर्गादीनांयद्यपितस्यचरणार्चनमेकारणंतथापिकारुणिकत्वादभूय्ये
८ पिधनंमह्यंनाददात् १९ निजगृहस्यांतिकंतस्यांतंतस्यविशेषणंसूर्येति २० श्रीराम

स्वर्गापवर्गयोरितिद्वाभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वारिणियेषुतानि किंच जुष्टमिति आकुलैः

विचित्रोपवनादिभिश्चवर्त्तं कथंभूतैः कूजद्भिर्द्विजकुलैः तथाप्रोत्फुल्लानिकुमुदादी
नियेषुतानितथातैः २१ हरिणीनामिवाक्षीणियासांताभिः तदैश्वर्यंदृष्ट्वावितर्कि

विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः प्रोत्फुल्लकुमुदांभोज
कल्हारोत्पलवारिभिः २१ जुष्टंस्वलंकृतैः पुंभिः स्त्रीभिश्चहरिणा
क्षिभिः किमिदंकस्यवास्थानंकथंतदिदमित्यभूत् २२ ७ ७

तवान्तदाह किमिदमिति प्रथमंतेजःपुंजंदृष्ट्वाकिमिदमितियश्चाद्विमानानिदृष्ट्वा
कस्यचेतिस्थानंचस्वीयमितिज्ञात्वाकथंतदिदंस्थानमितिएवंरूपममभूदिति २३ श्रीरा॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७नतिसंभ्रम आदरो यस्याः सा

अमरप्रभास्तत्तुल्यकांतयः प्रत्यगृह्णन् उपायनादिभिराहृतवंतः २३ उद्भूतो हर्षो य
स्याः सा आलयात्कमलवनात् रूपधारिणी श्रीरिव २४ स्वर्गस्य तत्र भगवता आ

एवंमिमांसमानंतंनरानार्योमरप्रभाः प्रत्यगृह्णन्महाभागंगीतवा
द्येनभूयसा २३ पतिमागतमाकर्ण्यपत्न्युद्धर्षातिसंभ्रमा निश्चक्रा
मगृहात्तूर्णंरूपिणीश्रीरिवालयात् २४ पतिव्रतापतिंदृष्ट्वाप्रेमोत्कं
ठाश्रुलोचना मीलिताक्षनमद्बुध्यामनसापरिषस्वजे २५

नीतत्वात् स्वर्गिणामिवतयो रूपं बभूवेतिभावः बुध्या अयमेव वंद्य इति निश्चयेन म
नसा संकल्पेन २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰टी॰
२१

२६ २७ यत्रमंदिरेपयःफेननिभाःशय्याः आस्तरणानिसारिसंपदः तंत्रसर्वसंपदांस
न्दोर्विलोक्यतर्कयामासेतिचतुर्थेनान्वयः अत्रदांताःगजदंतमयाःपर्य्यंकाः २८

पत्नींवीक्ष्यविस्फुरंतींदेवींवैमानिकीमिव दासीनांनिष्ककंठीनांमध्येभांतींसवि
स्मितः २६ प्रीतःस्वयंतयायुक्तःप्रविष्टोनिजमंदिरं मणिस्तंभशतोपेतंमहेंद्रभ
वनंयथा २७ पयःफेननिभाःशय्यादांतारुक्मपरिच्छदाः पर्य्यंकाहेमदंडानिचाम
रव्यजनानिच २८ आसनानिचहैमानिमृदुपस्तरणानिच मुक्तादामविलंबीनिवि
तानानिद्युमंतिच २९

तत्रआसनानिचमृदुन्युपस्तरणानि तूलादिमयालिंयेषुतानियत्रचमुक्तादामविलंब
वंतिद्युमंतिचवितानानि २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० निर्व्ययःसंस्थिरः सन्अहैतुकीमाकस्मिकींस्वस्यसमृद्धिंतर्कयामासकुतएषास
मृद्धिरागतेति ३१ निश्चिनोतिनूनमिति एतन्ममेति एषचासावहंचतस्य एतन्मम

स्वछस्फटिककुड्येषुमहामारकतेषुच रत्नदीपाभ्राजमानाललनारत्नसं
युताः ३० विलोक्यब्राह्मणस्तत्रसमृद्धीःसर्वसंपदां तर्कयामासनिर्व्यग्रः
स्वसमृद्धिमहैतुकिं ३१ नूनंबतैतन्ममदुर्भगस्यशश्वद्दरिद्रस्यसमृद्धिहे
तुः महाविभूतेरवलोकतोन्योनैवोपपद्येतयदूत्तमस्य ३२ श्रीकृष्णपरमा

महतीविभूतिर्यस्यतस्यावलोकादन्य ३२ श्रीगोपीजनवल्लभायनमोनमः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुसचेदवलोकनमात्रेणमहदैश्वर्यंदत्तवानत्त हींदंतुभ्यंदत्तमितिकिंनासोवदतआहनन्वि
तिननुमत्सखासमक्षमब्रुवाणएवयाच्ञिष्णवेयाचकायभूरिबह्वपिदिशतिददाति अ
त्रहेतुःभूरिभोजःस्वयंतद्देयंपर्ज्जन्यवदीक्षमाणइतिअयमर्थःस्वयंतावद्भूरिभोजः आप्त
कामत्वात्लक्ष्मीपतित्वाच्च अतोयथापारावारपरिपूरकोतिवदान्यःपर्ज्जन्यःकदाचि

नन्वब्रुवाणोदिशतेसमक्षंयाच्ञिष्णवेभूर्यपिभूरिभोजः पर्ज्जन्यवत्तत्स्वयमीक्षमाणो
दाशार्हकाणामृषभःसखामे ३५

द्बह्वपिवर्षमल्पमेवमन्यमानोल ज्ञयेवसमक्षमवर्ष
न्रात्रौनिद्राणेकर्षकेनतत्क्षेत्रमाप्लावयतिएवंश्रीकृष्णोविश्वभोगापेक्षयातद्देयमिं
द्रादिपदमतितुच्छंमन्वानःतस्यभजनंबहुमन्यमानःसमक्षमब्रुवाणएवददाति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवाह किंचिदिति उरुबह्वपि स्वदत्तं यत् किंचित्करोति अल्पं मन्यते सुहृत्कृतं फल्गव
पि अतितुछमपि भूरिकारी बहुमन्यत इत्यर्थः अतं एव मय उपनीतं समीपनीतं प्री
तियुतः स्वयमेव प्रतिगृहीतवान् ३४ श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा तद्भक्तिं प्रार्थ

किंचित्करोत्यूर्वपि यस्त्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी मयोपनीतं पृथुकैकमुष्टिं
प्रत्यग्रहीत्प्रीतियुतो महात्मा ३४ तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि ज
न्मनि स्यात् महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसंगः ३५

यत्तत्तस्ये
च तिसौहृदं प्रेमं सख्यं हिताशंसनं च मैत्री उपकारं त्वं च दास्यं सेवकत्वं तत्समाहारैक ६
वचनं तस्य तत्संबंधिनो मे मम भूयासान्ननुविभूतिः किंच महानुभावेन तेनैव विषज्ज
तो विशेषेण संगं प्राप्नुवतस्तद्भक्तेषु प्रकृष्टः संगः स्यादिति २५ श्रीकृष्णपरमात्मनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
२१३

ननुभक्तेः फलंसंपदंप्राप्यपुनर्भक्तिंकिमितिप्रार्थयसेतत्राह भक्तायेति संपदःको
शादीन्राज्यमैश्वर्यंविभूतीः कलत्रपुत्रादीन्नसमर्द्धयतिनददाति अपितुदृढांभ

शतुर्योगमायामुपाश्रितौ ३४ तस्मिन्प्रविष्टावुपलभ्य दैत्यराड् विश्वात्मदैवं सुतरां
तथात्मनः संदर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ३५

थं भूतौ विश्वात्मभूतं दैवं सान्वयः सपरिवारः ३५ श्रीकृष्णपरमात्मने नमो नमः ७

२५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवृंदः सपरिजनः कथंभूतौ पादाववनिज्य यदंबुययोरवनेजनोदकं आब्रह्मब्रह्मा

तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः दधार पादाववनि
ज्य तज्जलं सवृंद आब्रह्म पुनद्यदंबुह ३६ समर्हयामास च तौ विभूतिभिर्महार्हव
स्त्राभरणानुलेपनैः तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन
३७ स इंद्रसेनो भगवत्पदांबुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया उवाच हानंदजला
कुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरः ३८ रुक्मिणीकांतायनमोनमः श्रीकृष्ण

णमभिव्याप्य जगत्पुनत्पवित्रयद्वर्त्तते तौ ३६ ३७ इंद्रसेनो बलिः प्रेमविभिन्नया प्रेमा
ईयाधियाबिभ्रत् धारयत् ३८

च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰
२५२

अनंतायशेषायबृहतेफणैकदेशोविश्वधारणात्बृहत्त्वंतस्मैकृष्णायवेधसेजगद्विधात्रे
सांख्ययोगवितानायेत्यादिपदत्रयमैक्यविवक्षया ३९ योगेश्वराणामपिदुर्दर्शौयु

बलिरुवाच नमोनन्तायबृहतेनमःकृष्णायवेधसे सांख्ययोगवितानायब्रह्म
णेपरमात्मने ३९ दर्शनंवांहिभूतानांदुःप्राप्यंचातिदुर्लभं रजस्तमःस्वभावा
नांयन्नःप्राप्तौयदृच्छया ४० दैत्यदानवगंधर्वाःसिद्धविद्याध्रचारणाः यक्षर
क्षःपिशाचाश्चभूतप्रथमनायकाः ४१

वामस्माभिर्दृष्टावित्येतन्नातिचित्रमित्या
ह दर्शनमतिदुःप्रापमपियुष्मत्कृपयाकेषांचिद्दुर्लभंसुलभमपितदाहरजस्तमः भवति
स्वभावानामितिनोदर्शनंप्राप्तौ ४० आहोस्विद्विषोवयंसात्विकभक्तेभ्योपिसभाग्याइ
त्याह दैत्येत्यादित्रिभिः ४१
ति

२५२

४२ उद्बद्धवैरेणयाभक्तिस्तयाकेचनेतिचैद्यादयःकामतोभक्त्यागोप्यादयोयथासन्नि
कृष्टास्त्वदात्मतांप्राप्ताः तथासत्वसंरब्धाःसत्वाविष्टाअपिसुरादयोनसंनिकृष्टाइति

विशुद्धसत्वधाम्न्यद्धात्वयिशास्त्रशरीरिणि नित्यंनिबद्धवैरास्तेवयंचान्येचता
दृशाः ४२ केचनोद्बद्धवैरेणभक्त्याकेचनकामतः नतथासत्वसंरब्धाःसन्निकृ
ष्टाःसुरादयः ४३ इदमित्थमितिप्रायस्तवयोगेश्वरेश्वर नविदंत्यपियोगेशा
योगमायांकुतोवयं ४४

४३ नतुसात्विकेभ्योपिराजसादयःसंनिकृष्टाइतिचित्रंतत्राह इदमितिस्वरूपतःइत्थमिति
विशेषतश्च ४४

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंयद्यपिवैरभावेनापित्वत्प्राप्तिर्भवेत्तथापिमांसातिकंकुर्वीतिप्रार्थयते तन्नइति
तत्तथानःप्रसीदयथानिरपेक्षैरात्मकामैरपिविमृग्यंयुष्मत्पदारविंदंतदेवंधिषण
माश्रयस्तस्मादन्यद्गृहंतदेवांधकूपस्तस्मान्निःक्रम्यनिर्गत्यविश्वस्यशरणंरासि

तन्नःप्रसीदनिरपेक्षविमृग्ययुष्मत्पादारविंदधिषणान्यगृहांधकूपात् निः
क्रम्यविश्वशरणांघ्र्युपलब्धवृत्तिः शांतोयथैकउतसर्वसखैश्चरामि १५

तारोवृक्षास्तेषामंघ्रिषुमूलेषुस्वतएवगलितैःफलादिभिरुपलब्धाप्राप्तावृत्ति
र्जीविकायेनसोहंशांतःसन्एकएवचरामि उतअथवासर्वेषांसखायोयेमहांतस्तैः
सहयथाचरामीति १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमल्पपुण्यानामेवंभावःसंभवति इतिचेत्तर्हियथैतद्भवेत्तथास्मान्नःशिक्षयेत्या
ह शाधीतिहेप्रभोईशितव्याः सर्वेजीवास्तेषामीशयन्त्वानुशासनंआतिष्ठन्आ
श्रयत् चोदनायाविधिनिषेधलक्षणायाःसकाशाद्विमुच्यतेनखलुत्वद्भक्तोविधि

शाध्यास्मान्नीशितव्येनानिष्पापान्कुरुनःप्रभो पुमान्यच्छ्रद्धयातिष्ठन्चोदना
याविमुच्यते ४६ श्रीभगवानु॰ ।।आसन्मरीचेःषट्पुत्राऊर्णायांप्रथमेंतरे देवाःकं
जहसुर्वीक्ष्यसुतांयभितुमुद्यतं ४७

किंकरस्यादितिभावः ४६ तदुक्तंसर्वमनुमोद्य
स्वागमनकारणंसप्रपंचंकथयति आसन्नितिपंचभिःऊर्णायांभार्यायांप्रथमेंतरे
स्वायंभुवमन्वंतरेतेदेवाःसुतांवाचंयभितुंजघ्न्युंमैथुनेनरमयितुंउद्यतंउद्युक्तंकंप्रजा
पतिंजहसुःउपहसितवंतः ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनावद्यकर्मणापापेनआसुरींयोनिमगमन् अधुनातत्क्षणमेवहिरण्यकशिपोर्जाताइ
त्यर्थः तेचयोगमाययाततोनीताः संतोदेवक्याउदरेजाताः हेराजन् बलेनतेचकंसेनवि

तेनासुरीमगन्योनिमधुनावद्यकर्मणा हिरण्यकशिपोर्जातानीतास्तेयोगमायया
४८ देवक्याउदरेजाताराजन्कंसविहिंसिताः सातांशोचत्यात्मजान्स्वांस्तइमेध्यास
तेंतिके ४९ इतएतान्प्रणेष्यामोमातृशोकापनुत्तये ततःशापाद्विनिर्मुक्ता लोकंया
स्यंतिविज्वराः ५० स्मरोद्गीथःपरिष्वंगः पतंगःक्षुद्रभृद्घृणी षडिमेमत्प्रसादेनपुन
र्यास्यंतिसद्गतिं ५१

हिंसिताः साचतानात्मजान्मत्वाशोचति तेचमेतवांतिकेध्यासते
४९ लोकंदेवलोकं ५० स्मरोद्गीथःस्मरसहितःउद्गीथःसद्गतिंमोक्षंस्मरस्यैवपूर्वंकीर्त्तिमा
नितिनाम अतःकीर्त्तिमंतंप्रथमजंकंसायानकदुंदुभिरर्प्पयामासेत्युक्तं ५१ श्रीकृष्ण २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयछतांअर्पयामासतुः ५२ ५४ अमृतत्वेहेतुःगदाभृतः पीतशेषमिति नारा

इत्युक्त्वातान्समादायइंद्रसेनेनपूजितौ पुनर्द्वारवतीमेत्यमातुःपुत्रानयछतां ५२
तान्दृष्ट्वाबालकान्देवीपुत्रस्नेहस्नुतस्तनी परिष्वज्यांकमारोप्यमूर्ध्न्यजिघ्रदभी
क्ष्णशः ५३ अपाययत्स्तनंप्रीतासुतस्पर्शपरिप्लुता मोहितामाययाविष्णोर्य
यासृष्टिःप्रवर्त्तते ५४ पीत्वामृतंपयःतस्याःपीतशेषंगदाभृतः नारायणांग
संस्पर्शप्रतिलब्धात्मदर्शनाः ५५ तेनमस्कृत्यगोविंदंदेवकींपितरंबलं मिष
तांसर्वभूतानांययुर्धामदिवौकसां ५६ श्रीगोपालकृष्णायनमः॥ श्रीराम॥

यणांगसंस्पर्शेनप्रतिलब्धंदेवावयंइत्यात्मदर्शनंयैस्ते ५५ धामदेवलोकं ५६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्रुतानामागमननिर्गमं चश्रीकृष्णस्य मायां मेने तैनैवापस्मादिरूपेण रचितां ५८ ५९
अमृतं कीर्तिर्यस्य तस्य व्यासपुत्रैरिति बहुवचनं पूजार्थं जगतश्च अघं भिनत्तीति तथा
तत् अलं निःशेषं यथा भवति तथा नकृष्णादिवदिति नदेवं मोक्षहेतुत्वं पापक्षयहेतु

तं दृष्ट्वा देवकी देवी मृतागमननिर्गमं मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ५८
एवं विधान्यद्भुतानि कृष्णस्य परमात्मनः वीर्याण्यनंतवीर्यस्य संत्यनंतानि भारत
५९ सूत० यइदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः
जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ६०

त्वं चोक्तं तद्भक्तानां तु सत्कर्णपूरं परमसुखावहं कर्णाभरणमिति स्वयं सुखरूपतामा
ह किंच भगवति कृतमावेशितं चित्तं येन सं तथा भूत्वा तस्य क्षेमधाम कालादिभय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिदशमे पंचाशीतितमोऽध्यायः ॥८५॥ षडशीतितमेदंभात्सुभद्रामर्ज्जुनोहरत् ग

पि त्वाचमिथिलांकृष्णोन्टपविप्रावनंदयत् १ पित्रोःस्वज्ञानमादिश्यसुभद्रांफाल्गुना

इतिश्रीभागवतेमाहापुराणेदशमस्कंधे ता ज्ञा य नामपंचाशीतितमोऽध्यायः॥

नृ ८५ राजोवाच ब्रह्मंवेदितुमिछामःस्वसारंरामकृष्णयोः यथोपयेमेविजयोया

ममासीत्पितामही १ श्रीशुकउवाचअर्ज्जुनस्तीर्थयात्रायांपर्यटन्नवनिंप्रभुः गतः

प्रभासमश्रृणोन्मातुलेयींसआत्मनः २ पचजगाममिथिलांकृष्णःस्वभक्तप्रि

नः यकृत्तमः देवक्यामृतपुत्रलाभवत् अर्ज्जुनस्यसुभद्रालाभोपिरामप्रातिकूल्याद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्घटश्तिमन्यमानः प्रसंगात्स्पृच्छति ब्रह्मान्निति १ २ कथमस्मृणोत् दुर्योधनायेति अपरे
चवसुदेवादयो न दास्यंतीति लिप्सुः तस्यां मातुलेय्यां लिप्सुः रामं वंचयितुं पूज्यतमं त्रिदं

दुर्योधनाय रामस्तां दास्यतीति न चापरे तल्लिप्सुः स यतिर्भूत्वा त्रिदंडी द्वारका
मगात् ३ तत्र वै वार्षिकान्मासानून्यवात्सीत्स्वार्थसाधकः पौरैः सभाजितो
भीक्ष्णं रामेणाज्ञानतोऽवसः ४ एकदा गृहमानीय आतिथ्येन निमन्त्र्य तं श्र
द्धयोपहृतं भैक्ष्यं बलेन बुभुजे किल ५ एवं वेषं विधायागतस्तस्याह स यतिरिति
३ स्वार्थसाधकः कन्याप्रेप्सुः ४ तमातिथ्येन निमंत्र्य गृहमानीय बलेन पश्चाच्छ्रद्धयोप
हृतं परिविष्टं तद्भैक्ष्यं किलार्जुनो बुभुज इत्यन्वयः ५ श्रीफाल्गुणमित्रायनमः ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावेनरस्याभिप्रायेणक्षुभितंमनोदधे ६ व्रीडितापांगीसव्रीडंकटाक्षातस्मिन्नेव

सोपश्यत्तत्रमहतींकन्यांवीरमनोहरां प्रीत्युत्फुल्लेक्षणस्तस्यांभावक्षुब्धंमनोद
धे ६ सापितंचकमेवीक्ष्यनारीणांहृदयंगमं हसंतीव्रीडितापांगीतन्यस्तहृदयेक्ष
णा ७ तांपरांसमनुध्यायन् अंतरंप्रेप्सुरर्जुनः नलेभेशंभ्रमच्चित्तः कामेना
तिबलीयसा ८ महत्यांदेवयात्रायांरथस्थांदुर्गनिर्गतां जहारानुमतःपित्रोःकृ
ष्णस्यचमहारथः ९ रथस्थोधनुरादायशूरांश्चारुंधतोभटान् विद्राव्यक्रोशतां
स्वानांस्वभागंमृगराडिव १०

न्यस्तंहृदयमीक्षणंचययासा ७ अंतरंहर्तुमवसरंप्रे
प्सुःभिक्षुःकामेनभ्रमच्चित्तंयस्यसःशंरामादिसंमाननिमित्तंसुखं ८ ९ आसमंताद्रुंधतः
आवरंकुर्वतः १०

भा·द·
२५७

११ पारिबर्हाणिवरवध्वोः प्रीतिदेयानि १२ १३ अनीहयाऽनुधर्मेनैवागतंयदाहार्यभो

तच्छ्रुत्वाक्षुभितोरामः पर्वणीवमहार्णवः गृहीतपादः कृष्णेनसुल्हस्थि
न्वशाम्यत ११ प्राहिणोत्पारिबर्हाणिवरवध्वोर्मुदाबलः महाधनोपस्करे
भरथाश्वनरयोषितः १२ श्रुकउवाच ॥ कृष्णस्यासीद्द्विजःश्रेष्ठश्श्रुतदेवइति
श्रुतः कृष्णैकभक्त्यापूर्णार्थःशांतःकविरलंपटः १३ सउवासविदेहेषुमि
थिलायांगृहाश्रमी अनीहयागताहार्यनिर्वर्तितनिजक्रियः १४ श्रीराम

ज्यंतेननिवर्तिताःनिजक्रियायेनसः १४

२५७

यात्रामात्रंशरीरादिनिर्वाहमात्रंभोज्यंउपनमतितंप्रत्यागच्छति १५ मिथिलस्यजन

यात्रामात्रंत्वहरहर्दैवादुपनमत्युत नाधिकंतावतातुष्टः क्रियाश्चक्रेयथोचि
ताः १५ तथातद्राष्ट्रपालोंगबहुलाश्वइतिश्रुतः मैथिलोनिरहंमानउभावप्य
च्युतप्रियौ १६ तयोःप्रसन्नोभगवान्दारुकेणाहृतंरथं आरुह्यसाकंमुनिभि
र्विदेहान्प्रययौप्रभुः १७ नारदोवामदेवोत्रिःकृष्णोरामोसितोरुणः अहंबृह
स्पतिःकण्वोमैत्रेयश्च्यवनादयः १८ तत्रतत्रतमायांतंपौराजानपदानृप उपत
स्थुःसार्घ्यहस्ताग्रहैःसूर्यमिवोदितं १९

कस्यवंश्योमैथिलः १६ प्रभुरेवस्वयंविदेहा
न्देशान्प्रययौ १७ कृष्णोव्यासःरामोभार्गवःअहंशुकःएवमादिभिःसन् १८ १९ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनर्त्ताद्यर्णांतास्तत्तद्देशवर्त्तिन्योन्ननार्यः उदारहासं स्निग्धमीक्षणं यस्मिन् तत् दृ

आनर्त्तधन्वकुरुजांगलकंकमत्स्यपांचालकुंतिमधुकैकयकोशलार्णाः अन्ये
चतन्मुखसरोजमुदारहासस्निग्धेक्षणंन्नृपपपुर्दृशिभिर्न्ननार्यः २० तेभ्यःस्व
वीक्ष्यणविनष्टतामिस्नदृग्भ्यः क्षेमंत्रिलोकगुरुरर्थदृशंचयछन् शृण्वँदिगंध
वलंस्वयशोशुभघ्नंगीतंः सुरैर्नृभिरगाछनकैर्विदेहान् २१ [illegible] तेच्युतंप्रा
समाकर्ण्यपौरजानपदान्नृप अभीयुर्मुदितास्तस्मैगृहीतार्हणपाणयः २२

शिभिर्नेत्रैः २० स्ववीक्षणेनैवविनष्टँमिस्नादृग्येषांतेभ्यःक्षेमंअभयंअर्थदृशंतत्वज्ञा
नंचयछन् २१ अभीयुःप्रत्युज्जग्मुः २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रीत्याउत्फुल्लानिआननानि आशयाअंतःकरणानिचयेषांनैतैकैः शिरोभिः २३ २५ त
दभिप्रेतंअंगीकृत्यतत्तदाउभाभ्यामपिताभ्यांमद्गृहादन्यस्यगेहंयातीत्यलक्षितः ७

दृष्ट्वातउत्तमश्लोकंप्रीत्युत्फुल्लाननाशयाः कैर्ध्वतांजलिभिर्नेमुःश्रुतपूर्वास्तथा
मुनीन् २२ स्वानुग्रहायसंप्राप्तंमन्वानौतंजगद्गुरुं मैथिलःश्रुतदेवश्चपादयोःपे
ततुःप्रभोः २४ न्यमंत्रयेतांदाशार्हमातिथ्येनसहद्विजैः मैथिलःश्रुतदेवश्चयुग
पत्संहतांजली २५ भगवांस्तदभिप्रेत्यद्वयोःप्रियचिकीर्षया उभयोराविशद्गेहं
उभाभ्यांतदलक्षितः २६ श्रोतुमप्यसतांदूरान्जनकःस्वगृहागतान् आनीतेष्वा नू
सनाग्र्येषुसुखासीनान्महामनाः २७

विहितः यद्वाउभाभ्यांरूपाभ्यांतदलक्षितः
ताभ्यामलक्षितइति २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धर्षेऽञ्जतहर्षेत्स्दयंयस्यअँस्रैराक्लिन्नेर्रक्षणेयस्यसएवसच २८ ईश्वरंततुल्यं

प्रव्रुध्मन्त्स्याउद्धर्षेत्स्हृदयास्नाविलक्षणः नत्वातदंघ्रीन्प्रक्षाल्यतदपोलोकपा
वनीः २८ सकुटुंबोवहन्मूर्ध्नापूजयांचक्रईश्वरान् गंधमाल्यांबराकल्पधूप
दीपार्घगोवृषैः २९ वाचामधुरयाप्रीणन्इदमाहान्नतर्पितान् पादावंकगतौ
विष्णोः संस्पृशन्शनकैर्मुदा ३० ॥राजोवाच॥ भवान्हिसर्वभूतानांआत्मासाक्षी
स्वदृक्प्रभो अथनस्त्वत्पदांभोजंस्मरतांदर्शनंगतः ३१

स्वेत्यर्थः २९ प्रीणन्प्री
णयन्संस्पृशन्संमर्द्दयन् ३० आत्माचेतयितासाक्षीप्रकाशकः स्वदृक्स्वप्रकाशः
अथअतःकारणात् ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनंतोबंधुरपि अजः पुत्रोपि ३२ ३३ तच्छांत्यैसंसारोपशमाय ३४ ३५ गृहान्गृहे

स्ववचस्तदृतंकर्तुमस्मदृग्गोचरोभवान् यदात्थैकांतभक्तान्मेनानंतः श्रीरजः
प्रियः ३२ कोनुत्वच्चरणांभोजमेवंविद्विसृजेत्पुमान् निष्किंचनानांशांतानांमुनी
नांयस्त्वमात्मदः ३३ योवतीर्ययदोर्वंशेनृणांसंसरतामिह यशोवितेनेतच्छां
त्यैत्रैलोक्यवृजिनापहं ३४ नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे नाराय
णायऋषयेसुशांततपईयुषे ३५ दिनानिकतिचिद्भूमन्गृहान्नोनिवसँद्वि तृ
जैः समेतःपादरजसापुनीहीदंनिमेः कुलं ३६ इत्युपामंत्रितोराज्ञाभगवाँल्लो
कभावनः उवासकुर्वन्कल्याणंमिथिलानरयोषितां ३७

धिस्यर्थः ३६ ३७ श्रीकृष्ण

धुन्वन्परिभ्रमयन् ३९ अवनिजेअवनिन्जिेप्रक्षालितवान् ४० ४१ फलैरामलकादि
भिरर्हणेनोशीरैस्तृणविशेषमूलैः सुवासितैः शिवैरमृतवत्स्वादुभिरंबुभिः सुरभ्याम्र

श्रुतदेवोच्युतंप्राप्तंस्वगृहान्जनकोयथा नत्वामुनीन्सुसंहृष्टोधुन्वन्वासोननर्त्तह
३९ तृणपीठबृषिष्वेतानानीतेषूपवेश्यसः स्वागतेनाभिवंद्यांघ्रीन्सभार्योवनि
जेमुदा ४० तदंभसामहाभागआत्मानंसगृहान्वयं स्नापयांचक्रउद्धर्षोलब्धस
र्वमनोरथः ४१ फलार्हणोशीरशिवामृतांबुभिर्मृदासुरभ्यातुलसीकुशांबुजैः
आराधयामासयथोपपन्नयासपर्ययासत्वविवर्धनांधसा ४२

दाकस्तूरीप्रमुखया
सपर्ययापूजया यथोपपन्नयाअनायासेनसंपन्नयाप्राप्ता
नुपद्रवलब्धत्वात्सत्वविवर्द्धनंयदंधः अन्नंतेनच ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यश्रीकृष्णस्यात्मामूर्त्तिस्तस्यानिकेतैर्भूसुरैश्चसर्वतीर्थास्पदपादरेणुभिः कृष्णा
दिभि र्यः संगमः सममकुतोन्वभूदिति अन्वितिविस्मयेयद्वाआश्चर्येतिवितर्केनुइति

सतर्कयामासकुतोममान्वभून्महांधकूपेपतितस्यसंगमः यः सर्वतीर्थास्पद
पादरेणुभिः कृष्णेनचास्यात्मनिकेतभूसुरैः ४२ सूपविष्टान्कृतातिथ्यान्श्रु
तदेवउपस्थितः सभार्यैःस्वजनापत्यउवाचांघ्र्यभिमर्शनः ४४

चिस्मये ४२ उप
स्थितःसमीपउपविष्टःभार्याभर्त्तव्यास्वजनाअपत्यानिचतैःसहितः श्रीकृष्णस्यांघ्रि
माभिमृश तिसंमर्दयतीतिअंघ्र्यभिमर्शनः ४४ श्रीरामोजयरामेति॥ ७॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यर्हिदंविश्वंस्वशक्तिभिःसत्वादिभिःसृष्ट्वाप्रविष्टस्तदैवदर्शनंप्राप्तइतिसएवसन्मात्रोयं ना
लनीभूतस्त्वमित्यर्थः यद्वानः अस्मान् अद्यैवप्राप्तइतिनकिंतुतदैवप्राप्तः यर्हिदंवि
श्वंस्वशक्तिभिःस्वसत्वादिभिःसृष्ट्वास्वसत्तयाअनुविष्टस्त्वंदर्शनंतुपरंकेवलंअद्यैव

श्रुतदेवउवाच॥ नाद्यनोदर्शनंप्राप्तःपरंपरमपूरुष यर्हिदंशक्तिभिःसृष्ट्वाप्र
विष्टोह्यात्मसत्तया ४५ यथाशयानःपुरुषोमनसैवात्ममायया सृष्ट्वालोकंप
रंस्वाप्नमनुविश्यावभासते ४६

प्राप्तइति ४५ मायासृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौदृष्टांततयाहयथेति आत्म
माययास्वाविद्ययेत्यर्थः यद्वाआत्मनस्तवमाययेति ४६ श्रीगोपालकृष्णायनमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तप्येतपंचाग्नीन्सूर्येणसहचतुर्दिशमग्नीन्निधायात्मानंतापयेदित्यर्थः आसारषा
ढ्आसारंधारासंपातंसहतइतितथाअभ्रावकाशंनामव्रतंचरेत् जलेआकंठम

श्रीग्रीष्मेतप्येतपंचाग्नीन्वर्षास्वासारषाड्जले आकंठमग्नःशिशिरएवंव
त्तस्तपश्चरेत् ४ अग्निपक्वंसमश्नीयात्कालपक्वमथापिवा उलूखल
वृ लाश्मकुट्टोवादंतोलूखलएववा ५ स्वयंसंचिनुयात्सर्वमात्मनोवृ
त्तिकारणं देशकालबलाभिज्ञोनाददीतान्यदाहृतं ६ श्री

ग्नःउदकवासंना
मव्रतंचरेत् ४ उलूखलेऽनयाश्मनावाकुट्टयतिकंडयतीतितथा दंताएवोलूखलं
यस्यसतथा ५ संचिनुयात्आहरेत् अन्यदाकालांतरेआहृतंकालांतरेनाददीत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग॰
१२५

लब्धेन वन्येनवेऽभावे पुराणं तु परित्यजेदिति नारदोक्तेः ६ कालचोदितान् आग्रयणादीन्
७ किंच अग्निहोत्रमिति मुनेश्चनैगमैर्वेदवादिभिः ८ अस्य निष्कामस्य फलमा

वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान् नतु श्रौतेन पशुना मांयजेत
वनाश्रमी ७ अग्निहोत्रं च दर्शश्च पूर्णमासश्च पूर्ववत् चातुर्मास्या
नि च मुनेराम्नातानि च नैगमैः ८ एवं चीर्णेन तपसा मुनिर्धमनिसंत
तः मां तपोमयमाराध्य ऋषिलोकादुपैति मां ९ हएवमिति धमनीभिः शि
राभिः संततः व्याप्तः यावज्जीवं कृतेन तपसा शुष्कमांसस्तु स्पर्थः ऋषिलोकान् महर्लो
कादिक्रमेण अपेभावः अंतःकरणशुद्धिभक्तिद्वाराऽत्रैव तावन्मुच्यते प्रतिबंधकबा

हुल्येत्वनेनक्रमेणमुच्यतइति ९

१२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंसकामंनिंदतियास्त्विति निश्रेयसंमोक्षफलं अल्पीयसेआविरंच्यादल्पमेव
तस्मै १० एवंयावज्जीवंवर्त्तमानस्यमोक्षः तृतीयभागावसानेतुमंदविरागोपि

यस्त्वेतत्कृच्छ्रतश्चीर्णंतपोनिःश्रेयसंमहत् कामायाऽल्पीयसेयुंज्याद्बा
लिशःकोऽपरस्ततः १० यदासौनियमेकल्पोजरयाजातवेपथुः आत्म
न्यग्नीन्समारोप्यमच्चित्तोऽग्निंसमाविशेत् ११ यदाकर्मविपाकेषुलो
केषुनिरयात्मसु विरागोजायतेसम्यङ्न्यस्ताग्निःप्रव्रजेततः १२ संन्यासा

धिकारः यदितुततोऽर्वागेवस्वधर्माशक्तोभवेत्तदापिसम्यगविरक्तः विरक्तोवातत्रा
विरक्तस्यकृत्यसमाहयदेति जातोवेपथुः कंपोदेहेयस्यसः ११ विरक्तंप्रत्याहयदेति १२

तत्रादौ क्तस्यमाहइष्टेति यथोपदेशंश्राद्धाष्टकपूर्वकंप्राजापत्येष्टिमामिष्ट्वा स्वेषा
णेआत्मनि १३ सन्यासेविप्रा भवंति तानविगणय्यसंन्यसेदेवेत्याशयेनाह विप्रस्ये
ति केनाभिप्रायेणकुर्वंतितमाह अथमितिपरंपरंब्रह्म १४ एवंप्रव्रजितस्यधर्मा

इष्ट्वायथोपदेशंमांदत्त्वासर्वस्वमृत्विजे अग्नीन्स्वप्राणआवेश्य निरपेक्षःपरिव्र
जेत् १३ विप्रस्यवैसंन्यसतोदेवादारादिरूपिणः विघ्नान्कुर्वंत्ययंह्यस्मा नाक्रम्य
समियात्परं १४ बिभृयाच्चेन्मुनिर्वासःकौपीनाच्छादनंपरं त्यक्तंनदंडपात्राभ्यामन्य
त्किंचिदनापदि १५

नाह बिभृयाच्चेदिति परंकौपीनादन्य द्वासोयदिधारयितुमिच्छ
ति तर्हिकौपीनमाच्छाद्यतेयावतातावन्मात्रंधारयेदित्यर्थः त्यक्तंप्रेषोच्चारात्पूर्वमेवअ
तोन्यत्किंचिदपिनबिभृयात् दंडपात्राभ्यामित्यावश्यकजलपात्रादेरुपलक्षणं १५ ७७६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विगर्ह्यानीति पदुक्तेत देव विचिन्त्य दर्शयति देवो मुनिर्द्विजो राजा वैश्यः शूद्रो बिडालकः पशुर्म्लेच्छश्चांडालो विप्रा दश विधाः स्मृताः १ भिक्षुकोध्यापकः

वसंतुष्टो विजितेंद्रियः वेदशास्त्रार्थतत्वज्ञो विप्रो देवः प्रकीर्तितः २ तपः सत्यमहिंसा च षट्कर्माणि दिने दिने नमेद्वेलाकालोपस्थ ब्राह्म

मनः पूतं मनसा सम्यक् विचार्य यच्छ्रेयं तदाचरेत् १६ मौनं वाचो दंडः अनीहा काम्यक
र्मत्यागे देहस्य प्राणायामश्चेतसः एते अंतस्त्रयो दंडा यस्य न संति अंग हे उद्धव अं

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् १६
मौनानीहानिलायामा दंडा वाग्देहचेतसां न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः १७
भिक्षां चतुर्षु वर्णेषु विगर्ह्यान् वर्जयंश्चरेत् सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता १८

गेध्रते वेणुभिरिति वा १७ चतुर्ष्विति ब्राह्मणेष्वेव वृत्तिभेदेन चतुर्विधेषु पूर्वपूर्वासं
भवे वा विगर्ह्यान् अभिशस्तपतितान् असंक्लृप्तान् अत्रायं लाभो भविष्यतीत्यपूर्वम
नुद्दिश्य १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहिर्ग्रामात् पावितंप्रोक्षणादिभिःशोधितं विभज्यविष्णुब्रह्मार्कभूतेभ्यः अशेषमि
त्यधिकाहरणंनिरस्तं याचितमितिपाठेमाधुकरेणयाचितमन्नंचेत्तर्हिविभज्यभुं
जीतनत्वयाचितादि भैक्ष्यचतुष्टयमित्यर्थः माधुकरेतुनैवेद्यंभैक्षेनान्येषुवियते

बहिर्जलाशयंगत्वातत्रोपस्पृश्यवाग्यतः विभज्ययाचितंशेषंभुंजीता पवि
शेषमाहृतं १९ एकश्चरेन्महीमेतांनिःसंगःसंयतेंद्रियः आत्मक्री
डआत्मरतआत्मवान्समदर्शनः २०

नैवेद्यकंक्षिपेदप्सुत्रितयंभौतिकं
बहिरितिस्मृतेः यद्वातदानींकेनापियाचितंचेत्तन्मध्येतस्मैकिंचिद्विभज्यदत्वेत्यर्थः
१९ किंचएकश्चरेदिति आत्मन्येवक्रीडाकौतुकंयस्यसः आत्मन्येवचरतःसंतुष्टः आ १७७
त्मवान्धीरः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः मयि भावेन विमलः आशयो यस्य सः
२१ बंधं मोक्षं च केन बंधः केन वा मोक्ष इति तावाह बंध इति २२ २३ पुराणि हद्दादिमंति

विविक्तक्षेमशरणो मद्भावविमलाशयः आत्मानं चिंतयेदेकमभेदेन म
या मुनिः २१ अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया बंध इंद्रियविक्षे
पो मोक्ष एषां च संयमः २२ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः विरक्तः
क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत् २३ पुरग्रामव्रजान् सार्थान् भिक्षा
र्थं प्रविशंश्चरेत् पुण्यदेशसरिच्छैलवनाश्रमवतीं महीं २४

ग्रामास्तद्रहिताः व्रजा गोष्ठानि तान् सार्थान् यात्रिकजनसमूहान् २४ नमो भगवते ह्व

५ ५९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तदि

यतः शिलवृत्त्याग्रासेन तदीयेनांधसा अन्नेनैं शुद्धसत्त्वः सन् निवृत्तमोहः संसिध्यति मुच्य
ते २५ ननु मिष्टान्नं विहाय कथं शीलान्ने प्रवृत्तिः स्यादत आह नैतेति एतदृश्यमानं मि

वानप्रस्थाश्रमे देपे धर्मीक्ष्णं भैक्षमाचरेत् संसिध्यत्याश्वसंमोहः
शुद्धसत्वः शिलांधसा २५ नैतद्वस्तु तथा पश्येत् दृश्यमानं विनश्य
ति असक्तचित्तो विरमेदिहामुत्र चिकीर्षितात् २६ नमो भगवते

ष्टान्नादिवस्तु तया न पश्येत् यतो विनश्यति अतः इहामुत्र च लोके असक्तचित्तः स
न् चिकीर्षितात् तदर्थं कृत्याद्विरमेत् २६ नमो भगवते वासुदेवाय नमो नमः ॥ ७ ॥ १७८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुतथापियावद्विनाशंसुखहेतुत्वात्तच्चिंतावतःकुतोविरागःस्यात्तत्राहयदेतदि
ति एतज्जगत्ममतास्पदंमनोवाक्प्राणैःसंहतंसहितमहंकारास्पदंशरीरंचस

यदेतदात्मनिजगन्मनोवाक्प्राणसंहतं सर्वंमा
येतितर्केणस्वस्थस्त्यक्त्वानतत्स्मरेत् २७ नमः

र्वंतज्जन्यंसुखंचआत्मनिमायामात्रमितितर्केणस्वप्नादिदृष्टांतेनत्यक्त्वास्वस्थआ
त्मनिष्ठः सन्पुनः तन्नस्मरेत्नचिंतयेत् २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
११९

एवंबहूदकादिधर्मानुक्त्वापरमहंसधर्मानाहज्ञाननिष्ठइतिसार्द्धैर्द्वादशभिः बहिर्विर
क्तोमुमुक्षुःसन्योज्ञाननिष्ठोवामोक्षेप्यनपेक्षोमद्भक्तोवासलिंगान्त्रिदंडादिसहि
तान्आश्रमानतद्धर्मान्सत्यक्त्वातदासक्तिंत्यक्त्वायथोचितंधर्मंचरेदित्यर्थः नपुनरत्यं

ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः सलिंगा
नाश्रमांस्त्यक्त्वाचरेदविधिगोचरः २८ श्रीरामजी

त्यागएवविवक्षितःपुनर्धर्मविधानात् अक्रियत्वस्योत्तराध्यायेवक्ष्यमाणत्वाच्च
तर्हिपूर्वस्मात्कोविशेषःतमाह अविधिगोचरः विधिकिंकरोनस्यादिति एतदेवस्फु ११९
टीकरिष्यतिशौचमाचमनंस्नानंनतुचोदनयाचरेदित्यादिना २८ नमोरामचंद्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंचरेत्तदाह बुधः विवेकवानपि बालकवत् मानावमानविवेकशून्यः कुशलः नि
पुणोपि जडवत् फलानुसंधानाभावेन नैगमः वेदार्थनिष्ठोपि गोचर्यां अनियताचार

बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत् वदेदुन्मत्तवद्विद्वान्गोचर्यां नैगम
श्चरेत् २९ वेदवादरतो न स्यान्न पाषंडी न हैतुकः शुष्कवादविवादे न कं
चित्पक्षं समाश्रयेत् ३० नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु अतिवा
दांस्तितिक्षेत नावमन्येत कंचन ३१ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचि

मिय २९ वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः हैतुकः केवलतर्कनिष्ठः तु
शुष्कवादे निःप्रयोजनगोष्ठ्यां यो विवादस्तस्मिन् ३० अतिवादान् दुरुक्तानि ३१ नमोनम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.र.
१८०

आत्मदृष्ट्यातावद्भेदकारणंनास्तीत्युक्तंएकएवेति देहदृष्ट्यापिनास्तीत्याह भूतानिच
देहाअपिकारणरूपेणैकात्मकानि ३१ दैवतंत्रितंदैवाधीनंयतः ३२ अलंतर्हिभि

एकएवपरोह्यात्माभूतेष्वात्मन्यवस्थितः यथेंदुरुदपात्रेषुभूतान्येकात्मकानिच
काले ३१ अलब्ध्वानविषीदेतकालेऽशनंक्वचित् अलब्ध्वानहृष्येद्धृतिमानुभयंदैव
तंत्रितं ३२ आहारार्थंसमीहेतयुक्तंतत्प्राणधारणं तत्त्वंविमृश्यतेतेननतद्विज्ञायवि
मुच्यते ३४

क्षाश्रयत्नेनापितत्राह आहारमात्रार्थंसमीहेतैव यतःतस्यप्राणधारणंयुक्तंसम्यक्
कथं तेनप्राणधारणेनतत्त्वंविचार्यते किंतेनापितदाहतद्विज्ञायेति ३४ नमोभगव १८०
त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हिकिंमिष्टान्नादिकमग्राह्यमेवकेनैवमुक्तमित्याह यदृच्छयेति ३५ यथाहमीश्वरो
लीलयाचरामितथाज्ञानीज्ञाननिष्ठः अनासक्तःकुर्यात्नतुविधिकिंकरत्वेनतस्यज्ञा
ननिष्ठाविरोधादित्यर्थः ३६ कुतोविधिकिंकरत्वाभावस्तस्यतत्राह नहितस्यविकल्प

यदृच्छयोपपन्नान्नमद्याछ्रेष्ठमुतापरं तथावासस्तथाशय्यांप्राप्तंप्राप्तंभजेन्मुनिः ३५
शौचमाचमनंस्नानंनतुचोदनयाचरेत् अन्यांश्चनियमान्ज्ञानीयथाहंलीलयेश्वरः
नहितस्यविकल्पाख्यायाचमद्वीक्षयाहता आदेहांतात्क्वचित्ख्यातिस्ततःसंप ३६
द्यतेमया ३७

ख्याभेदप्रतीतिः नन्वस्तिसा सत्यंयाचासीत्सापिमद्वीक्षयाज्ञानेनहता ननुनहतापु
नर्दृश्यमानत्वात् तत्राह आदेहांतात्क्वचित्कदाचित्बाधितैवख्यातिर्भवति ३७ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
१८१

तदेवं विरक्तस्य पक्षेरोज्ञानवतः संन्यासं तद्धर्मांश्चोक्त्वा केवलं वैराग्यवंतं विविदिषुं प्र
साह दुःखोदर्केष्विति नजिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं येन सः ३८ मामेवम

प्राप्नुः खोदर्केषु कामेषु जातनिर्वेद आत्मवान् अजिज्ञासितमद्धर्मो गुरुं
मुनिमुपाव्रजेत् ३८ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः यावद्ब्रह्म वि
जानीयान्मामेव गुरुमादृतः ३९ यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः
ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति ४०

इष्टैव गुरुं परिचरेत् ततः परमेक
श्वरे हिंसादि धर्मैर्वर्त्तेतरति भावः ३९ अनधिकारिणः संन्यासं निंदति द्वाभ्यां यस्त्विति
प्रचंडो अत्यासक्त इंद्रियसारथिर्बुद्धिर्यस्य सः ४० १८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरान् यक्षान् देवान् स्वात्मानं च आत्मस्थं मां च निकुते प्रतारयति निह्नवफलमा
ह अस्मादिति ४१ चतुर्णां प्रधानधर्मानाह भिक्षोरिति ४२ अन्यधर्मान् कांश्चित्

सुरानात्मानमात्मस्थं निकुते मां च धर्महा अविपक्वकषायोस्मा
दमुष्माच्च विहीयते ४१ भिक्षोर्धर्मः शमोहिंसा तप ईक्षा वनौकसः
गृहीणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ४२ ब्रह्मचर्यं तपः शौचं
संतोषो भूतसौहृदं गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ४३

गृहस्थेऽप्यतिदिशति ब्रह्मचर्यमिति शौचं रागादिराहित्यं तस्य ब्रह्मचर्यप्रकार
माह ऋतौ गंतुरिति ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१८२

एवंभूतवर्णाश्रमधर्मफलमाह इतिमामिति दृढांमद्भक्तिंविंदते ४४ ततःकिमत
आहभक्त्येति महेश्वरत्वेहेतुः सर्वोत्पत्त्यप्ययंसर्वस्योत्पत्त्यप्ययौयस्मात् अत

इतिमांयःस्वधर्मेणभजन्नित्यमनन्यभाक् सर्वभूतेषुमद्भावोम
द्भक्तिंविंदतेचिरात् ४४ भक्त्योद्धवानपायिन्यासर्वलोकमहेश्वरं
सर्वोत्पत्त्यप्ययंब्रह्मकारणंमोपयातिसः ४५ इतिस्वधर्मनिर्णिक्त
सत्वोनिर्ज्ञातमद्गतिः ज्ञानविज्ञानसंपन्नोनचिरात्समुपैतिमां ४६

एवंतत्कारणंमामांब्रह्मरूपंवैकुंठनिवासिनंयद्वाब्रह्मणोवेदस्यकारणंमाउपया
तिसामीप्येनप्राप्नोति ४५ ततश्चासौमुक्तएवेत्याहुः इतिएवंभूतेनस्वधर्मेणनि १८२
र्णिक्तंशुद्धंसत्वंयस्यसः अतएवनिर्ज्ञातामममगतिरैश्वर्यंयेन ४६ नमोरामाय॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्कमर्थं संक्षिप्याह यएष आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुक्तः म
दर्पणेनकृतः ४७ प्रकरणार्थमुपसंहरति एतत्तेः मिहितं यथाभक्तोमूलामां

वर्णाश्रमवतांधर्मएषआचारलक्षणः सएवमद्भक्तियुतोनिःश्रे
यसकरःपरः ४७ एतत्तेमिहितंसाधोभवान्पृच्छातियच्चमां यथा
यु स्वधर्मसंक्तोभक्तोमांसमियात्परं ४८ इति श्रीभागवते महापुराणे
एकादशस्कंधेअष्टदशोध्यायः ॥१८॥

परंसंप्राप्नुयादिति ४८ इति श्रीभागवते महापुराणे एकादशस्कंधे टीकायां अष्टाद
शोध्यायः ॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानादेर्निर्णयः पूर्वं कृतोथाश्रमधर्मतः एकोनविंशतितमे ज्ञानादेस्त्याग उच्यते तदे
वं तर्कतो बाधितोऽपि देहादिप्रपंचो यावदेवं परोक्षानुभवेन दृष्टो हादिरिव न लीयते
तावज्ज्ञानाभ्यासः ततो मुक्तिरित्युक्तं आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते न
येत्यादिना यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचित्कृत्यमस्तीत्याह

श्रीभगवानुवा॰ योविद्याश्रुतसंपन्न आत्मवान्नानुमानिकः मायामात्रमिदं ज्ञात्वा ज्ञानं
च मयि संन्यसेत् १

हयइति विद्या अनुभवः तत्पर्यंतेन श्रुतेन संपन्नः अत एव आत्मवान्
प्राप्तात्मतत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान्न भवति अनकारपाठे प्राक् श्रुत्यनु
कूलतर्कतो निर्णीतार्थ इत्यर्थः सइदं द्वैतं तन्निरस्तिसाधनं च मयि मायामात्रमिति
ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् अयमेव विद्वत्संन्यासो नाम १ १८३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रहेतुमाहज्ञानिनोरिवति यस्मादहमेवतस्येष्टः अपेक्षितः स्वार्थः फलंहेतुःत
त्साधनंच समंतः स्वर्गोभ्युदयश्च अपवर्गः संसारनिवृत्तिः अतस्तस्यनप्राप्यंक्व स्त

ज्ञानिनस्त्वहमेवेष्टः स्वार्थोहेतुश्चसंमतः स्वर्गश्चैवापवर्गश्चनान्योऽर्थो
मदृतेप्रियः २ ज्ञानविज्ञानसंसिद्धाः पदंश्रेष्ठंविदुर्मम ज्ञानीप्रियतमो
तोमेज्ञानेनाऽसौबिभर्त्तिमां ३ तपस्तीर्थंजपोदानंपवित्राणीतराणिच
नालंकुर्वंतितांसिद्धिंयाज्ञानकलयाकृता ४

स्यवाकिंचिदस्तीत्यर्थः २ अत्रवि
द्वदनुभवंप्रमाणयतिज्ञानेति यथोक्तंज्ञानिनमभिनंदतिज्ञानीति यतोऽसौज्ञाने
नमांधारयति ३ तस्यज्ञानंस्तौतितपइति अलंअत्यर्थंज्ञानस्यकलयालेशेन ४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ग॰
१८५

ज्ञानेनसहितंतत्स्यर्थंतंयथाभवतितथाज्ञात्वातत्संपन्नः सन्मामेवभजअन्यत्सर्वं

तास्मात्ज्ञानेनसहितंज्ञात्वास्वात्मानमुद्धव ज्ञानविज्ञान
संपन्नोभजमांभक्तिभावितः ५ ज्ञानविज्ञानयज्ञेनमामि
ष्ट्वाऽऽत्मानमात्मनि सर्वयज्ञपतिंमांवैसंसिद्धिंमुनयोगमन्

त्यजेत्सर्थः ५ तस्यप्रसयार्थंपूर्वेषांवृत्तमाहज्ञानेति मामेवसंसिद्धिंप्राप्ताः ६ राम १८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवज्ञानंसंक्षेपतउपदिशातित्वयीति त्रिविधः अध्यात्मिकादिविकारः देहादिःसः
मायानतुपरमार्थः यत् यस्मात् अंतरामध्यएवापतति रज्जौसर्पमालादिवत् नाद्य
पवर्गयोःनत्वादावंतेचास्ति अतः यत् यदाअस्पविकारस्यामीजन्मादयःस्युः तदा

त्वय्युरुधाश्रयतियास्त्रिविधोविकारोमायांऽनराऽपततिनाद्यपवर्गयोर्य
त् जन्मादयोस्ययदमीतवतस्यकिंस्युराद्यंतयोर्यदसतोऽस्तितदेवमध्ये

तस्यतवाधिष्ठानभूतस्यकिंनकिंचिदित्यर्थः तस्यापिवस्तुतोनसंतितस्यासत्वादि
त्याह आद्यंतयोरितिअसतः सर्पादेः आद्यंतयोर्यदस्तिरज्ज्वादितदेवमध्येऽपितसुस
र्पादि तद्वदयंविकारोनास्तीत्यर्थः यद्वा आद्यंतयोर्यदस्तितन्मध्येऽप्यस्त्वेव नतस्यज
न्मादयःसंतीअतस्त्वंनिर्विकारंब्रह्मेति ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानादेर्विशेषंजिज्ञासुः पृच्छतिज्ञानमिति विशुद्धमेतत्ज्ञानंविपुलंनिश्चितंयथाभ
वतितथाकथयेति महद्भिर्भक्त्यादिभिर्विमृग्यं ८ महद्भिर्मृग्यत्वमभिनयेनाह ता

उद्धव उवाच॥ ज्ञानंविशुद्धंविपुलंयथैतद्वैराग्यविज्ञानयुतंपुराणं आ
ख्याहिविश्वेश्वरविश्वमूर्त्तेत्वद्भक्तियोगंचमहद्विमृग्यं ८ तापत्रयेणा
भिहतस्यघोरेसंतप्यमानस्यभवाध्वनीश पश्यामिनान्यच्छरणंतवां
घ्रिद्वंद्वातपत्रादमृताभिवर्षात्

ता

पत्रयेणाभितोहतस्यअतःसं तप्यमानस्य अंघ्रिद्वं
द्वमेवातपत्रंतस्मात् नकेवलंआतपात्त्रातुः किंतुअमृतंयथाभितोवर्षयतीतितत्तस्मात्

१८५

ध्यासादिना म

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानादिभिरुपबृंहितान् तत्सहिता नित्यर्थः १३ तत्रज्ञानं कथयति नवेति प्रकृतिपुरु
षमहदहंकारपंचतन्मात्राणि एकादशइंद्रियाणि पंचमहाभूतानि त्रयोगुणाः ए
तान् भावानष्टाविंशतितत्वानि भूतेषु ब्रह्मादिस्थावरांतेषु अनुगतानि येनज्ञानेने

तानहं तेभिधास्यामि देवव्रतमुखाच्छ्रुतान् ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युप
बृंहितान् १३ नवैकादशपंचत्रीन् भावान् भूतेषु येनवै ईक्षेताथैकमप्येषु तत्
ज्ञानं मम निश्चितं १४

न क्षेत अथएष्वपि भावेषु एकं परमात्मतत्वं अनुगतं येनेक्षेत का
र्यकारणात्मकं जगत्पश्यन् परमकारणात्मकमेवैतत् न तु ततः पृथगिति येन पश्ये १८६
त् तज्ज्ञानमित्यर्थः १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिकृपामुत्पादयन्नाहदृष्ट्वमिति अस्मिन्बिलेसंसारकूपेपतितं तत्रचकालाहिनादृ
ष्टं एवमपिक्षुद्रसुखेघेव उरुस्तर्षः तृष्णायस्यतंदत्यमानः कथंसमुद्धरणीयइति

१ दृष्ट्वंजनंसंपतितंबिलेस्मिन्कालाहिनाक्षुद्रसुखोरुतर्षं समुद्धरेनंकृपयापवर्ग्यै
र्वचोभिरासिंचमहानुभाव १० श्रीभगवानुवाच इत्यमेतत्पुराराजाभीष्मंधर्मभृ
तांवरं अजातशत्रुःपप्रच्छसर्वेषांनोनुश्रृण्वतां ११ निवृत्तेभारतेयुद्धेसुहृन्निधन
विह्वलः श्रुत्वाधर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत १२

चेत्तत्राह आपवर्ग्यैः अ
पवर्गबोधकैः वागमृतैरासिंचेति १० तद्दिश्वासार्थंविद्वत्सभायांनिर्णीतमहत्वस्या
मीत्याहइत्यमिति १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञानमाह एतदेवेति श्लोकार्द्धेन यत्पदार्थेनैकेनानुगतानेकात्मब्रह्माभावान् पू
र्वमैक्षत तान् तथा पूर्ववन्नेक्षेत किंतु तदेकं परमकारणं ब्रह्मैव तदा एतदेव वि
ज्ञानमुच्यते एतदुक्तं भवति परोक्षज्ञानेनापरोक्षभ्रमस्य दिङ्मोहादिवद्विनि
वृत्त्यभावात् तदा जगत्परस्य ब्रह्मण आत्मनः पृथक् सदिति न मन्यते अपरोक्षे ज्ञाने तु
एतदेव हि विज्ञानं न तथैकेन येन यत् स्थितः सत्सत्पश्यन्पश्येद्भावानां त्रिगुणात्म
१५
बाधितमेव जीवन्मुक्तः संस्कारशेषं पश्यति ततः परं न पश्यति च अतः परोक्षापरो
क्षज्ञाने ज्ञानविज्ञानशब्दाभ्यामुच्येते इति एकेन सर्वकार्याणामनुगतिं कार्याणां
कारणात्पृथगसत्त्वं चोपपादयति सार्द्धेन तत्र यदि न कदाचिदनीदृशं जगदित्यर्थो
दीन्साधयति स्थितीति त्रिगुणात्मनां सावयवानामित्यर्थः विमताभावाज्ञत्पत्ति

सादिमंतः सावयवत्वात् घटादिवदितिपश्येत् १५ तत्रआदौत्वसत्तौ अंतेपरिणामां
तरापत्तौचकारणत्वेन मध्येचाश्रयत्वेनसज्जासरूपंकार्यात्कार्य्यांतरं प्रतियद

आदावंतेचमध्येचसज्ज्पासरूपंयदन्वियात् पु
नस्तत्प्रतिसंक्रामेयाछिष्येतत्तदेवसत् १६

न्वियात् अनुगच्छेत् तत्प्रतिसंक्रामेतेषांप्रलयेचयदवशिष्येत तदेवसदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैराग्यमाह श्रुतिरिति द्वाभ्यां श्रुतिः नेह नानास्ति किंचनेत्यादिः प्रत्यक्षं पदार्थादिकार्यं तंवा
द्व्यतिरेकेण न दृश्यते चैतन्यव्यतिरेकेण च न किंचित् दृश्यत इति ऐतिह्यं महाजन
प्रसिद्धिः अनुमानं विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवत् इत्यादि एवं प्रमाणचतु

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते
१७ कर्मणां परिणामित्वादाविरिंच्यादमंगलं विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत्

१८

ष्टयं एतेष्वनवस्थानात् एतैर्बाधितत्वात् स एवं सर्वानुगतं सत्यमात्मानत्वं प
श्यन्विकल्पस्य च मिथ्यात्वं ततो पश्यन्निति संबंधः विरक्तो भवतीत्यर्थः १७ न चवे
दोक्तस्वर्गादिसुखाशया न विरज्येतेत्याह कर्मणामिति आविरिंच्यात् ब्रह्मलोकप
र्यंतं अदृष्टमपि सुखं अमंगलं दुःखरूपं नश्वरं पश्येत् १८ श्रीगोपीजनवल्लभाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए
१८८

भक्तियोगंसकारणमाह भक्तियोगःपूर्वमुक्तएवतथाःपितास्मिन्प्रीतिप्रायमुद्धवतेतुभ्यं
पुनश्चकथयिष्यामि १९ श्रद्धा [illegible]

भक्तियोगःपुरैवोक्तःप्रीयमाणायतेनघ पुनश्चकथयिष्यामिमद्भक्तेःकारणंपरं १९
श्रद्धामृतकथायांमेशश्वन्मदनुकीर्त्तनं परिनिष्ठाचपूजायांस्तुतिभिःस्तवनंमम २०
आदरःपरिचर्यायांसर्वांगैरभिवंदनं मद्भक्तपूजाभ्यधिकासर्वभूतेषुमन्मतिः २१
मदर्थेष्वंगचेष्टाचवचसामद्गुणेरणं मय्यर्पणंचमनसःसर्वकामविवर्जनं २२ ७

श्रवणादरःशश्वदितिसर्वत्रानुषज्जते मदनुकीर्त्तनंश्रवणानंतरंमत्कथाव्याख्यानमि १८८
त्यर्थः २० २१ अंगचेष्टालौकिकीक्रिया वचसालौकिकेनापिमद्गुणानामीरणंकथनं २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदर्थैमङ्गजनार्थंतद्विरोधिनोऽर्थस्यपरित्यागः भोगस्यतत्साधनस्यचंदनादेः
सुखस्यपुत्रोपलालनादेः इष्टादिवैदिकंयत्कर्मतदपिमदर्थंकृतंभक्तेःकारण
मित्यर्थः २३ भक्तिप्रेमलक्षणासंजायते अस्यभक्तस्यअन्यःकोऽर्थःसाधन

७ ७ मदर्थेर्थपरित्यागोभोगस्यचसुखस्यच इष्टंदत्तंहुतंजप्तंमदर्थंयद्व्रतंतपः
२३ एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां मयिसंजायतेभक्तिःकोऽन्योर्थो
स्यावशिष्यते २४ यदात्मन्यर्पितंचित्तंशांतंसत्वोपबृंहितं धर्मंज्ञानंसवैराग्य
मैश्वर्यंचाभिपद्यते २५

रूपःसाध्यरूपोवाऽवशिष्यतेस र्वोपित्वत्तएवभवतीत्यर्थः २४
तदेवाहकिंबहुनाचित्तमेवांतर्बहिर्निष्ठमर्थानर्थयोःकारणमित्याहयदात्म नीतिद्वाभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१८९

यदाआत्मनिमयीश्वरेचित्तमर्प्पितंतदापुमान्धर्मादीन्प्राप्नोत्येव २५ एतदेवव्यति
रेकेणद्रढयति यत्तुयदातच्चित्तंविकल्पेदेहगृहादावर्पितंसत्परिधावतितदाधि
स कंरजस्वलमसन्निष्ठंचभवति ततश्चविपर्ययंअधर्मादिकंविद्धि २६ स्वाभिप्रेतान्

यदर्पितंतद्विकल्पइंद्रियैःपरिधावति रजस्वलंचाऽसन्निष्ठंचित्तंविद्धिविपर्ययं २६
धर्मोमद्भक्तिकृत्प्रोक्तोज्ञानंचैकात्म्यदर्शनं गुणेष्वसंगोवैराग्यमैश्वर्यंचाणिमाद
यः २७ ॥उद्धव उ०॥ यमःकतिविधःप्रोक्तोनियमोवारिकर्शन कःशमःकोदमःकृष्णः
कातितिक्षाधृतिःप्रभो २८

धर्मादीन् व्याचष्टे धर्मोमद्भक्तिकृत् यतःसएवप्रोक्तःप्रकृ
ष्टउक्तःशास्त्रेषु २७ धर्मादीनांमहाजनप्रसिद्धानामन्यथाव्याख्यानत्वाद्यमादिष्वपि
संख्यातःस्वरूपतोवाकिंचिद्वैलक्षण्यंस्यादितिसंभावनयातद्विशेषजिज्ञासुःपृच्छति १८९
यमइतिपंचभिः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इष्टंअभ्यर्हितंधनंचकिं २९ परेतिवियादीनां विशेषणं श्रीमंडनं ३० ३१ प्रश्नानुए

किंदानंकिंतपःशौर्यंकिंसत्यमृतमुच्यते कस्त्यागःकिंधनंचेष्टंकोयज्ञःकाचदक्षि
णा २९ पुंसःकिंस्विद्बलंश्रीमद्भगोलाभश्चकेशव काविद्या ह्रीःपराकाश्रीःकिंसुखं
दुःखमेवच ३० कःपंडितःकश्चमूर्खःकःपंथाउत्पथश्चकः कःस्वर्गोनरकःकःस्वित्
कोबंधुरुतकिंगृहं ३१ कआढ्यःकोदरिद्रोवाकृपणःकःकईश्वरः एतान्प्रश्नान्मब्रूहि
विपरीतांश्चसत्पते ३२ श्रीभगवानु०॥ अहिंसासत्यमस्तेयमसंगोह्रीरसंचयः आस्ति
क्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाभयं ३३

ष्टानर्थान् विपरीतान् अश मादीन् ३२ यम
नियमानाह अहिंसेतित्रिभिः अस्तेयंमनसापिपरस्वाग्रहणंआस्तिक्यंधर्मेविश्वासः ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौचं बाह्यमाभ्यंतरं चेति द्वयं एते द्वादश नियमाः श्रद्धा धर्मादिः ३४ उभयोः श्लोकयोर्ये स्मृताः ते यमा नियमाश्च यद्वा उभयोः प्रवृत्तनिवृत्तयोः मुमुक्षोर्यमा मुख्याः

शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ३४
एते यमाः स नियमा उभयोर्द्वादश स्मृताः पुंसामुपासितास्तात यथाकामं दुहंति हि
३५

सकामस्य नियमा मुख्याः स्मृता इत्यर्थः अत्र हेतुमाह हि यस्मात् उपासिताः सेविताः
संतः पुंसां प्रवृत्तानां निवृत्तानां यथाकामं कामानुसारेण मोक्षमभ्युदयं च दुहंतीति ३५ १९०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुमुक्षोरुपादेयान्शमादीन्हेयांश्चदुःखादीन्महाजनप्रसिद्धेभ्योविलक्षणानाहशम
इत्यादिनायावत्समाप्ति एतेनैवतद्विपरीताशमादयोऽप्युन्नेयाः शमोमन्निष्ठताबु
द्धेः नतुशांतिमात्रं दमइंद्रियसंयमनंनचोरादिदमनंतितिक्षाविहितदुःखस्यसंमर्षः

शमोमन्निष्ठताबुद्धेर्दमइंद्रियसंयमः तितिक्षादुःखसंमर्षोजिह्वोपस्थजयोधृ
तिः ३६ दंडन्यासःपरंदानंकामत्यागस्तपःस्मृतं स्वभावविजयःशौर्यंसत्यंचस
मदर्शनं ३७

सहनंनभारादेः जिह्वोपस्थयोर्वेगधारणंधृतिः नतुउद्वेगमात्रं ३६ दंडो
भूतद्रोहः तस्यत्यागोदानंनधनार्पणंकामत्यागः भोगोपेक्षातपः नकृच्छ्रादिस्वभा
वोवासनातस्यजयःप्रतिबद्धः शौर्यंनविक्रांतिः समंब्रह्मतस्यदर्शनमालोचनंसत्य
विषयत्वात्सत्यंनयथार्थभाषणमात्रं ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यत्रऋतंसूनृतस्यासत्याप्रियाचवाक् एवंचऋतसत्ययोःस्फुटएवविवेकः क्रमप्राप्तं
त्यागंव्याख्यातुमादौतत्तोर्थभेदेनशौचंव्याचष्टेतस्यापिमलत्यागरूपत्वेनत्यागाद
भेदप्रतीतेः कर्मसुअसंगमः अनासक्तिः शौचंत्यागस्तुसंन्यासइतितयोर्भेदइत्य

ऋतंचसूनृतावाणीकविभिःपरिकीर्तिता कर्मस्वसंगमःशौचंत्यागःसन्यासउच्य
ते ३९ धर्मइष्टंधनंनृणांयज्ञोहंभगवत्तमः दक्षिणाज्ञानसंदेशःप्राणायामःपरंब

लं ३९
र्थः ३९ नृणांइष्टंधनंधर्मःनपश्वादिसाधारणंभगवत्तमःपरमेश्वरोहमेवयज्ञःमद्बु
ध्यायत्तोऽनुष्ठेयःनाक्रियाबुद्धिरपर्थः यत्नार्थंदानंदक्षिणासाचज्ञानोपदेशः नहिरण्या
दिदानं तेनहियज्ञरूपोविष्णुःआप्यते उर्द [illegible] मनंबलंतच्चमनोदमनहेतुत्वात्प्राणाया
मस्ति ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ञाभंव्याचिख्यासुः प्रथमं भगं तत्तोभेदेन व्याचष्टेलोकेतयोरभेदप्रसिद्धेः भगोभाग्यं
तत्तुमेऐश्वर्योभावोमदीयंऐश्वर्यादिषाड्गुण्यमित्यर्थः उत्तमोलाभस्तुम्मद्भक्तिः नपुत्रा

भगोमऐश्वर्योभागोलाभोमद्भक्तिरुत्तमः वि
द्यात्मनिभिदाबाधोजुगुप्साह्रीरकर्मसु ४०

दिः विद्यात्मनिप्रतीतस्यभेदस्यबाधः नज्ञानमात्रं अकर्मसुजुगुप्साहेयत्वदर्शनं
ह्रीः नलज्जामात्रं ४०

गुणा एव श्रीर्मंडनं न किरीटादि दुःखसुखयोरत्ययः अतिक्रमः अननुसंधानं सुखं न
भोगः विषयभोगापेक्षैव दुःखं नाग्निदाहादि बंधमोक्षद्वयं च यो वेत्ति स पंडितः न वि
द्वन्मात्रं ४१ अहंबुद्धिरित्युपलक्षणं देहगेहादिष्वहं ममेत्यभिमानवान् मूर्ख इत्यर्थः

श्रीर्गुणा नैरपेक्षाद्याः सुखं दुःखसुखात्ययः दुःखं कामसुखापेक्षा पंडितो बंधमोक्ष
वित् ४१ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः उत्पथश्चित्तविक्षेपः स्वर्गः सत्व
गुणोदयः ४२

मन्निगमः मां नितरां गमयति प्रापयतीति यो निवृत्तिमार्गः [illegible] स तु पंथाः सन्मा
र्गः न कंटकादिमान्यः चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः न तु चोराद्याकुलः
सत्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमसउन्नाहः उद्रेकः सनरकः नत्तामित्रादिः गुरुरेवबंधुर्नपित्रादिः सुखाऽहमेव य
थाऽहंजगद्गुरुः एकएवपरोबंधुर्विषमेसमुपस्थिते गुरुःस कंधर्मोयत्राकिं ल
चनगोहरिरिति ससाधनं भोगायतनंग्रहंतच्चमानुष्यंमानुषरूपंशरीरमेवनहर्म्या

नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे ग्रहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४४ द
रिद्रोयस्त्वसंतुष्टः कृपणोयोऽजितेंद्रियः गुणेष्वसक्तधी शोगुणसंगोविपर्ययः ए
तउद्धवतेप्रश्नाः सर्वेसाधुनिरूपिताः ४५

द्विगुणैः संपन्नआढ्यउच्यतेनधनी ४४ असं
तुष्टोयः सदरिद्रः ननिःस्वः योऽजितेंद्रियः सकृपणः शोच्यः नदीनः विषयेष्वनासक्तधी
र्यः सईशः स्वतंत्रः नराजादिः गुणसंगः गुणेषुसंगोयस्यसः विपर्ययः अनीशः एतच्चश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१९३

मादिविपर्ययोपलक्षणार्थं ४४ उपसंहरति एतइति साधुमोक्षोपयोगितया ४५ एत
च्चसर्वंगुणदोषयोर्विवेकायोद्धवेन पृष्टमितितयोः संक्षेपतोलक्षणमाह किंबहुना

किंवर्णितेनबहुनालक्षणंगुणदोषयोः गुणदोषदृशिर्दो
षोगुणस्तूभयवर्जितः ४६ इतिश्रीभागवतेमाहापुराणे
एकादशस्कंधेएकोनविंशातिमोध्यायः ॥१९॥ श्रीराम ॥

वर्णितेनगुणदोषयोर्लक्षणमेतावदेव तदाहगुणदोषयोर्दृशिर्दर्शनंदोषः गुणस्तु
तदुभयदर्शनवर्जितंस्वभावइति ४६ इतिश्रीभागवते॰॥॰ टिकायां एकोनविंशातिमो
ध्यायः ॥१९॥

१९३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विंशेयोगत्रयंप्रोक्तंभ सौक्तिनेक्रियात्मकं गुणदोषव्यवस्थार्थमधिकारिविभागतः

गुणदोषदृशिर्दोषोगुणस्तूभयवर्जितः सुक्तंतदास्सिपतिविधिश्चेतिपंचभिः विधि

उध्धव उवाच॥ विधिश्चप्रतिषेधश्चनिगमोहीश्वरस्यते

अवेक्षतेःरविंदाक्षगुणंदोषंचकर्मणां १ नमोभगव

श्चप्रतिषेधश्चेरस्यतवनिगमआज्ञारूपोवेदः सचविधेयानांप्रतिषेध्यानांचकर्मणां

गुणंदोषंचपुण्यपापफलरूपमवेक्षते १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तमाधमभावेनतदधिकारिणांवर्णानामाश्रमाणांविकल्पंभेदंचगुणदोषरूपम
वेक्षते प्रतिलोमानुलोमजंचगुणदोषंतथैवावेक्षते प्रतिलोमजाः उत्तमवर्णासु
स्त्रीषुहीनवर्णेभ्यःपुरुषेभ्योजाताः सूतवैदेहकादयः [illegible]

वर्णाश्रमविकल्पंचप्रतिलोमानुलोमजं द्रव्यदेशवयःकालान्स्वर्गंनरकमेवच २

[illegible] अनुलोमजास्तूत्तमवर्णेभ्यःपुरुषेभ्योहीनवर्णा
सुस्त्रीषुजाताः मूर्द्धावसिक्तांबष्ठादयः तेषांच असत्संतस्तु विज्ञेयाः प्रतिलोमानुलो
मजाइतिगुणदोषौ द्रव्यादीन्कर्म्मार्हतानर्हताभ्यांस्वर्गंनरकंचतत्फलतयागुणदोषरू
पमेवावेक्षते एतच्चोत्तराध्यायेप्रपंचयिष्य
ते २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथापिप्रस्तुतेकिमायातं अतआह गुणदोषेति गुणदोषदर्शिदोषरतिगुणदोषयोर्नि
राकृतत्वात् गुणदोषाभिदादृष्टिमंतरेणतां विनानिषेधविधिलक्षणंकर्मकांडंतव
चः कथं तत्र्ववचोंतरेण नृणांनिश्रेयसंकथंस्यात् ३ तत्रापिश्रोतव्योमंतव्यः

गुणदोषाभिदादृष्टिमंतरेणवच स्तव निश्रेयसंकथंनृणांनिषेधविधिलक्षणं
पितृदेवमनुष्याणांवेदश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेर्थेसाध्यसाधनयोरपि ४

त्यादिसाधनविधेः नानुध्यायाद्बहूंछब्दान्वाचोविग्लापनंहितदित्यादिनिषेधस्यचा
वश्यकत्वादितिभावः यद्वागुणदोषाभिदादृष्टिमंतरेणनिषेधविधिलक्षणंतववचो
विनेतिसामानाधिकारण्यमेवास्तु यद्वागुणदोषभिदादृष्टिमंतरेणनिषेधविधिल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणमपिवचः कथंनुतत्वमस्यादिवाक्यवत् निःश्रेयसपरंस्यात् सर्वस्यवेदस्यतत्त्व
त्वांगीकारादित्यर्थः ३ ननुपितरोदेवाश्चसर्वज्ञाःअस्मत्तोदृष्ट्वामनुष्येभ्यःकथ
यिष्यंतीतिनेत्याह पित्रादीनांसर्वेषांतत्वत्वाक्यरूपोवेदएवतुश्रेयःश्रेष्ठंचक्षुःप्रमाप
कंच अनुपलब्धेर्थेमोक्षस्वर्गादौचतथासाध्यसाधनयोःइदमस्यसाध्यंइदमस्यसा

गुणदोषभिदादृष्टिर्निगमात्तेनहिस्वतः निगमेनापवादश्चभिदायाइतिहभ्रमः ४

धनमित्यत्रापि तदेवंगुणदोषदृष्ट्यभावेनिःश्रेयसंनघटते ४ किंचशास्त्रेणैवविहि
तांभेददृष्टिंतस्मिन्नेवविषयेशास्त्रंकथंनिवर्त्तयेदित्याह तेनिगमात्तत्वज्ञानारूपा १९५
द्वैतादेवनहिस्वतः यस्मादर्थप्राप्तत्वेननिवर्तेत हस्फुटंभ्रमोभवतितंनिवर्त्तयेदिति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयाभेदेप्य॰धिकारिभेदेनाविरोधंवक्तुंप्रथमंयोगत्रयमाहयोगाइति योगाउपायाः
ब्रह्मकर्मदेवताकांडैःप्रोक्ताः कर्मचनिष्कामंश्रेयोविधित्सयामोक्षसाधनेछया अ
न्यउपायोनास्तीतिकाम्यकर्मादिकंव्यावर्त्तयति तथाचोत्तराध्यायेस्फुटीकरिष्यति

श्रीभगवानु॰॥ योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया ज्ञानंकर्मचभक्तिश्चनो
पायोन्योस्तिकुत्रचित् ६ निर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसु तेष्वनिर्विण्ण
चित्तानांकर्मयोगस्तुकामिनां ७

यएतानित्यादिना ६ तेष्वधिकारिभेदमाहनिर्वि
ण्णानामितिद्वाभ्यां इहएषांमध्येकर्मसुनिर्विण्णानांदुःखबुद्ध्यातत्फलेषुविरक्तानां अ
तएवतत्साधनभूतकर्मन्यासिनांज्ञानयोगःसिद्धिदइत्युत्तरेणान्वयः अनिर्विण्ण
चित्तानांदुःखबुद्धिशून्यानां अतःकामिनांतत्फलेषुविरक्तानामित्यर्थः ७ नमोगमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदृच्छयाकेनापिभाग्योदयेन तत्रकाम्यकर्मसुप्रवर्त्तमानस्यसर्वात्मनाविधिप्र
तिषेधाधिकारस्तुत्तराध्यायेवक्ष्यति निष्कामकर्मयोगाधिकारिणस्तुयथाशक्ति

यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान् ननिर्विण्णोनातिसक्तोभ
क्तियोगस्यसिद्धिदः ८ तावत्कर्माणिकुर्वीतननिर्विद्येतयावता म
त्कथाश्रवणादौवाश्रद्धायावन्नजायते ९

सचस्नानभक्तियोगाधिकारात्प्रागेव तदधिकृतयोस्तुस्वल्पः ताभ्यांसिद्धानांतुनकिं
चिदिति ८ सावधिंकर्मयोगमाह तावदितिनवभिः कर्माणिनित्यनैमित्तिकानि यावता
यावत् ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मयोगिनोज्ञानभक्तिभूमिकारोहप्रकारमाहस्वधर्मस्थइति अनाशीःकामःअ
फलकामः अन्यत्तुनिषिद्धं नरकयानंहिहेतुत्वेवविहितातिक्रमाद्यानिषिद्धाचरणा

स्वधर्मस्थोयजन्यज्ञैरनाशीःकामउद्धव नयातिस्वर्गनरकौ
यद्यन्यन्नसमाचरेत् १० अस्मिल्लोकेवर्तमानःस्वधर्मस्थोन
घःशुचिः ज्ञानंविशुद्धमाप्नोतिमद्भक्तिंवायदृच्छया ११

द्वा अतःस्वधर्मस्थत्वान्निषिद्धवर्जनाद्यनरकंनयातिअफलकामत्वान्नस्वर्गमपीत्य
र्थः १० किंतुअस्मिल्लोकेअस्मिन्नेवदेहेअनघःनिषिद्धत्यागी अतःशुचिः निवृत्तरा
गादिमलः यदृच्छयेतिकेवलज्ञानादपिभक्तेर्दुर्लभत्वंद्योतयति ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनेनप्रकारेणज्ञानभक्तिसाधनत्वान्नरदेहंस्तौतिस्वर्गिणोपीति निरयिणइतिदृष्टां
तत्वेनोक्तं ज्ञानभक्तिभ्यांज्ञानभक्त्योः तदुभयंस्वर्गिनारकिशरीरं १२ अतोनरःस्व

स्वर्गिणोप्येनमिछंतिलोकंनिरयिणस्तथा साधकंज्ञानभक्तिभ्यामुभयं
तदसाधकं १२ ननरःस्वर्गतिंकांक्षेन्नारकींवाविचक्षणः नेमंलोकंचकां
क्षेतदेहावेशात्प्रमाद्यति १३

र्गतिंनकांक्षेत् नारकीमितिदृष्टांतः यद्वास्वर्ग
नरकसाधनकर्माणिनकुर्यादित्यर्थः अस्यातिश्रेष्ठत्वात्पुनरपिमनुष्योभवेयमित्य
पिनकांक्षेतयतोदेहावेशात् देहासक्त्यास्वार्थेप्रमाद्यतिअवधानशून्योभवति १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपितु एतद्देहं साधकमिति विद्वान् न स्वार्थसिद्धिमपि मर्त्यो ज्ञात्वा अप्रमत्तः अन
लसः सन् मृत्योः पूर्वमेव मोक्षाय घटेत यत्नं कुर्यात् १४ अप्रमत्तो मुक्तसंगः सुखं

एतद्विद्वान्मु[illegible]रामृत्योरभवाय घटेत सः अप्रमत्त इदं ज्ञात्वाम
र्त्यमप्यर्थसिद्धिदं १४ छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं
खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः १५

प्राप्नोतीत्यत्र दृष्टांतः छिद्यमानमिति यमैः यमवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिन् तं
स्वकेतं स्वस्याश्रयं अलंपटः अनासक्तः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दार्ष्टांतिकमाह अहोरात्रैः छिद्यमानमायुर्बुद्ध्वाभयेनवेपथुः कंपोयस्यसः १६ एवम
प्रयत्नमानंप्रमत्तंनिंदति नृदेहं प्लवंनावंप्राप्येत्यध्याहारः योभवाब्धिंनतरेत्सआत्म
हा तत्रहेतवः आद्यंसर्वफलानांमूलं एतदुपार्जितकर्मभिःसर्वप्राप्तेः किंच सुदुर्ल

अहोरात्रैःश्छिद्यमानंबुद्ध्वायुर्भयवेपथुः मुक्तसंगःपरंबुद्ध्वानिरीहउपशाम्य
ति १६ नृदेहमाद्यंसुलभंसुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारं मयानुकूलेननभ
स्वतेरितंपुमान्भवाब्धिंनतरेत्सआत्महा १७

भंउद्यमकोटिभिरपिप्राप्तुमश
क्यंतथापितुसुलभंयदृच्छयालब्धत्वात् तंचसुकल्पंपटुतरं किंचगुरुःसंश्रितमात्रए
वकर्णधारोनेतायस्यतं मयाचस्मृतमात्रेणानुकूलमारुतेनप्रेरितं १७ श्रीरामजयति १९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंतावदविरक्तस्यवैराग्यद्वाराज्ञानभक्तिसाधकंकर्मयोगमुक्त्वेदानींसम्यग्विरक्त
स्यज्ञानयोगंतस्यचज्ञानप्राप्तेःपूर्वंकिंचित्कृत्यंवर्जनीयंचाहसार्द्धैर्नवभिः यदातुआ
रंभेषुकर्मसुनिर्विण्णःदुःखदर्शनेनोद्विग्नः नतत्फलेषुविरक्तश्च तदासंयतेंद्रियःस

यदारंभेषुनिर्विण्णोविरक्तःसंयतेंद्रियः अभ्यासेनात्मयोनोगीधारयेदचलं
मनः १८ धार्यमाणंमनोयर्हिभ्राम्यदाश्वनवस्थितं अतंद्रितोनुरोधेनमा
र्गेणात्मवशंयेत् १९ न

नआत्मनोभ्यासेनआत्म विषयवृत्तिसंतत्या अचलंयथाभव
तितथामनोधारयेत् १८ तत्रप्रथममेवास्यंतधारणासंभवात्स्वभावानुसारेणवशी
करणमाहयर्हिआशुभ्राम्यत्परिभ्रमदनवस्थितंभवतितदाअनुरोधेनकिंचिदपेक्षा
प्ररणद्वारेण १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुतर्हियथापूर्वमेवस्यात्तत्राह मनोगतिंतुनविसृजेत् नोपेक्षेत किंतुअप्रमत्तःस
न् वशंनयेत् लक्षयेदित्यर्थः २० अनुरोधमार्गंदृष्टांतंस्तौति एषःअनुवृत्तिमार्गेण
मनसःसंग्रहः परमोयोगः तत्साधनत्वात्उपचारेणस्तुतिः यथाअदांतस्यदमनी

मनोगतिंनविसृजेज्जितप्राणोजितेंद्रियः सत्वसंपन्नयाबुध्या
मनआत्मवशंनयेत् २० एषवैपरमोयोगोमनसःसंग्रहःस्मृतः
हृदयज्ञत्वमन्विछन्दम्यस्येवार्वतोमुहुः २१ श्रीकृष्णपरमात्मा

यस्यअर्वतः अश्वस्यहृदयज्ञत्वंस्वाभिप्रायेणगतिमन्विछन्अपेक्षमाणः अश्वधार
कः प्रथमंकिंचित्तद्गतिमनुवर्त्तनेनतदाचरश्मिनातंधृत्वैवगच्छतिनतूपेक्षते तद्वदित्यर्थः १९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

एवमीषद्वशीकृतस्य मनसोत्यंतनैश्चल्योपायानाह सांख्येनेति त्रिभिः सांख्येन तत्ववि
वेकेन सर्वभावानां महदादिदेहांतानां अनुलोमतः प्रकृत्यादिक्रमेण भवं प्रतिलोमतः
पृथिव्यादिक्रमेणाप्ययं च अन्वनुध्यायेत् प्रसीदति निश्चलं भवति २२ ततश्च वाग

सांख्येन सर्वभावानां प्रतिलोमानुलोमतः भवाप्ययावनुध्याये
न्मनो यावत्प्रसीदति २२ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदि
नः मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया २३

मायापितृसुतेष्वबधिमत्तात्मदर्शनात्तदविवेकापन्नसंसारे निर्विण्णस्य अतो विरक्तस्य
ततश्चोक्तवेदिनः गुरूपदिष्टार्थालोचकस्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनःपुनर
नुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच यमादिभिर्योगमार्गैः अन्वीक्षिक्यापदार्थद्वयशोधनेन ममार्चनध्यानादिभि
र्वावाशब्देनास्यपक्षस्यस्वात्तंत्र्यंदर्शयति एतैरुपायैर्योग्यंपरमात्मानंमनःस्मरे

॥ यमादिभिर्योगपथैरान्वीक्षिक्याचविद्यया ममार्चोपास
नाभिर्वानान्यैर्योग्यंस्मरेन्मनः २४ यदिकुर्यात्प्रमादेनयोगी
कर्मविगर्हितं योगेनैवदहेदंहोनान्यत्तत्रकदाचन २५ ॥

त् नान्यैः अतोन्यत्नकुर्यादित्यर्थः ननुपापापत्तौप्रायश्चित्तंकार्यमेवतत्राहयदीति
योगेनज्ञानाभ्यासेनैवएतत्त्वभक्तस्यापिनामकीर्तनाद्युपलक्षणार्थंनान्यत् १०० २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुनित्यनैमित्तिकंकर्मसत्वशोधकत्वाद्गुणः हिंसादिकंत्वशुद्धिहेतुत्वाद्दोषः तत्रच
तन्निवर्त्तकत्वात्कृच्छ्रादिप्रायश्चित्तंगुणइतिविधिप्रतिषेधाभ्यामुक्तत्वात्प्रायश्चि

स्वेस्वेधिकारेयानिष्ठासगुणःपरिकीर्तितः कर्मणांजात्य
शुद्धानामनेननियमःकृतः गुणदोषविधानेनसंगानां
त्याजनेछया २६

तंविनायोगेनैवकथंपापंदहेत् तत्राहस्वेस्वइतिसार्द्धेनसएवगुणः नेतरः यदुपपादय
ति यस्माद्विधिप्रतिषेधाभ्यामनेनगुणदोषविधानेनकर्मणांनियमः संकोचः कृतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुतइत्यतआह आसाउत्पत्त्यैवाशुद्धानां सचप्रासानांसंगानांत्याजने
छया अयंभावः पुरुषस्याशुद्धिर्नामनप्रवृत्तेरन्या ऽस्तिस्वाभाविकप्रवृ
त्त्यैवतस्यमलिनत्वात् नत्वसहसासर्वतोनिवृत्तिः कुर्त्तुं शक्यतेअत
इदंकर्त्तव्यमितिस्वाभाविकप्रवृत्तिसंकोच द्वारेणनिवृत्तिरेवक्रियते
यथाचनप्रवृत्तिपरोवेदस्तथोत्तराध्यायेवक्ष्यामः उत्पत्त्यैवहिकामे
ष्वित्यादि अतोयोगिनःस्वाभाविकप्रवृ॰ सभावान्नप्रायश्चित्तादिवि
धिगोचरतेति २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्त्याधिकारिणो भक्तियोगमाह जातश्रद्ध इति त्रिभिः मत्कथासु जातश्रद्धः अत एव अन्येषु कर्मसु उद्विग्नः न तु तत्फलेषु विरक्तः तदाह वेदेति यद्यपि वेद तथापि तत्परि

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामा
न्परित्यागेप्यनीश्वरः २७ ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्च
यः जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् २८ ७० ७

त्यागे अनीश्वरः अशक्तः २७ एवंभूतो यः श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततः तदनंतरं मां प्रीत्या भजेत् विषयांस्तु सेवमानोपि तेषु प्रीतिं न कुर्यादित्याह गर्हय

त

कथंभजेनकिंवाततोभवतितदाहप्रोक्तेनेतिद्वाभ्यांश्रद्धामृतकथायांमेशश्वन्मदनुकी
र्तनमित्यादिनातत्रतत्रोक्तेनमामांअसकृत्नित्यंभजतः हृदय्यात्हृताः कामान्

प्रोक्तेनभक्तियोगेनभजतोमासकृन्मुनेः कामाहृदय्यान
श्यंतिसर्वेमयिहृदिस्थिते २९ भिद्यतेहृदयग्रंथिःश्छिद्यंते
सर्वसंशयाः क्षीयंतेचास्यकर्माणिमयिदृष्टेखिलात्मनि ३०

श्यंति २९ हृदयमेवग्रंथिरहंकारः तत्पूर्वकाश्चसर्वेसंशयाः असंभावनादयः कर्मा
ण्यनारब्धफलानिसंसारहेतुभूतानि ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं व्यवस्थयाऽधिकारित्रयमुक्तं तत्र च भक्तेरन्यनिरपेक्षत्वादन्यस्य च तत्सापेक्षत्वाद्भ
क्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य त

तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ३१
यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् योगेन ज्ञानधर्मेण श्रेयोभिरितरैरपि ३२
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ३३ ७

स्य प्रायः श्रेयःसाधनं ३१ तत्र हेतुः यत्कर्मभिरित्यादि इतरैरपि तीर्थयात्राव्रतादिभिः
श्रेयःसाधनैर्यद्भाव्यं स्वर्गसुखादि तत्सर्वं ३२ अंजसा अनायासेनैव स्वर्गमपवर्गं
मद्धाम वैकुंठं लभत एव वांछा तु नास्तीत्युक्तं यदि वांछतीति ३३

तत्र हेतुमाह न किंचिदिति धीराः धीमंतः यतो मम एकांतिनः मय्येव प्रीतियुक्ताः अ
तो मया दत्तमपि न गृण्हंति किं वक्तव्यं न वांछंतीत्यर्थः अपुनर्भवं आत्यंतिकमपि कै
वल्यं ३४ तदुपपादयति नैरपेक्ष्यमेव परं उत्कृष्टं अनल्पकं महत् निःश्रेयसं फलं

नकिंचित्साधवो धीरा भक्ता ह्येकांतिनो मम वांछंत्यपि मया दत्तं
कैवल्यमपुनर्भवं ३४ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं तस्मा
न्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ३५ नमो भगवते नमो नमः

तत्साधनं च प्राहुः मे भक्तिर्निराशिषः प्रार्थनाशून्यस्य निरपेक्षस्य प्रार्थनाकारणभू
तापेक्षारहितस्य पुंसो भवेत् यद्वा मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः
३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनेनचप्रकारेणसिद्धानांनगुणदोषाइतिविरोधपरिहारमुपसंहरतिनमयीति गुण
दोषैर्विहीतप्रतिषिद्धैरुद्भवोयेषांतेगुणाः पुण्यपापादयः साधूनांनिरस्तरागादीनांअ
तःसमचित्तानांअतएवबुद्धेः परमीश्वरंप्राप्तानां ३६ काम्यकर्मनिष्ठान्निंदिष्यन्नेतान्मु

नमय्येकांतभक्तानांगुणदोषोद्भवागुणाः साधूनांसमचित्तानांबुद्धेः परमुपेयुषां
३६ एवमेतान्मयाऽदिष्टाननुतिष्ठंतिमेपथः क्षेमंविंदंतिमत्स्थानंयद्ब्रह्मपरमंविदुः
३७ इतिश्रीभागवतेमाहापुराणेएकादशस्कंधेविंशतिमोध्यायः ॥२०॥ नमोनमः

त्रिमार्गाननुपसंहरतिएवमितिमेपथः मत्प्राप्त्युपायान्येअनुतिष्ठंतितेक्षेमंकाल
मायादिरहितंममलोकंविंदंति यत्परमंब्रह्मतत्त्वविदुः ३७ इतिश्रीभा० ॥टी० विंशति०
२०

जयतिस्वपरानंदः परमानंदनृकेसरी यत्कृपालवलेशेन श्रीधरः सत्कृतिः कृती ६
क्षंतामिछयासंतः क्षमंतां मम साहसं मयाहि स्वीयबोधाय कृतमेतन्न सर्वतः

श्रीभगवानुवाच यएतान्मत्पथोहित्वा भक्तिज्ञान
क्रियात्मकान् क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संस
रंतिते १

एकविंशोत्किषनधिकारिणां कामिनां द्रव्यदेशादिगुणदोषाः प्रपंचिताः तदेवं गुण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोषव्यवस्थार्थंयोगत्रयमुक्तं तत्रचज्ञानभक्तिसिद्ध्यानांनकिंचिद्गुण
दोषौ साधकानांतुप्रथमभूमौनिवृत्तकर्मनिष्ठानांयथाशक्तिनित्य
नैमित्तिकंकर्मसत्वशोधकत्वाद्गुणः तदकरणंनिषिद्धकरणंचतन्म
लीमसकरणत्वाद्दोषः तन्निवर्त्तकत्वाच्चप्रायश्चित्तंगुणः विशुद्धस
त्वानांतुज्ञाननिष्ठानांज्ञानाभ्यासएववासिद्धिहेतुत्वाद्गुणः भक्तिनिष्ठां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांपुनः श्रवणकीर्त्तनादिभक्तिरेवगुणः तद्विरुद्धंसर्वमुभयेषांदोषइ
त्युक्तं इदानींयेतुनसिद्धानापिसाधकाः किंतुकेवलंकाम्यकर्मप्रधा
नाः तेषांसकलगुणदोषान् प्रपंचयिष्यन् आदौतानतिबहिर्मुखान्निं
दतियएतानिति मत्पथः मदुक्तमार्गान् क्षुद्रान्तुच्छान्चलैः अस्थिरैः
प्राणैर्देहवायुभिरिंद्रियैर्वाजुषंतः सेवमानाभवंतितेसंसरंतिनि
खिलगुणदोषभाक्त्वेननानायोनीः प्राप्नुवंतीत्यर्थः १ नमोरामजज

२०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुध्य

ननु तैरेवकर्मभिः केचिद्गुणदोषभाजः केचिन्नेतिकुतोवैषम्यंनत्वग्निनाकेचित्त
प्यंतेकेचिन्नेतिसंभवतितत्राहस्वेस्वइति अधिकारभेदेनकल्पितौगुणदोषौनव
स्तुनिष्ठावितिभावः २ तदाहशुद्ध्यशुद्धीइति विचिकित्सार्थंयोग्यमयोग्यंवेतिसंदेहद्वारा

स्वेस्वेऽधिकारेयानिष्ठासगुणःपरिकीर्त्तितः विपर्ययस्तुदोषः
स्यादुभयोरेषनिश्चयः २ शुद्ध्यशुद्धीविधीयेतेसमानेष्वपि
वस्तुषु द्रव्यस्यविचिकित्सार्थंगुणदोषौशुभाशुभौ ३ ७

स्वाभाविकप्रवृत्तिप्रतिबंधार्थमित्यर्थः तत्रशुद्ध्यशुद्धीयोग्यत्वायोग्यत्वे गुणदोषौत
न्निमित्तोपादेयत्वानुपादेयत्वे शुभाशुभौतन्निमित्तावर्थानर्थौ ३ नमोभगवतेनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा-स
२०८

तत्रशुभ्रमशुद्धी धर्मार्थंशुद्धेनधर्मः अशुद्धेनाऽधर्मइति गुणदोषौव्यवहारार्थंअशुद्धावपि
राजादीनांव्यवहारदर्शनाद्युपादेयंनान्यदिति शुभाशुभौयात्रार्थंप्राणरक्षार्थंदो

धर्म्यंव्यवहारार्थंयात्रार्थमितिचानघ द
र्शितोयंमयाचारोधर्ममुद्वहतांधुरं ४७

षत्वेऽप्यापत्सुशरीरनिर्वाहमात्रोपादाने नपापंअधिकोपादानेतुपापमिति मयाम
न्वादिरूपेणधर्मरूपांधुरंभारंकर्मजडानामिसर्थः ४ नमोकृष्णायभगवतेनमः २०८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणमुद्धीप्रपंचयिष्येत्वेदोक्तत्वेनतदभिनिवेशोमाभूदितिसमानेष्वपिवस्तुष्वितियदु
क्तंतत्प्रपंचयतिभूमीतित्रिभिः भूतानांप्राणिनांधारयंतीतिधातवः कारणानिशा

भूम्यंबग्न्यनिलाकाशाभूतानांपंचधातवः आब्रह्मस्थावरादीनांशारीरा
आत्मसंयुताः ५ वेदेननामरूपाणिविषमाणिसमेष्वपि धातुषूद्धवकल्प्यं
तएतेषांस्वार्थसिद्धये ६

रीराःशरीरारंभकाःदेहतःसाम्यमुक्तंजीवतोप्याहआत्मसंयुताइति ५ धातुषुदेहेषु
नामरूपाणिवर्णाश्रमादीनि कल्पनायाःप्रयोजनमाहएतेषांप्राणिनांस्वार्थसिद्धये
प्रवृत्तिनियमद्वाराधर्मादिपुरुषार्थसिद्धये ६ नमोभगवतेश्रीकृष्णायनमोनमः राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकेवलंदेहेष्वेवअपितुदेशकालादिभावानामपि आदिशब्देनानुपादेयानांफलनि

देशकालादिभावानांवस्तूनांममसत्तम गुणदोषौवि
धीयेतेनियमार्थंहिकर्मणां॥ नमोरामचंद्रायकृष्ण

मित्ताधिकारिणांग्रहणंवस्तूनामुपादेयानांव्रीह्यादीनामपिममया नियमार्थंसंको
चार्थमित्यर्थः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंगुणदोषविषयंपरिशोध्यतयोः शुध्यशुद्धिमूलत्वात् शुध्यशुद्धीप्रपंचयतिअकृ
ष्णसारइत्यष्टाभिः देशानांमध्येकृष्णहरिणराहितोः शुचिः तत्रापिअब्रह्मण्यःब्रा
ह्मणभक्तिशून्योस्यंतमशुचिः कृष्णसारोपिकृष्णेनमृगेनासारःश्रेष्ठोयःसोपिअ

अकृष्णसारोदेशानामब्रह्मण्योशुचिर्भवेत् कृष्णसारोप्यसौवीरकी
कटासंस्कृतेरिणं ८

सौवीरःकीकटःसुवीराःसत्पुरुषाःतद्वान्सौवीरः
कीकटोपिशुचिःतदुक्तं सर्वेपुण्यतमोदेशःसत्पात्रंयत्रलभ्यत इति तद्वर्जितोयःकी
कटः अंगवंगकलिंगादिः असंस्कृतः संमार्जनादिशून्यः म्लेछबहुलोवाइरिणंतु
षरंएकधन्वावःतदशुचिर्ह्येन्यंः शुचिरित्यर्थाउक्तंभवति ८

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालस्य शुध्यशुद्धी दर्शयति कर्मण्य इति द्रव्यतः द्रव्यसंपत्त्या स्वतो वा पूर्वोक्ताहीर्यः
कर्मण्यः कर्मार्हः स कालस्तस्मिन् कर्मणि गुणवान् यतः यस्मिन् द्रव्यालाभेन वारा

कर्मण्यो गुणवान्कालो द्रव्यतः स्वत एव वा यत्तो नि
वर्त्तते कर्म स दोषो कर्मकः स्मृतः १

श्च विघ्नवाहीना वा कर्म निवर्त्तते यश्च सूतकादोद्ग्राहादिलक्षणो ऽकर्मकः कर्मानर्हः
स्मृतः स कालो दोषः अशुद्ध इत्यर्थः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्तुशब्दोपात्तानांद्रव्याणांशुद्ध्यशुद्धीदर्शयतिद्रव्यस्येतिचतुर्भिः द्रव्येणतोयादिना
शुद्धिः मूत्रादिनात्वशुद्धिः वचनेनशुद्धमशुद्धंवेति संदेहेशुद्धमित्येवंरूपेणब्राह्मण
वचनेनशुद्धिःविपरीतेनाशुद्धिः संस्कारेणप्रोक्षणादिनापुष्पादेःशुद्धिःअवघ्राण

द्रव्यस्यशुद्ध्यशुद्धीचद्रव्येणवचनेनच संस्कारेणाथकालेन महत्वाल्प
तथाथवा १०

णादिनात्वशुद्धिः कालेनकालेमेघोदकंग्राह्यंवर्ज्यंतुत्र्यहमेवहि अकालेदशरात्रंस्या
ततः शुद्धिर्विधीयते दशाहाद्दिनानवोदकादेःशुद्धिः विपरीतेनाशुद्धिः पर्युषितान्ना
देरशुद्धिः अंत्यजाद्युपहतानांतडागाद्युदकानांमहत्वाल्पत्वाभ्यांशुद्ध्यशुद्धी १० नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शक्त्याशक्त्यासूर्योपरागादिसूतकान्मादेः शक्तानुप्रस्यशुद्धिः अशक्तानुप्रतिशुद्धिः
वृद्धापुत्रजन्मादौ दशाहाद्बहिर्ज्ञानेनशुद्धिः अंतर्ज्ञानेनाशुद्धिः समर्थाजीर्णमलवद्ध
स्त्रादेः समर्थंप्रत्यशुद्धिः दरिद्रंप्रतिशुद्धिः तत्रापिविशेषमाहयदिति एतेचद्रव्यवच
नादयोद्रव्याशुद्धिद्वा आत्मनेपदं धंकुर्वंतितद्देशावस्थानुसारतएवयथाययथावत्कु

शक्त्याशक्त्याथवाबुद्ध्यासमर्थ्याच्चयदात्मने अ
धंकुर्वंतिहियथादेशावस्थानुसारतः ११ नमः

र्वंतिनसर्वत्तः तथाहिनिर्भयएवदेशेकुर्वंतिनतुचौराद्याकुलेतथारोगादिव्यतिरि
क्तयुवाद्यवस्थयामेवकुर्वंतिनबाल्यरोगाद्यवस्थायामिति तथाचस्मृतिः देशं
कालंतथात्मानंद्रव्यंद्रव्यप्रयोजनं उपपत्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेदिति ११ २०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्र्व्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं तत्र वचनादिशुद्धिरेकरूपैव द्रव्यतस्तु शुद्धिर्बहुरू
पेति तां प्रपंचयति धान्येति धान्यानां वायुना दारूलौकिकं ग्रहचमसादि च आस्थि
गजदंतादि रसास्तैलघृतादयः तैजसाः सुवर्णादयस्तेषां पार्थिवानां च रथ्याकर्द

धान्यदार्वास्थितंतूनां रसतैजसचर्मणां काल
वाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः १२

मघटेष्टकादीनां यथायथं कालादिभिः शुद्धिः तत्रापि कांस्यजाद्युपधातुतारतम्ये
न देशकालावस्थाद्यनुसारेण च एतैरन्यैश्च युतायुतैर्मिलितैः केवलैश्च कालस्य पु
नर्ग्रहणं युतत्वप्रदर्शनार्थं १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्पृश्यस्पर्शेशुद्धिमुक्त्वालेपविषयेप्याह यत्पीठपात्रवस्त्रादि येन तत्क्षणक्षारा
म्लोदकादिना गंधं लेपं च व्यपोहति त्यजति स्वगतं च मलं त्यक्त्वा प्रकृतिं स्व
मेव रूपं भजते तस्य तत् शौचं शोधकं यावता च तक्षणादिना व्यपोहति तावत्प्र
माणं स्वरूपत आवृत्तितो वा तत्कर्तव्यमिष्यते १२ एवं तावत् द्रव्यशुद्धिरुक्ता इ

अमेध्यलिप्तं यद्येन गंधलेपं व्यपोहति भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते १२
स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः मत्स्मृत्या चात्मनः शौचं शुद्धः कर्माचरेद्द्वि द्
जः १३

दानीं कर्तृशुद्धिमाह स्नानेति अवस्था कौमारादिः वीर्यं शक्तिः संस्कार उपनयना
दिः कर्म संध्योपासनदीक्षादिलक्षणं आत्मनः साहंकारस्य कर्तुः एतैः स्नानादि
भिर्यथायथं तत्तत्कार्यानुसारिणी शुद्धिः इयं च शुद्धिर्न व्यवहारार्था किंतु विहितकर्मा २१०
र्थेत्याह शुद्धः इति द्विजग्रहणमुपलक्षणं शूद्रादेरपि १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रशुद्धिमाह सद्गुरुमुखाद्यथावत्परिज्ञानंमंत्रस्यशुद्धिः कर्मशुद्धिमाह ईश्वरार्प
णंकर्मणःशुद्धिः धर्माधर्मयोःशुद्ध्यशुद्धीप्रपंच्यतः षट्स्वोपसंहरतिधर्मइति देश
कालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यतेएतेषांयोविपर्ययः सोध
र्मः तद्धेतुरित्यर्थः १५ अयंचगुणदोषविभागोनवास्तवइत्याहक्वचिदिति आपदि ६

मंत्रस्यचपरिज्ञानंकर्मशुद्धिर्मदर्पणं धर्मःसंपद्यतेषड्भिरधर्मस्तुविपर्ययः १५ क्व
चिद्गुणोपिदोषःस्याद्दोषोपिविधिनागुणः गुणदोषार्थनियमस्तद्भिदामेवबाधते १६

प्रतिग्रहोगुणोऽप्यनापदिनिषिद्धत्वाद्दोषः परधर्मस्यपरस्यगुणोपिस्वस्यदोषः दोषो
पिकुटुंबत्यागादिर्विरक्तादेर्नदोषः अपितुविधिबलेनगुणः एवंयोऽयंगुणदोषयो
रेकस्मिन्नेवार्थेनियमःगुण दोषार्थंवायोनियमः नियामकंशास्त्रंसतयोर्भेदमेवबाध
ते १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰ष
२११

दोषस्यक्वचिद्दोषत्वाभावेगुणत्वेचोदाहरणंदर्शयति समानस्यतस्यैवकर्मणः सुरापा
नादेराचरणं अपतितानांपतनहेतुरपिजात्याकर्मणावापतितानांपुनः पातकं अधिका
रभ्रंशकंनभवतिपूर्वमेवपतितत्वात् अतोत्रदोषस्यापिदोषत्वानस्तीत्यर्थः तथासं

समानकर्माचरणंपतितानांनपातकं तथौत्प
त्तिकोगुणः संगोनशयानः पतत्यधः ९७

गोपि योयंतेदोषः सग्रहस्थस्यौत्पत्तिकः पूर्वंस्वीकृतोनदोषः अपितुगुणः ऋतौभार्यो
पेयादितिविधानात् उभयत्रदृष्टांतः पूर्वमेवाधः शयानोयथानपततीति ९७ ७ २११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोगुणदोषनियमविधीनांप्रवृत्तिसंकोचद्वारानिवृत्तावेवतात्पर्यमित्यभिप्रेत्याह
यतोयतइति १८ यथाश्रुतप्रवृत्तिपरतांवेदस्यनिराकर्त्तुंप्रवृत्तिमार्गस्यानर्थहेतुतां

यतोयतोनिवर्त्तेततविमुच्येततत्स्ततः एषधर्मोनृणांक्षेमःशोकमोहभयापहः १८ विषयेषुगुणाध्यासात्पुंसःसंगस्ततोभवेत् संगात्तत्रभवेत्कामःकामादेवकलिर्नृणां १९ कलेर्दुर्विषहःक्रोधस्तमस्तमनुवर्त्तते तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीद्रुतं २०

दर्शयतिविषयेष्विति चतुर्भिः संगः
आसक्तिः तत्रतेषुयेनप्रतिहन्यतेकामः तेनसहकामादेवकलिर्कलहोविवादः १९
दुर्विषहःतीव्रः तमःसंमोहः तंक्रोधंचेतनाकार्याकार्यस्मृतिः द्रुतंशीघ्रं २० श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेसाधोतया कार्याकार्यस्मरसारहितो जंतुः

शून्यायकल्पते असत्तुल्योभवतीत्यर्थः स्वार्थविभ्रंशाः पुरुषार्थहानिः मूर्छितमृत
तुल्यस्य २१ तत्तुल्यत्वंप्रपंचयाति विषयेति मर्थः वृक्षजीविकयैवयोजीवन्वर्त्त

तयाचरहितः साधोजंतुः शून्यायकल्पते ततोस्यस्वार्थविभ्रंशो
मूर्छितस्यमृतस्यच २१ विषयाभिनिवेशेननात्मनंवेदनापरं
वृक्षजीविकयाजीवन् व्यर्थंभस्त्रेवयः श्वसन् २२

तेसम्मूर्छिततुल्यः अतएवयोभस्त्रेवश्वसन्वर्त्तनेसमृततुल्यः अतः स्वार्थनाशइ
त्यर्थः २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुप्रवृत्तस्यस्वर्गादिफलश्रवणात्कुतः स्वार्थविभ्रंशः तत्राहइयंफलश्रुतिः नश्रेयः
परमपुरुषार्थपरानभवतीत्यर्थः किंतुबहिर्मुखानांनराणांमोक्षविवक्षयाअवांत

फलश्रुतिरियंनृणांनश्रेयोरोचनंपरं श्रेयो
विवक्षयाप्रोक्तंयथाभैषज्यरोचनं २३ ७

रफलैः कर्मसुरुच्युत्पादनमात्रं यथाभैषज्ये औषधेरोचनंरुच्युत्पादनं तथाहि
पिबनिंबंप्रदास्यामि खलुतेखंडलड्डुकान् पित्रैवमुक्तः पिबतिनफलंतावदेवतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
२१३

ननुकर्मकांडेमोक्षस्यनामापिनश्रूयतेकुतएवंव्याख्यायतेयथाऽऽकृतस्या धँनादि ८
स्याहउत्पन्नस्येतिद्वाभ्यां उत्पन्नस्यास्वभावत एवकामेषुपश्वादिषु प्राणेषुआयुरिंद्रिय
बलवीर्यादिषु स्वजनेषुपुत्रादिषु अनर्थहेतुषुपरिपाकतोदुःखहेतुषु २४ अत
स्तानस्वार्थपरमसुखमविदुषः अतोनतान्प्रह्वीभूतान्वेदोयद्बोधयिष्यतितद
उत्पन्नस्यैवहिकामेषुप्राणेषुस्वजनेषुच आसक्तमनसोमर्त्याआत्मनोऽनर्थहेतुषु
२४ नतोऽनविदुषःस्वार्थंभ्राम्यतोवृजिनाध्वनि कथंयुंज्यात्पुनस्तेषुतांस्तमोविशतो
बुधः २५
वश्रेयइतिविश्वसितानित्यर्थः तानेवंभूतान्वृजिनाध्वनिकामवर्त्मनिदेवादियोनि
षुभ्राम्यतः ततःपुनःतमःवृक्षादियोनिविशतःपश्वुकामरतिआयुरिंद्रियादिकाम
रतिपुत्रादिकामरतिचकथंपुनस्तेष्वेवकामेषुस्वयंबुधोवेदोयुंज्यात्प्रवर्तयेत्तथा

सद्यनाशःस्यादितिभावः २५

२१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंतर्हिकर्ममीमांसकाः फलपरतांवदंतिवेदस्यतत्राह एवमिति व्यवसितंवेदस्याभि
प्रायं कुसुमितांअवांतरफलप्ररोचनतयारमणीयांपरमफलश्रुतिंवदंति कुतस्ते
कुबुद्धयस्तदाहहियस्माद्वेदज्ञाव्यासादयस्तथानवदंतीति २६ कुबुद्धित्वंप्रपंचय
तिकामिनइत्यष्टभिः कामित्वात्कृपणाः ततोलुब्धाः तृष्णाकुलाः अतःपुष्पेष्ववां

एवंव्यवसितंकेचिदविज्ञायकुबुद्धयः फलश्रुतिंकुसुमितांनवेदज्ञावदंतिहि २६ का
मिनःकृपणालुब्धाःपुष्पेषुफलबुद्धयः अग्निमुग्धाधूमतांताःस्वलोकंनविदंतिते २७

तरफलेषुपरमफलबुद्धयः अतएवअग्निमुग्धाःअग्निसाध्यकर्माभिनिवेशेनलुप्त
विवेकाः ततश्चधूमतांताःधूमताधूममार्गोःतेयेषांतेस्वलोकंआत्मतत्वं तथाच
श्रुतिः कश्चिद्दवा [illegible] अस्माल्लोकात्प्रैत्यआत्मानंवेदअयमहमस्मीतिकश्चित्स्वं
लोकंनप्रतिजानातिअग्निमुग्धोहैवधूमतांतःशते २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोसौस्वलोकः तमाहनेति त्वं दिस्थमात्मानंस्वंलोकंननुत्वं दिस्थमहंकारस्यदंज्ञानंत्वे
व सत्यंपरमात्मानंतुनजानंतीत्याहयदिदं यद्व्यतिरिक्तंजगन्नास्तिकुतः यतइदंज
गज्ज्ञानंतंकुतोनजानंतिहियस्मात्तुउक्थंकर्मैव शास्त्रंशंस्यंकथनीयंपशुहिंसासा

॥ध॰॥ नतेमामंगज्ञानंतित्वं दिस्थंयइदंयत्तः उक्थ्यशास्त्रायसुत्तपोपथानीहारस्व
त्तुषः॥२८॥

धनंवायेषांतेअत्तः केवलंअसुतृपः प्राणतर्पणपराः नीहारंतमः तेनव्याप्तानिचक्षूं
षियेषांतेयथासंनिहितमपिनजानंतितद्वत् तथाचश्रुतिः नतंविदाथययइमाज्ज
जानान्युष्माकमंतरंबभूव नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरं
तिइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदतात्पर्यंाज्ञानाच्छास्त्रान्यजंतीत्याह तेपरोक्षमस्फुटंमेमतमविज्ञायदेवादीन्यजंतस्तुत्तरेणान्वयः स्वमतमेवाहहिंसायांमांसभक्षणार्थंनतत्फलार्थंचयदिरागःस्यात्तर्हियज्ञएवेत्यभ्यनुज्ञानतत्द्वारापरिसंख्येयंनत्वावश्यकत्वेन चोदनेत्येवंरूपंममममतं य

तेमेमतमविज्ञायपरोक्षंविषयात्मकाः हिंसायांयदिरागःस्याद्यज्ञएवनचोदना २९

हिंसाविहाराह्यलब्धैःपशुभिःस्वसुखेच्छया यजंतेदेवतायज्ञैःपितृभूतपतीन्खठाः ३०

यद्यपिनित्यनैमित्तिकयोःकामविशेषानुबंधोनास्तितथापिकर्मणापितृलोकइतिश्रुतेःसामान्यतःपितृलोककामनास्सस्येवअंतःकरणशुद्धिकाम नाचेतिभावः तदुक्तंनकामस्यक्रियाकाचिद्दृश्यतेचेहकर्हिचित् यद्यद्धिकुरुतेजंतुस्ततत्कामस्यचेष्टितमिति २९ अज्ञानादेवहिंसयाविहारःक्रीडायेषांते ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असत्वादेवहिंसयाविहारः क्रीडायेषांते ३० किंचते ऽतिमंदबुद्धयस्साह स्वप्नोपम
मिति अमुंपरलोकंआशिषश्चास्मिंल्लोकेसंकल्प्यननुनिश्चित्यविघ्नबाहुल्यात्त्व

नृ
हिंसाविहारात्याऽलब्धैः पशुभिः स्वसुखेच्छया यजंतेदेवतायज्ञैः
पितृभूतपतीन्खलाः ३० स्वप्नोपममभुंलोकमसंतंश्रवणप्रियं
आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक् ३१

जंतिकर्मसुविनियोजयंतियथा कश्चिद्वणिक्दुस्तर समुद्रादिलंघनेनबहुधनार्जनेच्छ
यासिद्धंधनंत्यजन्तुभयपक्षच्योभवातितद्वदित्यर्थः ३२ २१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोरजःसत्वतमोनिष्ठास्तेरजःसत्वतमोजुषःस्वानुरूपानिंद्रादीनेवोपासतेनतु
मांयद्यपींद्रादीनामपिमदंशत्वान्मदुपासनमेवतत् तथापियथावन्नोपासतेभेद

रजःसत्वतमोनिष्ठारजःसत्वतमोजुषःउपासतइंद्रमुख्यान्देवादीन्न
तथैवमां ३२ इष्टेहदेवतायज्ञैर्गत्वारंस्यामहेदिवि तस्यांतइहभूयास्म
महाशालामहाकुलाः ३३ एवंपुष्पितयावाचाव्याक्षिप्तमनसांनृणां
मानिनांचातिस्तब्धानांमद्वार्त्तापिनरोचते ३४

दर्शितादित्यर्थः ३२ इहदिवि
कल्प्येसुरकृतमेवसंकल्प्यंदर्शयतिइष्टेति तस्यभोगस्यांतेमहाशालामहागृहस्थाः ३३
ततःकिमित्यतआहएवमिति अतोमत्प्रवणताभावान्नित्यंसंसारिणोभवंतीतिभावः
३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं प्रवृत्तिपरत्वं निराकृत्य प्रकृतं निवृत्तिपरत्वमेवोपसंहरति वेदा इति कर्मब्रह्म
देवताकांडविषया इमे वेदाः ब्रह्मात्मविषयाः ब्रह्मैवात्मा न संसारीत्येतत्पराः तस्य
रत्वाप्रतीतौ च फलश्रुतिरियं नृणां न श्रेयो रोचनं परं श्रेयो विवक्षया प्रोक्तं तथा भे

वेदा ब्रह्मात्मविषयास्त्रिकांडविषया इमे परोक्षवादा ऋषयः परोक्षं मम च प्रियं ३५

॥ षड्परोचनमित्युक्तमेव कारणमनुस्मारयति परोक्षेति परोक्षवादाः अतींद्रियार्थ
प्रतिपादनपराः ऋषयो मंत्रास्तद्द्रष्टारो वा तत् किमिति यतः परोक्षमेव मम च प्रियं
अयं भावः शुद्धांतःकरणैरेवैतद्बोद्धव्यं नान्यैरनधिकारिभिः यथा कर्मत्यागेन भ्रंशप्र
संगादिति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुवेदज्ञा अपिजैमिन्यादयः किमितितथानवर्णयंतिमांविनातत्वतोवेदंतदर्थंवान
कोपिवेदेत्याशयेनाह शब्दब्रह्मेतियावत्समाप्ति स्वरूपतोर्थतश्चदुर्विज्ञेयं तच्चसूक्ष्मं
स्थूलंचेतिद्विविधंतत्रसूक्ष्मंतावत्स्वरूपतोपिदुर्ज्ञेयमित्याह प्राणेंद्रियमनोमयंप्र

शब्दब्रह्मसुदुर्बोधंप्राणेंद्रियमनोमयं अनं
तपारंगंभीरंदुर्विगाह्यंसमुद्रवत् ३६

थमंप्राणमयंपराख्यं ततोमनोमयंपश्यंत्याख्यं ततइंद्रियमयंमध्यमाख्यंतस्यवा
क्व्यंजकत्वेनवागिंद्रियप्रधानत्वात् किंच अनंतपारंसमष्टिप्राणादिमयस्यनिर्विशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
२१७

यस्यचतस्यकालतोदेशतोवस्थापरिच्छेदात् अर्थतोपिदुर्ज्ञेयत्वमाह गंभीरंनि
गूढार्थंअतोदुर्विगाह्यंमतिप्रवेशानर्हं तथाचश्रुतिः चत्वारिवाक्परिमितापा
दानितानिविदुर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेंगयंतितुरीयंवा
चोमनुष्यावदंतिअयमर्थः वाचःशब्दब्रह्मणःपरिमितानिगणितानिपद्यंते
ज्ञायंतेपरंतत्वमेभिरितिपदानिस्वरूपाणिचत्वारितानिचत्वार्यपियेमनीषिणो
नर्द्दयः तेविदुर्नान्येयतोगुहायांदेहमध्येत्रीणिनिहितानि नेंगयंतिस्वरूपं
नप्रकाशयंति यतःकेवलंवाचःतुरीयंचतुर्थंभागंवैखरीरूपंमनुष्याःप्रा
णिनोवदंति तमपिवदंत्येवनतुतत्वतोजानंति ३५

२१७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र मनीषिभिरेव ज्ञेयं सूक्ष्मं रूपं दर्शयति मयेति मयांतर्यामिणोपबृंहितं अधिष्ठितं
अंतस्थत्वेप्यपरिछेदमाह भूम्नेति अधिष्ठातृत्वेप्यविकारित्वमाह ब्रह्मणेति अवि
छिन्नस्यापि नियंतृत्वं घटयति अनंतशक्तिनेति भूतेषु सर्वप्राणिषु घोषरूपेण नाद
रूपेण लक्ष्यते मनीषिभिः अंतःसूक्ष्मत्वेन दर्शने दृष्टांतः बिसे सूर्णातंतुरिवेति ३७

मयोपबृंहितं भूम्ना ब्रह्मणानंतशक्तिना भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ३७
यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् आकाशात् घोषवान्प्राणो मनसा स्पर्शरूपि

णा ३८

ततो वैखर्याख्यायाबृहत्या वाचउत्पाति प्रकारं सदृष्टांतमाह यथेति त्रिभिः हृ
दयाल्स काशान् मुखान् मुखद्वारा तद्वमते बहिः प्रगटयति दार्ष्टांतिके दर्शयति आका
शादिति प्राणः तदुपाधिहिरण्यगर्भरूपः प्रभुर्भगवान् ३

तेनरूपेणछंदोमयोवेदमूर्त्तिः सत्तत्वमृतमयः घोषवान्नादोपादानवान् मनसा
निमित्तभूतेन निमित्ततामेवदर्शयति स्पर्शादीन्वर्णान्रूपयतिसंकल्पयतीति
स्पर्शरूपीतेन स्पर्शग्रहणमुपलक्षणं हृदयाकाशा[illegible]बृहतींसृजतीतितृतीय
श्लोकेनान्वयः बृहती [illegible] शब्दार्थव्याख्यानायविशेषणानिसहस्रपदवींबहुमा

छंदोमयोऽमृतमयः सहस्रपदवींप्रभुः ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषि
तां २९

र्गां तदेवाह ॐकारात्ऽउरः कंठादिसंगेनव्यंजितैः स्पर्शादिभिर्भूषितां ॐकारस्था
त्ततः सूक्ष्मोऽभिप्रेतः नत्वकारादिवर्णरूपः तस्यव्यंग्यकोटित्वात् तत्रस्पर्शाःकादि
पंचवर्गाःस्वराःअकारादयःषोडश उष्माणःशषसहाः अंतस्थायरलवाः २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विचित्राभिर्वैदिकलौकिकभाषाभिर्विततां यथोत्तरं चत्वारि चत्वार्यक्षराणि उत्तरा
णि अधिकानि येषां तैः छंदोभिरुपलक्षितां एवमनंतपारां सृजति स्वयमेवाक्षि

विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः अनंतपारां बृहतीं सृजत्याक्षि
पत्स्वयं ४० गा यत्र्युष्णिगनुष्टुप्बृहती पंक्तिरेव च त्रिष्टुप्जगत्यति
छंदो ह्यत्य त्यतिजगद्विराट् ४१

पत्तेउपसंहरति ४० तेषु कानि चित् छंदांसि दर्शयति
गायत्रीति तत्र चतुर्विंशत्यक्षरा गायत्री ततश्चतुरक्षरवृद्ध्योष्णिगादिछंदांसि अत्य
ष्टिः अतिजगती अतिविराडित्यर्थः एतैः छंदोभिरुपलक्षितामिति पूर्वेणैवान्वयः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
२२१

अतोरहस्यपिसाकल्येनस्वरुपतोऽदुर्ज्ञेयेत्युक्तंअर्थतोपिदुर्ज्ञेयत्वमाह किमिति कर्म
कांडेविधिवाक्यैः किंविधत्ते देवताकांडेमंत्रवाक्यैः किमाचष्टेप्रकाशयति ज्ञानकांडे

किंविधत्तेकिमाचष्टेकिमनूद्यविकल्पयेत्
इत्यस्याहृदयंलोकेनान्योमद्वेद कश्चन ४२

चकिमनूद्यविकल्पयेत् निषेधार्यमित्येवमस्याहृदयंतात्पर्यंमत्तोन्यः कश्चिदपिन २२१
वेद ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि त्वं मद्रूपं याकथय यदुं मिति कथयति मामेव यत्तद्रूपं विधत्ते मामेव तत्तद्देव
तारूपमभिधत्ते न मत्तः पृथक् यस्मादाकाशादिप्रपंचजातं तस्माद्धा एतस्मादात्मन

मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहं एतावान्सर्ववेदार्थः शब्द
आस्थाय मां भिदां मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ४३ इति श्री
भागवते महापुराणे एकादशस्कंधे एकविंशोऽध्यायः ॥२१॥ श्रीकृष्णार्पण

आकाशः संभूत इत्यादिना विकल्प्यापोह्यते निराक्रियते नह्यहमेव न मत्तः पृथगस्ति
कुत इत्यपेक्षायां सर्ववेदार्थं संक्षेपतः कथयति एतावानेव सर्वेषां वेदानामर्थः तमेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह शब्दोवेदः मांपरमार्थरूपमाश्रित्याभिदांमायामात्रमित्यनूद्यनेहनानास्तिकिंच
नेतिप्रतिषिध्यप्रसीदतिनिवृत्तव्यापारोभवति अयंभावः यथात्यंकुरेयोरसः
सएवतद्विस्तारभूतनानाकांडशाखास्वपितथैवप्रणवस्ययोऽर्थःपरमेश्वरः
त सएवतद्विस्तारभूतानांसर्ववेदकांडशाखानामपि संगच्छतेनान्यइ
ति नित्यमुक्तः स्वतः सर्ववेदकृत्सर्ववेदवित् स्वपरज्ञानदाताय
स्तंवंदेगुरुमीश्वरं ४२ इतिश्रीभागवतेमाहापुराणे एकादश
स्कंधे टीकायां एकविंशतिमोध्यायः ॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्यंविंशेतत्वसंख्यानामविरोधविधोच्यते पुंप्रकृत्योर्विवेकश्चजन्ममृत्युविधादिच
तद्देवंवेदानांप्रकृतिपरत्वंनिराकृत्यमोक्षपरत्वंनिर्णीतंसंक्तिचमोक्षपरत्वेऽपितद
वांतरविवादाः तथाहिकेचित्तत्वसंख्यासुविवदंतेतत्रापिचबास्यार्थसद्देत्वेआत्म स

उद्धव उवाच कतितत्वानिविश्वेशसंख्यातान्यृषिभिः प्रभो नवैकादशपंचत्रीण्या
त्थत्वमिहशुश्रुम १ केचित्षड्विंशतिंप्राहुरपरेपंचविंशतिं सप्तैकेनवषट्केचिच्च
त्वार्येकादशापरे २ केचित्सप्तदशप्राहुःषोडशैकेत्रयोदश ३ तत्वेष्वेकत्वनाना
त्वादिषुतत्रकिंसत्यमितिजिज्ञासयापृच्छतिकतीति ऋषिभिरागमेषुबहुधासं
ख्यातानितेषुकतियुक्तानीत्यर्थः १ भगवन्मतानुवादपूर्वकंबहुधासंख्यानप्रपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चयतिनचेतित्रिभिः त्वंतावदष्टविंशतितत्वान्यात्थ तानिचवयंशुश्रुमश्रुतवंतः २
एतावत्तीनां भावएतावत्वंनानात्वमित्यर्थः यद्विवक्षयायत्प्रयोजनमभि
प्रेत्यचगायंतिआयुष्मन्नित्यसंबुद्धे ३ विवक्षाभेदेनसर्वंयुक्तमेवमाययाचकिंनामन

एतावत्त्वंहिसंख्यानंऋषयोयद्विवक्षया गायंतिपृथगायुष्मन्निदंनोवक्तुमर्हसि ३
श्रीभगवा॰ युक्तंचसंतिसर्वत्रभाषंतेब्राह्मणायथा मायांमदीयामुद्गृह्यवदतांकिंनुदुर्घटं

युक्तमित्याहयुक्तमिति यथाब्राह्मणाः भाषंतेतद्युक्तंनचवस्तुतः यस्मात्संतिसर्वत्रांत
र्भूतानिसर्वाणितत्वानि किंचमायामिति असत्वेपिमायाश्रयत्वात्घटतएवेत्यर्थः
उद्गृह्यस्वीकृत्यनहिमरीचिजलपरिमाणादिविवादेकिंचिदघटितमिवभवति ४ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयदिसर्वमपियुक्तंकुतोविवादः यदिचमायैवावलंबनंकुतोहेतुंप्रतिविवादःत
त्राहनैतदिति हेतुंप्रतिच्चविवदमानानांमदीयाउरतिक्रमाऽशक्तयःसत्वाद्याअंतः
करणवृत्तिविशेषरूपेणपरिणतास्तवहेतुरित्यर्थः ६ तासांविवादहेतुत्वमुपपा

नैतदेवंयथात्थत्वंयदहंचिन्तितस्तथा एवंविवदतांहेतुः शक्तयोमेदुरत्ययाः ६
यासांव्यतिकरादासीद्विकल्पोवदतांपदं प्राप्तेशमदमेप्येतिवादस्तमनुशाम्यति

दयतियासामिति यासांव्यतिकरात्क्षोभात् वदतांपदंविषयः विकल्पोभेदआ
सीत् अंतःकरणवृत्तिविकल्पोवातन्मूलभूतः एतदेवव्यतिकरेणहृदयतिशाम
दमयोर्द्वैक्यंतस्मिन्प्राप्तेविकल्पोऽप्येतिलीयते तंचविकल्पमनुवादःशाम्यतीवि

नारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतिसर्वत्रेतियदुक्तंतत्तत्पंचयतिपरस्परेतिद्वाभ्यां अन्योन्यस्मिन्ननुप्रवेशात्त्ववक्तु
र्यथाविवक्षितंयथापूर्वंकारणंअपरंकार्यंकार्यकारणभावेनप्रसंख्यानंभवति य
द्वापूर्वाअल्पसंख्याअपराअधिकसंख्यातयोर्भावः पौर्वापर्यंतेनप्रसंख्यानंगण

परस्परानुप्रवेशात्तत्त्वानांपुरुषर्षभ पौर्वापर्यप्रसंख्यानंयथावक्तुर्विवक्षितं ८
एकस्मिन्नपिदृश्यंतेप्रविष्टानीतराणिच पूर्वस्मिन्वापरस्मिन्वातत्त्वेतत्त्वानिसर्वशः

नमिति ८ अनुप्रवेशंदर्शयतिएकस्मिन्नपीति पूर्वस्मिन्कारणभूतेतत्त्वेकार्यतत्त्वा
निसूक्ष्मरूपेणप्रविष्टानिमृदादिघटवत् अपरस्मिन्कार्यतत्त्वेकारणतत्त्वान्यनुगत २२२
त्वेनप्रविष्टानिघटेमृद्वत् ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविरोधमुपसंहरति अतः अमीषांतत्वानांपौर्वापर्यंतत्तत्कारणकार्यत्वंप्रसंख्या
नंचन्यूनाधिकमभीप्सितंवादिनांमध्येयथाविवक्षयायद्युक्तंयस्यमुखंप्रवर्त्तते
तत्सर्वंविविक्तंनिश्चितंवयंगृण्हीमः उक्तन्यायेनसर्वत्रयुक्तेः संभवात् १० ननुका

पौर्वापर्यमतोमीषांप्रसंख्यानमभीप्सतां यथाविविक्तंयद्युक्तंगृण्हीमोयु
क्तिसंभवात् १० अनाद्यविद्यायुक्तस्यपुरुषस्यात्मवेदनं स्वतोनसंभवाद
न्यस्तत्वज्ञोज्ञानदोभवेत् ११

र्यकारणतत्वानांपृथक्त्वस्य कोपिविवक्षयाभवतुना
मसंख्याभेदः जीवेश्वरयोस्तुकथंभेदविवक्षायायाषड्विंशतिपंचविंशतिपक्षौप्रवृ
त्तौअतआहअनादीति स्वतोनसंभवति अन्यतस्तुसंभवात् स्वतःसर्वज्ञःपरमेश्व
रोन्योभवितव्यइतिषड्विंशतिपक्षाभिप्रायस्त्यर्थः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंतर्हि पंचविंशतिपक्षः तत्राह पुरुषेति वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रू
पत्वात् अतस्तयोरत्यंतमन्यत्वकल्पना अपार्था व्यर्था एवं पंचविंशतिपक्षप्रवृत्ति
रित्यर्थः नन्वेवमपीश्वरप्रसादलभ्यज्ञानस्य पृथक्त्वात्पक्षद्वयमपि न घटते अत

।। पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गु
णः १२ प्रकृतिर्गुणसाम्यं वै प्रकृतेरात्मनो गुणाः सत्वं रजस्तम इति स्थित्युत्पत्त्यंत
हेतवः १३

आह ज्ञानं चेति सत्वगुणवृत्तित्वात्तदंतर्भूतमित्यर्थः १२ ननु ज्ञानं जीव
धर्मः कथं प्रकृतेर्गुणः स्यादत आह प्रकृतिरिति गुणसाम्यं हि प्रकृतिः अतस्तद्वि
शेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्य कर्तृत्वात्तस्य स्थित्यादिहेतुभूतगुणाश्र
यत्वानुपपत्तेः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः सत्वं सत्वमयं ज्ञानं प्रकृतेर्गुण इति पूर्वेणैवान्वयः ननु तत्रिवर्ग्स्य कर्मचाज्ञानं च ततां
तरं स्यात् न रजः कर्म रजोवृत्तिः अज्ञानं च तमसः अतः कर्माज्ञानयोः रजस्तमोद्वारा

सत्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते गु
णव्यतिकरः कालः स्वभावः सूत्रमेव च १४

भाग ९४

प्रकृतावेवांतर्भाव इति भावः तथापि कालस्वभावयोस्तत्वांतरता स्यात् न गुणानां व्य
तिकरो यस्मात् स ईश्वर एव कालो नाम स्वभावो नाम सूत्रं महत्तत्वमेव तस्य सर्वशक्तिम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गमा

तदेवं ज्ञानादीनां यथा पृथग्भंतर्भावात्पक्षद्वयेऽपि तत्त्ववृद्धिः एतच्च पक्षांतरेष्वपि ज्ञे
यं स्वमते तु गुणानामौपाधिकत्वात् प्रकृतेर्भेदो विवक्षितः अतो गुणाः त्रीणि तत्त्वानि अ
पराणि पंचविंशति तत्त्वानि पूर्वोक्तपक्षद्वयसाधारणानि दर्शयति पुरुष इति सार्द्धद्वाभ्यां

पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव
१५ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंगोभ
यं मनः १६

व्यक्तं महत्तत्त्वं नभआदीनि तन्मात्राणि मे मया १५ एकादश दर्शयति श्रोत्रमिति दर्शनं
चक्षुः ज्ञानशक्तयः ज्ञानेंद्रियाणि पंच वागादि याश्चं तानि द्वंद्वैक्येनोक्तानि चत्वारि अंघ्रि
श्चेति कर्माणि कर्मेंद्रियाणि पंच उभयं उभयात्मकं मनः अंग हे उद्धव एवमेतान्येकादश २२४
१६

पंचदर्शतिशब्द इति शब्दादीनि विषयतया परिणतानि पंचभूतानि ननु गत्यादिभि
स्तत्वाधिक्यं पक्षत्रयेपिस्यात् नेत्याह गतीति गतिश्च उक्तिश्च उत्सर्गौ च शिल्पं च तानि

शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः गत्युक्त्यु
त्सर्गशिल्पानि कर्मायतनसिद्धयः १७ नमो भग०

कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि तत्वांतराणीत्यर्थः १७ श्रीरामकृष्ण जय०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंमतत्रयेपितत्त्वसंख्याभेदंनिरूप्ययद्विवक्षयागायंतीतिपरस्पष्टंतत्तन्मेतात्पर्यंदर्श
यतिसर्गादाविति कार्याणिषोडशविकाराः कारणानिमहदादीनिसप्ततद्रूपिणीसती
प्रकृतिः अस्यविश्वस्यसर्गादौगुणैःसज्ज्यत्वाद्यवस्थांधत्तेउपादानकारणरूपत्वात् पु

सर्गादौप्रकृतिर्ह्यस्यकार्यकारणरूपिणी सत्वादिभिर्गुणैर्धत्तेपुरुषोऽव्यक्तईक्षते १८
व्यक्तादयोविकुर्वाणा धातवःपुरुषेक्षया लब्धवीर्याःसृजंत्यंडंसंहताःप्रकृतेर्बलात् १९

रुषस्तुअव्यक्तः अपरिणामीनिमित्तभूतःकेवलमीक्षते अतःपरिणामिन्याःप्रकृतेः
पुरुषोभिन्नइति १८ तयोरारब्धस्यकार्यस्यतदंतर्भावमभिप्रेत्याहव्यक्तादयइतिव्यक्ता
दयोमहदादयःप्रकृतेरुत्पन्नायेधातवस्तेविकुर्वाणाःपुरुषेक्षणलब्धवीर्याःसंहताश्चस २२५
तःअंडंकार्यंसृजंतिप्रकृतेर्बलात्तामाश्रित्येत्यर्थः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंस्वमतंतंउपसंहृत्यमतांतरेष्वपिसामान्यतोनिरूपितांघटनांविशेषतःस्वतात्पर्यंद
र्शयतिसप्तैवेति ज्ञानंजानातीतिद्रष्टाजीवः उभयोर्द्दृष्टदृश्ययोराधारआत्माचेतिस
प्ततत्रभूतसादीनांकारणत्वेनखादिष्वंतर्भावः उत्तरेषामंतर्भावार्थमाह ततःतेभ्यः

सप्तैवधातवइतितत्रार्थाःपंचखादयः ज्ञानमात्माोभयाधारस्ततोदेहेंद्रियासवः २०
षडित्यत्रापिभूतानिपंचषष्ठःपरःपुमान् तैर्युक्तआत्मसंभूतैःसृष्टेदंसमुपाविश
त् २१ चत्वार्येवेतितत्रापितेजआपोन्नमात्मनः जातानितैरिदंजातंजन्मावयविनः
खलु २२

सप्तभ्यः देहेंद्रियासवः कार्याणिज्ञा यते २० षडितिःमत्तेपिभौतिकस्य
भूतांतर्भावंजीवस्यचपरमात्मांतर्भावमाहतैर्युक्तइति २१ अन्नंपृथ्वी आत्मनोजा
तानिआत्मनासहचत्वारितत्वानि अंतर्भावार्थमाहतैरिति अवयविनःकार्यस्य २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानिचमात्राणिचइंद्रियाणिचपंचपंचएकेनमनसासहआत्मासप्तदशः
२३ आत्मैवसंकल्प्ययन्मनउच्यते त्रयोदशपक्षेभूतानितन्मात्रैरैकीभूतानिपंचै

संख्यानेसप्तदशकेभूतमात्रेंद्रियाणिच पंचपंचैकमनसाआत्मासप्तदशःस्मृ
तः २३ तद्वत्षोडशसंख्यानेआत्मैवमनउच्यते भूतेंद्रियाणिपंचैवमनआत्मा
त्रयोदश २४ एकादशत्वआत्मासौमहाभूतेंद्रियाणिच अष्टौप्रकृतयश्चैवपुरु
षश्चनवेत्यथ २५

व इंद्रियाणिचतत्प्रकाशका निपंचैवमनश्चैकामिंद्रिया धिष्ठा
तृ आत्माचद्विविधःएवंत्रयोदश २४ एकादशपक्षेपंचभूतानिपंचेंद्रियाणि जी
वमनसोरात्मांतर्भाविनैतान्येवैकादश नवपक्षेअष्टप्रकृतयःपुरुषश्चविकारा
णामंतर्भावः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपसंहरतिइतीति एभिःप्रकारैःप्रकृतिपुरुषभेदज्ञापनायेत्यर्थः २६ तत्रपृछति
प्रकृतिरिति आत्मनाजडाजडस्वभावेनविलक्षणौअन्योन्यापाश्रयात् परस्परपरि

रतिनानाप्रसंख्यानंतत्त्वानामृषिभिःकृतं सर्वंन्याय्यंयुक्तिमत्वाद्विदुषांकि
मशोभनं २६ उद्धवउवाच प्रकृतिःपुरुषश्चोभौयद्यप्यात्मविलक्षणौ अ
न्योन्यापाश्रयात्कृष्णदृश्यतेनभिदातयोः २७ प्रकृतौलक्ष्यतेह्यात्माप्र
कृतिश्चतथात्मनि एवंमेपुंडरीकाक्षमहांतंसंशयंहृदि २८ छेत्तुमर्हसि
सर्वज्ञवचोभिर्नयनैपुणैः २८

हारेणाप्रतीतेरित्यर्थः तदेवव्यनक्ति प्रकृतौतत्का
र्येदेहेप्रकृतिश्चात्मनितेनविनातस्याअप्रतीतेः अहमित्यभेदप्रतीतेर्देहात्मनोर्भे
देलक्ष्यतइत्यर्थः २७ हृदिवर्तमानंसंशयंनयेनयुक्त्यानैपुण्यंप्रावीण्यंयेषांतैः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
२२७

अर्हसीत्युक्तं तत्र हेतुमाह हियस्मात् त्वत्तः त्वत्प्रसादादेव अत्र ज्ञाने प्रमोषः भ्रंशश्च ते
शक्तितः मायातः ननु च स्वप्रकाशस्यात्मनः कथं ज्ञानं प्रमोषः ज्ञानदाने त्वत्प्रमोषे
वा मम किं प्रयोजनं तत्राह त्वमेवेति २८ विकाराविकाराभ्यां नानात्वैकत्वाभ्यां सा
पेक्षनिरपेक्षाभ्यां प्रकाशाप्रकाशाभ्यां चात्यंतभेदं वक्तुमाह प्रकृतिः पुरुषश्चेति

त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेत्र शक्तितः त्वमेव ह्यात्ममामायागतिं वेत्थ न चा
परः २८ श्रीभगवानुवाच ॥ प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ एष वैकारिकः सर्गो गु
णव्यतिकरात्मकः २९ विकल्पोत्यंतभेद एव कुतः त्यपेक्षायां प्रकृतिशब्दोक्त दे
हादिसंघातस्य विकारित्वं तावद्दर्शयति एष इति द्वाभ्यां एष सर्गः सृज्यत इति सर्गः
देहादिसंघातः वैकारिकः विकारवान् अत्र हेतुः गुणव्यतिकरात्मकः गुणक्षोभप्रकृ
तः २८

२२७

नागात्वमाह भमेति विकल्पंभेदं तद्बुद्धीश्च अनेकधात्वंप्रपंचयति वैकारिकः अनेक
विकारवानपिस्थूलेनमार्गेणतावत्त्रिविधः त्रैविध्यमेवाह अध्यात्ममितिएकंरू
पं ३० तानिरूपाणिदर्शयति दृक् अध्यात्मरूपं अधिभूतं अत्ररंध्रेचक्षुर्गोलके
प्रविष्टंआर्कंवपुः अंशोधिदैवमिति सापेक्षप्रकाशतामाहपरस्परमिति चक्षु

ममांगमायागुणमय्यनेकधा विकल्पबुद्धीश्चगुणैर्विधत्ते वैकारिकस्त्रिविधोध्या
त्ममेकमथाधिदैवमधिभूतमन्यत् दृग्रूपमार्कंवपुरत्ररंध्रेपरस्परंसिद्ध्यतियःस्व
तःखे ३०

षा [illegible] रूपज्ञायतेतदन्यथानुपपत्त्या वस्तुस्तत्वरत्यन्यथानुपपत्त्यातदधि
ष्ठात्रीदेवता ततश्चक्षुषः प्रवृत्तिस्ततोरूपज्ञानमित्येवमेतत्त्रयंपरस्परंसिद्ध्यति अ
त्ररंध्रइतिविशेषणव्यावर्त्यमाहदृष्टांतोपयोगितयायस्तुखेआकाशेअर्कोवर्तते
मंडलात्मासतुस्वतःसिद्ध्यति चक्षुर्विषयत्वेपिप्रतियोग्यपेक्षाभावमात्रेणस्वतइ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीमात्मनो विकारित्वाद्यभावेन भेदमाह यत् यस्मात् आत्मा एषामध्यात्मादीना
माद्यः कारणं अत एकरूपः अभिन्नश्च तस्मादेतेभ्योः परो भिन्नं स्वप्रकाशत्वादपीत्या
ह स्वयानुभूत्या स्वतः सिद्धप्रकाशेन अखिलानां सिद्धानां परस्परं प्रकाशकानामपि
प्रकाशकः सर्वेषामपि सामान्यतः चित्प्रकाशविषयत्वात् अत एव तस्य स्वप्रका

आत्मा यदेषाम परोय आद्यः स्वयानुभूत्या खिलसिद्धसिद्धिः एवं त्वगादिश्रवणादि
चक्षुर्जिह्वादिनासादि च चित्तयुक्तं ३१

शत्वं सिद्धं चक्षुषि दर्शितं त्रैविध्यमिंद्रियांतरेष्व
प्यतिदिशति एवमिति यथा चक्षुः एवं त्वगाद्यपीत्यर्थः त्वक् स्पर्शो वायुरिति श्रवणं
शब्दो दिश इति जिह्वा रसो वरुण इति नासा गंधोऽश्विनाविति चित्तेनयुक्तमंतःकरणां
नरमपि तत्र चित्तं चेतयितव्यं वासुदेव इति मनो मंतव्यं चंद्र इति बुद्धिर्बोद्धव्यं ब्रह्मेति अ २२८
हंकारोऽहंकर्तव्यं रुद्र इत्येवं त्रिविधमित्यर्थः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुचपुनरपिवैलक्षण्यमात्रमेवोक्तं त्रिविधप्रपंचव्यतिरिक्तात्मप्राप्तिस्तुकुतः स्यात् अहं
कारनिवृत्त्या तदूकुतः त्रिविधविकल्पनिवृत्त्यैवेत्याशयेनाहयोसौअहंकारः तमेवाहगु

योसौगुणक्षोभकृतोविकारः प्रधानमूलान्महतः प्रसूतः अहं
त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामसऐंद्रियश्च ३२

णक्षोभंकरोतीतितथाततः परमेश्वरात्कालाद्वानिमित्तात्प्रधानंमूलमुपादानंय
स्यतस्मान्महतः प्रसूतोविकारः सत्रिवृत् त्रिविधः मोहमयस्यविकल्पस्यहेतुः त्रि
विधत्वमेवाहवैकारिकइति ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकुतोनिवर्त्ततेआत्माज्ञानविलसितत्वात्तज्ज्ञानेनैस्याशयेनाह आत्मापरिज्ञानमयइत्य
न्वयः यद्वा विवादः सर्वोपिभिदार्थनिष्ठएवनतुवस्तुमात्रनिष्ठः अतः परस्परयुक्तिभि
रेवभेदस्यनिराकृतत्वात्तमोहमयत्वंसिद्धमिति ननुयद्यहंकारोविकल्पश्चनास्तिअ

आत्मापरिज्ञानमयोविवादोस्त्यस्तीतिनास्तीतिभिदार्थनिष्ठः व्यर्थोपिनैवोपरमेतपुं
सांमत्तः परावृत्तधियांस्वलोकात् ३३ ॥उध्दव॰॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्र
भो उच्चावचान्यथादेहान्गृह्णंतिविसृजंतिच ३४

लं तर्हितन्निवृत्तिप्रयासेनत
त्राह व्यर्थोपिअर्थरहितोपिस्वरूपभ्रंशात्मतोबहिर्मुखानांनैवोपरमेत् प्रस्तुतनत्कृतैः
कर्मभिरुच्चनीचदेहेषुतेसंसरंतीति ३३ तत्रपृच्छतित्वत्तइतिव्यापकस्यात्मनोदेहाद्देहांत
रगमनंअकर्तुःकर्माणिनिस्तस्यजन्ममरणादीनिकथमितिभावः ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गयो

एतद्विद्वांसोनसंति हियस्मात्मायया वंचितामोहिताः ३५ लिंगशरीराध्यासेनसर्वंघटत इत्युक्तस्माहमनइति प्रधानत्वेनपंचभिरितिनिर्देशोन्येषामप्युपलक्षणार्थः देहाद्देहांतरं प्रतिनतोन्यएवात्मातन्मनोनुवर्त्तते अहंकारेणानुगच्छति ३६ ननुमनसोपिपूर्वदेहवियोगेदेहांतरयोगश्चकथंभवतीतिचेत्स्मातिवियोगाभ्यामितिवक्तुंतयोःकारणमाह ध्याय

तन्ममाख्याहिगोविंदधुर्विभाव्यमनात्मभिः नह्येतत्प्रायशोलोकेविद्वांसःसंतिवंचिताः श्रीभगवानु० ॥ मनःकर्ममयंनृणामिंद्रियैःपंचभिर्युतं लोकाल्लोकंप्रयात्यन्यआत्मातदनुवर्त्तते ३६ ध्यायन्मनोनुविषयान्दृष्टान्वानुश्रुतानथ उद्यत्सीदत्कर्मतंत्रंस्मृतिस्तदनु शाम्यति ३७

इति कर्मतंत्रत्वात्कर्मोपस्थापितान् दृष्टान्वाअनुश्रुतान् वेदोक्तान्वाविषयान् अनुध्यायत् अथअनंतरंध्यायमानेषुउद्यत् आविर्भवत् पूर्वविषयेषुचसीदत्लीयमानंभवति तदनंतरंतस्यस्मृतिःपूर्वापरानुसंधानंनश्यति ३७ नमोरामायप्रसी०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः किमत आह विषयेति कर्मोपस्थापितदेवादिदेहे ऽत्यंताभिनिवेशेन आत्मानं पूर्वदेहं पु
नर्मनो न स्मरेत् इति यत्[illegible]नस्सैव यातनादेहाभिनिवेशेन भयशोकादेः देवादिदेहाभिनिवे
शेन वा हर्षतर्षादेर्हेतोः पूर्वदेहे अत्यंतविस्मृतिः अहंकारनिवृत्तिः तदभिमानिनो जंतोर्मृ

विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः जंतोर्वै कस्यचिद्धेतोर्मृत्युर[illegible]तविस्मृतिः ३८
जन्मत्वात्मतया पुंसः सर्वभावेन भूरिद विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ३९

वस्य मृत्युरुच्यते न तु देहविनाशः ३८ जन्म तु विषयस्य देहस्य आत्मतया स्वीकृतिं अभि
मानं प्राहुः न तु देहवदुत्पत्ति न च पुत्रादिदेहवत्प्रीत्यतिशयमात्रेण किंतु सर्वभावेन अभेदे
न अभिमानमात्रेणोत्पत्तिमरणे दृष्टांतद्वयं यथा स्वप्नश्च मनोरथश्चेत्यर्थः ३९ नमो नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टांतो विवृणोति स्वप्नमिति तत्र वर्तमाने स्वप्नादौ पूर्वं चेति अपूर्वमिवेति चान्वयः पूर्वसिद्धम
प्यात्मानमपूर्वमिवाद्यजातमिव पश्यतीत्यर्थः ४० उपसंहरति इंद्रियाणामयनं मनः त

स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्य
ति ४० इंद्रियायनसृष्ट्येदं त्रैविध्यं भाति वस्तुनि बहिरंतर्भिदाहेतुर्जनोऽसज्ज
नकृद्यथा ४१ नित्यदा ह्यंग भूतानि भवंति न भवंति च कालेनालक्ष्यवेगेन सू
क्ष्मत्वात्तन्न दृश्यते ४२

स्य देहांतराभिनिवेशेन यासृष्टिः उ-त्पत्तिस्तया वस्तुनि आत्मनि देहाभि
मानेनेदं त्रैविध्यं उत्तम मध्यम नीचत्वं असदेव भातीत्यन्वयः एवंभूत आत्मा बाह्याभ्यंतर भेद
हेतुश्च भवति बाह्यविषयान् आंतरान् सुखादींश्च पश्यतीत्यर्थः यथा जनो जीवः स्वप्ने बहून्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असतोजनान् देहान् कुर्वन् पश्यन् बहुरूपोभातितद्वत् यद्वाइदंत्रैविध्यंअध्यात्मादिरूपंभा
ति असज्जनक्लृप्तदुष्टपुत्रोत्पादकः जनः पितास्वयंसमोपिपुत्राभिमानतस्तदरिमित्रा
दिषुयथाभेदहेतुर्भवतितद्वदिति अन्यत्समानं ४१ नदेवंलोकप्रसिद्धौजन्ममृत्यूनि
रूप्यसूक्ष्मावृष्ट्या वपितौवैराग्यायनिरूपयति नित्यदाप्रतिक्षणंभूतानिशरीराणि
उत्पद्यंतेनश्यंतिच कालस्यातिसूक्ष्मत्वात्तत्कृतंभवनंचाविवेकिभिर्नलक्ष्यते ४२ स
यथार्चिषांस्त्रोतसांचफलानांवावनस्पतेः तथैवसर्वभूतानांवयोवस्थादयःकृताः ४३
तोर्जन्ममरणयोरज्ञानेकारणमेतद्भवेत्सत्यमेवतयोः कुतइत्याशंक्यानुमानेनसाधय
ति अर्चिषांपरिणामादिभिः स्त्रोतसांरसादिभिः फलानांरूपादिभिर्यथाः अवस्थाविशे
षाः कृताःकालेनेतिपूर्वस्यानुषंगः आदिशब्देनतेजोबलकामकौशलादीनामुपादानंवि
मतंप्रतिक्षणोत्पत्तिविनाशवत् अवस्थाभेदवत्वात् दीपज्वालादिवस्त्वनुमानं ४३ नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंतर्हिप्रत्यभिज्ञातद्वदेवसादृश्यावलंबिनीसाहसोयमिति सादृश्यादर्चिषामेवयथासो
यंदीपइतिप्रत्यभिज्ञा यथाचस्रोतसांप्रवाहजलानामेवतदिदंजलमिति तथासोयंपु
मानितिधीर्गीर्भ्वनृणां बहूनांशरीरिणां मृषाव्यर्थमायुर्येषामविवेकिनांतेषामित्य
र्थः ॥ ननुकथंदेहाध्यासवतःपुंसःकर्मजन्ममरणानिसंतिनान्यस्येतिव्यवस्थानहि

सोयंदीपोर्चिषांयद्वत्स्रोतसांतदिदंजलं सोयंपुमानितिनृणांमृषागीर्धीर्मृषायुषां ॥
मास्वस्यकर्मबीजेनजायतेसोप्ययंपुमान् म्रियतेवामरोभ्रांत्यायथाग्निर्दारुसंयुतः ॥

घटतेघटस्यपुरुषभेदेनसत्वमसत्वंचेति नअज्ञस्यापिवस्तुतस्तदभावादित्याह मास्व
स्यैनैवात्मनः कर्मणाबीजभूतेनसोऽपिअजोऽपिपुमान्जायतेम्रियतेवाकिंतुअयं
भ्रांत्याअजन्मापिजायतइवअमरोपिम्रियतइव यथामहाभूततेजोरूपोग्निराकल्पांत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्क०
२३२

मवस्थितोऽपि दारुयोगवियोगाभ्यां जन्मनाशौ प्राप्नोति तद्वत् ४५ सिद्धवल्लस्योक्ताः वयो
वस्थाः प्रपंचयति निषेको जठरे प्रवेशः गर्भस्तन्मध्ये बुद्धिः बाल्यं आपंचमाब्दात्॥
कौमारं आषोडशाद्वर्षात् ततो यौवनमापंचचत्वारिंशतः ततो वयोमध्यमाषष्टिवर्षा

निषेकगर्भजन्मानि बाल्यकौमारयौवनं वयोमध्यं जरामृत्युरित्यवस्थास्तनोर्नव ४६
एता मनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ४७

त् ४६ देहसंबंधाज्जन्ममरणादीनीत्युपपादितमर्थमुपसंहरति एता इति हि स्फुटं अन्यस्य
अनात्मनो देहस्य संबंधिनीः एता मनोरथमयीः तनूः अवस्था गुणसंगात् प्रकृतस्य विवे
कात् कश्चित् परमेश्वरानुगृहीतः कथंचिज्जहाति अवस्थावतो देहस्य द्रष्टा नावस्थावानि २३२
ति विवेकज्ञानेन ४७

तदुपरि जरा तदुपरि मृत्युः

ननुतदानींमूर्छितत्वेनजन्ममरणवान्देहोनदृश्यतेतत्राह आत्मनइतिपितृदेहस्यैवोर्ध्वदे
हिकंकुर्वतःव्ययदर्शनात् पुत्रदेहस्यचजातकर्मणिजन्मदर्शनादात्मनःस्वदेहस्यापिभ
वाप्ययावनुमेयौएवंचदृश्यत्वेसतिभवाप्ययवतांवस्तूनांदेहानामभिज्ञोद्वयलक्ष

आत्मनःपितृपुत्राभ्यामनुमेयौभवाप्ययौ नभवाप्ययवस्तूनामभिज्ञोद्व
यलक्षणः॥ तरोर्बीजविपाकाभ्यांयोविद्वान्जन्मसंयमौ तरोर्विलक्ष
णोद्रष्टाएवंद्रष्टातनोःपृथक्॥

णःभवाप्ययधर्मकोनभवति॥ एतदेवदृष्टांतेनस्पष्ट
यतितरोरिति तरुशब्देनोद्भिज्जमात्रस्योपलक्षणंफलपाकांतस्यव्रीह्यादेरित्यर्थः यद्वा
तरोरेवांत्यःपरिणामोविपाकःबीजाज्जन्मविपाकात्संयमंनाशंचविद्वान् ॥१९॥ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविवेकिनः संसारं प्रपंचयति प्रकृतेरिति प्रपंचाभिः तत्वेन तत्वतो विविच्य तत्वदृष्ट्यास्पर्शे
षु विषयेषु संमूढ इति वा ५० गुणभेदेन त्रिविधं तत्रापि तत्तारतम्येनैकैकत्र द्विविधं संसार
माह सत्वेति ५१ ननु कर्त्तुरात्मनः कुतः कर्मभिर्भ्रमणं तत्राह नृत्यतो गायतो जनान्पश्य

प्रकृतेरेवमात्मानमम विविच्याऽबुधः पुमान् तत्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ५०
सत्वसंगादृषीन्देवान्रजसाऽसुरमानुषान् तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः
नृत्यतो गायतः पश्यन्यथैवानुकरोति तान् एवं बुद्धिगुणान्पश्यन्ननीहोऽप्यनुकार्यते ५२

न अनुकरोति तद्गतस्वरतालादिगतिं शृंगारकरुणादिरसं च मनस्यनुवर्तयतीत्यर्थः अ
नुकार्यते गुणैर्बलादित्यर्थः अनेन दृष्टांतेन दृश्यधर्मो द्रष्टरि स्फुरतीति दर्शितः ५२ नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपाधिधर्मास्त्रोपहितेऽवभासंतइत्यत्रदृष्टांतमाहयथांभसेति तीरस्थास्तरवोधावंत इवदृश्यंते जलेप्रतिबिंबितावाच्चंचलाइवेति विषयग्राहकेनमनसापरिकल्पिताएव तेषुलावण्यादयोगुणाः नवस्तुतः संतिअतोमनोनिबंधएवसंसारइत्यभिप्रेत्यग्राहक कथानुभवः संसारोमृषा

यथांभसाप्रचलतातरवोपिचलाइव चक्षुषाभ्राम्यमा
णेनदृश्यतेभ्रमतीवभूः ५३ यथामनोरथधियोविषया
नुभवोमृषा स्वप्नदृष्टाश्चदाशार्हतथासंसारआत्मनः ५४

गुणाग्राह्येऽवभासंतइत्यत्रदृष्टांतमाहचक्षुषेति ५३ भोगस्यापिमिथ्यात्वेदृष्टांतद्वयमा हयथेति यथाएताःप्रसिद्धामनोरथधियःस्वप्नदृष्टाश्चधियोयथामृषा एवमात्मनोवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयदिमेषां तर्हि किं तन्निवृत्तिश्रमेण तत्राह अर्थेहीति अस्यात्मनः ५५ अतोभ्रो
गोद्यमोन कर्त्तव्यस्तस्याह तस्मादिति ५६ दुःखप्रतीकारोद्यममपि परित्यज्य परमेश्व

अर्थेल्पः विद्यमानेपि संसृतिर्न निवर्त्तते ध्यायतो विषयानस्यस्व
प्नेनर्थागमो यथा ५५ तस्मादुद्धवमा भुंक्ष्व विषयानसदिंद्रियैः आ
त्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ५६ क्षिप्तोवमानितो सद्भिः
प्रलब्धोसूयितोथवा ताडितः संनिरुद्धो वा वृत्त्या वा परिहापितः ५७

रनिष्ठेनैव भाव्यमित्याह क्षिप्तइति द्वाभ्यां क्षिप्तआक्षिप्तः तुच्छ इति वा प्रलब्धःउपह
सितः ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदाधैर्यमवलंब्यासनावुध्यासानमुध्दरेत् श्रीनारायणं स्मरेदित्यर्थः

निष्ठितः निष्ठीवनविषयीकृतः मूत्रितः मूत्रेणार्द्रीकृतः प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावितोपि कृछ्रगतः कष्टंप्राप्तोऽपि ५८ एवं त्वदुक्तं यथा ऽवबुध्येयं तथानः सर्वानुप्र

निष्ठितो मूत्रितो वाज्ञैर्बहुधैवं प्रकंपितः श्रेयस्कामः कृछ्र
गत आत्मनात्मानमुध्दरेत् ५८ उध्दवउवाच यथैवमनुबुध्ये
यं वदनो वदतां वर सुदुःसहमिमं मन्य आत्मन्यसदतिक्रमं
विदुषामपि विश्वात्मन् प्रकृतिर्हि बलीयसी ऋतेत्वद्धर्मनिरतां
छांतांस्ते चरणालयान् ६० इति श्रीभागवते ॥ ० ॥ द्वाविंशोध्यायः ॥

ॐ

निवदत्वद्धर्मनिरतान्तेविदुषामपि असद्भिः कृतमतिक्रमं अपराधं सुदुःसहं मन्य इत्यन्व

प्रकृतिः स्वभावः ५९ निरस्यसर्वसंदेहानेकीकृत्यसुदर्शनं प्रकाशितरहस्यं तं भजामिगुरुमी
श्वरं ६० इतिश्रीभागवते मा० एका० द्वाविंशोध्यायः॥२२॥ त्रयोविंशेतितिरस्कारसहनोपायईर्य
ते भिक्षुगीताप्रकारेणमनसः संयमोधिया १ दुर्जनोपद्रवोत्कृतंदुःसहोपिमहीयसां अ
तश्चतुर्भिरध्यायैःसहनोपायवर्णनं तत्रतावदस्मिन्नध्यायेभिक्षुगीतयामनोविजयः

बादरायणिरुवाच सएवमाशंसितउद्धवेनभागवतमुख्येनादशार्हर्ष
भेण सभाजयन्भृत्यवचोमुकुंदस्तमाबभाषेश्रवणीयवीर्य्यः १ ७

उत्तरास्मिन्प्रकृतिपुरुषविवेकः तदुत्तरास्मिन्गुण[illegible]वृत्तिविजयः ततः परास्मिन्नैलगी
तयाविषयसंगत्यागेनसत्संगइतिक्रमेणोपायाभगवतावर्ण्यंते आशंसितः प्रार्थि
तः भृत्यस्यवचः सत्कुर्वंस्तंभृत्यंप्रतिआबभाषे १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रतावदंगीकारैस्तद्वचः संपूजयतिद्वाभ्यां हेबार्हस्पत्यबृहस्पतेः शिष्यअत्रलोकेससा
धुर्नास्तियोदुर्जनोक्तैर्भिन्नंक्षुभितंमनः शमयितुमीश्वरः स्यात् २ कुतस्त्यत्तआहनेति
यथामर्मस्थाः मर्मस्वेवनिस्यास्थिताःपुरुषोक्तिरूपाइषवस्तुदंतिव्यथयंतितथाइतरेबा

श्रीभगवानुवाच ॥ बार्हस्पत्यनसोस्त्यत्रसाधुर्वैदुर्जनेरितैः उरुक्तैर्भिन्नमात्मानंयःसमाधातु
मीश्वरः १ नततथातप्यतेविद्धःपुमान्बाणैरमर्मगैः यथातुदंतिमर्मस्थाह्यसतांपुरुषे
षवः २ कथयंतिमहत्पुण्यमितिहासमिहोद्धव तमहंवर्णयिष्यामिनिबोधसुसमाहितः सु

णानतुदंति अतस्तैस्तथानतप्यतइत्यर्थः तथापिमयावक्ष्यमाणैरुपायैः सर्वसोढुंश
क्यमित्यभिप्रायेणेतिहासंप्रस्तौति महद्यथाभवतितथापुण्यमितिहासंगाथांकथयं
ति ३

५

भा॰ए॰
२३६

व

५ साभिक्षुः पूर्वं धनाढ्यः ष्टार्जितस्य धनस्य नाशेन संतप्यमानो निर्विण्णः सन् प्रव्रज्याभि
क्षामटन् दुर्जनैरुपद्रुतः प्रस्तुतोपयोगिनीं गाथामगायदेतानि वक्तुं तस्य चरितमाह अवं
तिष्वित्यादिना अवंतिषु मालवेषु वार्त्ताकृषिवाणिज्यादिरूपा वृत्तिर्यस्य कदर्यस्तु स्म

केन चिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः स्मरता धृतियुक्तेन विपाकं निजकर्मणां ५ अ
वंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया वार्त्तावृत्तिः कदर्यस्तु कामी लुब्धोतिकोपनः ६
ज्ञातयोतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः शून्यावसथ आत्मापि काले कामैरनर्चि
तः ७
तावुक्तः आत्मानं धर्मलक्ष्यं स्वं वपुपुत्रदा श्चपीडयन् देवतातिथिभृत्यांश्च सक
दर्स्पर्द्ध इति स्मरत इति ६ तस्य ये ज्ञातयो बांधवा अतिथयो ऽध्वनीनाश्च तेन नार्चिता इ
त्यर्थः शून्यावसथे धर्महीने गृहे देहे वा ७

कर्म

२३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ यक्षाणांवित्तमिवकेवलंरक्षणीयंवित्तंयस्य पंचभागिनः पंचयज्ञदेवताः ९ तेषाम
वध्यानमनादरः तेनविस्रस्तोविशीर्णः पुण्यस्यस्कंधः अर्थलाभमात्रहेतुरंशोयस्यत

दुःशीलस्यकदर्यस्यद्रुह्यंतेपुत्रबांधवाः दाराद्रुहितरोभृत्याविषण्णानाचरन्प्रियं ८ त
स्यैवंयक्षवित्तस्यच्युतस्योभयलोकतः धर्मकामविहीनस्यचुक्रुधुः पंचभागिनः ९
तदवध्यानविस्रस्तपुण्यस्कंधस्यभूरिद अर्थोप्यगच्छन्निधनंबह्वायासपरिश्रमः
ज्ञातयोजगृहुः किंचित्किंचिद्दस्यवउद्धव दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात् ११

स्य बह्वायासैः कृष्यादिभिः केवलंश्रमोयास्मिन्सः १० दैवतः गृहदाहादिना कालतः नि
खातधान्यादिनृणांपार्थिवानांदंडैकरूपंतस्मात् ११ श्रीरामजयरामजयजयरामनमः

च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ नष्टरायः नष्टोराअर्थोयस्यतस्यतपस्विनः संतप्तस्य १३ मेमयाआत्मादेहः वृथैवा
त्मानुतापनंअपंचयतिनधर्मायेत्यादिना यस्यईदृशोऽर्थायासस्तेनमया १४ नरका
यच सत्यप्यर्थेधर्माननुष्ठानात् १५ श्वित्रः श्वेतकुष्ठं १६ सिद्धेप्यर्थेतस्योत्कर्षेसंवर्द्ध

तस्यैवंध्यायतोदीर्घंनष्टरायस्तपस्विनः खिद्यतोबाष्पकंठस्यनिर्वेदःसुमहानभूत् १२
सचाहेदमहोकष्टंवृथात्मामेनुतापितः नधर्मायनकामाययस्यार्थायासईदृशः १३
प्रायेणार्थाःकदर्याणांनसुखायकदाचन इहचात्मोपतापायमृतस्यनरकायच १४
यशोयशस्विनांशुद्धंश्लाघ्यायेगुणिनांगुणाः लोभःस्वल्पोपितान्हंतिश्वित्रोरूपमिवे
प्सितं १५ अर्थस्यसाधनेसिद्धेउत्कर्षेरक्षणेव्यये नाशोपभोगेआयासस्त्रासश्चिंताभ्र
मोनृणां १६
ने नाशोपभोगयोर्द्वंद्वैक्यंनाशोपभोगचसमर्थः साधनोत्कर्षयोरायासः ततस्त्रासः २३७
चिंताच नाशोभ्रमइति १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच अर्थप्राप्त्यर्थाः स्तेयादयः षडनर्थाः प्राप्तेऽर्थे स्मयादयो व्यसनैः सह नव व्यसना
नि स्त्रीद्युतमद्यविषयाणि त्रीणि १८ १९ भेदवैरस्पर्द्धाः प्रपंचयति द्वाभ्यां भिद्यंते स्नेहं

स्तेयं हिंसानृतं दंभः कामक्रोधः स्मयो मदः भेदो वैरमविश्वासः संस्पर्द्धा व्यसनानि च
१८ एते पंचदशानर्था ह्यर्थमूला मता नृणां तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजे
त् १९ भिद्यंते भ्रातरो दाराः पितरः सुहृदस्तथा एकास्निग्धाः काकिणिना सद्यः स
वैरयः कृताः २० अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः त्यजंत्याशु स्पृधो घ्नं
तिसहसोत्सृज्य सौहृदं २१

त्यजंति कथंभूताः एकास्निग्धाः एके एकप्राणाः ते च ते आ
स्निग्धाः अतिप्रियाश्चेत्यर्थः कुतः काकिणिना पुंस्त्वमार्षं विंशतिवराटिका काकिणी त
या २० संरब्धाः क्षुभिताः स्पृधः स्पर्द्धमानाः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहतावदर्थनिष्ठानामेतेनर्थाः परलोकेप्यनर्थएवतेषामित्याह लब्ध्वेतित्रिभिः मानुष्यंज
न्मतत्तत्रापिद्विजाग्र्यतांब्राह्मण्यं स्वार्थंघ्नंतिआत्महितंनकुर्वंतिये तेयांति २२ अम
रप्रार्थ्यतांदर्शयन्नाह स्वर्गेतिलोकंदेहं अनुषज्जेतआसक्तिंकुर्यात् २३ ऋषयोमनु

लब्ध्वाजन्मामरप्रार्थ्यंमानुष्यंतत्द्विजाग्र्यतां तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांग
तिं २२ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमान् द्रविणेकोनुषज्जेतमर्त्योनर्थस्यधा
मनि २३ देवर्षिपितृभूतानिज्ञातीन्बंधूंश्चभागिनः असंविभज्यचात्मानंयक्षवित्तः
पतत्यधः २४

ष्यपञ्चब्रह्मयज्ञयोर्देवताः देवपितृभूतानीतरेषु ज्ञातयः सगोत्राः बंधवोविवाहादि
नासंबद्धाः तान् अन्यांश्चभागिनः भागार्हान् आत्मानंच असंविभज्यअन्नादिभिरसं
तर्प्य २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविमृश्यानुतप्यमानआह व्यर्थयार्थेहयाप्रमत्तस्यममवितादिगतमितिशेषः ये
नवितादिनाकुशलाः विवेकिनः सिध्यंतिमुच्यंते जरठोवृद्धः २५ अन्यमपिस्वदुःशंसो

व्यर्थयार्थेहयावित्तंप्रमत्तस्यवयोबलं कुशलायेनसिध्यंतिजरठः किंनुसाधये २५
कस्मात्संक्लिश्यतेविद्वान् व्यर्थयार्थेहयासकृत् कस्यचिन्माययानूनंलोकोयंसुवि
मोहितः २६ किंधनैर्धनदैर्वाकिंकामैर्वाकामदैरुत मृत्युनाग्रस्यमानस्यकर्मभिर्वो
तजन्मदैः २७ [illegible]

चेति कस्मादेवमनर्थेविद्वानपिसंक्लिश्यति कारणंसंभावयतिकस्यचिदिति २६ ननुनायं
मोहितः क्लिश्यतिकिंधनादिभिर्भोगादिविधित्सयाअतआहकिंधनैरिति उतपुनरपि २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींसपन्नविवेकः संहृष्यन्नाहनूनमितित्रिभिः येनप्रीतेनात्मनः प्लवरूपोनिर्वेदस्थ्रमव
तिसहरिर्मेनूनंप्रीतइति २८ अंगंशोषयिष्येतपसायद्वाविधयालयंनेष्यामियदिस्या
त्कालावशेषस्तर्ह्यात्मन्येवासिद्धस्तुष्टः सन् अखिलेस्वार्थेधर्मादिसाधने अप्रमत्तःस

नूनंमेभगवांस्तुष्टःसर्वदेवमयोहरिः येननीतोदशामेतांनिर्वेदश्चात्मनः प्लवः २८
सोहंकालावशेषेण शोषयिष्येंगमात्मनः अप्रमत्तोखिलस्वार्थेयदिस्यात्सिद्धआत्म
नि २९ तत्रमामनुमोदेरन्देवास्त्रिभुवनेश्वराः मुहूर्त्तेनब्रह्मलोकंखट्वांगः समसाधय
त् ३० श्रीभगवानुवाच इत्यभिप्रेत्यमनसात्वावंसोद्विजसत्तमः उन्मुच्यहृदयग्रंथींछांतो
भिक्षुरभून्मुनिः ३१

न् २९ अनुमोदेरन् अनुगृण्हंतु ननु देवैरनुमोदितोपिजरठःस्वल्पेन
कालेनकिंसाधयिष्यसितत्राहमुहूर्त्तेनेति ३० अभिप्रेत्यनिश्चित्य आवंत्यःअवंतिदेशभ
वः हृदयग्रंथिन् अहंकारममकारान् ३१ २३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असंगः आसक्तिशून्यः अलक्षितः ऐश्वर्य्यमद्योतयन् ३२ प्रवयसंवृद्धं अवधूतं मलिनं पर्य

भवन् अवमेनिरे हे भद्र परिभूतिभिस्तिरस्कारैः ३३ परिभवानेवदर्शयति केचिदितिस

सचचार महीमेतां संयतात्मेंद्रियानिलः भिक्षार्थं नगरग्रामानसंगो

लक्षितोः विशत् ३२ तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः दृष्ट्वा पर्य्यभ

वन् भद्र बह्वीभिः परिभूतिभिः ३३ केचित्त्रिवेणुं जगृहु रेके पात्रं कमंड

लुं पीठं चैके क्षसूत्रं च कंथां चीराणि केचन ३४ प्रदाय च पुनस्तानि द

र्शितान्याददुर्मुनेः ३४

भाभिः भो भगवन् गृहाणेति दर्शितानि संनिप्रदाय पुनश्चाददुः ३४ नमो भगवते कृष्णाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्येमूत्रयंतिमूर्द्धनीचष्टीवंतिथूत्कारेणश्लेष्माणंप्रक्षिपंति ३५ ३६ क्षिपंतिनिंदंति निं

॥१॥अन्नंचभैक्ष्यसंपन्नंभुंजानस्यसरित्तटे मूत्रयंतिचपापिष्ठाःष्ठीवंत्यऽस्य
चमूर्द्धनि ३५ यतवाचंवाचयंतिताडयंतिनवक्तिचेत् तर्जयंत्यपरेवाग्भिः
स्तेनोयमितिवादिनः ३६ बध्नंतिरज्वातंकेचिद्बध्यतांबध्यतामिति क्षिपं
त्येकेवज्ञानंतएष धर्मध्वजःशठः ३७ क्षीणवित्तइमांवृत्तिमग्रहीत्स्वज
नोज्झितः अहोएषमहासारोधृतिमान्गिरिराडिव ३८

मौनेनसाधयत्यर्थंबकवद्दृढनिश्चयः इत्येकेविहसंत्येनमेकेदुर्वातयंतिच ३९ तंबबंधुर्निरुरुधुर्यथाक्रीडनकंद्विजं एवंसभौतिकंदुःखंदैविकंदैहिकंचयत् ४० भोक्तव्यमात्मनोदिष्टंप्राप्तंप्राप्तमबुध्यत परिभूतइमांगाथामगायतनराधमैः पातयद्भिःस्वधर्मस्थोधृतिमास्थायसात्त्विकीम् ४१ द्विज उवाच नायंजनोमेसुखदुःखहेतुर्नदेवतात्माग्रहकर्मकालाः मनःपरंकारणमामनंतिसंसारचक्रंपरिवर्तयेद्यत् ४२

रामिवाह एषधर्मध्वजः
त्रिदंडलिंगोपजीवी शठोलोकवंचकः ३७ तदेवाहुःक्षीणवित्तइति महासारःअतिबली
३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्दुर्वातयंतितउपर्यधोवायुंमुंचंति बबंधुःश्रृंखलैःनिरुरुधुःकारागृहादिषु द्विजंशुकसा
रिकादियथा ३९ भौतिकंदुर्जनादिकृतं दैविकंशीतोष्णादिप्रभवंदिष्टंदैवप्राप्तं ४० ध

मौनेनसाधयत्यर्थंबकवद्दृढनिश्चयः इत्येकेविहसंत्येनमेकेदुर्वातयंतिच तंबबं
धुर्निरुरुधुर्यथाक्रीडनकंद्विजं ३९ एवंसभौतिकंदुःखंदैहिकंदैविकंचयत् भोक्तव्यमा
त्मनोदिष्टंप्राप्तंप्राप्तमबुध्यत ४० परिभूतइमांगाथामगायतनराधमैः पातयद्भिःस्व
धर्मस्थोधृतिमास्थायसात्विकीं ४१

र्मात्पातयद्भिःपरिभूतो पिसात्विकींधृतिमास्थायस्व
धर्मएवस्थितइमांवक्ष्यमाणांगाथामगायत सात्विकीधृतिश्च धृत्याययाधार्यतेमनः
प्राणेंद्रियक्रियाःयोगेनाव्यभिचारिण्याधृतिःसापार्थसात्विकीतिस्मृतेः ४१ नमोभगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामेवाष्टादशश्लोकींगाथमाहुनायमिति नचात्मानापिग्रहादयः मनःपरंकेवलंसुखदुः
खयोः कारणंवदंतिमनसात्येवंपश्यतिमनसाश्रृणोतीत्यादिश्रुतयः ४२ परिवर्तनप्रकार

द्विजउवाच॥ नायंजनोमेसुखदुःखहेतुर्नदेवताःत्माग्रहकर्मकालाःमनःप
रंकारणमामनंतिसंसारचक्रंपरिवर्त्तये तथं मनोगुणान्वैसृजत्तेबली तृ
यस्ततश्च कर्माणि विलक्षणानि शुक्लानिकृष्णान्यःथलोहितानितेभ्यःस
वर्णाःसृतयोभवंति ४३

मेवाहमनस्त्सादिगुणानुगुण वृत्तीःसृजति ततश्चतेभ्योगुणेभ्यःशु
क्लानि सात्विकानिकृष्णानितामसानि लोहितानिराजसानि सवर्णास्तत्कर्मानुरूपाःसृ
तयः देवतिर्यङ्नरादिगतयः ४३ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हिमनसएवसंसारःस्यान्नात्मनइत्याशंक्याहअनीहइतिअयमर्थः अविद्ययाम
नोध्यासेनेयमात्मनः संसृतिर्नतुस्वतः यतस्तद्रहितस्येश्वरस्यसानास्ति किंतु

अनीहआत्मामनसासमीहताहिरण्मयोमत्सखउद्विचष्टे
मनःस्वलिंगंपरिगृह्यकामानजुषन्निबद्धोगुणसंगतोसौ ४

तद्दतोजीवस्यैवेति तदेतदाह मनसासमीहमानेनसहनियंतृत्वेनवर्त्तमानोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमात्माअनीहस्तत्क्रियासंगरहितः यतोहिरण्मयः विद्याशक्तिप्रधानः कुतः
यतोमत्सखः ममजीवस्यसखानियंताअतः उतूउच्चैर्विचष्टेअतिरोहितज्ञाने
नकेवलंपश्यतीत्यर्थः असौपुनरहंजीवः स्वलिंगंस्वास्मिन्नात्मनिलिंगयति
द्योतयतिसंसारमितितथातन्मनः परिगृह्यआत्मत्वेनस्वीकृत्यतस्यमनसो
गुणैः कर्मभिः संगतः संबद्धः गुणसंगाद्धाकामानूजुषान्निबद्ध्यते ५५ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोमनोनिग्रहेकृतेसर्वंकृतंस्यात्तंविनातुसर्वंव्यर्थमित्याहदानमितिद्वाभ्यां स्वधर्मे
नित्यनैमित्तिकः सद्व्रतान्येकादश्युपवासादीनि अन्यानिचयावंतिकर्माणिएतेसर्वे
उपायामनोनिग्रहलक्षणः अंतोनिष्ठाफलंयेषांतेतथा ननुज्ञानांगत्वंतेषांप्रसि
दानंधर्मेस्वेमौंनियमोयमश्चश्रुतंचकर्माणिचसद्व्रतानि सर्वेमनोनिग्रहलक्षणांताः
परोहियोगोमनसः समाधिः ४५ समाहितंयस्यमनः प्रशांतंदानादिभिः किंवदस्त
स्यकृत्यं असंयतंयस्यमनोविनश्यद्दानादिभिश्चेदपरंकिमेभिः ४६
इतत्राह म
नसः समाधिर्निग्रहएववैरोयोगांज्ञानं ४७ अतोयस्यमनःसमाहितंभवतितस्यकिं
कृत्यमस्तिवदेतिपरंप्रत्युपदिशान्निवस्वयमेवाह असंयतंविक्षिप्तंचेत् यद्वावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पु॰
२४

नश्यत् आलस्यादि नालीयमानं चेत् भवेत् तर्हि एभिर्दानादिभिः किम परं प्रयोजनं
स्यात् न किंचिदित्यर्थः ४६ ननु तर्हि इंद्रियजयः प्रयोजनं स्यात् नेत्याह मनोवश इति देवा
इंद्रियाणि तदधिष्ठातारो वा भीष्मः योगिनामपि भयंकरो मनोलक्षणो देवः कुतः स

प

मनोवशेऽन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति भीष्मो हि देवः स
हसः सहीयान्युंज्याद्वशे तं स हि देवदेवः ४७

हसः बलादपि बलिनोपि वा सहीया
न बलीयान् अतस्तं यो वशवर्तिनं कुर्यात्स एव देवदेवः सर्वेंद्रियजेता भवति नान्यः
तथा च श्रुतिः मनसो वशे सर्वमिदं बभूव नान्यस्य मनो वशमान्वियाय भीष्मो हि देवः
सहसः सहीयानिति तन्निग्रहव्यतिरेकेण इतरनिग्रहाय प्रयत्नाभूढ इत्याह तमिति २४
तं दुर्जयं ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोसत्वारागादयोवेगायस्यतं अतएव अरुंतुदं अरुंमर्मतत्तुदतिव्यथयतीत्यरुंतु
दः तं तनूनेतिछेदः तंनविजित्यअजित्वातूततः येकेचिन्मर्त्यैः कैश्चितूअसद्भिर्न्नहंकु
र्वंति तत्रचानुकूलप्रतिकूलादीनूअन्यान्मित्रादीनूकुर्वंतितेमूढाइत्यर्थः ४ ततश्चा

तंदुर्जयंशत्रुमसह्यवेगमरुंतुदंतन्नविजित्यकेचित् कुर्वंत्यसद्विग्रह
मत्रमर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४ देहंमनोमात्रमिमंगृहीत्वा
ममाहमित्यंधधियोमनुष्याः एषोहमन्योयमितिभ्रमेणदुरंतपारे
तमसिभ्रमंति ४

नेनप्रकारेणसंसारेभ्रमंतीत्याह देहमिति मनोमात्रपरिकल्पितमि
मंस्वदेहमहमितिपुत्रादिदेहंचममेति स्वीकृत्यतमसिसंसारे ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ॰गी॰
१४४

तदेवंमनसएवसुखदुःखकारणत्वमुपपाद्येदानींजनादीनांषण्णामकारणत्वंप्रपंचय
तिजनास्त्वितिषड्भिः अत्रचअस्मिन्नपिपक्षेआत्मनः किंनकिंचित्सुखदुःखकर्मत्वंतत्क
र्तृत्वंचेत्यर्थः कुतइत्यतआहहिःइतिनिश्चितंभौमयोर्भूविकारयोर्देहयोरस्तत्नत्वात्मनः का

जनस्तुहेतुःसुखदुःखयोश्चेत्किमात्मनश्चात्रहिभौमयोस्तत्
जिह्वांक्वचित्संदशातिस्वदद्भिस्तद्वेदनायांकतमायकुप्येत् ५०

अमूर्त्तस्याक्रियस्यचहननादिषुकर्मत्वकर्त्तृत्वानुपपत्तेः तथापिदुःखमात्मपर्यवसा १४४
य्येवेतिचेत् एवमपिपरमात्मनः उभयत्राप्येकत्वात्नकोपविषयोस्तीतिस्वदृष्टांते
नदर्शयतिजिह्वामिति ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदिदेवता अस्तुनामतत्रापिपक्षे आत्मनः किंयतोविकारयोर्विक्रियमाणयोर्देवतये
स्तत् हस्तेनमुखेनिहतेतेनवाहस्तेदृष्टेतदाभिमानिनोर्वह्निंद्रयोरेवतत् नत्ववि

दुःखस्यहेतुर्यदिदेवतास्तुकिमात्मनस्तत्रविकारयोस्तत् य
दंगमंगेननिहन्यतेक्वचित्कुध्येतकस्मैपुरुषःस्वदेहे ५१

क्रियस्यानहंकारस्यवात्मनः देवतानांचसर्वदेहेष्वभेदान्नकोपविषयोस्तीतिस्वदे
हदृष्टांतमाह यत्यदाअंगंदेवताधिष्ठानंहस्तमुखादिअतएवपूर्वत्रदेवतानधि
ष्ठानरूपभूविकारदृष्टांतोदाहरणं ५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनः सुखदुःखाद्याकारः परिणामः अतः स एव हेतुर्यदि स्यात्तत्र तस्मिन्पक्षे अन्यतः
किंन किंचिदन्यतोऽभवतिपस्मै कुप्येदित्यर्थः यतो निज एव स्वभावः सः न त्वात्मनस्त
थापरिणामोऽन्यनिमित्ततोऽभवति अतोऽस्ति कोपविषय इति चेत्तत्राह नहीति आत्म

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः
स्वभावः न त्यात्मनोऽन्य यदि तन्मृषा स्यात् कुप्येत कस्मान्न
सुखं न दुःखं ५२

व्यतिरिक्तं नास्त्येव यदि स्यात् अस्तीति प्रतीयेत तर्हि तन्मृषैव अतः कस्माद्धेतोः कुप्ये
त् यतो नास्ति निमित्तं न च सुखं दुःखं चेत्यर्थः ५२ श्रीरामचंद्राय नामस्मरणं कुर्यात् २५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रहपक्षेप्यजस्यात्मनः किंयतः जन्यतरतिजनोदेहस्तस्यैवजन्मलग्नापेक्षयाद्वाद
शाष्टमादिराशिस्थास्तेसुखदुःखयोर्निमित्तंभवंति किंच अंतरिक्षस्थैर्ग्रहैस्तत्रस्थ
स्यग्रहस्यैवपादार्द्धादिदृष्ट्यादिभेदैः पीडांवदंति दैवज्ञाः नतुग्रहकोणादिषुस्थितस्य

॥ ग्रहानिमित्तंसुखदुःखयोश्चेत्किमात्मनोऽजस्यजनस्यतेवै
ग्रहैर्ग्रहस्यैववदंतिपीडांक्रुध्येतकस्मैपुरुषस्ततोन्यः ५२ ७

तद्दृश्यगोचरस्यपुरुषस्य ग्रहगतैवतुपीडातल्लग्नोत्पन्नेदेहेतस्याभिमानाद्भवति
अतः पुरुषः ततोग्रहाद्देहाच्चान्यः कस्मैक्रुध्येत ५२ नमोभगवतेकृष्णायनमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्महेतुश्चेत् आस्तिक्यस्योपगमः कर्मैव नास्ति कुतस्तस्य हेतुत्वमिति तदाह हिय
स्मात् तत्कर्म एकस्य जडाजडत्वे सति स्यात् जडत्वाद्धिकारित्वोपपत्तेः अजडत्वाच्च

कर्मास्तु हेतुः सुखदुःखयोश्चेत् किमात्मनस्तद्धि जडाजडत्वे दे
हस्त्वचित्पुरुषोऽयं सुपर्णः क्रुध्येत तस्मै न हि कर्ममूलं ५४

हितानुसंधानतः प्रवृत्तिसंभवात् अचित् जडो देहः अतस्तस्य प्रवृत्तिर्न संभवति पु
रुषस्तु सुपर्णः शुद्धज्ञानस्वरूपः अतः कस्मै क्रुध्येत् यंतः सुखदुःखयोर्मूलभूतं कर्म २५८

तत्रकालपक्षेपिआत्मनः किंमतोसौकालात्मकएवब्रह्मांशत्वात् त्वांशस्यस्वतःपीडा
नास्तीत्यत्रदृष्टांतः नाग्रेर्हेतोस्तदंशस्यज्वालादेस्तापोदाहतोनाशोस्ति तत्रोपाधिभूत

कालस्तुहेतुःसुखदुःखयोश्चेत्किमात्मनस्तत्रतदात्मकोसौ ना
ग्नेर्हितापोनहिमस्यतत्स्यात्क्रुध्येतकस्मैनपरस्यद्वंद्वं ५५

काष्टांशदाहान्नाशःस्यादितिदृष्टांतांतरमाह किमस्यतत्त्वतोसंतदंशस्यतुषारकण
स्यनाशकंनस्यादित्यर्थः किंच आस्तामंशत्वं वस्तुतःपरत्वाये नचपरस्यद्वंद्वंसुखदुः

त्वाहिकिमस्मीति ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं षड्भिस्तेहेतवः प्रसिद्धानिरस्ताः यदि कश्चिद्विशेषं तरमुद्भावयेत्तदपि वस्तुमहिमावसायां
नसंभवतीत्याह नकेनचिदिति ननु परोक्षः कथमपरूप्यते तत्राह यथेति संसृतिम
विद्यमानामेव रूपयति प्रकाशयतीति तथा तस्य अहमः अहंकारस्य यथास्यान्तत

नकेनचित्क्वापि कथं च नास्य द्वंद्वोपरागः परतः परस्य यथाहमः संसृतिरूपिणःस्या
देवं प्रबुद्धो न बिभेति भूतैः ५६ एतां समास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्म
हर्षिभिः अहं तरिष्यामि दुरंतपारं तमो मुकुंदाङ्घ्रिनिषेवयैव ५७

थापरतः प्रकृतेः
परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तो सोनवास्तव इत्यर्थः एवं प्रबुद्धोपरः स भूतैः
कृत्वा न बिभेति ५६ अतोहमपि तथैव परमात्मनिष्ठया तरिष्यामीत्याह एतामिति
सोहमित्यन्वयः ननु इयं निष्ठैव कथं भवेत्तदाह मुकुंदेति ५७

CC-0. In Public Domain,Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्तावेनसहगाथार्थंसंक्षेपतोदर्शयतिद्वाभ्यां इत्थंनष्टद्रविणोनिर्विद्यगतक्लमः प्रव्र
ज्यगांपर्यटन्नसद्भिर्निराकृतोपिस्वधर्मादकंपितःसन्मुनिरमुंगाथामगायतेत्यन्व

श्रीभगवानु०॥ निर्विद्यनष्टद्रविणोगतक्लमःप्रव्रज्यगांपर्यटमानइत्थं निराकृतोसद्भि
रपिस्वधर्मादकंपितोमूंमुनिराहगाथां ५८ सुखदुःखप्रदोनान्यःपुरुषस्यात्मवि
भ्रमः मित्रोदासीनरिपवः संसारस्तमसःकृतः ५९ तस्मात्सर्वात्मनातातनिगृहाण
मनोधिया मय्यावेशितयायुक्तएतावान्योगसंग्रहः ६०

यः ५८ मित्रोदासीनरिप
वःसर्वेपिचसंसारःतमसःअज्ञानतः आत्मनोमनसोविभ्रममात्रकृतः नतात्विक
इत्यर्थः ५९ उक्तंद्वंद्वसहतोपायमुपसंहरतितस्मादिति ६० नमोनमोरामायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोनिग्राहाशक्तोप्येतछ्रवणादिनिष्ठस्तत्फलंप्राप्नोतीत्याहयइति द्वंद्वैः सुखदुः
खादिभिः भिक्षुर्गीतमिषंकृत्वाभक्तचित्तगतंहरिः मोहंनिघ्नन्निहाभातिपरमा

यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमाहितः धारयंछ्रावयंछृण्वन्द्वं
भ द्वैर्नैवाभिभूयते ६१ इतिश्रीभागवतेम॰ एका॰त्रयोविंशोध्यायः॥२३ ॥

स्कं
नंदरूपतः ६१ इतिश्रीभागवतेमहापुराणेएकादशेधेटीकायांत्रयोविंशोध्यायः॥२३॥च
तुर्विंशेतुसांख्येनमनोमोहोनिवार्यते आत्मानःसर्वभावानामागमापायचिंत्त
॥या १ श्रीकृष्णपरमात्मनेनमः॥ २४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वपदद्वंद्वभक्तानामद्वंद्वत्वायसंयमं चित्तस्योक्त्वापुनः कृष्णः सांख्यमत्राहतत्कृते अद्वि
तीयात्परमात्मनोमाययाप्रकृतिपुरुषद्वारासर्वंद्वैतमुदेति पुनस्तत्रैवलीयतइत्यनुसं

श्रीभगवानुवाच॥ अथतेसंप्रवक्ष्यामिसांख्यंपूर्वैर्वि
निश्चितं यद्विज्ञायपुमान्सद्योजह्याद्वैकल्पिकंभ्रमं १

दधानस्यद्वंद्वभ्रमोनिवर्त्ततइतिवक्तुंसांख्यंप्रस्तौतिअथेति पूर्वैः कपिलादिभिर्विनि
श्चितं वैकल्पिकंभेदनिमित्तंभ्रमंसुखदुःखादिरूपं १ नमोभगवतेवासुदेवायनमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथोशब्दः कालत्रैत्तानंद्रष्टातेनदृश्यः कृत्स्नोऽप्यर्थश्चविकल्पशून्यमेकमेवब्रह्म
ण्येवलीनमासीदित्यर्थः करेत्यपेक्षायामाह अयुगेयुगेभ्यः पूर्वंप्रलयइत्यर्थः

आसीज्ज्ञानमयोअर्थएकमेवाविकल्पितं यदाविवेकनि
पुणाआदौकृतयुगेयुगे २ तन्मायाफलरूपेणकेवलंनि
र्विकल्पितं वाङ्मनोगोचरंसत्यंद्विधासमभवद्बृहत् ३

तथाआदौयत्कृतयुगंतस्मिंश्च अन्यदापियदाविवेकनिपुणाजनाभवंतितदापि
तेषांभेदास्फूर्त्तेः २ तद्बृहद्ब्रह्मवाङ्मनोगोचरंयदाभवतितथा मायादृश्यंफलंतत्प्र
काशः तद्रूपेणमायाविलासरूपेणवाद्विधाऽभूत् ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोर्द्विधाभूतयोरंशयोर्मध्ये उभयात्मिकाकार्यकारणरूपिणी ४ अभवन् अभिव्यक्ता
बभूवुः मयापरमेश्वरेणजीवादृष्टप्रयुक्तत्वात्स्रष्टेः पुरुषानुमतत्वं यद्वास्वस्यैवप्रकृ
तीक्षणरूपायापुरुषावस्थातदनुमतेनतद्वारेणेत्यर्थः ५ सूत्रंक्रियाशक्तिमान्प्रथ

तयोरेकतरोत्यर्थः प्रकृतिः सोभयात्मिका ज्ञानंत्वन्यतमोभावःपुरुषःसोभिधीयते
तमोरजःसत्वमितिप्रकृतेरभवन्गुणाः मयाप्रक्षोभ्यमाणायाःपुरुषानुमतेनच ५
तेभ्यःसमभवत्सूत्रंमहान्सूत्रेणसंयुतः ततोविकुर्वतोजातोयोहंकारोविमोहनः ६

मोविकारः ततोमहान्ज्ञानशक्तिः नन्वयमहानेवप्रथमोविकारः प्रसिद्धः तत्राह सच
ज्ञानक्रियागर्भत्वात्सूत्रेणसंयुतः नपृथक् एकमेवतत्वंक्रियाज्ञानशक्तिभ्यांद्विधोच्य
तइत्यर्थः विमोहनः जीवस्यभ्रमहेतुः संजातः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतस्तन्मात्रादीनांकारणंमनःशब्देनदेवानामप्युपलक्षणंचिदचिन्मयः चिदाभासम्ब
सत्वादुभयग्रंथिरूपइतिजीवोपाधित्वंदर्शितं यद्यपितस्माद्वाएतस्मादात्मनःआ
काशःसंभूतइत्यादिश्रुतेरन्नमयंहिसोम्यमनइत्यादिश्रुतेश्चप्रथमंभूतानिजायं
तेतेभ्यश्चापंचीकृतेभ्यः प्राणादिक्रमेणसमष्ट्यात्मकंलिंगशरीरं पंचीकृतेभ्यश्च

वैकारिकस्तैजसश्चनामसश्चत्यध्यहंत्रिवृत् तन्मात्रेंद्रियमनसांकारणंचिदचिन्मयः

ब्रह्मांडंतस्मिन्वैराजस्तदंतर्यामीलीलाविग्रहःक्षीराब्धिशायीश्रीनारायणःतन्ना
भिपद्मेचवैराजस्यभोगार्थविग्रहश्चतुराननःततोयथावत्परमन्येषांजीवानामाविर्भा
वइतिप्रक्रिया तथापिचित्ताभिव्यक्तिपूर्वकोहंकारस्ततोभूतेंद्रियादिव्यवहारइत्येता
वतामहदादिक्रमेणसृष्टिरुच्यते तथाचोक्तं मद्धोहविस्फुलिंगाद्यैःसृष्टिर्याचोदिताः २५०
न्यथा उपायःसोवतारायनास्तिभेदःकथंचनेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्रिविधात्त्रिविधप्रपंचोत्पत्तिंदर्शयतिअर्थइति तन्मात्रिकात्शब्दादितन्मात्रका
रणात्तामसात्तत्द्वारार्थोमहाभूतरूपोजज्ञेबभूव भूतानामावरणस्वभावत्वात्

अर्थस्तन्मात्रिकाज्जज्ञेतामसादिंद्रियाणिच तैजसाद्देवता
आसन्नेकादशाचवैकृतात् ८ मयासंचोदिताभावाःसर्वे
संहत्यकारिणः अंडमुत्पादयामासुर्ममायतनमुत्तमं ९

इंद्रियाणिदशतैजसात्राजसात् तेषांप्रकृतिस्वभावत्वात् वैकृतात्सात्विकात्
देवताः दिग्वातार्कप्रचेतोश्विवन्हींद्रोपेंद्रमित्रकाः चंद्रश्चेत्येकादशचशब्दान्मन
श्चतेषांप्रकाशस्वभावत्वात् ८ ममवैराजांतर्यामिणः ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सलिलेसंस्थितिर्यस्यतस्मिन्सलिलसंस्थितांडेश्रीनारायणरूपोलीलाविग्रहेणसम
भवंस्थितइत्यर्थः विश्वाख्यंलोककारणंतत्रचात्मभूः चतुराननरूपभोगविग्रहेणपुनर्वै
राजएवतस्मिन्नाविर्भूतइत्यर्थः रजसायुक्तोमदनुग्रहात्तपसाऽसृजत् भुवः अंतरिक्षलो

तस्मिन्नहंसमभवमंडेसलिलसंस्थिते ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः १०
सोऽसृजत्तपसायुक्तोरजसामदनुग्रहात् लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रिधा
देवानामोकआसीत्स्वर्भूतानांचभुवःपदं मर्त्यादीनांचभूर्लोकः सिद्धानांत्रितयात्परं
अधोऽसुराणांनागानांभूमेरोकोऽसृजत्प्रभुः १२

कः स्वः स्वर्गमहर्लोकादेरप्युपलक्षण ११ लोकसृष्टिप्रयोजनमाह देवानामितिसार्द्धेन
ओकोनिवासः पदंस्थानंत्रितयात्परंमहर्लोकादिभूमेरधः अतलादि १२ वासुदेवाय ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंव्यवस्थायांकारणमाहसार्द्धेन त्रिलोक्यांपातालादिसहितायां योगादितारतम्येनय
थोत्तरंमहर्लोकादयः मद्गतिः वैकुंठलोकः १३ तत्रतुमद्गतिव्यतिरेकेणेतरागतय

त्रिलोक्यांगतयःसर्वाःकर्मणांत्रिगुणात्मनां योगस्यतपसश्चैवन्यासस्य
गतयोमलाः महर्जनस्तपःसत्यंभक्तियोगस्यमद्गतिः१३ मयाकालात्म
नाधात्राकर्मयुक्तमिदंजगत् गुणप्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति

१४

श्चंचलाइत्याह वैराग्यार्थं मयाकालशक्तिना धात्रापरमेश्वरेणकर्मफलप्रदेनहेतुभू
तेनगुणप्रवाहेसंसारेउन्मज्जतिआसत्यलोकमुत्तमागतीःप्राप्नोति पुनर्निमज्जतिआ
स्थावरंनीचाःप्राप्नोति १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्त्यर्थत्वात्तत्प्रतिपादनाय कारणेन कार्यस्य व्याप्तिमाह
उभयेन संयुक्तो व्याप्तः तदेवाह प्रकृत्येति १५ इदानीं कार्यस्य कारणात्मत्वं दर्शयति य
स्य कार्यस्य आदिः कारणं अंतः लयस्थानं च तस्य मध्यं मध्यावस्थापि स एव वै प्रसिद्धं म

अणुर्बृहत्कृशः स्थूलो यो यो भावः प्रसिध्यति सर्वोप्युभयसंयुक्तः प्रकृत्या पुरुषेण च १५
यस्तु यस्यादिरंतश्च स वै मध्यं च तस्य सन् विकारो व्यवहारार्थो यथा तैजसपार्थिवाः १६

त्सुवर्णादिषु अत एवाव्यभिचारित्वात्स एव सन् नेतरः अलं तर्हि मिथ्याभूतकार्यसृष्ट्या
तत्राह विकार इति तैजसाः कटककुंडलादयः पार्थिवा घटशरावादयश्च यथेति १६ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंतर्हिस्वकार्यंप्रतिमहदादीनामप्याद्यंतरूपत्वात्सत्यत्वंस्यात्तत्राहयदिति यदुपमु
पादायउपादानकारणतयास्वीकृत्यपूर्वः कारणरूपोमहदादिर्भावः परंअहंकारादिकं
भावंविकुरुतेसृजति यथापिंडोमृदमुपादायस्वयंनिमित्तभूतोघटंसृजतितत्कस्मिन्

यदुपादायपूर्वस्तु भावोविकुरुतेपरं आदिरंतोयदाय
स्यतत्सत्यमभिधीयते १७ नमोनारायणायनमः ७

वसन्निति पूर्वस्यानुषंगः कथंतर्हिमृत्तिकेत्येवसत्यमित्यादिश्रुतिः तत्राहआदिरिति
यत्यदायस्यादिरंतश्चविवक्ष्यतेतदानस्सत्यमित्यभिधीयतेश्रुत्यापरमकारणस्या

मनःसमस्तविवक्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वविकारमिथ्यात्वे

ननुतथापिप्रकृतिपुरुषकालानामकार्यभूतानांभिन्नत्वात्कथमद्वितीयतातत्राह प्रकृ
तिरिति अस्यसतः कार्यस्योपादानंयाप्रकृतिः प्रसिद्धायश्चतस्याआधारः अधिष्ठाता

प्रकृतिर्यःस्योपादानमाधारःपुरुषःपरः सतोऽ
भिव्यंजकःकालोब्रह्मतत्त्रितयंत्वहं १८ ७

परंपुरुषःयश्चगुणक्षोभेणाभिव्यंजकःकालस्तत्त्रितयंब्रह्मरूपोऽहमेवनतुपृथक् प्र
कृतेः शक्तित्वात् पुरुषकालयोरवस्थारूपत्वात् १८ नमोरामचंद्रायनमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंतावत्कालत्रयेऽप्यव्यभिचारित्वात् ब्रह्मैव सत्यमिति वक्तुं तस्य सृष्टिकारणत्वेनाद्वैत
त्वमुक्त्वा मध्ये ऽपि तस्यैव सत्त्वमुपपाद्यांते ऽप्यवधित्वेन सत्त्वं दर्शयिष्यन्सर्गप्रवाहरूपा
याः स्थितेरवधिमाह सर्ग इति महान् बहुलः पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अ

सर्गः प्रवर्त्तते तावत्पौर्वापर्येण नित्यशः महान् गुण
विसर्गार्थः स्थित्यंतो यावद्दीक्षणं १९ नमो कृष्णाय

विच्छेदेन किमर्थं प्रवर्त्तते तदाह गुणेषु देहेषु विविधतया सृज्यत इति गुणविसर्गो जी
वः तदर्थः तद्भोगप्रयोजनः किंपर्यंतं प्रवर्त्तते यावत् स्थितेरंतः सोऽपि किमवधिः तदा
ह यावदीक्षणं परमेश्वरस्य तावत् १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाप्यमानः

प्रलयंतिनिरूपयति विराड्ब्रह्मांडंभयाकालात्मनाऽऽसाद्यमानःप्राप्यमानः लोकाना
महरहः कल्पाः सृष्टिप्रलयाविविधाः कल्पंतेयास्मिन् तान्वास्त्वस्मिन्विकल्पयतीति

विराण्मयासाद्यमानोलोककल्पविक
ल्पकः पंचत्वायविशेषायकल्पतेभुव
नैःसह २०

तथासतथाभूतोऽपिपंचत्वरूपायविशेषायविभागायकल्पतेयोग्योभवतिपंचानां
भूतानामैक्यरूपस्तेषांपृथग्भावापत्त्यानश्यतीत्यर्थः २० नमोभगवतेकृष्णायनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रतस्माद्वाएतस्मादात्मनआकाशःसंभूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः
पृथिवीपृथिव्याओषधयः ओषधीभ्योन्नं अन्नात्पुरुषइतिश्रुसुक्तसृष्टिक्रमप्रातिलो
म्येनप्रलयमाह अन्नइति मर्त्यंशरीरंयेनोपचितंतस्मिन्नन्नेशतवर्षायामनाष्टौ

अन्नेप्रलीयतेमर्त्यमन्नंधानासुलीयते धा
नाभूमौप्रलीयंतेभूमिर्गंधेप्रलीयते २७

क्षीणेसतितत्रैवलीयतइत्यर्थः अन्नंधानासुबीजमात्रावशेषंभवतीत्यर्थः धानाभूमौ
उत्पानप्ररोहंतीत्यर्थः भूमिर्गंधेसंवर्तकादित्यशोषितासंकर्षणमुखाग्निनादग्धाच
सतीभूतसूक्ष्मरूपगंधमात्रावशेषाभवति २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
२५५

अप्सु गंधः शतवर्षयावृष्ट्याप्लाव्यमानोप्सु लीयते एवमेवापश्चाज्योतिषा शोष्यमाणा
रसमात्रावशेषा भवंति ततो रसोपि तस्मिंल्लीयते ज्योतिश्च वायुनाभिभूयमानं रूप

अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे लीयंते ज्योतिषि रसो
ज्योती रूपे प्रलीयते रूपं वायौ स च स्पर्शे लीयते सोपि चांबरे
२२

मात्रं सत्तस्मिंल्लीयते वायुश्च कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः सन् तस्मिन् २२ ७ २५५

अंबरंच भूतादिनाऽहंकारेण ग्रस्यमानं शब्दतन्मात्रे तदेवं तामसाहंकारकार्यस्य शब्द
पर्यंतं लयमुक्त्वा राजसाहंकारकार्यस्याप्याह इंद्रियाणि स्वयोनिष्विति स्वप्रवर्त्तकदे
वतासु तेषां प्रवृत्तिस्वभावत्वात्प्रवृत्तेश्च देवताधीनत्वात्तासु लयः तिवाच्चो युक्तिः

अंबरं शब्दतन्मात्र इंद्रियाणि स्वयोनिषु योनिर्वैकारिके
सौम्य लीयते मनसीश्वरे ४३

न
वस्तुतस्तु स्वकारणे राजसाहंकारे लयोऽभिप्रेतः योनिरित्युद्देश्यगतत्वादेकत्वमवि
वक्षितं योनयो देवतास्तु मनसि कुतः ईश्वरे नियंतरि मनो वशेऽन्येत्यभवनुस्मदेवा
इत्युक्तत्वात् इंद्रियलयोक्त एवात्राप्यभिप्रायः मनश्च देवताभिः सह वैकारिके अहंका

४३

भा०९
२५६

तामसाहंकारकार्यावशेषितस्यशब्दस्यलयमाह शब्दोभूतादिंतामसाहंकारं अप्येति
तस्मिन्लीयतइत्यर्थः भूतादिरितिउपलक्षणं त्रिविधोऽप्यहंकारोमहत्तिजअंशंविहा
यज्ञानक्रियाशक्तिमात्ररूपोभवति कथंभूतः प्रभुःसमर्थःसर्वजगन्मोहकत्वा

शब्दोभूतादिमप्येतिभूतादिर्महतिप्रभुः सलीयते
महान्स्वेषुगुणेषुगुणवत्तमः तेव्यक्तेसंप्रलीयंतेत
त्कालेलीयतेप्यये २५

त् सचमहान्स्वकारणेषुगुणेषु ज्ञानक्रिया
शक्तिमत्वाद्गुणवत्तमस्ताद्दृग्भावंविहायगुणमात्ररूपोभवति तेचाव्यक्तेप्रकृतौसा
म्यावस्थांगच्छंतीत्यर्थः तदव्यक्तंकालेकालाधीनत्वात्तेनैकीभूयावतिष्ठते अप्ययेऽपर

श्रीहरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायामयेमायाप्रवर्त्तकेज्ञानमयेवाअतएवजीवयतीतिजीवस्तस्मिन्महापुरुषे
अयंभावः विश्वस्रष्टुर्महापुरुषस्योपकरणरूपः कालोवत्संशेनसज्ज्यस्थं अतस्तदा
त्मनावतिष्ठतइति तदुक्तंसप्तमे कालंचरंतंसृजतीश आश्रयंप्रधानपुंभ्यांनरदेवस
त्यकृदितिदशमेच योऽयंकालस्तस्यतेऽव्यक्तबंधोचेष्टामाहुश्चेष्टतेयेनविश्वं निमेषा

कालोमायामयेजीवेजीवआत्मनिमप्यजे आत्माकेवलआत्मस्थोविकल्पापायलक्ष
णः २५

दिर्वत्सरांतोमहीयांस्तंत्वेशानंक्षेमधा मप्रपद्यइतिजीवआत्मनि प्रकृतेर्लीन
त्वेनप्रतियोग्यभावात्परिपूर्णेनस्वरूपेणावतिष्ठते आत्मात्वात्मस्थएवनान्यत्रली
यते यतः केवलोनिरुपाधिः अत्रहेतुः विकल्पापायाभ्यांविश्वोत्पत्तिलयाभ्यांलक्ष्यते
अधिष्ठानत्वेनावधित्वेनचेतितथासः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यकथनस्यप्रस्तुतोपयोगमाहएवमिति मनसःकथंभेदनिमित्तोभ्रमःस्यात् ज्ञा
तोवाकथंतद्दितिष्ठेदिति २६ उपसंहरतिएषइति प्रत्यक्षमिवयेनेदंदर्शितंतत्वमात्म

एवमन्वीक्षमाणस्यकथंवैकल्पिकोभ्रमः मनसोहृदितिष्ठेत
व्योम्नीवार्कोदयेतमः २६ एषसांख्यविधिःप्रोक्तःसंशयग्रं
थिभेदनः प्रतिलोमानुलोमाभ्यांपरावरदृशामया २७ इति
श्रीभागवतेमहापुराणेए॰चतुर्विंशतितमोध्यायः ॥२४॥

नः सांख्यप्रख्यानतस्तस्मैहरयेगुरवेनमः २७ इतिश्रीभागवतेमाःए॰ ॥ टि॰ ॥चतुर्विंश
तितमः ॥२४॥ पंचविंशेत्वनैर्गुण्यप्रतिपत्त्यैनिरूप्यते चित्तप्रभवसत्वादिगुणवृत्तिरनेकधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकृतिपुरुषविवेकज्ञानवतोऽपियावत्प्रयत्नविशेषेणगुणत्रयवृत्तिजयोनस्यात्तन
तू तावद्द्वंद्वोपरमः अतस्तज्जयोपायकथनायगुणवृत्तिनिरूपणार्थमाहगुणानामिति

श्रीभगवानुवाच ॥ गुणानामसमिश्राणांपुमान्येनय
थाभवेत् तन्मेपुरुषवर्येदमुपधारयशंसतः १ ७

सहमिश्रीभूयवर्त्तमानाः समिश्राः नसमिश्रा असमिश्रास्तेषांविभक्तानांगुणानां
मध्येयेनगुणेनयथायादृशोभवेत्तदिदंकथयतोमत्तोनिबोधेत्यर्थः १ श्रीरामचंद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रसत्वरत्तीराहशमइति ईक्षाविवेकः तपःस्वधर्मवर्त्तित्वं स्मृतिः पूर्वापरानुसंधा
नं तुष्टिर्यथालाभसंतोषः त्यागोव्ययशीलत्वं अस्पृहावैराग्यं श्रद्धाआस्तिक्यंह्रीः

शमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः तुष्टिस्त्या
गोःस्पृहाश्रद्धान्हीर्दयादिःस्वनिर्वृतिः २ श्रीराम७

अनुचितेकर्मणिलज्जा दयादानं दयदानगतिरक्षणोबितिस्मरणात् आदिशब्दे
नार्ज्जवविनयादि स्वनिर्वृतिः आत्मरतिः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजसोवृत्तीराह कामोभिलाषः इहाव्यापारः मदोदर्पः तृष्णालाभेससत्यसंतोषः स्तंभो
गर्वः आशीः धनाद्यभिलाषेणदेवतादिप्रार्थनं भिदाअहमन्यइतिभेदबुद्धिः सुखंवि

कामइहामदस्तृष्णास्तंभआशीर्भिदासुखं
मदोत्साहोयशःप्रीतिर्हास्यंवीर्यंबलोद्यमः २

षयभोगः महोत्साहः मदेनयुद्धाद्यभिनिवेशः यशःप्रीतिः स्तुतिप्रियत्ता हास्यमु
पहासः वीर्यंप्रभावाविष्कारः बलेनोद्यमः न्यायेनोद्यमःसात्विकएव २ नमोरामाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा.र.
२५९

म तमोवृत्तीराह क्रोध इति लोभोप्ययपराङ्मुखता क्लमः श्रमः कलिः कलहः शोकमो
होअनुशोचनं चपलत्वं च विषादार्तीदुःखं दैन्यं च निद्रा तंद्रा आशा रदंभे भविष्यती

क्रोधो लोभोनृतं हिंसा याच्ञा दंभः क्लमः कलिः शोकमोहौ विषा
दार्ती निद्राशा भीरनुद्यमः ४ सत्वस्य रजसे जश्चैतास्तमसश्चा
नुपूर्वशः रत्नयोवर्णितप्रायाः सन्निपातमथो शृणु ५ श्री

त्यान्वीक्षा भीर्भयं अनुद्यमो जाड्यं ४ अनुपूर्वशः क्रमेणैभिश्लोकत्रयोक्ताः वर्णितप्रा २५९
याः अन्या अप्युक्ता रतिभावः ५ ६ ७
ता:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभक्तानांगुणानांत्त्रयोवर्णिताः मिश्राणामाहसन्निपातइतित्रिभिः अहंममेतिचम
तावुक्तसर्वइत्तिसामानाधिकरण्यदर्शनात् सन्निपातजत्वंअहंशांतः कामीक्रोधीत्यादि
तथाममशंगत्तिरास्तिकामःक्रोधइत्यादिदृष्टत्वं तत्पूर्वकःसर्वोव्यवहारश्चसन्निपातका

सन्निपातस्त्वहमितिममेत्युभयामतिः व्यवहारःसन्निपातोमनोमात्रेंद्रियासुभिः६
धर्मेचार्थेचकामेचयदासोपरिनिष्ठितः गुणानांसन्निकर्षोयंश्रद्धारतिधनावहः ७

र्यमित्याहव्यवहारइति अत्रहेतुः मनश्चमात्राणिचइंद्रियाणिचअसवश्चतैः मनआ
दीनांसात्विकत्वामसराजसत्वात्तैर्व्यवहारः सन्निपातजइतिभावः ६ असौपुरुषोयदा
धर्मादिषुपरिनिष्ठितोभवति तदाश्रयःत्रिषुनिष्ठारूपः सन्निकर्षःसन्निपातकार्यं धर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
२६०

रीनांसत्वतमोरजः कार्यत्वात् विषयतः सन्निपातजत्वमुक्तं फलतस्त्वतथात्वमाह श्रद्धा
रतिधनानिसत्वरजस्तमोमयान्यावहतीतितथा ७ धर्मनिष्ठायामेवसन्निपातंदर्श
यति प्रवृत्तिलक्षणेकाम्येधर्मेयदापुंसोनिष्ठाभवति तथापुमान्यदागृहाश्रमे

प्रवृत्तिलक्षणेनिष्ठापुमान्यर्हिगृहाश्रमे स्व
धर्मेचानुतिष्ठेतगुणानांसमितिर्हिसा ८

यासक्तस्तिष्ठेत् अनुपश्चात्स्वधर्मेचनित्यनैमित्तिकेतिष्ठेत्सापिसमितिः सन्निपा
तः हियस्मात्काम्यधर्मगृहासक्तिस्वधर्मारजस्तमः सत्वमयाइत्यर्थः ८ रामकृष्ण २६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंमिश्रामिश्रगुणवृत्तीः प्रदर्श्येदानींपुमान्येनयथाभवेदितियदुक्तंतद्दर्शयतिपुरु

पुरुषंसत्वसंयुक्तमनुमीयाच्छमादिभिः कामादिभीरजोयुक्तंक्रोधा
द्यैस्तमसायुतं९ यदाभजतिमांभक्त्यानिरपेक्षःस्वकर्मभिः तंस
त्वप्रकृतिंविद्यात्पुरुषंस्त्रियमेववा १० यदाआशिषआशास्यमांय
जेतस्वकर्मभिः तंरजःप्रकृतिंविद्याद्धिंसामाशास्यतामसं ११ ७

मभितिंत्रिभिः ९१० हिंसांशत्रुमरणादिकमाशास्ययोभजेत्तंतामसंविद्यात् एतैर्गुणैरे

वंभूतोभवतीतितात्पर्यार्थः ११

८

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसुत्तवापिगुणवशेनकर्तृत्वाविशेषात्केनविशेषेणत्वंसेव्योजीवस्त्वसेवकइतिनियमः
यतोमांभजेतेतिवारंवारमुच्यतेतत्राहसत्वमिति जीवस्यैवनमे कुतःयतश्चित्तजाद्भी
वोपाधेर्योचित्तैःभिव्यज्यंते अतोयेः सएवबध्यते कीदृशःभूतानांदेहरूपाणांभन्ये

सत्वंरजस्तमइतिगुणाजीवस्यनैवमे चित्तजा
यैस्तुभूतानांसज्जमानोनिबध्यते १२ नमः

षांचमध्येसज्जमानः अहंत्वनासज्जमानोगुणनियंतृत्वेनसृष्ट्यादिकर्त्तापिनिस्य
मुक्तः अतोमहान्विशेषइतिभावः यद्वाभूतानामपंचीकृतानां यत्कार्यभूतंचित्तं
अन्नमयंहिसोम्यमनइतिश्रुतेः तत्प्रभवाः अतोभूतोपहितस्यजीवस्यैवेति अन्यस
मानं १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंमिश्रामिश्रगुणकार्याणिप्रदर्श्येदानीमेकैकगुणोद्रेककार्याणिदर्शयतियदेति
सप्तदशाभिः यदेतरौरजोगुणौजयेत् अभिभवेत् भास्वरंप्रकाशकं विशदंस्वच्छं शिवं
शांतं शिवत्वविशदत्वभास्वरत्वानांयथाक्रमंसुखधर्मज्ञानहेतुत्वात्तदातैर्युज्येत

यदेतरौजयेत्सत्त्वंभास्वरंविशदंशिवं तदासुखेनयुज्येतधर्मज्ञानादिभिःपुमान् १३
यदाजयेत्तमःसत्त्वंरजःसंगंभिदाचलं तदादुःखेनयुज्येतकर्मणायशसाश्रिया १४

आदिशब्दात्शमदमादिभिश्च १३ तमःसत्त्वंचकर्मभूतं रजःकर्तृ संगंसंगहेतुः भि
दाभेदहेतुः चलंप्रवृत्तिस्वभावं अतःसंगहेतुत्वात्यशसाश्रियाचयुज्येततत्तत्का
मःपुमान्भवतीत्यर्थः भिदाहेतुत्वात्दुःखेनयुज्येतद्वितीयाद्वैभयंभवतीतिश्रुतेःच
लत्वात्कर्मणाचयुज्येत १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा रजः सत्वं च कर्मभूतं तमः कर्तृ जयेत् मूढं विवेकभ्रंशकं लयं आवरणात्मकं रज
उं अनुद्यमात्मकं अतो मूढत्वात् शोकमोहहिंसाभिः लयत्वान्निद्रया रजउत्वादुद्यमा

यदा जयेद्रजः सत्वं तमो मूढं लयं जउं युज्येत शोकमोहाभ्यां निद्रया हिंसया
शया १५ यदा चित्तं प्रसीदेत इंद्रियाणां च निर्वृतिः देहेभयं मनोसंगं तत्सत्वं
विद्धि मत्पदं १६

भावेन केवलमाशया युज्येतेति द्र ष्टव्यं जन इति पादे लयात्मकत्व
मेव निद्राशयोर्हेतुः १५ किंच यदा चित्तं प्रसीदेत स्वच्छं भवेत् निर्वृत्तिरुपरतिः तत्तदा
मत्पदं मदुपलब्धिस्थानं सत्वमुद्रिक्तं विद्धि १६ नमो बादरायणाय नमो नमः ७ ७ २६२

यदापुनः क्रियया विकुर्वन् विकारं प्राप्नुवन् आधीर्भवति आसमंताद्धिक्षिप्ता धीर्यस्य
सः चेतसां बुद्धींद्रियाणां अनिर्वृतिः अनुपरातिः मात्राणि कर्मेंद्रियाणि तेषामस्वास्थ्यं
विकाराधिक्यं मनोभ्रांतं चंचलं रजउत्कटं निशामय जानीहि १७ यदासीदत्तति

विकुर्वन्क्रियया चाऽधीरनिर्वृत्तिश्च चेतसां गात्रास्वास्थ्यं मनोभ्रांतं रज
एतैर्निशामय १७ सीदश्चित्तं विलीयन चेतसोग्रहणेक्षमं मनोनष्टं तमो
ग्लानिस्तमस्तदुपधारय १८

रोभवत् चेतसोग्रहणे चिदाकारपरिणामे अक्षमं सच्चित्तं विलीयेत मनोऽपि संकल्पा
त्मकं नष्टं लीनं तमोऽज्ञानं ग्लानिर्विषादश्च भवति तत्तदा तमउत्कटं उपधारय विद्धि १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच एधमानइति इंद्रियाण्येव निवृत्तिप्रवृत्तिमोहस्वभावानि देवासुररक्षांसि इतिज्ञे
यं यद्वा प्रसंगादाधिदैविकानांगुणानामुत्कर्षकार्याण्युक्तानीतिज्ञेयं १९ गुणोत्क

एधमानेगुणेसत्वेदेवानांबलमेधते असुराणांचरजसि
तमस्युद्धवरक्षसां १९ सत्वाज्जागरणंविद्याद्रजसास्वप
मादिशेत् प्रस्वापंतमसाजंतोस्तुरीयंत्रिषुसंततं २० ७

र्षतोऽवस्थाभेदंदर्शयतिसत्वादिति प्रसंगान्निर्गुणावस्थामाह तुरीयंचतुर्थमवस्थां
तरंनाम त्रिषुजागरणादिषुसंततमेकरूपमात्मतत्वमेवेत्यर्थः २० कृष्णपरमात्मा २६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणोत्कर्षद्वारेणतत्तत्कर्मफलनिष्ठांदर्शयतिऊर्पर्युपरीति ब्राह्मणावेदार्थानुष्ठानाभि
युक्ताः आब्रह्मणइतिपाठेब्रह्मलोकमभिव्याप्येत्यर्थः आमुख्यात्स्थावरानभिव्या
प्य अंतरचारिणः मनुष्याएवभवंति २७ देहादुत्क्रांतिकालीनगुणोत्कर्षफलमाह

उपर्युपरिगच्छंतिसत्वेनब्राह्मणाजनाः तमसाधोधआमुख्याद्र
जसांतरचारिणः २१ सत्वेप्रलीनाःस्वर्यांतिनरलोकंरजोलयाः त
मोलयास्तुनिरयंयांतिमामेवनिर्गुणाः २२ नमोरामायनमः॥

सत्वेवृद्धेसतिप्रलीनामृताः रजोलयाःरजसिप्रवृद्धेसतिलयोयेषांते एवंतमोलया
इत्यपिनिर्गुणाइत्यत्रतुलयशब्दानुपादानाज्जीवंतोपिनिर्गुणाश्चेन्मामेवयांतीत्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तं

इदानीं गुणोत्कर्षकृतमेव तत्तत्फलसाधनकर्मत्रैविध्यमाह मदर्पणं मत्प्रीत्युदेशेन कृतं निः
फलं केवलं दासभावेनैव कृतं यन्निजं कर्म नित्यादि तत्सात्विकं फलं संकल्प्यते यस्मिन्त
त् हिंसाप्रायं हिंसोद्देशेन कृतं हिंसाबहुलं वा आदिशब्दाद्दंभमात्सर्यादिकृतं च २३

मदर्प्पणं निःफलं वा सात्विकं निजकर्म तत् राजसं फलसंकल्पं हिंसा
प्रायादि तामसं २३ कैवल्यं सात्विकं ज्ञानं रजो वैकल्पिकं तु यत् प्राकृ
तं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं २४

मेश्वरविषयं २४

इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह कैवल्यं देहादिव्यतिरिक्तात्मवि
षयं वैकल्पिकं देहादिविषयं यत इज्जः राजसं प्राकृतं बालमूकादिज्ञानतुल्यं मन्निष्ठं पर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वनंविविक्तत्वात्सात्विकोवासः भगवन्निकेतनंतुसाक्षात्तदाविर्भावान्निर्गुणंस्थानं २५
कारकःकर्त्ता असंगीअनासक्तः रागांधः अत्यभिनिवेशवान् स्मृतिविभ्रष्टः अनु

वनंतुसात्विकोवासोग्रामोराजसउच्यते तामसंद्यूतसदनंमन्निकेतंतु
निर्गुणं २५ सात्विकःकारकोःसंगीरागांधोराजसःस्मृतः तामसःस्मृ
तिविभ्रष्टोनिर्गुणोमदपाश्रयः २६ सात्विक्याध्यात्मिकीश्रद्धाकर्मश्र
द्धातुराजसी तामस्यधर्मेयाश्रद्धामत्सेवायांतुनिर्गुणा २७ नमः ॥

संधानशून्यः मदपाश्रयः मदेकशरणःसहिनिरहंकारत्वान्निर्गुणः २६ अधर्मेधर्मइति

एका २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पथ्यंहितंपूतंशुद्धं अनायस्तंअनायासतःप्राप्तं आहार्य्यंभक्ष्यभोज्यादि इंद्रियाणांप्रेष्ठंकटुम्ललवणादि आर्तिदाशुचिंदैन्यकंमशुद्धंचवशरान्मन्निवेदितंनिर्गुणमित्यभिप्रेतं २८

पथ्यंपूतमनायस्तमाहार्य्यंसात्विकंस्मृतं राजसंचेंद्रियप्रेष्ठंतामसंचार्त्तिदाशुचि २८ सात्विकंसुखमात्मोत्थंविषयोत्थंतुराजसं तामसंदैन्यमोहोत्थंनिर्गुणंमदपाश्रयं २९

आत्मोत्थंसुखंमदपाश्रयमित्यपि त्वंतत्पदार्थविषयत्वेनज्ञानवदेवद्रष्टव्यं २९ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्कं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां द्रव्यं पथ्यपूतादि देशो वनग्रामादिः फलं सा
त्विकं सुखमित्यादि कालः यदा भजेत मां भक्त्या यद्देन तौ जयेदित्यादिना ग्योर्थोउक्तः ज्ञानं

द्रव्यं देशं फलं कालो ज्ञानं कर्म च कारकः श्रद्धा
वस्थाः कृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ३०

कैवल्यं सात्विकं ज्ञानमित्यादि कर्ममदर्पणमित्यादि कारकः सात्विकः कारको संगीत्या
दि श्रद्धा सात्विक्याध्यात्मिकीत्यादि अवस्था सत्वाज्जागरणमित्यादि आकृतिः उप
र्युपरि गच्छंतीत्यादिनोक्ता देवत्वादिरूपा निष्ठा सत्वे प्रलीनाः स्वर्यांतीत्यादिनोक्तं स्वर्गाए दि
वं सर्वोप्ययं भावस्त्रैगुण्यस्त्रिगुणात्मकः ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकेवलमेषएवकिंतुयावंतः पुरुषाव्यक्तयोधिष्ठिताः अधिष्ठिताः तेसर्वेभावागुणमया
एवतत्प्रपंचः दृष्टमपि ३१ इदानीमुक्तत्रैगुण्यस्यसंसारहेतुत्वमनुवदंस्तन्निर्जयान्मो
क्षस्स्याहएतादृतिसार्द्धेन येननिर्जिताःसपश्चादविक्षिप्तेनभक्तियोगेनमन्निष्ठः

सर्वेगुणमयाभावाःपुरुषाव्यक्तधिष्ठिताः दृष्टंश्रुतमनुध्यातंबुध्यावापुरुषर्षभ ३१
एतांसंसृतयःपुंसोगुणकर्मनिबंधनाः येनेमेनिर्जिताःसौम्यगुणाजीवेनचित्तजाः
भक्तियोगेनमन्निष्ठोमद्भावायप्रपद्यते ३२ तस्माद्देहमिमंलब्ध्वाज्ञानविज्ञानसंभवं
गुणसंगंविनिर्धूयमांभजंतुविचक्षणाः ३३

सन्मद्भावायमोक्षायप्रपद्यतेयोग्योभ
वति ३२ तस्माद्विवेकिनामिदमेवयुक्तमित्याह तस्मादिति ज्ञानविज्ञानयोःसंभवोयस्मि
न्तमिमंनरदेहं ३३ २६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भजनप्रकारमाह निःसंगइतिसार्द्धेन सत्वसंसेवयासात्विकान्येवसेवेतपुमान्सत्ववि
रुद्धयइतिप्रागुक्तया नैरपेक्ष्येणउपशमात्मकेनसत्वेनैव ३४ एवंचसति मांप्राप्तो
नीत्याह संपद्यतइतिजीवंजीवस्यकारणंलिंगशरीरं ३५ मांप्राप्तस्यनपुनः संसारइ

निःसंगोमांभजेद्विद्वानप्रमत्तोजितेंद्रियः रजस्तमश्चाभिजयेत्सत्वसंसेवयामुनिः
सत्वंचाभिजयेद्युक्तोनैरपेक्ष्येणशांतधीः ३४ संपद्यतेगुणैर्मुक्तोजीवोजीवंविहायमां
३५ जीवोजीवविनिर्मुक्तोगुणैश्चाशयसंभवैः मयैवब्रह्मणापूर्णोनबहिर्नांतरश्चरेत्
३६ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपंचविंशोध्यायः ॥२५॥ ७

त्याहजीव
इति नबहिः विषयभोगेननांतरः तत्स्मरणेन गुणकृतामुरुसंसरणप्रथामजितपुण्य
कथानादिभिः धुनुतभक्तिरसेनविवेकिनोनहिपुनःसुलभंजनुरीदृशं ३६ इतिअध्यायः
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षड्विंशेयोगनिष्ठायाविघातोदुष्टसंगतः साधुसंगेनतन्निष्ठापराकाष्ठेतिवर्ण्यते १ यो
गिनोयोगविभ्रंशःसंगतःसंभवेदिति सर्वथातन्निवृत्त्यर्थमैलगीतंवितन्यते निःसं
गोमांभजेदि छ्रप्रमत्तोजितेंद्रिय इत्युक्तं तत्रविपक्षेनर्थंकथयिष्यन्जीवन्मुक्त

श्रीभगवानुवाच मल्लक्षणमिमंकायंलब्ध्वामद्धर्म
आस्थितः आनंदंपरमात्मानंमात्मस्थंसमुपैतिमां।

स्यापितर्हिसंगोदुर्वाररत्नर्थः स्यादित्याशंक्योक्तानुवादपूर्वकंपरिहरतिसार्द्धाभ्यां म
ल्लक्षणंमत्स्वरूपंलक्ष्यतेयेनतमिमंनरदेहंलब्ध्वा मद्धर्मेभक्तिलक्षणेआस्थितःस २६७
न् आत्मस्थंआत्मन्येवनियंतत्वेनस्थितंपरमानंदरूपमात्मानंमांसमुपैतिसम्यक्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचैवंभूतस्यविषयसंगोनामास्तीत्याहगुणमय्येति गुणमयीयाजीवयोनिः जीवोपा
धिस्तया विमुक्तः गुणेषुवर्त्तमानोः पितैर्नयुज्यतेसंगंनप्राप्नोति अत्रहेतुः अवस्तुभिः
नन्ववस्तुभिरप्यन्येयुज्यमानादृश्यंतेतत्राह अवस्तुत्वेनदृश्यमानेषु २ तथाः पिसंगं

गुणमय्याजीवयोन्या विमुक्तोज्ञाननिष्ठया गुणेषुमायामात्रेषुदृश्यमा
नेष्ववस्तुतः वर्त्तमानोपिनपुमान्युज्यतेवस्तुभिर्गुणैः २ संगंनकुर्याद
सतांशिश्नोदरतृपांक्वचित् तस्यानुगस्तमस्यंधेपतत्यंधानुगोंधवत् ३

वर्जयेदित्याहसंगमिति असतांलक्षणमाह शिश्नोदरेणपर्यंतीतिशिश्नोदरतृपस्तेषां क्व
चित्कदाचिदपि आस्तांतावद्बहूनांसंगः किंतुतस्यैकस्याप्यनुगतः अनुवर्त्ती अंधमनुग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
२६८

अत्रेतिहासमाह ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः कीर्तिर्यस्य सः उर्वशीविर
हात् प्रथमं मुह्यन् पश्चात् कुरुक्षेत्रे तां समागम्य गंधर्वदत्तेनाग्निना देवानिष्ट्वा पुनरुर्व
शीलोकं प्राप्य शोकसंयमे शोकापगमे सति ततो निर्विण्णः सन्निमां गाथाममायतेति

ऐलः सम्राडिमां गाथामगायत् बृहच्छ्रवाः उर्वशीविरहान्मुह्यन्निर्विण्णः
शोकसंयमे ४ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः विलपन्नन्व
गाज्जाये घोरे तिष्ठेति विक्लवः ५

नवमस्कंधानुसानुसारेण द्रष्टव्यं ४ प्राक्तनीं मोहावस्थामाह त्यक्त्वेति घोरे तिष्ठेति हयेजाये
मनसा तिष्ठ घोरे वचांसि मिश्रा क्लणवावहैनु ननौ मंत्रा अनुदितास एते मयस्करन्परतरे
चनाहन्निस्येवं मंत्रैर्विलपन् ५

२६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैक्लव्येकारणमाहकामानिति वर्षाणांयामिनीरात्रीः यंतीः अपयांतीः आयंतीः आ
गामिनीः अक्लष्टचेतनायस्यसः ६ तस्यगंधर्वलोकंप्राप्तस्यबहुकालमुर्वशीसंभो

कामानत्तसोः नुजुषनूक्षुल्लुकान्वर्षयामिनीः नवेदयंतीर्नायं
तीरुर्वश्याक्लष्टचेतनः ६ ॥ ऐलउवाच ॥ अहोमेमोहविस्तारःका
मश्मलचेतसः देव्याग्रहीतकंठस्यनायुःखंडाइमेस्मृताः ७

गानंतरंनिर्विण्णस्यगाथामाहाष्टादशाभिः तत्राष्टाभिरनुतापःप्रपंच्यतेअहोइतियत्तो
मयाइमेअहोरात्ररूपाआयुःखंडाःनस्मृताः ७ नमोभगवतेवासुदेवायनमोनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवाहनाहमितिअभिनिर्मुक्तः मयिरममाणेअस्तंगतः अभ्युदितोवासूर्यइति अमुया
उर्वश्यावंचितः बतखेदे उतअपिवर्षपूगा णामपिगतान्यहानिनवेदेति ८ येनसंमोहे

नाहंवेदाभिनिर्मुक्तः सूर्योवाऽभ्युदितोऽमुया मुषितोवर्षपूगानांबताहानिगतान्युत
८ अहोमेआत्मसंमोहोयेनात्माप्योषितांकृतः क्रीडामृगश्चक्रवर्तीनरदेवशिखाम
णिः ९ सपरिछेदमात्मानंहित्वात्तृणमिवेश्वरं यांतींस्त्रियंचान्वगमंनग्नउन्मत्तवद्रु
दन् १०

न आत्मादेहः क्रीडामृगवत् अधीनः ९ ननुप्रणयकुपितायाअनुनयार्थमधीनता
युक्तेवसत्यंनतत्रतदस्तीसाह सपरिछदंराज्यादिसहितंईश्वरंचक्रवर्त्तिनंतृणमिव २६९
त्यक्त्वायांतीमपिअन्वगमं अनुगतोऽस्मि १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचममप्रभावाद्यभिमानोव्यर्थैवेत्याह कुतस्तस्यमेतेजोबलं खरोयथापादताडितोः
पिखरीमनुगछतितद्वत् ११ एवंभूतस्यसर्वसाधनंव्यर्थमित्याह किमिति त्यागेनसंन्या

कुतस्तस्यस्याःनुभावःस्यात्तेजउग्रशात्वमेववा योन्वगछंस्त्रियंयांतीं खरवत्स्यादताडितः
११ किंवधयाकिंतपसाकिंत्यागेनश्रुतेनवा किंविविक्तेनमौनेनस्त्रीभिर्यस्यमनोहृतं १२
स्वार्थस्याकोविदंधिङ्मांमूर्खंपंडितमानिनं योहमीश्वरतांप्राप्यस्त्रीभिर्गोखरवज्जितः
१३ सेवतोवर्षपूगान्मेउर्वश्याअधरासवं नतृप्यत्यात्मभूःकामोवह्निराहुतिभिर्यथा १४

आत्मभूर्मनसिजः पुनःपुनरुद्भवन् १४

सेनविविक्तेनएकांतसेवया मौनेनवाङ्नियमेन १२ अनुतप्तःसन्नात्मानंनिंदति द्वाभ्यां
स्वार्थस्येति अकोविदमज्ञातारं गोखरवत् गौरिवखरइवेति १३ अधरासवंसेवमानस्य

एवमष्टाभिः निर्वेदोनिरूपितः इदानींतस्यविवेकमाह दशभिः पुंश्चल्येति अयंभावः कर्म
भिर्देवानिष्टाद्दुःखमेवप्राप्तोऽस्मिअतः परमेश्वरमेवभजेयमिति १५ परमेश्वरप्रसादंवि
नादेवैरुपदिष्टादपिवेदवाक्यान्मोहोननिवर्त्ततइत्याह बोधितस्यापीतिदेव्याउर्वश्यासू

पुंश्चल्यापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः आत्मारामेश्वरमृतेभगवंतमधोक्षजं १५
बोधितस्यापिदेव्यामेसूक्तवाक्येनदुर्मतेः मनोगतोमहामोहोनापयात्यजितात्मनः १६

क्तवाक्येनयथार्थवचनेनपुरूरवोमामृथामाप्रतप्तोमात्वावृकासोअशिवासउक्षन्
नवैस्त्रैणानिसख्यानिसंतिशालावृकाणांहृदयान्येतानीत्यनेन १६ नमोभगवतेराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वंपूर्वमल्पापकृतंचित्तमित्यादिनातस्याअपकारोऽनुस्मृतः इदानींममैवायमपराधइत्याह
किमेतयेति नः अस्माकंकामिन्याएतयाकिमपकृतंनकिंचिदपि यथारज्जुस्वरूपाविदुषोर
ज्जुद्रष्टुः पुंसस्तस्यांसर्पकल्पनयाखिद्यतोपिरज्ज्वाकिमपिनापकृतंतद्वत् यद्यस्माद्योह

किमेतयानोपकृतंरज्ज्वावासर्पचेतसः रज्जुस्वरूपाविदुषोयोहंयदजितेंद्रियः १७ का
यंमलीमसःकायोदौर्गंध्याद्यात्मकोऽशुचिः स्रक्गुणाःसौमनस्याद्यास्तत्त्यासोऽ विद्ययाकृ
तः १८

मेवंभूतःसएवाजितेंद्रियत्वादपराधीत्यर्थः १७ ननुतयापिस्रैवसौगंध्यप्रेमादिगुणैःसंमोह
मूलमित्याशंक्य तेऽपिस्व परिकल्पिताएवेत्याहचतुर्भिः कायमिति मलीमसः अतिमलि
नः सुमनसांकुसुमानामिवगंधः सौकुमार्यादि सौमनस्यंशोभनमनोभावोवा १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममत्वमपितस्मिन्परिकल्पितमेवेत्याह पित्रोः किंस्वंकायजनकत्वात् नुवितर्के भार्या
यावाभोगप्रदत्वात् अत्रानुपयुक्तमप्येतन्न्यायतुल्यत्वाउक्तं स्वामिनोवाअधीनत्वात्
अग्नेर्वाअंतेध्यानदाहुतित्वात् श्वगृध्रयोर्वाभक्ष्यत्वात् किंवाआत्मनः तत्कृतशुभ

पित्रोः किंस्वनुभार्यायाःस्वामिनोग्नेःश्वगृध्रयोः किमात्मनः किंसुहृदामितियोनावसी
यते १९ तस्मिन्कलेवरेमेध्येतुछनिष्ठेविषज्जते अहोसुभद्रंसुनसंसुस्मितंचमुखं
स्त्रियाः २०

भागित्वात् सुहृदांवाउपकारित्वात् एवंयोनानिश्चीयते १९ तुछा कृमिविड्भस्मलक्षणा
निष्ठाअंतोयस्यतस्मिन्काये कलेवरेऽप्रियत्वेनगृहीते विषंगमेवाहअहोइति सुनसंशो
भननासिकं २० नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोगुणारोपेणरममाणामादृशाः कृमिसमाइत्याह त्वगादिसंहतौतत्संघातेदेहे विण्मू
त्रादिसंहतौरमतांकृमीणांवा २१ यद्यप्येवंबीभत्सिताएवस्त्रियः अथापिनोपसज्जेत
अवलोकनादिनापिसंगंनकुर्यात् अर्थवित् विवेकी अत्रहेतुः विषयेति २२ ननुक्व

[illegible]

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ विण्मूत्रपूयेरमतांक्रिमिणांकियदंतरं
२२ अथापिनोपसज्जेतस्त्रीषुस्त्रैणेषुचार्थवित् विषयेंद्रियसंयोगान्मनः क्षुभ्यतिनान्यदा २३
अदृष्टादश्रुताद्भावान्नभावउपजायते असंप्रयुंजतः प्राणांछाम्यतिस्तिमितंमनः २४
चिन्निमीलितनयनादेरपिमनः क्षोभोदृश्यतेसत्यंसो ऽपिपूर्वदर्शनादिकंविनानभवती
त्याह अदृष्टादितिभावात्पदार्थात् भावोमनः क्षोभः अतः प्राणानिंद्रियाणिअसंप्रयुं

त्रैणेषु

जतः नियच्छतः स्तिमितं निश्चलं सत् २३ इंद्रियैः कृत्वा अविश्रब्धः अविश्वसनीयः मा
दृशां अविवेकिनां २४ फलितमाह द्वाभ्यां एवमिति नृपेषु देवेषु च दीव्यतीति तया २५

तस्मात्संगो न कर्त्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः विदुषां चाप्यविश्रब्धः षड्वर्गः
किमु मादृशां २४ ॥श्रीभगवानुवाच॥ एवं प्रगायन्नृपदेवदेवः स उर्वशीलो
कमथो विहाय आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः
२५ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् संत एतस्य छिंदंति मनो
व्यासंगमुक्तिभिः २६

उक्तिभिः हितोपदेशैः इति तीर्थदेवादिसंगादपि सत्संगः श्रेयानिति दर्शयति २६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतांलक्षणमाहसंतइति विशेषणाष्टकस्ययथेष्टंहेतुँमद्भावः २७ नचतेषूपदेशापे
क्षाअपितुकेवलंतत्संनिधिरेवतारयतीत्याहतेष्विति सप्तभिः २८ श्रवणादिभिरे

॥ संतोनपेक्षामच्चित्ताःप्रशांताःसमदर्शिनः निर्ममानिरहंकारानि
र्द्वंद्वानिष्परिग्रहाः २७ तेषुनित्यंमहाभागमहाभागेषुमत्कथाः सं
भवंतिहितान्नृणांजुषतांप्रपुनंत्यघं २८ तायेशृण्वंतिगायंतिह्यनु
मोदंतिचादृताः मत्पराःश्रद्दधानाश्चभक्तिंविंदंतितेमयि २९
भक्तिंलब्धवतःसाधोःकिमन्यदवशिष्यते मय्यनंतगुणेब्रह्मण्या
नंदानुभवात्मनि ३०

वमत्पराः श्रद्दधानाश्चसं तोभक्तिंविंदंति २९ ३० श्रीराम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभावसुमग्निंसेवमानस्यअप्येतिनश्यति तथाकर्मादिजाड्यंआगामिसंसारभयं
तन्मूलमज्ञानंचनश्यतीत्यर्थः ३१ निमज्ज्योन्मज्जतांउग्रावचायोनिंगछतांपरमा

यथोपश्रयमाणस्यभगवंतंविभावसुं शीतंभयंतमोप्येतिसाधून्सं
सेवतस्तथा ३१ निमज्ज्योन्मज्जतांघोरेभवाब्धौपरमायनं संतोब्रह्म
विदःशांतानौर्दृढेवाप्सुमज्जतां ३२ अन्नंहिप्राणिनांप्राणआर्त्तानां
शरणंत्वहं धर्मोवित्तंनृणांप्रेत्यसंतोर्वाग्बिभ्यतोरणं ३३ ७

यनंपरमाश्रयः ३२ किंच यथान्नमेवप्राणोजीवनंअहमेवयथाशरणं धर्मएवय
थाप्रेत्यपरलोकेवित्तंतथासंतएवअर्वाक्संसारपाताद्बिभ्यतःपुंसःअरणंशरणं
३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच संतश्चक्षूंषिसगुणनिर्गुणज्ञानानि अर्कः पुनः सम्यगुत्थितोऽपिबहिः तदप्येक
मेवचक्षुरित्यर्थः ३४ अध्यायार्थमुपसंहरति वैतसेनइतिसुद्युम्नभावेनोमावनंप्र
विष्टस्यवीतासेनास्त्रीभावंप्राप्तायस्यतस्यस्त्रीभावंप्राप्तस्यपुत्रोवैतसेनः पुरूर

संतोदिशंतिचक्षूंषिबहिरर्कः समुत्थितः देवताबांधवाःसंतः संतआ
त्माहमेवच ३४ वैतसेनस्ततोप्येवमुर्वश्यालोकनिस्पृहः मुक्तसंगोम
हीमेतामात्मारामश्चचारह ३५ इतिश्रीभागवतेमाहापुराणेएकादशस्कंधे
षड्विंशतिमोध्यायः॥२६॥

वाः एवमुक्तप्रकारेणोर्वश्यालोकात् स्थानादवलोकनाद्धानिःस्पृहः
ततोपिसत्संगादपिहेतोर्मुक्तसंगः सन्नात्मारामोभूत्वायथेष्टंचचारेति ३५ इति अध्या
य २६

सप्तविंशेक्रियायोगः सद्यश्चित्तप्रसादकः सर्वकामाप्तिहेतुश्च ससांगः प्रोक्तः समास
तः १ रागाद्याकुलचित्तानां कुतोत्संगादिसंभवः इतिकृष्णार्चनंभद्रमनुस्मृत्यानुपृ
च्छति क्रियायोगमिति भवदाराधनरूपं यस्मादितिकरणाधिष्ठानादिप्रश्नः सर्वकार

क्रियायोगंसमाचक्ष्वभवदाराधनंप्रभो यस्मात्वांयेयथार्चंतिसात्वताःसा
त्वतर्षभ १ एतद्वदंतिमुनयोमुहुर्निःश्रेयसंनृणां नारदोभगवान्व्या
सआचार्योंगिरसःसुतः २

कार्णानिमित्तत्वस्याविशिष्टत्वात् यथेतिकस्मिन् अधि
ष्ठानादौकेनप्रकारेणेतिप्रश्नः येअधिकारिणः सात्वताभक्ताः २ अस्यपुनर्विशेषतः
प्रश्नेकारणमाहचतुर्भिः एतत्त्वदर्चनंनिःश्रेयसकरंवदंतिअंगिरसःसुतोबृहस्पतिः २७४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निस्तंत्वयोपदिष्टमितिसर्थः देव्यै पार्वत्यै ३ सवर्णानांत्रैवर्णिकानां ४ विश्वेश्वराये

निःसृतंतेमुखांभोजाद्यदाहभगवानजः पुत्रेभ्योभृगुमुख्येभ्योदेव्यै
चभगवान्भवः ३ एतद्वैसर्ववर्णानामाश्रमाणांचसंमतं श्रेयसा
मुत्तमंमन्येस्त्रीशूद्राणांचमानद ४ तत्त्वकमलपत्राक्षकर्मबंधवि
मोचनं भक्तायचानुरक्तायब्रूहिविश्वेश्वरेश्वर ५ श्रीभगवानुवाच
नह्यंतोनंतपारस्य कर्मकांडस्यचोद्धव संक्षिप्तंवर्णयिष्यामियथाव
दनुपूर्वशः ६

तेषामीश्वरः ५ कर्मकांडस्यपूजाविधानस्यनास्त्यंतोग्रंथतःपारश्चअनुष्ठानतोयस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैदिक एवमंत्रोवैदिकान्येवांगानिचयास्मिन्पुरुषसूक्तादौसवैदिकः एवंतांत्रिकोपि
मिश्रोष्टाक्षरादिःमखःपूजा ७ यदात्रैवर्णिकोयजेततदाविषेशमाह यदागर्भाष्ट

वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः त्रयाणामीप्सितेनैवविधिनामांसमर्चयेत्
७ यदास्वनिगमेनोक्तंद्विजत्वंप्राप्यपूरुषः यथायजेतमांभक्त्याश्रद्धयातन्निबोधमे
अर्चायांस्थंडिलेग्नौवासूर्येवाप्सुहृदिद्विजे द्रव्येणभक्तियुक्तोर्चेत्स्वगुरुंमाममायया ९
पूर्वंस्नानंप्रकुर्वीतधौतदंतोंगशुद्धये उभयैरपिचस्नानंमंत्रैर्मृद्ग्रहणादिना १० राम

मैकादशद्वादशादिकालेस्वनिगमेनस्वाधिकारप्रवृत्तेनवेदोक्तंद्विजत्वमुपनयनं ८
अर्चायांप्रतिमादौ ९ स्नानेविशेषमाह उभयैर्वैदिकैस्तांत्रिकैश्चमंत्रैः १० नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचसंध्योपासनादीनिकर्माणि आचोदितानिसाकल्येनविहितानियस्यआनितैःसह
मेपूजांकुर्यात् नतुतानिपरित्यजेदित्यर्थः सम्यक् परमेश्वरविषयएवसंकल्पोयस्य
तथाभूतःसन् कर्मपावनींकर्मनिर्हारिणी ॥११॥ अर्चाभेदानाहसार्द्धेन शैलीशिला

संध्योपास्त्यादिकर्माणिवेदेनाचोदितानिमे पूजांतैःकल्पयेत्सम्यक्संकल्पः
कर्मपावनीं ॥११॥ शैलीदारुमयीलौहीलेप्यालेख्याचसैकती मनोमयीमणि
मयीप्रतिमाष्टविधास्मृता ॥१२॥ चलाचलेतिद्विविधाप्रतिष्ठाजीवमंदिरं ॥१२॥

मयी लौहीसुवर्णादिमयीलेप्यामृच्चंदनादिमयी हृदिपूजायांमनोमयी प्रकर्षेण
तिष्ठत्यस्यामितिप्रतिष्ठाप्रतिमैव जीवस्यभगवतोमंदिरं यद्वाप्रतिष्ठयाकलान्यासे
नभगवन्मंदिरंभवतीति ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
२७६

प्रतिमाभेदेनविशेषमाह सार्द्धेन उद्वासोविसर्जनं अस्थिरायामर्चनेविकल्पः शाल
ग्रामेनकुर्यात् सैकतांतुकुर्यात् अन्यत्रकुर्याद्वानवेति अविलेप्यायांमन्मयेलेख्य
व्यतिरिक्तायां अन्यत्राविलेप्यायांलेख्यायांचपरिमार्जनमेव १४ इदानींसकामानि

उद्वासावाहनेनस्तः स्थिरायामुद्धवार्चने आस्थिरायांविकल्पःस्यात्स्थंडि
लेतुभवेद्द्वयं स्नपनंत्वविलेप्यायामन्यत्रपरिमार्जनं १४ द्रव्यैः प्रसिद्धैर्मद्या
गः प्रतिमादिष्वमायिनः भक्तस्यचयथालब्धैर्हृदिभावेनचैवहि १४ ७

ष्काम भेदेनविशेषमाहद्रव्यैरिति प्रकर्षेणसिद्धैःसुशोभनैः अमायिनोनिः कामस्य
भक्तस्यतुयथालब्धैःयत्रचंदनादिसर्वथानलभ्यतेतत्रहृदिभावेनभावनया यद्वा
हृदिचेन्मद्यागः तदाभावेनमनोमयैर्द्रव्यैरित्यर्थः १५

२७६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधिष्ठानभेदेनप्रधानोपचारमाहसार्द्धेनस्नानेनेति तत्त्वविन्यासः यथास्थानमंगप्रधानदे
वतानांतत्तन्मंत्रैः स्थापनंअभ्यर्हणंउपस्थानार्घादिसलिलादिभिस्तर्पणादिनायजनं १६
सर्वत्रसाधारणमाह श्रद्धयेति १७ एवमधिकारादिव्यवस्थामुक्त्वेदानींपूजाप्रकारमाह

स्नानालंकरणंप्रेष्ठमर्चायामेवतूद्धव स्थंडिलेतत्त्वविन्यासोवह्नावाज्यप्लुतंहविः सू
र्येचाभ्यर्हणंप्रेष्ठंसलिलेसलिलादिभिः १६ श्रद्धयोपहृतंप्रेष्ठंभक्तेनममवार्यपि
भूर्यप्यभक्तोपहृतंनमेतोषायकल्पते गंधोधूपःसुमनसोदीपोन्नाद्यंचकिंपुनः १७
शुचिःसंभृतसंभारःप्राग्दर्भैःकल्पितासनः आसीनःप्रागुदग्वार्चेदर्चायांत्वथसंमु
खः॥१८॥

शुचिरिति संभृताः संभाराः पूजासाधनानियेनसः प्रागग्रैर्दर्भैः यद्वाप्रागेवसंभृतसं
भारः सन्नासीनः नत्वासीनः सन्नुपस्थानात्तत्संभारार्थंवारंवारमुत्तिष्ठेदित्यर्थः प्राङ्मुखउ

रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा० ए
२७७

दङ्मुखोवाआसीनः आर्चायांतुस्थिरायांसंमुखः अर्चाभिमुखउपविष्टःसन् १८ अनंत
रंगुर्वादिनमस्कारपूर्वकंयथोपदेशंस्वास्मिन्कृतन्यासःकृतोमूलमंत्रन्यासोयस्यांतां
ममार्चांआमृजेत् निर्माल्याद्यपकर्षणादिनाशोधयेत् कलशंपूर्णकुंभंप्रोक्षणीयं

कृतन्यासःकृतन्यासांमदर्चांपाणिनामृजेत् कलशंप्रोक्षणीयंचयथावदुप
साधयेत् तदद्भिर्देवयजनंद्रव्याण्यात्मानमेवच १९ प्रोक्ष्यपात्राणित्रीण्य
द्भिस्तैस्तैर्द्रव्यैश्चसाधयेत् २०

प्रोक्षणार्थोदकपात्रंउपसाधयेत् चंदनपुष्पादिभिःसंस्कुर्यात् तदद्भिःप्रोक्षणीयाद्भिः
देवयजनंदेवपूजास्थानं १९ पाद्यार्घ्यार्थंत्रीणिपात्राणि कलशोदकैः पूरितानितैस्तैर्द्र २७७
व्यैःसाधयेत् तत्रपाद्यादिद्रव्याणि २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाद्यस्यामाकदूर्वाब्जविष्णुक्रांतादिरिष्यते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वाचेति
क्रमादर्घद्रव्याष्टकमुदीरितं जातिलवंगकंकोलैर्मतमाचमनीयकमिति तानिचत्रीणि
पात्राणियथाक्रमंहृदयादिमंत्रैर्गायत्र्याचसर्वाण्यभिमंत्रयेत् २२ तदनंतरंपिंडेदेहेवा

पाद्यार्घ्याचमनीयार्थंत्रीणिपात्राणिदेशिकः हृदाशीर्ष्णाथाशिखयागायत्र्याचाभिमं
त्रयेत् २२ पिंडेवाय्वग्निसंशुद्धेहृत्पद्मस्थांपरांमम अण्वींजीवकलांध्यायेन्नादांतोसि
द्धभाविता २३

वाय्वग्निसंशुद्धइतिकोष्ठगतेनवायुनाशोषितेआधारगतेनाग्निनादग्धेपुनर्ललाटस्थचं
द्रमंडलामृतप्लावनेनामृतमयेजातेतस्मिँहृत्पद्मस्थांपरांश्रेष्ठांजीवकलांश्रीनाराय
णमूर्तिंध्यायेत् कथंभूतां नादांतोसिद्धभाविताप्रणवस्याकारोकारमकारबिंदु नादाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए
२७८

पंचांशाः तत्र नादांते सिद्धेर्ध्यातां तथा च श्रुतिः यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठि
तः तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति २३ तया [illegible]भूतया स्वेनैव भावेन
चिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति तस्मिन्नेवादौ मानसे

तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः आवाह्यार्घ्यादिभिः स्थाप्य न्यस्तांगं मां
प्रपूजयेत् २४ पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत् धर्मादिभिश्च नव
भिः कल्पयित्वासनं मम २५

रुपचारैः संपूज्य तन्मयः सन्नर्घ्यादिभिरावाह्य स्थापनमुद्रया
स्थापयित्वा २४ कथं पूजयेत्तदाह पाद्येति द्वाभ्यां धर्मादिभिर्ममासनं तत्र पद्मं च कल्प
यित्वोभाभ्यां वेदतंत्राभ्यामुभयसिद्धये मह्यं पाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः उ
पस्पर्श आचमनं अर्हणमर्घ्यं २५

२७८

उभयसिद्धये वेदतंत्रोक्तभुक्तिमुक्तिप्राप्तये अयमर्थः धर्मज्ञानवैराग्यैश्वर्याण्यासनप
र्यंकस्याग्नेयादिचतुःकोणेषु पादाः अधर्मादीनि पूर्वादिदिक्षु गात्राणि त्रयोगुणाः प
ट्टिकाः तत्र पूर्वादिक्रमेण मध्ये च विमलोत्कर्षणी ज्ञाना क्रिया योगा प्रह्वी सत्येशानानु

पद्ममष्टदलं तत्र कर्णिकाकेसरोज्वलं उभाभ्यां वेदतंत्राभ्यां मत्स्यं तूभयसिद्धये २६ सुदर्श
नं पांचजन्यं गदासीषु धनुर्हलान् मुशलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २७ नम

ग्रहेति नवशक्तयः एवं यथोपदेशं धर्मादिभिर्नवभिश्च शक्तिभिरासनं कल्पयित्वा ति क
र्णिकायाः केसरैस्तत्रस्थसूर्यादिमंडलैश्चोज्वलमित्यर्थः २६ आयुधादिपूजामाह सु
दर्शनमिति त्रिभिः तत्र न्यस्तांगमिस्संगावरणपूजा सूचिता आसनेनैव शक्त्यावरण
मप्युक्तं ततः सुदर्शनादिमुशलांतान्यायुधान्यष्टदिक्षु कौस्तुभमाला श्रीवत्सानुरसि २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदादीन्पार्षदानष्टदिक्षु गरुडं पुरतः २८ दुर्गादीनि कोणेषु गुरून्वामतः सुरानिंद्रादिलोकपा
लान्पूर्वादिदिक्षु एवमेतान् देवस्याभिमुखान्प्रोक्षणादिभिः पूजयेदित्यर्थः २९ पाद्यादी

नंदं सुनंदं गरुडं प्रचंडं चंडमेव च महाबलं बलं चैव कुमुदं कुमुदेक्षणं २८
दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान् स्वे स्वे स्थाने त्व भिमुखान्पूज
येत्प्रोक्षणादिभिः २९ चंदनोशीरकर्पूरकुंकुमागरुवासितैः सलिलैः
स्नापयेन्मंत्रैर्नित्यदा विभवे सति ३०

रुपचारान्प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपंचयति चंदनेनिषङ्किः ३० मनोरमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रानाहस्वर्णघर्मानुवाकः सुवर्णघर्मंपरिवेद [illegible]नमित्यादिमहापुरुषविद्ययाजितंतेपुं
डरीकाक्षनमस्तेविश्वभावन सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वजेति पौरुषंसूक्तंस
हस्रशीर्षेत्यादिनीराजनादीनिसामानि इंद्रंनरोनेमधिताहवंतेइत्यस्यामृचिगीतानि

॥ स्वर्णधर्मानुवाकेनमहापुरुषविद्यया पौरुषेणापिसूक्तेनसामनीराज
नादिभिः ३१ वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः अलंकुर्वीतसप्रेम
मद्भक्तोमांयथोचितं ३२

आदिशब्देनरौहिणादीनि ३१ वस्त्राद्युपचारेष्वलंकारलक्षणगुणं विधत्तेवस्त्रेतिपत्राणि
कपोलवक्षस्स्थलादिषुलिखिताः पत्रभंग्यः मद्भक्तश्चेत्सप्रेमयथाभवतितथा यथोचित
मलंकुर्वीतेत्युक्तार्थंसर्वसाधारणं ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रद्धालक्षणंगुणंविधत्ते पाद्यमिति ३३ नैवेद्येवैभवलक्षणंगुणंविधत्तेगुडपायसेति शा
ष्कुल्यः तैलपक्वविशेषाः आपूपा अपूपानामंडुकादीनांसमूहाः सूपाः व्यंजनादीनिस

पाद्यमाचमनीयंचगंधंसुमनसोऽक्षतान् धूपदीपोपहार्याणिदद्यान्
मेश्रद्धयार्चकः ३३ गुडपायससर्पींषिशाष्कुल्यापूपमोदकान् संयाव
दधिसूपांश्चनैवेद्यंसतिकल्पयेत् ३४ अभ्यंगोन्मर्दनादर्शदंतधावाभि
षेचनं अन्नाद्यगीतनृत्यानिपर्वणिस्फुरतान्वहं ३५

तिविभवइतिशेषः ३४ कालभेदेनगुणंविधत्तेअभ्यंगेति अभिषेचनंपंचामृतादिस्नप
नं अन्नाद्येति अन्नंभोज्यंआद्यंभक्ष्यं पर्वण्येकादश्यादौ अन्वहंप्रत्यहंवाविभवेसतीति ३५ २८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलभूयस्त्वार्थिनोऽग्नावपिपूजाप्रकारमाह विधिनास्वगृह्योक्तप्रकारेण मेखलादिभिरु
पलक्षिते विहितेविनिर्मिते तदुक्तं विस्तारोच्छ्राय तस्तिस्रोमेखलाश्चतुरंगुलाः हस्तमा
त्रोभवेद्गर्तः सयोनिर्वेदिकातथेत्यादि उदितंप्रज्वलितमग्निंपरितः समूहेत् एकत्रमे
विधिनाविहितेकुंडेमेखलागर्तवेदिभिः अग्निमाधायपरितः समूहेत्पाणिनोदितं ३६
परिस्तीर्याथपर्युक्षेदन्वाधाययथाविधि प्रोक्षण्यासाद्यद्रव्याणिप्रोक्ष्याग्नौभावये
तमां ३७ तप्तजांबूनदप्रख्यंशंखचक्रगदांबुजैः लसच्चतुर्भुजंशांतंपद्मकिंजल्कवाससं ३८
लयेत् ३८ दर्भैः परिस्तीर्यपरितः प्रोक्षयेत् अन्वाधाय अन्वाधानसंज्ञकंव्याहृतिं समि धिः
त्प्रक्षेपादिरूपंकर्मकृत्वा अग्नेरुत्तरतोद्रव्याणिहोमोपयोगीन्यासाद्यनिधायप्रोक्ष्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रोक्षण्या प्रोक्षणीपात्रोदकेन प्रोक्ष्याग्नौ मां ध्यायेत् ३७ शंखादिभिरुल्लसंतः शोभमाना
श्चत्वारो भुजा यस्य तं ३८ स्फुरंति किरीटादीनि यस्य तं ३९ हविषा घृतेन अभिघृतानि
संसिक्तानि दारूणि शुष्कसमिधः प्राश्य प्रक्षिप्य आघारौ नत्संज्ञकौ यागौ एवमाज्य

स्फुरत्किरीटकटककटिसूत्रवरांगदं श्रीवत्सवक्षसंभ्राजत्कौ
स्तुभं वनमालिनं ३९ ध्यायन्नभ्यर्च्य दारूणि हविषाऽभिघृ
तानि च प्राश्याज्यभागावाघारौ दत्वा चाज्यप्लुतं हविः ४०

भागौ च दत्वा न दर्व्या आहुती हुत्वेत्यर्थः तत्राघारौ प्रजापतये स्वाहा इंद्राय स्वाहेति चो
त्तरदक्षिणपरिधिसंधिमारभ्याग्निमध्याहृतापरिध्यंतं घृतस्य क्षारणरूपौ आज्यभागौ अग्न
ये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूलमंत्रेणअष्टाक्षरेण तथाषोडशर्चोयास्मिन्तेनमहापुरुषसूक्तेनच. अवदानतः
प्रत्यृचमाहुतिग्रहणेनेत्यर्थः पुरुषसूक्तेनाराधनपक्षेसएवमूलमंत्रः तेनैवप्रत्यृच
मवदानतोहोमइति मंत्रैः स्वाहांतैर्नाममंत्रैः यथाम्नायंपूजाक्रमेणैव अग्नयेस्वि

जुहुयान्मूलमंत्रेणषोडशर्चावदानतः धर्मादिभ्योयथाम्नायंमं
त्रैःस्विष्टकृतंबुधः ४१ अभ्यर्च्यापिनमस्कृत्यपार्षदेभ्योबलिंहरे
स्म त् मूलमंत्रंजपेद्भक्त्यासौन्नारायणात्मकं ४२ श्रीरामजयति

ष्टकृतेस्वाहेत्येवंस्विष्टकृतंचहुत्वा ४१ ततोवन्हिस्थंभगवंतमभ्यर्च्याथिनमस्कृत्यपार्ष
देभ्योनंदादिभ्यःअष्टसुदिक्षुबलिंहरेत् ततःपूजास्थानमागत्यदेवस्याग्रेसमुपविश्यय
थाशक्तिमूलमंत्रंजपेत् ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र उभयत्र भगवतो भोजनसमाप्तिं ध्यात्वा आचमनं दत्वा उच्छेषं नैवेद्यभागं विष्वक्से
नाय कल्पयित्वा तदनुज्ञया पश्चात्स्वयं भुंजीत ततः सुरभिमत्सुगंधवत् तांबूलायं

दत्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत् सुखवासं सुरभिमत्तांबू
लायमथार्हयेत् ४३ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम
मत्कथाः श्रावयंछृण्वन्मुहूर्त्तं क्षणिको भवेत् ४४ स्तवैरुच्चावचैः
स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ४५

सुखवासं दत्वा पुनरपि अर्हयेत् पुष्पांजलिना पूजयेत् ४३ अभिनयन् स्वस्मिन्नाविष्कु
र्वन् क्षणिकः वैयग्र्यं परित्यज्य लब्धावसरो भवेत् ४४ स्तवस्तोत्राणां भेदं दर्शयन्ति पौराणैः २८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व ५

कथंप्रणमेदित्यपेक्षायामाह शिरइति बाहुभ्यांदक्षिणोत्तराभ्यांपरस्परंममदक्षिणोत्तरौ
पादौगृहीत्वापद्भ्यांश्वतः परस्परनिबद्धाभ्यांकृतापराधईं प्रपन्नमित्यादिविज्ञप्याचप्र

शिरोमत्पादयोः कृत्वाबाहुभ्यांचपरस्परं प्रपन्नंपाहिमामीशभीतंमृत्यु
ग्रहार्णवात् ४६ इतिशेषांमयादत्तांशिरस्याधायसादरं उद्वासयेच्चेदु
द्वास्यं ज्योतिर्ज्योतिषितत्पुनः ४७ अर्चादिषुयदायत्रश्रद्धामांतत्रचार्च
येत् सर्वभूतेष्वात्मनिचसर्वात्माहमवस्थितः ४८

णमेत् ४९ ततः शेषाग्रह
णपूर्वकंवैकल्पिकोऽद्वासनप्रकारमाह इतिअनयैवप्रार्थनयाशेषांनिर्माल्यंमयादत्तां
ध्यात्वाशिरस्याधाय धृत्वायद्युद्वासयेत् तर्हिप्रतिमायांयत्प्रस्तंज्योतिस्तत्पुनरपिलक्ष्यम

नृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.ए.
२८

ज्योतिष्येवोद्वासनीयं ४७ एतेष्वधिष्ठानेषु किं मुख्यमित्यपेक्षायामाह अर्चादिष्विति य
दा यत्र श्रद्धा तदा तत्र न त्वधिष्ठाने मुख्यामुख्यत्वं कुतः यतः सर्वभूतेष्विति ४८ उभयतः

एवं क्रियायोगपथैः पुमान्वैदिकतांत्रिकैः अर्चन्नुभयतः सि
द्धिं मत्तो विंदत्यभीप्सितां ४९ मदर्चां संप्रतिष्ठाप्य मंदिरं का
रयेद्दृढं पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ५०

इहामुत्र च ४९ समर्थं प्रत्याह मदर्चामिति त्रिभिः पुष्पोद्यानानि च कारयेत् पूजायात्रोत्स
वाश्रितान् पूजा प्रत्यहं यात्रा विशिष्टे पर्वणि बहुजनसमागमः उत्सवः वसंतादिम
होत्सवस्तदाश्रितान् ५० २८३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेत्रादीन्दत्वा पूजायात्रोत्सवाश्रितानित्यस्य विवरणं पूजादिनामिति प्रवाहार्थं संत
तानुवृत्त्यर्थं मत्सार्ष्टितां मत्समानैश्वर्यं ५१ प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह प्र

पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं क्षेत्रापणपुरग्रामान्दत्वा मत्सा
र्ष्टितामियात् ५१ प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं पूजादिना ब्र
ह्मलोकं त्रिभिर्मत्साम्यतामियात् ५२ मामेव नैरपेक्ष्येण भक्तियोगेन
विंदति भक्तियोगं स लभत एवं यः पूजयेत्त मां ५३ नमो नारायणाय

तिष्ठयेति मत्साम्यतां मया साम्यमित्यर्थः ५२ सकामं प्रत्युक्तं अहेतुकभक्तं प्रत्या
ह मामेवेति अहेतुकभक्तियोगः कथं भवतीति तत्राह भक्तियोगमिति ५३ नमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दातुः फलमुक्तं अपहर्तारं निंदति यइति विड्भुक् विष्ठाभोजी क्रिमिः ५४ कर्तुर्यत्फलं त
देवान्येषामप्याह कर्तुरिति सारथेः सहकारिणः हेतोः प्रयोजकस्य अनुमोदितुश्च प्रे
त्य एतत्फलमित्यन्वयः कुतः यतः कर्मणामेते भागिनः भागार्हाः तत्रापि विशेषमाह

यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं ५४ क
र्तुश्च सारथेर्हेतोरनुमोदितुरेव च कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ५५ इ
ति श्रीभागवते महापुराणे एकादशस्कंधे सप्तविंशतिमोऽध्यायः ॥२७

भूयसि कर्मणि सारथ्यादौ च भूयः अधिकं फलमिति पयःपत्रादिमात्रेण पूजितो यः
परं पदं प्रागेव दिशति स्म प्रीतः स कृष्णः शरणं मम ५५ इति एकादशटीकायां सप्तविंशोऽध्यायः॥

२८४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायविंशेतु यः पूर्वं विस्तरेणोपवर्णितः ज्ञानयोगः पुनश्चासौ समाहृत्य निरूप्यते १
इदानीमतिविस्तरेणोक्तं ज्ञानयोगं संक्षेपेण वक्तुमाह परेषां स्वभावान् शांतघोरादी

श्रीभगवानुवाच परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् वि
श्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च १ परस्वभावकर्माणि
यः प्रशंसति निंदति स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः २

न कर्माणि च तत्र हेतुः विश्वमिति १ विपक्षे दोषमाह परेति स्वार्थात् ज्ञाननिष्ठालक्ष
णात् असति मिथ्याभूते द्वैते अभिनिवेशात् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ए

२८४

भ्रंशमेवदृष्टांततोदर्शयति तैजसेराजसाहंकारकार्येइंद्रियगणेनिद्रयाआपन्नेअभि
भूतेसतिपिंडस्थोजीवः केवलंमनोमात्रेणमायांस्वप्नरूपांप्राप्नोति ततोमनसिली
नेसलिनष्टचेतनः सन्मृत्युतुल्यांसुषुप्तिंवाप्राप्नोतियथातद्वदेवनानार्थदृक्द्वैता

तैजसेनिद्रयापन्नेपिंडस्थोनष्टचेतनः मायांप्राप्नोतिमृत्युंवातद्वन्नानार्थदृक्पुमान्
किंभद्रंकिमभद्रंवाद्वैतस्यावस्तुनः कियत् वाचोदितंतदनृतंमनसाध्यातमेवच ४

भिनिवेशीविक्षेपंलयंचप्राप्नोतीति ३ द्वैतासत्यतयास्तुतिनिंदयोर्निर्विषयत्वंप्रप
ञ्चयतिसार्द्धैः षड्भिः किंभद्रमिति अवस्तुनोद्वैतस्यमध्येकिंभद्रंकिंवाऽभद्रंकिय
द्भद्रंकियद्वाऽभद्रमित्यर्थः अवस्तुत्वमेवाह वाचेतिबाह्येंद्रियोपलक्षणं वाचाउदि
तंउक्तंचक्षुरादिभिश्चयत्दृश्यंतदनृतमिति ४ २८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंसतिदेहादिभावानामप्यसत्वात्कथंभयहेतुत्वंतत्रसदृष्टांतमाह छायाप्रतिबिं
बंप्रसाह्वयः प्रतिध्वनिः आभासः शुक्तिरजतादिः एतेयथाः संतोऽप्यनर्थकारिणो

छायाप्रत्याह्वयाभासाह्यसंतोप्यर्थकारिणः एवंदेहादयोभा
वायच्छंसामृत्युतोभयं ५ आत्मैवतदिदंविश्वंसृज्यतेसृजति
प्रभुः त्रायतेत्राति विश्वात्माह्रियतेहरतीश्वरः ६ नमोनमः

भवंति आमृत्युतः मृत्युमभिव्याप्य यद्वामृत्युर्लयः यावत्तेनैवलीयंतेतावत्पर्यंतमित्य
र्थः ५ ननुसृष्ट्यादिश्रुतिभिरेवद्वैतंनिरूपितंकथमसत्वंस्यात्तत्राहआत्मैवेतिसा
र्द्धाभ्यां त्रायतेपाल्यतेत्रातिपालयति ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यस्मात्स्रज्यादिव्यतिरिक्तात् त्रिविधाअत्मोध्योदिरूपाभातिः प्रतीतिः ननुकथं

तस्मान्नत्स्यात्मनोन्यस्मादन्योभावोनिरूपितः निरूपितेयंत्रिविधा
निर्मूलाभ्रातिरात्मनि इदंगुणमयंविद्धित्रिविधंमाययाकृतं ७ ए
तद्विद्वान्मुदितंज्ञानविज्ञाननैपुणं ननिंदतिनचस्तौतिलोकेचर
तिसूर्यवत् ८ ७

निर्मूलंप्रतीयतेनेनत्राहइदमिति ७ ज्ञानविज्ञानयोर्नैपुणंनिष्ठां सूर्यवत्समोभूत्वा ८ २८६

एतन्निश्चयप्राप्त्युपायमाह प्रत्यक्षेणेति यदाद्यंतवत्तद्धि तत्तदसदिति ज्ञात्वा निःसंगो विच
रेत् आद्यंतवत्वे प्रमाणानि प्रत्यक्षेण घटादि अनुमानेन सावयवत्वेन दृश्यं पृथिव्या
दि निगमेनाप्रत्यक्षमाकाशादि आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यंतवत् ॥

प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा आद्यंतवदसज्ज्ञात्वा निःसंगो विचरेदिह ९
उद्धव० ॥ नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः अनात्मस्वदृशोरीश कस्य स्यादुपल
भ्यते १०

सच्चेति ज्ञात्वेति ननु यद्यात्मसंविदा सर्वं दृश्यमसदित्युच्यते तर्ह्यात्मा स्वप्रकाशो देहा
दिद्वैतं च जडमित्युक्तं स्यात् ९ तथा च संसारप्रतिभासो न घटेतेति चोदयति नैवेति अ
नात्मस्वदृशोः जडाजडयोः अत्र हेतुः द्रष्टृदृश्ययोः मा भूत्तद्द्वयोरपि तत्राह उपलभ्यत
इति १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्प्रपंचयति आत्मेति अव्ययत्वादि पंच विशेषणैर्नाशादि रागादि पुण्यापुण्याज्ञा
नपरिच्छेदानामसंभवं दर्शयति हेतुहेतुमत्वं तु यथेष्टं अविनाशजडः अयंभावः यथे

आत्माऽव्ययो गुणः शुद्धः स्वयंज्योतिरनावृतः
अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ११

वाग्निदारुणोर्भेदानुपलंभेऽपि दारुप्रकाश्यमेव अग्निस्वप्रकाशकः तथा देहात्मनो
श्रीरामकृष्ण रपीति न संसृतिस्तयोरन्यतरस्यापि घटत इति ११ : जयराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यं तथाऽप्युभयोरेवमविवेक एव संसारालंबनमित्याह पंचभिः यावदिति संनिक
र्षणं संबंधः नन्वसंगस्य कुतः संबंधस्तत्राह अविवेकिनः अज्ञानकृतं इत्यर्थः ननु

श्रीभगवानुवाच॥ यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणं संसारः
फलवांस्तावदपार्थोप्यविवेकिनः १२ अर्थे ह्यविद्यमानेपि संसृति
र्न निवर्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा १३ ७. ७

स्वप्रकाशस्य कथमज्ञानतः संसारस्तत्राह अपार्थोपि मिथ्याभूतोपि केवलं फलवा
न् फलं स्फूर्तिर्न तु तत्त्वतोस्तीत्यर्थः १२ नन्वसतो देहादेः कुतः संसार[illegible]स्फूर्तिहेतुत्वमपि
तत्राह अर्थे हीति अस्यात्मनः १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकथंचिज्ज्ञानतोविषयस्फूर्त्तेर्जीवन्मुक्तस्यापिदुर्वारत्वान्निर्मोक्षप्रसंगः स्यात्तत्राहय
थाहीतिप्रस्वापः स्वप्नः बहूननर्थान्बिभर्त्तिपुष्णातीतितथा १४ अहंकारलक्षणोदेहा

यथात्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत् सएवप्रतिबुद्ध
स्यनवैमोहायकल्पते १४ शोकहर्षभयक्रोधलोभमोहस्पृ
हादयः अहंकारस्यदृश्यंतेजन्ममृत्युश्चनात्मनः १५

दिसन्निकर्षएवसंसारालंबनमित्यन्वयव्यतिरेकाभ्यांदर्शयतिशोकेति सुषुप्तादौतेषा
मदर्शनात् अहंसुखीतिवद्देहेतन्यंसुखीतिप्रतीत्यभावाच्चदृश्यत्वाच्चसुखादीनांक्लृप्त
त्वादिवद्देहधर्मत्वानुपपत्तेरितिभावः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयद्यहंकारस्यसंसारस्तर्हिमुक्तिरपितस्यैवेतिमुक्तावहंकारावशेषःप्रसज्येततत्राह
देहेति देहादिष्वभिमानोयस्यसः आत्मैवतेषामंतर्हितोजीवः अतएवगुणकर्मयीमू
र्त्तियस्यसः एवंचसूक्ष्मोपाधिभिर्बहुधेवसूत्रादिशब्दैर्गीतः संसारेपरमेश्वराधीनःस

देहेंद्रियप्राणमनोभिमानोजीवोंऽतरात्मागुणकर्ममूर्त्तिः सूत्रंमहानित्युरुधेवगीतःसं
सारआधावतिकालतंत्रः १६ अमूलमेतद्बहुरूपरूपितंमनोवचःप्राणशरीरकर्म
ज्ञानासिनोपासनयाशितेनछित्वामुनिर्गांविचरेत्यतृष्णः १७

वर्त्तोधावतिअतो नायं
दोषरतिमात्रः १६ तदेवमहंकारकृतंबंधमुपपाद्येदानींज्ञानेनतन्निवृत्तौमुक्तिरित्याह अ
मूलमिति वस्तुतोमूलशून्यअज्ञानतस्तुबहुभीरूपैःरूपितंप्रकाशितमैंद्रजालिकतुल्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितिवाकिंतत्तूलदाहमनइति मनआदीनांद्वंद्वः यद्वामनआदिषुक्रियतइतिकर्म
अहंकरणं गुरूपासनयानिशितेनज्ञानखड्गेनछित्वा १७ तदेवज्ञानंस्वरूपसाध
नफलैर्निरूपयतिज्ञानमिति विवेकोज्ञानं साधनान्याह निगमोवेदः तपःस्वधर्मः
प प्रत्यक्षंस्वानुभावः ऐतिह्यमुपदेशः अनुमानंतर्कः फलमाह आद्यंतयोर्यदस्यजग

ज्ञानंविवेकोनिगमस्तपश्चप्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्ययदेवकेवलं
कालश्चहेतुश्चतदेवमध्ये १८

तः मध्येऽपितदेवकेवलंनतुजगदिति किंतत् कालः
कलयतिप्रकाशयतियः तथाहेतुः कारणंचयत्तदेव एतदुक्तंभवति यदस्यविश्वस्यका
रणंप्रकाशकंचब्रह्मतदात्मकमेवैतत्नततःपृथगस्त्येवंनिश्चयफलोनिगमादिसाधनै २८९
र्योपत्तेयोविवेकः तत्त्वज्ञानमिति १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रनानाभेदव्यवहारालंबनस्यापिविश्वस्यकारणमात्रात्मकत्वंसदृष्टांतमाहयथे
ति स्वछंतंसुष्टुकुंडलादिरूपेणाविरचितंयद्धिरण्यं कीदृशंहिरण्मयस्यकुंडलादेरुत्प

॥ यथाहिरण्यंसुकृतंपुरस्तात्पश्चाच्चसर्वस्यहिरण्मयस्य
तदेवमध्येव्यवहार्यमाणंनानापदेशैरहमस्यतद्वत् १८

त्तेःपुरस्तान्नाशाच्चपश्चाद्यदस्तिकटकंकुंडलमित्यादिनानाव्यपदेशैर्व्यवहारंप्राप्यमाण
मपितदेवयथातद्वत्अस्यविश्वस्यकारणभूतोहमेवनानाव्यवहारालंबनंनतुमत्तःपृथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंकार्यस्यकारणमात्रात्मकतामुक्त्वाप्रकाश्यस्यप्रकाशकात्मतामाहविज्ञानमिति
त्रियवस्थ्यंयकारस्यपृथक्पाठः छंदोनुरोधेनजाग्रदादित्र्यवस्थ्यंयद्विज्ञानंमनः तदव
स्थाकारणंभूतंचयद्गुणत्रयंयच्चकारणकार्यकर्तृकारणमध्यात्मं कार्यंअधिभूतंक
र्तृअधिदैवंएवंगुणत्रयकार्यभूतत्रिविधंजगत् एतद्येनतुर्येणसामान्यज्ञानमात्रेणस
विज्ञानमेतत्त्रियवस्थमंगगुणत्रयंकारणकार्यकर्तृ समन्वयेनव्यतिरेकतश्चयेनैव

तुर्येणतदेवसत्यं २७

मन्वयेनभवतियेनानुगतंप्रकाश तदस्यार्थः तमेवभांत[illegible]मनुभा
तिसर्वंतस्यभासासर्वमिदंविभातीति तथाचक्षुषश्चक्षुरुतश्रोत्रंमनसोयेमनोविदुरि
तिश्रुतेः ननुविशेषज्ञानव्यतिरेकेणतुर्येयंनामोपलभामहेतत्राह व्यतिरेकतश्चसमा

ध्यादौयदस्तितदेवसत्यमिति २८ २९०

श्रोत्रस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंकालत्रयेऽप्यव्यभिचारिणःसत्यत्वमुक्तंव्यभिचारिणस्त्वसत्यतामाहनयदिति मध्ये
चतत्स्थयञ्चास्तिकिंतुव्यपदेशमात्रंकुतःयतः यद्यत्परेणअन्येनभूतंजातंप्रसिद्धंप्रका

नयत्पुरस्तादुतयत्ननपश्चान्मध्येचतन्नव्यपदेशमात्रं
भूतंप्रसिद्धंचपरेणयद्यत्तदेवतत्स्यादितिमेमनीषा २१

तावन्मा

शितंचतत्तदेवकारणप्रकाशकंतत्रंस्यान्नपृथगितिमेमनीषाबुद्धिः वाचारंभणंविकारो
नामधेयंमृत्तिकेत्येवसत्यं सर्वंखल्विदंब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेण
चकार्यस्यप्रकाश्यचानुपलंभादितिभावः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसामान्यतः कार्यप्रकाश्ययोः कारणप्रका[illegible]शकाभ्यामभेदंव्युत्पाद्यप्रस्तुतेन
उभयविवेकपूर्वकंप्रपंचस्यब्रह्माभेदमाह अविद्यमानइति योयंवैकारिकः विकार
समूहः सएषप्रागविद्यमानोराजसः सर्गः रजोद्वारेणब्रह्मकार्यभूतइत्यर्थः अवभा

॥ अविद्यमानोप्यवभासतेयोवैकारिकोराजससर्ग
एषः ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्म
विकारचित्रं २२

सन्नेपिब्रह्मप्रकाश्यश्चेत्यर्थः ब्रह्मतुस्वयंस्वतः सिद्धंनतुकार्यमित्यर्थः ज्योतिश्चप्रका
शकमित्यर्थः अतः कारणात्इंद्रियाणिचअर्थास्तन्मात्राणिच आत्मामनश्चदेवानाम
प्युपलक्षणं विकाराःपंचभूतानिएवंचित्रंब्रह्मैवभातीति २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपसंहरति एवंनिगमतपः प्रत्यक्षैतित्यानुमानैः स्फुटंयथाभवतितथाब्रह्मविवेक
हेतुभिः तथापरस्यदेहादेरपवादेन आत्मत्वनिरासेनचकीदृशेन विशारदेन निपुणे

एवंस्फुटंब्रह्मविवेकहेतुभिः परापवादेनविशारदेन
छित्वात्मसंदेहमुपारमेतस्वानंदतुष्टोखिलकामुके
भ्यः २२

नगुरुणानिमित्तभूतेनेतिवा आत्मविषयंसंदेहंछित्वास्वानंदतुष्टः सन् अखिलेभ्यः
कामुकेभ्यइंद्रियादिभ्यउपारमेतनिःसंगोभवेत् २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परापवादं प्रपंचयति वपुरात्मा न भवति पार्थिवत्वात् घटवत् तथा इंद्रियाणि तदधि
ष्ठातारो देवा असुः प्राणः मनः धिषणा बुद्धिः सत्वं चित्तं अहंकृतिरित्येते आत्मानो भ
वंति कुतः अन्नमात्रं अनोपष्टभ्यत्वात् शरीरवत् वायुर्जलं चकुतााशास्तेजः खं क्षिति

नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हु
ताशः मनोन्नमात्रं धिषणा च सत्वमहंकृतिः खं क्षिति
र्र्थसाम्यं २४

च

रिति पंचभूतानि अर्थाः शब्दादयः साम्यं प्रकृतिश्च नात्मा जडत्वात् घटवदिति यद्वा
हिशब्देनानुमानांतराणि सूचितानि तथा इंद्रियाण्यात्मा न भवंति करणत्वाद्दात्रा
दिवत् देवा आत्मा भवंति वैकारिकत्वात् मनोवत् प्राणश्च वायुत्वाद्बाह्यवायुव दित्या

दि २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं विवेकज्ञानवतो मुक्तस्य नेंद्रियादिकृतो गुणदोषसंबंधः इत्याह समाहितैरिति मत्सु
विविक्तधाम्नः मम सुष्ठु विविक्तं धाम स्वरूपं येन तस्य प्रकाशकस्य प्रकाश्यगुणदो
षा न भवंतीति रविदृष्टांतेनोक्तं २५ असंगब्रह्मत्वेनावस्थितस्य न कोपि गुणदोषा इत्या

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सु विविक्तधाम्नः विलिप्यमानैरुत किंतु
दूषणं घनैरुपेतैर्विगतैरवेः किं २५ यथा नभो वाय्वनलांबुभूगुणैर्गतागतैर्वर्तुगुणै
र्न सज्जते तथाक्षरं सत्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परं २६

काशदृष्टांतेनाह य
थेति वाय्वादीनां शोषणदहनक्लेदनरजोधूसरत्वादिभिर्गतागतैरागमापायिभिः ऋतुगुणैः
शीतोष्णादिभिर्वा अहंमतेः अहंकारात्परमक्षरं संसृतिहेतुभिर्न युज्यते यद्वाहंकारस्य संसृ
तिहेतुभिरिति २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्तवदसम्यकृज्ञानीनयेथेष्टमाचरेदित्याहद्वाभ्यांनथापीति गुणेषुविषयेषु रज्जःरा
गःमनसःकषायश्तेदुर्निरासत्वमाह २७ एतदेवदृष्टांतेनोपपादयतियथेति व्रणा
मामयोरोगःअसाधुसम्यग्यथाभवतितथा अपक्ककषायकर्मअदग्धाःकषायारा

तथापिसंगःपरिवर्ज्जनीयोगुणेषुमायारचितेषुतावत् मद्भक्तियोगेनदृ
ढेनयावद्रजोनिरस्येतमनःकषायः २७ यथामयोऽसाधुचिकित्सितोन्
णांपुनःपुनःसंतुदतिप्ररोहन् एवंमनोपक्वकषायकर्मकुयोगिनंविध्यति
सर्वसंगं २८

गादयस्तन्मूलानिकर्माणिचयास्मिन् तत् अतएवंसर्वसंगंसर्वेषुपुत्रादिषु
सज्जमानंमनःकुयोगिनमसम्यकृज्ञानिनंविध्यतिभ्रंशयति २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकथंचिद्विषयसंगेयदियोगभ्रंशः स्यात् अलंतर्हिसापायेनयोगमार्गेणतत्राह
कुयोगिनइति मनुष्यभूतैर्बंधुशिष्यादिरूपैः त्रिदशैरुपसृष्टैः प्रेरितैः तथाचश्रुतिः

५१॥ कुयोगिनोयेविहितांत्यंतरायैर्मनुष्यभूतैस्त्रिदशोपसृ
ष्टैः तेप्राक्तनाभ्यासबलेनभूयोयुंजंतियोगंनतुकर्मतंत्रं २९

यस्मात्तदेषांनप्रियंयदेतन्मनुष्याविद्युरितिभूयोजन्मांतरे नतुकर्मतंत्रंकर्मविस्तारं २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु विदुषामपि सर्वथा कर्म दुष्परिहरमिति पुनः संसारः स्यादत आह करोतीति विदुषो
न्योसौ जंतुर्देह एव भोजनादि कर्म करोति क्रियते विक्रियते च तेन कर्मणा पुरुषाद्यपि

करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात्‌ न
तत्र विद्वान्धृतो स्थितोपि निवृत्ततृष्णः स्वसुखानुभूत्या ३०

प्राप्नोतीत्यर्थः केनापि संस्कारादिना चोदितः सन्‌ आ निपातान्मरणपर्यंतं कर्म करो
ति विद्वांस्तु धृतो देहे स्थितोपि तत्र कर्मणि न विक्रियते निरहंकारित्वाद्धर्षविषादादि
भिः संसारं न प्राप्नोति ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच आस्तांतावद्दैहिककर्म्मभिर्विकारशंकायतोदेहमप्यसौनपश्यतीत्याहतिष्ठंतमि
ति ग्रस्संतंमूत्रयंतं स्वभावग्राह्यमन्यदपिदर्शनस्पर्शनादिईहमानंकुर्वंतं आत्मानंदेहं
३१ नन्विंद्रियवतःसर्वथाकथमदर्शनंसंभवतितत्राहयदिस्मेतियद्यपिअसत्तांबहिर्मु
तिष्ठंतमासीनमुपव्रजंतंशयानमुक्षंतमदंतमन्नं स्वभावमन्यात्किमपीहमानमात्मा
नमात्मस्थमतिर्नवेद ३१ यदिस्मपश्यत्यसदिंद्रियार्थंनानानुमानेनविरुद्धमन्यत् नम
न्यतेवस्तुतयामनीषीस्वाप्नंयथोत्थायतिरोदधानं ३२ स्वानामिंद्रियाणामर्थंपश्यतित
थापिनानात्वान्मिथ्यास्वप्नवदित्यनुमानेनविरुद्धंबाधितंसत् अन्यदात्मव्यतिरिक्तंमनीषी
वस्तुतयानमन्यते स्वापादुत्थायप्रबुद्धसंस्कारमात्रेणस्वाप्नंविषयंस्फुरंतं अतएवस्वयमे
वतिरोभवंतंयथातद्वत् ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०सू
२९५

तदेवंआत्मानविक्रियतइत्युक्तंनन्वेतदनुपपन्नंबद्धावस्थयासज्यमानत्वात् मुक्तावस्थ
याचगृह्यमाणत्वात् नहिव्रीहयोअवघातेनव्रीहिभावस्यागतस्तंदुलीभावेनगृह्यमा
णानविक्रियंतेतत्राह पूर्वमिति बद्धावस्थायांगुणैः कर्मभिश्चचित्रंअज्ञानकार्यंदेहेंद्रि
यादिलक्षणंआत्मन्यध्यासेनअविविक्तंगृहीतमासीत् तदेवपुनर्ज्ञानेनविनिवर्त्तनेआ

पूर्वंगृहीतंगुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग निवर्त्तनेतत्पुनरीक्षयैवनगृह्यते ते
नापिविसृज्यआत्मा ३३

त्मातुनकेनापिरूपेणगृह्यतेनापित्यज्यते अयंभावः मु
क्तेक्रियाफलत्वेतावदात्मनोविकारस्तस्यास्त्वारोपिता ज्ञानमात्रनिवृत्तिरूपत्वात् नात्म
संस्पर्शित्वंबंधमोक्षयोः अतोनविकारइति ३३ नमोभगवतेरामचंद्रायनमोनमः॥ २९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेवद्दष्टांतेनस्पष्टयतियथेति ननुपूर्वमेवसत्‌घटादिपुनर्विधत्तेकरोति समीक्षाआ
त्मविद्या ३४ आत्मनोनिर्विकारतांप्रपंचयति एषइत्यनेनापरोक्षतयानित्यप्राप्त

यथाहिभानोरुदयोनचक्षुषांतमोनिहन्यान्नतुसद्विधत्ते एवंसमी
क्षानिपुणासतीमेहन्यात्तमिस्रंपुरुषस्यबुद्धेः ३४ एषस्वयंज्योतिर
जोप्रमेयोमहानुभूतिःसकलानुभूतिः एकोद्वितीयोवचसांविरामे
येनेषितावागसवश्चरंति ३५

स्यात्मनःप्राप्तिंवारयति स्वयंज्योतिरित्यज्ञानमलापाकरणलक्षणांविकृतिंवारयति
अजइत्युत्पत्तिंवारयति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रमेय इति ज्ञानलक्षणातिशयाधानेन संस्कारं महानुभूतिरिति देशकालपरि
च्छेदाभावेनास्तित्ववृद्धिविपरीणामापक्षयनाशान् स्वयंज्योतिष्ट्वादेहेतुः सक
लानुभूतिरिति एकोद्वितीय इति विकारहेतोरन्यस्याभावान्नकोपि विकार इति दर्श
यति ननु श्रुतिविषयस्य कथं स्वयंज्योतिष्ट्वादित्तत्राह वचसां विरामे अगोचरत्वे
ननिवृत्तोसत्त्वं तथा च श्रुतिः यतो वाचो निवर्तंते अप्राप्य मनसा सह इति तत्र
हेतुः येनेषिताः प्रेषिताः तथा च श्रुतिः केनेषितं पततिप्रेषितं मनः केन प्राणः
प्रथमः प्रैतियुक्तः केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्र
स्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं प्राणस्य प्राणं चक्षुषश्चक्षुरिति ३५ नमो नमः २२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अद्वितीयत्वमुपपादयितुं भेदस्यावास्तवत्वमाह एतावानिति केवले अभिन्ने आत्मन् आ
त्मनि विकल्प इतियत् एतावान् सर्वोप्यात्मनो मनसः संमोहः भ्रमः यतः स्वात्मानमृते
विनायस्य विकल्पस्यावलंब आश्रयो नास्ति रजतभ्रमस्येव शुक्तिं विना नेहना नास्ति

एतावानात्मसंमोहोयद्विकल्पस्तुकेवले आत्मनृतेस्वमात्मानमव
लंबोनयस्यहि ३६ यन्नामाकृतिभिर्ग्राह्यंपंचवर्णमबाधितं व्यर्थेना
प्यर्थवादोयंद्वयंपंडितमानिनां ३७

किंचन इंद्रोमायाभिः पुरुरूपईयत्ते युक्ताह्यस्य हरयः शतादशेत्येवमित्यादिश्रुतेरित्यर्थः
३६ केचित्पुनः प्रत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षादिप्रतीतप्रपंचस्यबाधायोगात् वेदांतार्थानांचकृत्स्नार्थकर्तृत्वप्रतिपादनपरत्वेना
र्थवादत्वात् द्वैतंसत्यमितिमन्यंतेतन्मतमनवद्यंद्रूषयतियदिति नामाकृतिभिःना
मरूपोपलक्षितं पंचभूतात्मकंद्वयंद्वैतंयद्वेतेबाधितमितिपंडितमानिनोअ
त्रवयमेवपंडिताइत्यभिमानवत्तां वेदांतेष्वयमर्थवादइतिप्रतीतिः नतत्वविदां
यतःव्यर्थेनापिविनाऽप्यर्थेनसाप्रतीतिः तथाहिनतावद्विध्येकवाक्यत्वंतेषाम
स्तियतोऽर्थवादत्वंस्यात् नचाकर्तृ भोक्तृपरमानंदरूपात्माप्रतिपादनंकर्मवि
धिशेषतांभजते नचाबाधितत्वंद्वैतस्यनामरूपात्मकत्वात् ग्राह्यत्वात् पंचव
र्णात्मकत्वात् स्वप्नवदित्याद्यनुमानेनवाचारंभणादिश्रुतिभिश्चबाधितत्वादि

ति ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंज्ञानयोगंसपरिकरंनिरूप्येदानींतन्निष्ठस्यविघ्नप्रतीकारमाह योगिनइतित्रि
भिः योगंयुंजतः कायोयद्यंतरेवोत्पन्नैः उपसर्गैरोगाद्युपद्रवैः अभिभूयते विधिः
प्रतीकारः ३८ योगधारणयासोमसूर्यादिधारणयासंतापशैत्यादीन् आसनै

योगिनोपक्वयोगस्ययुंजतः कायउत्थितैः उपसर्गैर्विहिन्येततत्रायंविहितोविधिः
३९ योगधारणयाकांश्चिदासनैर्धारणान्वितैः तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्द
हेत् ३९ कांश्चिन्ममानुध्यानेननामसंकीर्तनादिभिः योगेश्वरानुवृत्त्यावाहन्यादशु
भद्रांछनैः ४०

वायुधारणान्वितैः वातादिरोगान् तपोमंत्रौषधैः पापग्रहसर्पादिकृतान् ३९ ममा
नुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्यादंभमानादीन्हन्यात् ४० वासुदेवभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्येतुदेहसिद्ध्यर्थमेवैतत्सर्वंकुर्वंतितत्तद्दूषयति केचित्तुनरेतैरन्यैश्चोपायैर्देहमेवसु
कल्पंजरारोगादिरहितंवयसितारुण्येस्थिरंचकृत्वापरकायप्रवेशादिसिद्धयेतत्तद्धा

॥४२ केचिद्देहमिमंधीराःसुकल्पंवयसिस्थिरं विधायवि
विधोपायैरथयुंजंतिसिद्धये ४१ नहितत्कुशलादृत्यंत
दायासोह्यपार्थकः अंतवत्त्वाच्छरीरस्यफलस्येववनस्प
तेः ४२

रणरूपंयोगंयुंजंतिनतुज्ञाननिष्ठारूपं ४१ कुशलैःप्राज्ञैरादरणीयंनभवति वनस्प
तिवद्दात्मैवस्थायीशरीरंतुफलवन्नश्वरमित्यर्थः ४२ नमोभगवतेवासुदेवायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुक्तंचेत्समाध्यंगत्वेनापिप्राणायामादियोगेक्रियमाणेजरारोगाद्यभावोदृ
श्यतेसत्यंतथापिसमाधिमुत्सृज्यनतत्रसज्जेतेत्याहयोगमिति नतुतांदेहसि
द्धिंनश्रद्दध्यात्नविश्वसेत् ४३ तदेवंविघ्नप्रतीकारैर्योगंकुर्यादित्युक्तं मच्छरण

योगंनिषेवतोनित्यंकायश्चेत्कल्पतामियात् तच्छ्रद्दध्यान्नमतिमान्योगमुत्सृ
ज्यमत्परः ४३ योगचर्यामिमांयोगीविचरन्मदपाश्रयः नांतरायैर्विहन्येतनिस्पृहः
स्वसुखानुभूः ४४ इति श्रीभा० ११ ॥ अध्यायः ॥ २८ ॥

स्यतुनविघ्नशंकापीत्याहयोग
चर्यामिति विचरन्आचरन् स्वसुखेअनुभूतः अनुभूतिर्यस्य स्पृहामूलाहिवि
घ्नाः साचमदपाश्रयस्यनिवर्त्तते अतोंतरायैरविह्वलः स्वानंदपूर्णोभवतीति ४४
समाहृत्यस्वयोगंतुसमस्तोपनिषद्रसं सख्येमुख्यतमांभक्तिंमुकोपुनरुपादिशत् ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति अध्यायः ॥२८॥ ऊनत्रिंशे तु यः पूर्वं विस्तरेण निरूपितः भक्तियोगस्तमेवाह स्वभक्ता
यसमासतः अतिक्लेशाद्बिवालक्ष्ययोगेः संगेकसंपदि सुखोपायं पुनः कृष्णमुद्धवः
परिपृच्छति २ अनात्मनः अवशीकृतमनसः अंजसा अप्रयासतो यथा सिद्ध्येत् तत्

उद्धव उवाच ॥ सुदुश्चरामिमां मन्ये योगचर्यामनात्मनः यथां
जसा पुमान् सिद्ध्येत्तन्मे ब्रूह्यंजसाच्युत १ प्रायशः पुंडरीका
क्ष युंजतो योगिनो मनः विषीदंत्यसमाधानान्मनोनिग्रहक
र्शिताः २

था अंजसा सुबोधं यथा तथा मे ब्रूहि १ सुदुः करतां प्रपंचयति प्रायशः इति मनो युंज
तो निग्रहंतः विषीदंति क्लिश्यंति कुतः असमाधानात् अनिग्रहात् कथंचित् मनसो
निग्रहे च कर्शिताः श्रांताः संतः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मादेवंकेचनविषीदंतिअतः अतएवयेहंसाःसारासारविवेकचतुराःतेतुआनंद
दुघंसमस्तानंदपरिपूरकंतवपदांबुजमेवसुखंयथाभवतितथानुनिश्चितंश्रेयरन्
सेवंते अमीतुत्वन्मायायाविहताः केयेयोगकर्मभिर्मानिनः संतोनश्रयंते यद्वा अ

अथातआनंददुघंपदांबुजंहंसाश्रयेरन्नरविंदलोचन सुखं
नुविश्वेश्वरयोगकर्मभिस्त्वन्मायया॰मीविहतानमानिनः २

मीलङ्कृताः त्वन्माययानविहताः अतएवयोगकर्मभिः कृतामानिनोनभवंति अन्ये
तुत्वन्माययामोहिताःसंतोवयंयोगज्ञाःवयंकर्मकुशलाइतिकेवलंगर्विताभवंतिनतु
मुच्यंतइत्यर्थः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वदुक्तास्तुत्वत्प्रसादेनकृतार्थाभवंतीतिनातिचित्रमित्याहकिमिति अनन्यशरणेषु
दासेषुतथा — त्वमसात्त्वंतदधीनत्वंयत्‌यथानंदगोपीबलिप्रभृतितिषु एतत्‌किंचि
त्रंनाश्चर्यमित्यर्थः यतोयोभवान्‌श्रीरामरूपेणमृगैर्वानरैः सह साहित्यंसख्यमि

॥ किंचित्रमच्युततवैतदशेषबंधोदासेष्वनन्यशरणेषुयदात्म
सात्वं योऽरोचयत्सहमृगैःस्वयमीश्वराणांश्रीमत्किरीटतटपीडि
तपादपीठः ४

तियावत्‌ अरोचयत्प्रीत्याकृतवान्‌ कथंभूतः ईश्वराणांब्रह्मादीनांयानिश्रीमंतिकि
रीटानितेषांतटान्यग्राणितैः पीडितंविलुंठितपादपीठंयस्यसएवंतथाभूतोपिसन्‌ ४ १००

अतस्त्वां परित्यज्य को नामान्यत्संश्रयेदित्याह नत्वेति न मेवंभूतं त्वां को नु विसृजेत्
कथंभूतः स्वकृतविदुर बलिप्रह्लादादिषु त्वयाकृतमनुग्रहं जानन् यद्वा स्वस्मिन्नेवा
नर्यामितया कृतमुपकारं विद्वान् तदेवाह अखिलात्मदयितेश्वरं अखिलस्य जग

त्वां वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत
को नु को वा भजेत्किमपि विस्मृतये नु भूत्यै किं वा भवेन्न तव पादरजोजुषां

तः आत्मानं चेतयितारं आत्मत्वादेव दयितं प्रेष्ठं सुसेव्यं ईश्वरत्वादवश्यं भजनीयं किंच
आश्रितानां सर्वार्थदं तर्हि किं फलोद्देशेनाहं सेव्यः नहि नहि किमपि अनिरुक्तत्वद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए
३०१

तिरिक्तंस्वर्गादित्वयादत्तमपि कोवाभजेत् सेवेतकथंभूतंतत् य
त् केवलंभक्तैरिंद्रियभोगाय अतुअनंतरमेवतद्विस्मृतयेभवति
यद्वा त्वद्व्यतिरिक्तंकिमपिदेयंतातरंधर्मज्ञानादिसाधनंवाभक्तैरैश्व
र्यायसंसारस्यविस्मृतयेमोक्षायवाकोभजेत् नकोपि ननुतत्सा
धनंविनाभोगमोक्षादिफलंकथंस्यात्तत्राह किंवेति त्वदुक्तंयावैसा
धनसंपत्तिःपुरुषार्थचतुष्टये तयाविनातदाप्नोतिनरोनारायणा
श्रयरति ५

३०१

आस्तामन्यभजनवार्त्तात्वत्कृतोपकारस्यत्वय्यात्मनिवेदनेनैवनिःकृतिर्नास्त्येवेत्या
हनैवेति अपचितिंप्रत्युपकारंआनृण्यमितियावत् कवयोब्रह्मविदोपिनैवप्रापु

नैवोपयंत्यपचितिंक वयस्तवेश ब्रह्मायुषा ऽपिकृतमृद्धमुदः स्मरंतः
योंतर्बहिस्तनुभृतामशुभंविधुन्वन्नाचार्यचैत्यवपुषास्वगतिंव्यनक्ति

वंति यतःत्व कृतमुपकारंस्मरंतः ऋद्धमुदः उपचितपरमानंदाः उपकारमेवाहयो
भवान्बहिराचार्यवपुषागुरुरूपेणअंतश्चैत्यवपुषाअंतर्यामिरूपेणअशुभंविषयवा
सनांविधुन्वन्निरस्यन्स्वगतिंनिजरूपंप्रकटयतितस्यतव ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प०
३०२

ईश्वरत्वेहेतुः जगत्क्रीडनकंक्रीडोपकरणंयस्यसः ननुजगत्स्रष्ट्रादिनाब्रह्मेशादयः
क्रीडंतिनत्वाह स्वशक्तिभिःसत्वादिभिः गृहीतंमूर्तित्रयंयेनसः सप्रेमप्रेमसहितंम

श्रीशुकउवाच॥ इत्युद्धवेनात्यनुरक्तचेतसापृष्टोजगत्क्रीडनकः
स्वशक्तिभिः गृहीतमूर्तित्रयईश्वरेश्वरोजगादसप्रेममनोहरस्मि
तः ७ श्रीभगवानुवाच॥ हंततेवर्णयिष्यामिममधर्मान्सुमंगलान्
यांछ्रद्धयाचरन्मर्त्योमृत्युंजयतिदुर्जयं ८

नोहरंस्मितंयस्यसः सप्रेमयथा
तथाजगादेतिवा ७ हंतेतिसहर्षसंबोधनंसुमंगलान्सुखरूपान् मृत्युंसंसारं दुर्जय ३०२
मन्यैरुपायैः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मानेवाहकुर्यादितित्रयोदशाभिः मांस्मरन्शनकैःअसंरंभतःकुर्यात् तदाहम
यीति अर्पितेमनश्चित्तेसंकल्पविकल्पानुसंधानात्मकेयेन अतएवमद्धर्मेष्वेवा

कुर्यात्सर्वाणिकर्माणिमदर्थंशनकैःस्मरन् मय्यर्पितमनश्चित्तोम
द्धर्मात्ममनोरतिः ९ देशान्पुण्यान्संश्रयेनमद्भक्तैःसाधुभिःश्रितान्
देवासुरमनुष्येषुमद्भक्ताचरितानिच १० पृथक्सत्रेणवामह्यंपर्वयात्राम
होत्सवान् कारयेन्नृत्यगीताद्यैर्महाराजविभूतिभिः ११ श्रीकृष्णपरमा·

त्ममनसोःरतिर्यस्यसः ९ पुण्यदेशलक्षणंमद्भक्तैरितिदेवादिषुयेयेमद्भक्तास्तेषांआ
चरितानिकर्माणिचाश्रयेत् १० सत्रेणसंभूयवा ११ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोंतर्यामीश्वरदृष्ट्यासर्वान्प्रणमेदित्याह विसृज्येति स्मयमानान्हसतः स्वान्
सखीन्तथादैहिकींदृशं अहमुत्तमः सतुनीचइतिदृष्टिंतयादृशायाव्रीडांल

विसृज्यस्मयमानान्स्वान्दृशंव्रीडांचदैहिकीं प्रणमेद्दंडवद्भूमा
वाश्वचंडालगोखरं १६ यावत्सर्वेषुभूतेषुमद्भावोनोपजायते
तावदेवमुपासीतवाङ्मनःकायवृत्तिभिः १७ श्रीरामायनमः

ज्ञातांचविसृज्यचांडालादीनभिव्याप्यप्रणमेत् एवंपंचभिःश्लोकैरुक्तायाःसमदृ
ष्टेरवधिमाहद्वाभ्यांयावदिति १७ नमोनमःनारायणाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यएवंकुर्वतः पुंसः सर्वंब्रह्मात्मकमेवभवति कुतः आत्ममनीषयासर्वत्रेश्वरदृष्ट्याया
विद्यातया अतः परितोब्रह्मैवपश्यन् सर्वतः क्रियामात्राउपरमेत् १८ किमयमेवोपायः
आस्तिवाऽन्योपीत्यपेक्षायांसंतिबहवः समीचीनस्त्वयमेवेत्याह अयंहीति १९ भग

सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया परिपश्यन्नुपरमेत्सर्वतोमु
क्तसंशयः १८ अयंहिसर्वकल्पानांसध्रीचीनोमतोमम मद्भावः
सर्वभूतेषुमनोवाक्कायवृत्तिभिः १९

वद्धर्मलक्षणोपायस्यसमीचीनत्वमेवो
पपादयतिद्वाभ्यांनहीति अंगहेउद्धवअनाशिषोनिःकामस्यउपक्रमेसतिअ एवपिर
घदपिवैगुण्यादिभिर्नाशोनास्त्येव यतोमयैवनिर्गुणत्वादयंधर्मः सम्यग्व्यवसितोनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चितः नतुमन्वादिमुखेनकथंचित् २० किंचयोयइतिअयमर्थः किंवक्तव्यंमद्धर्मस्य
नध्वंसइति यतोलौकिकोपियोनिरर्थः व्यर्थः आयासः सोपिमयिपरेनिःफलायचे

नत्वंगोपक्रमेध्वंसोमद्धर्मस्योद्धवाण्वपि मयाव्यवसितः
सम्यक्निर्गुणत्वादनाशिषः २० योयोमयिपरेधर्मःकल्पते
निःफलायचेत् तदायासोनिरर्थःस्याद्भयादेरिवसत्तम २१

कल्पतेनिष्कामतयार्पितश्चेत् तर्हिधर्मएवस्यात् निरर्थायासेदृष्टांतः यथाभयशो
कादेर्हेतोः फलायनाक्रंदनादिक्लेशस्तद्वत् २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोमज्जनमेवबुद्धेर्विवेकस्यमनीषायाश्चातुर्यस्यचफलमित्याहएषेति तामेव
दर्शयति सत्यममृतंचमामांअनृतेनासत्येनमर्त्येनविनाशिनामनुष्यदेहेनइह

२१ एषाबुद्धिमतांबुद्धिर्मनीषाचमनीषिणां यत्सत्यमनृतेनेहमर्त्येनाप्नोतिमाऽमृतं २२
एषतेभिहितःकृत्स्नोब्रह्मवादस्यसंग्रहःसमासव्यासविधिनादेवानामपिदुर्लभः
२३ अभीक्ष्णशास्त्रेगदितंज्ञानंविस्पष्टयुक्तिमत् एतद्विज्ञायमुच्येतपुरुषोनष्ट
संशयः २४

आस्मिन्नेवजन्मनिप्राप्नोतीतियत्सैवबुद्धिर्मनीषाचेति बुद्धिर्विवेकःमनीषाचातु
र्यं २२ महाप्रकरणार्थमुपसंहरतिद्वाभ्यांएषतइतिसमासव्यासविधिनासंक्षेपवि
स्तारप्रकारेण २३ २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
३०६

किंच आस्तांतावत्तज्ज्ञानं एतदनुसंधानकथनपठनश्रवणपराणामप्येतदेवफलंभव
तीत्याहचतुर्भिः सुविक्तमितिमयासुविविक्तंदत्तोत्तरं एतत्आख्यानमपियोधारयेत्

सुविविक्तंतवप्रश्नंमयैतदपिधारयेत् सनातनंब्रह्मगुह्यंपरंब्रह्माधिग
च्छति २५ यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलं तस्याहंब्रह्मदायस्यददा
म्यात्मानमात्मना २६ यएतत्समधीयीतपवित्रंपरमंशुचि सपूयेताः
हरहर्मांज्ञानदीपेनदर्शयन् २७

अनुसंदध्यात् ब्रे ह्मगुह्यंवेदेपिरहस्यं २५ सुपुष्कलं
यथाभवतितथा ब्रह्मदायस्यब्रह्मददातीतितथातस्यज्ञानोपदेष्टुः २६ समधीयी
तउच्चैः पठेत् परमंशुचिअन्येषामपिशोधकंपूयेत् शुद्ध्येत् २७ नमोभगवते८२

३०६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ सम्यक्ज्ञानानुसक्तौ पुनरुपदेक्ष्यामीत्याशयेनछेत्स्यतिअपीति अपिकिं २९ उपधा
रितमित्याकलय्याहनैतदिति शठायवंचकाय ३० शूद्राणांयोषितांचयदिभक्तिःस्या

यएतच्छ्रद्धयानित्यमव्यग्रःशृणुयान्नरः मयिभक्तिंपरांकुर्वन्कर्मभि
र्नसबध्यते २८ अप्युद्धवत्वयाब्रह्मसखेसमुप धारितं अपितेविग
तोमोहःशोकश्चासौमनोभवः २९ नैतत्त्वयादांभिकायनास्तिकायश
ठायच अशुश्रूषोरभक्तायदुर्विनीतायदीयतां ३० एतैर्दोषैर्विहीना
यब्रह्मण्यायप्रियायच साधवेशुचयेब्रूयाद्भक्तिःस्याच्छूद्रयोषितां ३१

त्तर्हिब्रूयात् अतस्तासामप्यधिकारइत्यर्थः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
३०७

एतत्ज्ञानेचपुमान्कृतार्थोभवतीत्याहनैतदिति अत्रदृष्टांतमाहपीत्वेति पीयूषंस्वादु
३२ ननिसंतिबहूनिज्ञेयानितत्तत्फलसाधनानिचसत्यंसंसभक्तानांभक्तस्यतुसर्वम
हमेवअतोमदेकशरणोभवेत्याहज्ञानइति ज्ञानादौयावान्धर्मादिलक्षणश्चतुर्वि

नैतद्विज्ञायजिज्ञासोर्ज्ञातव्यमवशिष्यते पीत्वापीयूषममृतंपातव्यं
नावशिष्यते ३२ ज्ञानेकर्मणियोगेचवार्त्तायांदंडधारणे यावानर्थोनृ
णांतातताबांस्तेहंचतुर्विधः ३३ श्रीरामकृष्ण

धोऽर्थः तावान्सर्वोपितेहमेव तत्रज्ञानेमोक्षः कर्मणिविहितेधर्मः स्वाभाविकेतुका
मः योगेत्वणिमादिसिद्धयः वार्तायांकृष्यादावर्थः दंडनीतावैश्वर्यमिति सिद्धैश्वर्य ३०७
योरपिकामांतर्गतत्वाच्चातुर्विध्यं ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुतस्स्यत आह मर्त्य इति यदा त्यक्तसमस्तकर्मा सन्मे निवेदितात्मा भवति तदासौ मे विचि
किर्षितः विशिष्टः कर्तुमिष्टो भवति ततश्च अमृतत्वं मोक्षं प्रतिपद्यमानो मयात्मभूयाय मदै
क्याय मत्समानैश्वर्यायेति यावत् कल्पते योग्यो भवति वै ध्रुवं ३४ आदर्शितो योगमार्गो

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे तदाऽमृतत्वं प्रतिपद्यमानो म
यात्मभूयाय च कल्पते वै ३४ श्रीशुक ॥०॥ स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकव
चो निशम्य बद्धांजलिः प्रीत्युपरुद्धकंठो न किंचिदूचेऽश्रुपरिप्लुताक्षः ३५ विष्टभ्य चित्तं
प्रणयावघूर्णं धैर्येण राजन्बहुमन्यमानः कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्त
च्चरणारविंदं ३६

यस्मै सः ३५ प्रणयेनावघूर्णं क्षुभितं चित्तं धैर्येण विष्टभ्य बहुमन्यमानः
आत्मानं कृतार्थं मन्यमानः ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेमयायआश्रितआसीत्सत्वसंनिधानेनैवविद्राविताः प्रभवंतिकिंतुबाधायस
मर्थाभवंति अज्ञाद्यब्रह्मणोपिजनक ३७ किंचयद्यपित्वसंनिधानाद्देवगताः त

उद्धव उवाच॥ विद्रावितोमोहमहांधकारोयआश्रितोमेतवसन्निधाना
त् विभावसोः किंतुसमीपगस्यशीतंतमोभीः प्रभवंत्यजाद्य ३७ प्रत्य
र्पितोमेभवतानुकंपिनाभृत्यायविज्ञानमयःप्रदीपः हित्वाकृतज्ञस्त
वपादमूलंकोऽन्यत्समीयाच्छरणंत्वदीयं ३८

याप्यनुकंपिनाभवताज्ञानम
यः प्रदीपश्चप्रत्यर्पितःस्वमाययापहृतःपुनःसमर्पितः अतस्तवकृतज्ञःयस्त्वया
कृतमनुग्रहंजानातिसकोनामत्वदीयंपादमूलंहित्वान्यच्छरणंसमीयात्आश्रयेत्
३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच दाशार्हादिषुत्वयायःस्वमाययास्नेहपाशःप्रसारितःसत्वयैवात्मतत्वज्ञानश
स्त्रेणवृक्णश्छिन्नः ३९ एवंयद्यपित्वयाबहूक्तंतथाप्येतावत्प्रार्थयइत्याहनमोस्त्वि

वृक्णश्चमेसुदृढःस्नेहपाशोदाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितःसृष्टिविवृद्धयेत्वया
स्वमाययात्व्यात्मसुबोधहेतिना ३९ नमोस्तुतेमहायोगिन्प्रपन्नमनुशाधिमांयथा
त्वच्चरणांभोजेरतिस्यादनपायिनी ४० श्रीभगवानु॰॥गच्छोद्धवमयादिष्टोबदर्याख्यं
ममाश्रमं तत्रमत्पादतीर्थोदेस्नानोपस्पर्शनैःशुचिः ४१

ति अनुशासनीयमाह
यथेतिमुक्तावप्यनपायिनी ४० तदुक्तमोमित्यंगीकृत्यतथापिमया दिष्टोलोकसं
ग्रहार्थमेतावत्कुर्वित्याहगच्छेति अदिष्टोनियुक्तः ४१ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
३०१

स्नानादेः पूर्वमेव मत्पादतीर्थोदकभूतायाअलकनंदायागंगायाईक्षया वसानः परिद
धानः ४२ द्वंद्वमात्राणांशीतोष्णादिविषयाणां सुशीलः आर्जवादिस्वभावः ४३ ते

ईक्षयालकनंदाया विधूताशेषकल्मषः वसोनोवल्कलान्यंग
वन्यभुक्सुखनिस्पृहः ४२ नितिक्षुर्द्वंद्वमात्राणांसुशीलः संय
तेंद्रियः शांतःसमाहितधिया ज्ञानविज्ञानसंयुतः ४३ मत्तोनु
शिक्षितंयत्तेविविक्तमनुभावयन् मय्यावेशितवाक्चित्तोमद्ध
र्मनिरतोभव ४४ अतिव्रज्यगतीस्तिस्रोमामेष्यतिततः परं ४५

त्वयाविविक्तंसुविचारितं तिस्रास्त्रिगुणात्मिकागतीरतिक्रम्य ४५ नमोनारायणाय ३०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिमेधसा संसारं हरतिमेधायस्यतेनश्रीकृष्णेन अद्वंद्वपरोपिसुखदुःखविनिर्मुक्तोपि अपक्रमेनिर्गमनसमये ४५ किंच सुदुस्त्यजः स्नेहोयस्मिन् तेनवियोगात्कातरोभी

श्री॥ कृ॥ वा॥ सएवमुक्तोहरिमेधसोद्धवः प्रदक्षिणंतंपरिश्रित्यपादयोः शिरोनिधायाश्रुकाभिराईधीर्न्यषिंचदद्वंद्वपरोप्यक्रमे ४५ सुदुस्त्यजस्नेहवियोगकातरोनशक्नुवंस्तंपरिहातुमातुरः कृच्छ्रंययौमूर्द्धनिभर्तृपादुके बिभ्रन्नमस्कृत्यययौपुनःपुनः ४६ नमोभगवते श्रीकृष्णायपरमात्मने

तः अतएवतंपरिहातुमशक्नुवन्नातुरोविह्वलः सन्कृच्छ्रं कष्टं ययौप्राप ततश्चभर्तृ

पादुकेतेनैवकृपयादत्तेमूर्ध्निबिभ्रत् अतिनिर्बंधरूपयातदाज्ञयातां
पुनःपुनर्नमस्कृत्ययथौ अत्रच पृष्ठतोऽन्वगमंभर्तुःपादविश्लेषणा
क्षमइत्यादितृतीयस्कंधोपक्रमोक्तानुसारेणबदरिकाश्रमंगच्छन्
भगवतःप्रभासयात्रामुपश्रुत्यशनैःपृष्ठतोगतःसन्नुपसंहृत्य
निजकुलंभगवंतमेकांतेदृष्ट्वातत्कालप्राप्तेनमैत्रेयेणसहपुनःकृ
पयाभगवतोपदिष्टंतत्वमाकलय्यतदाज्ञातोययाविति द्रष्टव्यं ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशालांबदरिकाश्रमंगतः सन्हरेर्गतिमगात् कथंभूतां तेनैवजगदेकबंधुनायथो
पदिष्टांतदाऽमृतत्वंप्रतिपद्यमानोमयाऽत्मभूयायचकल्पतेवै अतिव्रज्यगतीास्ति
स्त्रोमामेष्यसितत्तः परमित्येवमुक्तप्रकारां ४७ आनंदसमुद्रोभगवद्भक्तिमार्गस्त

ततस्तमंतर्हृदिसंनिवेश्यगतोमहाभागवतोविशालां यथोपदिष्टांज
गदेकबंधुनातपः समास्थायहरेरगाद्गतिं ४७ यएतदानंदसमुद्रसंभृतं
ज्ञानामृतंभागवताय भाषितं कृष्णेनयोगेश्वरसेवितांघ्रिणासच्छ्रद्धयाः
सेव्यजगद्विमुच्यते ४८

स्मिन् संभृतमेकीकृतंएत धः सच्छ्रद्धयाआसेव्यईषदपिसेविता
वर्ततेसविमुच्यतइतिकिंवक्तव्यंतत्संगेनजगदपिविमुच्यतइत्यर्थः ४८ नमोनारायण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
३११

एवंकृतोपदेशं जगद्गुरुं प्रणमति भवभयमिति भवः संसारः भयं च जरारोगादिनिमित्तं
तद्भयं निवृत्तानां प्रवृत्तानां च भृत्यवर्गाणां यथायोग्यमपहंतुं योऽमृतद्वयमुपजह्रे उ
द्धृतवान् तदेवाह वेदसारमेकं किं तत् ज्ञानविज्ञानरूपं च तत्सारं श्रेष्ठं च भगवत् भृंगो

प भवभयमपहंतुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं अमृत
मुदधितश्चापाययद्भृत्यवर्गान् पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोस्मि
४९ इति श्रीभागवते महापुराणे एकादशस्कंधे एकोनत्रिंशोध्यायः २९॥

यथा पुष्पमकोपयन्नेवामृतमुपहरति तथा स्वयं स्वकृत वेदानुसारेणैव उदधितश्चैकं त
च्चोभयं यथायथं भृत्यवर्गानपाययत्तं नतोस्मीति ४९ येनानुकंपितं विश्वमुद्धवप्रश्न
निर्णयैः तं वंदे परमानंदं नंदनंदनरूपिणं ॥ॐ॥ अध्यायः ॥२९॥ ३११

त्रिंशेतु भगुपक्षिप्तमौसलछलतोहरिः स्वधामगंतुमन्विछन्संजहारनिजंकुलं १ वि
रागायपुराघोरमुपक्षिप्तंहिमौसलं कथावसानेतत्रैवविशेषंपरिपृछति २ ततश्तित्रि
भिः १ ब्रह्मशापोपसंसृष्टेकुलेसतिअयंभावः भगवतिनहिशापः प्रभवति यादवत्वा

राजोवाच॥ ततोमहाभागवतउद्धवेनिर्गतेवनं द्वारवत्सांकिमक
रोत्भगवान्भूतभावनः १ ब्रह्मशापोपसंसृष्टेस्वकुलेयादवर्षभः
प्रेयसींसर्वनेत्राणांतनुंसकथमत्यजत् २

नुकरणाद्ब्रह्मसोपि कथंचिन्मान्यः अतः किमकरोदिति तदेतउक्तंकथमत्यजदिति स
र्वनेत्राणामितिसर्वेंद्रियोपलक्षणं २ वासुदेवायनमोनमः रामचंद्रायनमोनमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्प्रपंचयतिप्रसाकृष्टुमिति यस्मिन्रूपेलग्नंनयनंपरावर्त्तयितुमबलानशेकुः यत्र
कर्णरंध्रेणप्रविष्टंसत्तस्तामात्मनिलग्नंलिखितमिवतिष्ठति ततोनसरतिननिर्गच्छति
यस्यश्रीःशोभासंकीर्त्यमानाकवीनांवाचांरतिमुल्लासविशेषंजनयतितेषांमानंजगत्पू

प्रसाकृष्टंनयनमबलायत्रलग्नंनशेकुःकर्णविष्टंनसरतिततोयस्स
तामात्मलग्नं यच्छ्रीर्वाचांजनयतिरतिंकिंनुमानंकवीनांदृष्ट्वाजिष्णोर्यु
धिरथगतंयत्तत्साम्यमीयुः ३

ज्यतांजनयतीतिकिंनुव त्कव्यं यत्रविष्णोरूपंजि
ष्णोरर्जुनस्यरथोपस्थितंदृष्ट्वायुधिमत्तास्तत्साम्यंसारूप्यंईयुःप्राप्ताः तत्केनरूपेणास्य
जगदित्यन्वयः ३ नमोभगवतेनमोनमः नारायणाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिविसूर्यपरिवेषादीन् अंतरिक्षेदिग्दाहादीन् महोत्पातान् भुविभूकंपादीन् स्वय
मेवोत्पादितत्वादन्यैर्दुःप्रतीकारान् ४ यमस्यकेतवोध्वजाइवमृत्युसूचकाइत्यर्थः नः

श्रीऋषिरुवाच दिविभुव्यंतरिक्षेचमहोत्पातान्समुत्थितान् दृष्ट्वाऽऽसीनान्सुधर्मा
यांकृष्णःप्राहयदूनिदं ४ श्रीभगवानुवाच एतेघोरामहोत्पाताद्वार्वत्यांयमकेतवः
मुहूर्त्तमपिनस्थेयमत्रनोयदुपुंगवाः ५ स्त्रियोबालाश्चवृद्धाश्चशंखोद्धारंव्रजंत्वितः
वयंप्रभासंयास्यामोयत्रप्रत्यक्सरस्वती ६ तत्राभिषिच्यशुचयउपोष्यसुसमा
हिताः देवताःपूजयिष्यामःस्नपनालेपनार्हणैः ७

अस्माभिः ५ प्रत्यक्पश्चिमवाहिनी ६ अभिषिच्यस्नात्वा ७ नमोभगवतेकृष्णाय ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणांश्चैतैः कृतशांतिकाः संतोगवादिभिः पूजयिष्यामः ९ विधिप्रकारः मंगलायतनं
च किंच देवद्विजगवांपूजा भवउद्भवहेतुः देवलोकेपरमउद्भवोभविष्यतीतिभावः ९

ब्राह्मणांश्चमहाभागान्कृतस्वस्त्ययनावयं गोभूहिरण्यवासोभिर्गजाश्वरथवेश्म
भिः ९ विधिरेषह्यरिष्टघ्नोमंगलायनमुत्तमं देवद्विजगवांपूजाभूतेषुपरमोभवः ९
शुक उ० ॥ इतिसर्वेसमाकर्ण्ययदुवृद्धामधुद्विषः तथेतिनौभिरुत्तीर्यप्रभासंप्रययूरथैः
१० तस्मिन्भगवतादिष्टंयदुदेवेनयादवाः चक्रुःपरमयाभक्त्यासर्वश्रेयोपबृंहितं ११

मधुद्विषोवाक्यमाकर्ण्यतथेत्यभिनंद्यउत्तीर्यसमुद्रं १० सर्वश्रेयोपबृंहितमित्यत्रसंधि
रार्षः भगवतानुक्तैरपिसर्वैःश्रेयोभिःसहितंचक्रुः ११ नमोभगवतेवासुदेवायनमः॥ ३१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य

पीयतश्रतिपानं मैरेकं मदिराविशेषं मधुसुरसं दिष्टेनदैवेनविभ्रंशितधियः नत्वन्य
थातास्मिन्स्थानेतदुचितामितिभावः यस्यद्वैवेरसैः १२ कृष्णमायाविमूढानामिति

ततस्तास्मिन्महापानंपपुर्मैरेयकंमधु दिष्टविभ्रंशितधियोयत्नद्वैवैर्भ्रश्यतेमतिः १२
महापानाभिमत्तानांवीराणांहृष्टचेतसां कृष्णमायाविमूढानां संघर्षः सुमहानभूत्
१३ युयुधुः क्रोधसंरब्धावेलायामाततायिनः धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमर
र्ष्टिभिः १४ पत्त्यश्वाकैरथकुंजरोष्ट्रैः खरोष्ट्रगोभिर्महिषैर्नरैरपि मिथः समेत्या
श्वतरैः सुदुर्मदान्यहंश्छरैर्दद्भिरिवद्विपावने १५

मुख्योहेतुः संघर्षः कलहः १३ ततोयुयुधु

दि

श्च १४ पत्तसाश्वतरस्तश्चलंस्यः पताकायेषुतैरथादिभिः मिथःसमेत्यन्यंहनन्यघ्नन्ति
स्यर्थः दद्भिर्दंतैरिव १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिथः समेत्येत्यस्यग्र पंचः प्रद्युम्नेत्सादिचतुर्भिः गदोश्रीकृष्णस्यभ्रातेकः पुत्रश्चा
परस्तौसुमित्रासुरथावितिदैर्घ्यमार्षं असुरथनामावाकाश्चित् १६ मदांधेनमदन

प्रद्युम्नसांबौयुधिरूढमत्सराः वक्रूरभोजाः वनिरुद्धसात्यकी सुभद्रसंग्रामजितौ
सुदारुणेगदौसुमित्रासुरथौसमीयतुः १६ अन्येचयेवैनिशठोल्मुकादयः सहस्रजि
छतजिद्भानुसुरव्याः अन्योन्यमासाद्यमदांधकारिताजघ्नुर्मुकुंदेनविमोहितास्भृ
शं १७ दाशार्हवृष्ण्यंधकभोजसात्वतामध्वर्बुदामाथुरशूरसेनाः विसर्जनाः कुकु
राः कुंतयश्चमिथस्ततस्तेऽथविसृज्यसौहृदं १८

मसाबलात्कारिताः दाशार्हादयोनव
तद्वंश्याः अर्बुदामाथुराः शूरसेनाश्चतत्तद्देशीयाः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्रतियोगिवाचित्वाद्भ्रातरो मातुला इत्यादि द्रष्टव्यं १८
मित्रैश्च मित्राणि च अहन् हतवंतः १९ धन्वसु धनुःषु जह्रुः जगृहुः २० परिघालो

पुत्रा अयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः मित्राणि मित्रैः
सुहृदः सुहृद्भिर्ज्ञातींस्त्वहनन्ज्ञातय एव मूढाः १९ शरेषु हीयमानेषु भज्यमानेषु
धन्वसु शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः २० तावज्रकल्पा ह्यभवन्परिघा
मुष्टिना भृताः जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते २१ प्रत्यनीकं मन्यमाना ब
लभद्रं च मोहिताः हंतुं कृतधियो राजन्नापन्ना आततायिनः २२ अथ तावपि संक्रु
द्धावुद्यम्य कुरुनंदन एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि २३

हृदङ्गाः भृता धृताः त
द्विषो कृष्णमपि २१ प्रत्यनीकं प्रतिपक्षं २२ एरकामुष्टिरूपौ परिघावुद्यम्य २३

स्पर्द्धानिमित्तः क्रोधः कुलं क्षयं निन्ये २४ २५ पौरुषं योगं परमपुरुषध्यानलक्षणं तमे
वाहसंयोऽयेति मानुषं लोकं परलोकं मनुष्यरूपतां वा २६ धरोपस्थे भूतले २७

ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा
वनं २४ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः अवतारितो भुवो भार इति मेनेऽवशेषि
तः २५ रामः समुद्रवेलायां योगमास्थाय पौरुषं तत्याज लोकं मानुष्यं संयोज्यात्मा
नमात्मनि २६ रामनिर्याणमालोक्य भगवान् देवकीसुतः निषसाद धरोपस्थे
तूष्णीमासाद्य पिप्पलं २७ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया दिशो वितिमिराः कुर्वन् विधूम इव पावकः २८ ७ नमो नमः
भ्राजिष्णुरूपं २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवानुवर्णयति श्रीवत्सांकमितिचतुर्भिः २९ सुंदरास्मितंवक्त्राब्जंयस्मिन्तत्पुंड
रीकवदभिरामेसुंदरेअक्षीणीयस्मिन्तत् ३० ३१ वनमालयापरितान्यंगानिय

श्रीवत्सांकंघनश्यामंतप्तहाटकवर्च्चसं कौशेयांबरयुग्मेनपरिवीतंसुमंगलं २९
सुंदरास्मितवक्त्राब्जंनीलकुंतलमंडितं पुंडरीकाभिरामाक्षंस्फुरन्मकरकुंडलं ३०
कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः हारनूपुरमुद्राभिःकौस्तुभेनविराजितं ३१
वनमालापरीतांगंमूर्तिमद्भिर्निजायुधैः कृत्वोरौदक्षिणेपादमासीनंपंकजारुणं ३२
मुसलावशेषायःखंडकृतेषुर्लुब्धकोजरा मृगास्याकारंचरणंविव्याधमृगशंकया ३३

स्मिन्तत् निजायुधैश्चपरितांगंपंकजारुणंवामंपाददक्षिणेऊरोकृत्वाआसीनंरूप
बिभ्रत् ३२ जरानामकश्चिल्लुब्धकोमृगायुःमृगस्यास्यमिवाकारोयस्यतंचरणं ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४ ३५ ३६ ३७ ब्रह्मशापप्रकृतमेतन्नतवापराधइतिचेदतआह यस्यतवात्मयो
गरचितंस्वाधीनमायारचितंविरिंच्यः अस्यतनयारुद्रादयश्चयेचान्येगिरांपत

चतुर्भुजंतंपुरुषंदृष्ट्वासप्रकृतकिल्बिषः भीतःपपातशिरसापादयोरसुरद्विषः ३४
अजानताकृतमिदंपापेनमधुसूदन क्षंतुमर्हसिपापस्यउत्तमश्लोकमेनघ ३५
यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनं वदंतितस्यतेविष्णोमयासाधुकृतंप्रभो
३६ तन्माशुजहिवैकुंठपाप्मानंमृगलुब्धकं यथापुनरहंत्वेवंनकुर्यांसदतिक्रमं ३७
यस्यात्मयोगरचितंनविदुर्विरिंचोरुद्रादयोस्यतनयाःपतयोगिरांये त्वन्माययापि
हितदृष्टयएतदंजःकिंतस्यतेवयमसद्गतयोगृणीमः ३८ योवेदद्रष्टारःतेपिनावि
दुःतस्यतेअचिंत्यमायस्यएतत्ब्रह्मशापादिअंजसाऽसद्गतयःपापयोनयोवयंकिंगृ
णीमः कथंवर्णयामःअतस्त्वदास्त्वंआशुमांजहीतिभावः ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३९ इच्छाशरीरिणेत्यस्यायंभावः शुद्धसत्वमयींनिजांश्रीमूर्तिमंतर्द्धायतत्प्रतिकृत्यैवंविडंबन
मात्रमिति एतदेवस्फुटीकरिष्यति देवादयोब्रह्ममुख्याइत्यादिना ४० ४१ तंपतितंतत्रदृष्ट्वा

श्रीभगवानुवाच माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे याहित्वंमदनुज्ञातः स्वर्गंसुकृ
तिनांपदं ३९ इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा त्रिःपरिक्रम्यतंनत्वाविमानेनदि
वंययौ ४० दारुकःकृष्णपदवीमन्विच्छन्नाधिगम्यतां वायुंतुलसिकामोदमाघ्रायाभिमु
खंययौ ४१ तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्वत्थमूलेकृतकेतनंपतिं स्नेहप्लुतात्मा
निपपातपादयोरथादवप्लुत्यसबाष्पलोचनः ४२ अपश्यतस्त्वच्चरणांबुजंप्रभोदृष्टिः
प्रनष्टातमसिप्रविष्टा दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रनष्टे ४३

तस्यपादयोर्निपपात ४२ ०

उदीक्षमाणस्यसूतस्यसतः ४५ ४६ निर्याणंयोगमार्गेण मद्दृशाम्मितीछाशरीराभि

इतिब्रुवतिसूतेवैरथोगरुडलांछनः खमुत्पातराजेंद्रसाश्वध्वजउ
दीक्षतः ४५ तमन्वगछनूदिव्यानिविष्णुप्रहरणानिच तेनातिविस्मि
तात्मानंसूतमाहजनार्दनः ४६ श्रीकृ।।उवाच।। गछद्वारवतींसूतज्ञा
तीनांनिधनंमिथः संकर्षणस्यनिर्याणंबंधुभ्योब्रूहिमद्दशां ४७ द्वार
कायांचनस्थेयंभवद्भिश्चसबंधुभिः मयात्यक्तांयदुपुरींसमुद्रःप्लाव
यिष्यति ४८ ।।७।।

सायेण ४७ ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवितारक्ष्यमाणाः इंद्रप्रस्थंगमिष्यथेतिब्रूहीतिपूर्वेणान्वयः ४९ मन्मायारचनामे
तांविज्ञायेतिनिजश्रीमूर्त्तेरंतर्हितत्वाद्यथाशोकंमाकुर्वित्यर्थः कुलस्यविनष्टत्वात्तदुर्म

स्वंस्वंपरिग्रहंसर्वंआदायपित्तरोचनः अर्जुनेनाविताः सर्वइंद्रप्रस्थंग
मिष्यथ ४९ त्वंतुमद्धर्ममास्थायज्ञाननिष्ठउपेक्षकः मन्मायारचनामे
तांविज्ञायोपशमंव्रज ५० श्रीशुकउवाच इत्युक्तस्तंपरिक्रम्यनमस्कृ
त्यपुनःपुनः तत्पादौशीर्ष्ण्युपाधायदुर्मनाः प्रययोपुरीं ५१ इतिश्री
भागवतेमाहापुराणेएकादशस्कंधेमौसलेकुलक्षयेत्रिंशत्तमोध्यायः॥

नाः ५१ इतिएका॰त्रिंशोध्यायः॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकत्रिंशे स्वकं धामजगामभगवानितः तमेवानुययुःश्रीसावसुदेवादयस्ततः देवा
न्यहून्विधायारोहण्योदेवान्विधायच श्रीकृष्णः स्वेछया धामस्वतन्वैवसमाविश

श्री शु क उ वा च अथतत्रागमद्ब्रह्माभवान्याचसमंभवः महेंद्रप्रमु
खादेवामुनयः सप्रजेश्वराः १ पितरः सिद्धगंधर्वाविद्याधरमहो
रगाः चारणायक्षरक्षांसिकिंनराप्सरसोद्विजाः द्रष्टुकामाभग
वतोनिर्याणंपरमोत्सुकाः २

त् मुनयः सनकादयः प्रजेश्वरामरीच्यादयः १ द्विजाग
रुडलोकवासिनः पक्षिणः मैत्रेयादयोवा भगवतोपिनिर्याणंद्रष्टुकामाः संतः ३१८
परमोत्सुकास्तत्रागमत् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषामौत्सुक्यकृतं महोत्सवमाह सार्द्धेन गायंतश्चेति ३ विभूतीः इंद्रादीश्च पक्ष्मनेत्रेन्य
मीलयदित्यत्रायं भावः पूर्वं ब्रह्मादिभिः सलोकात्लोकपालान्नः पाहि वैकुंठ किंकरा
निति प्रार्थितत्वादिदानीं च स्वं स्वं लोकं प्रति नेतुमागतत्वात्तद्धुपुच तेषु दाक्षिण्यात्ता

गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च ववृषुः पुष्पवर्षाणि विमा
नावलिभिर्नभः कुर्वंतः संकुलं राजन् भक्त्या परमया युताः ३ भग
वान्पितामहं वीक्ष्य विभूतीरात्मनो विभुः संयोज्यात्मनि चात्मानं प
द्मनेत्रेन्यमीलयत् ४

न्वंचयितुं समाधिमिव कुर्वन्नेत्रे न्यमीलयदिति ४ नमो रु
क्मिणिकांताय नमो नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰र॰
३१९

योगिनामिवस्वछंदमृत्युभ्रमंवारयतिलोकाभिरामामिति अयमर्थः योगिनोहिस्व
छंदमृत्यवः स्वतनुमाग्नेय्यायोगधारणंदग्ध्वालोकांतरंप्रविशंति भगवांस्तुनतथाकिं
तुअदग्ध्वैवस्वतनुसहितएवस्वकंधामवैकुंठाख्यमविशत् तत्रहेतुः लोकानामभि
रामः अभितोरमणंस्थितिर्यस्यांतांजगदाश्रयत्वेनजगतोपिदाहप्रसंगादित्यर्थः

लोकाभिरामांस्वतनुंधारणाध्यानमंगलं योगधारणयाग्नेय्यादग्ध्वाधामाविशत्स्वकं ५

किंच धारणायाध्यानस्यचमंगलंशोभनंविषयं इतरथातयोर्विषयत्वंस्यात्तदस्य
तेचायाप्युपासकानांतथैवतद्रूपसाक्षात्कारफलप्राप्तिश्चेतिभावः इच्छाशरीराभि ३१९
प्रायेणवायथाश्रुतमेवास्तुतत्रापिलोकाभिरामामित्यादिविशेषणानामानर्थक्य
प्रसंगात् तदयदग्ध्वातिरोधायनिर्गतइत्येवसांप्रतं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदानुस्वंस्वमेवलोकमागमिष्यतीतिसंभ्रमेणदेवादिकृतः सर्वतोदुंदुभिनादपुष्प
वृष्ट्यादिमहोत्सवोऽभवदित्याहदिवीति भूमेः सकाशात्कृष्णमनुययुः ६ तदाश्री

दिविदुंदुभयोनेदुः पेतुःसुमनसश्चखात् सत्यंधर्मोधृतिर्भूमेः
कीर्तिश्रीश्चानुतंययुः ६ देवादयोब्रह्ममुख्यानविशंतंस्वधा
मनि अविज्ञातगतिंकृष्णंददृशुश्चातिविस्मिताः ७ नमोनमः

कृष्णेंतर्हितेसतिकुत्रोगतइतिवितर्कयंतोऽपिब्रह्ममुख्यादेवादयःस्वधामनिविशं
तंश्रीकृष्णंनददृशुः तत्रहेतुः अविज्ञातगतिमिति क्वचित्क्वचिद्ददृशुश्चततोऽतिविस्मि
ताबभूवुरित्यर्थः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविज्ञातगतित्वं दृष्टांतेन स्पष्टयति सौदामन्या गतिर्यथा मर्त्यैर्न लक्ष्यते देवैस्तु ल
क्ष्यते तथाभ्रमंडलं हित्वा गच्छतः श्रीकृष्णस्य गतिर्देवैरपि न लक्ष्यते किंतु तत्पार्षदैरे
वेत्यर्थः ८ ९ अभिप्रायापरिज्ञानतः प्रथमं क्लिष्टं दृष्टांतेनास्पष्टमुक्तेह दृष्टं दृष्ट्वा पुन

सौदामन्या यथाकाशे यांत्या हित्वाभ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य देव
तैः ८ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः विस्मितास्तां प्रशंसंतः स्वं स्वं लोकं ययुस्त
दा ९ राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य सृष्ट्वात्मने
दमनुविश्य विहृत्य चांते संहृत्य चात्ममहिनोपरतः स आस्ते १

स्त्वमेवार्थं प्रपंचय
तिराजन्निति त्रिभिः परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु जननाप्ययेहाः आवि ३२०
र्भावतिरोभावचेष्टाः मायया अनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करणमात्रमेवेहि नटोयथाः विकृतएवनानारूपैजन्मादीन्विडंबयतितद्वत् आस्तां
तावद्यादवादिषुजन्मादिशंकाविश्वसर्गनिरोधादिष्वप्यसाववविकृतएवास्तइत्याहस्र
ष्ट्वेति आत्मनास्वयमेवेदंजगत् सृष्ट्वा अंतर्यामित्वेनानुविश्य आत्ममहिनास्वम
हिम्नाआस्ते १० नपुनरन्यथामंतव्यंयतोऽस्मिन्नेवावतारेतत्प्रभावोनिरतिशयोदृष्ट

मर्त्येनयोगुरुसुतंयमलोकनितंत्वांचाऽनयच्छरणदःपरमास्त्रदग्धं जिग्येंतकांतकमपी
शमसावनीशः किंस्वावनेस्वरनयन्मृगयुंसदेहं ११

इत्याहमर्त्येनेति यमेनस्वलोकंप्र
तिनीतंगुरुसुतंमर्त्येनतेनैवशरीरेणयआनयत् आनीतवान् शरणदः शरणागतरक्ष
कः त्वांचब्रह्मास्त्रदग्धंयोरक्षितवान् यश्चअंतकानामंतकमपिईशंश्रीरुद्रंबाणसंग्रा
मेजितवान् मृगयुलुब्धकंसदेहंतेनैवदेहेनस्वःस्वर्गंअनयतनिन्ये असौस्वावनेस्वरक्षणे
अनीशःअसमर्थःकिं ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयदिसमर्थस्तर्हिकिंचित्कालमत्रैवतेनवपुषाकिंनातिष्ठत् तत्राह तथापीति य
द्यपिविक्तप्रकारेणाशेषस्यजगतांस्थित्यादिषुअनन्यहेतुर्निरपेक्षएवंकारणंस्व
यं यद्यस्मादशेषशक्तिधृक् तथापियादवान् संहृत्य निजंवपुः अत्रशेषितुंप्र

।तथाप्यशेषस्थितिसंभवाप्ययेष्व नन्यहेतुर्यदशेषशक्तिधृ
क् नैच्छत्प्रणेतुंवपुरत्रशेषितंमर्त्येनकिंस्वगतिंप्रदर्शयन् ।१२

६

णेतुंकर्तुंनैच्छत् किंतुस्वमेवलोकमनयत् तत्रहेतुः मर्त्येनदेहेनकिंनाकिंचित्का
र्यमितिस्वस्थानामात्मनिष्ठानांदिव्यांगतिमेवप्रकृष्टांदर्शयन् अन्यथातेपिदि ३२७
व्यांगतिमनाहृत्ययोगबलेनदेहसिद्धिंविधायात्रैवरंतुंयतेरन् तन्माभूदित्येतदर्थ
मितिभावः ।१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतां कृष्णप्रकारां पदवीं गतिं १३ तदेवं भगवता स्वं लोकं गच्छता वसुदेवादीनामपि

य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां प्रयतः कीर्त्तयेद्भक्त्या तामेवा
प्नोत्यनुत्तमां १३ दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः पतित्वा चर
णावस्रैर्न्यषिंचत्कृष्णविच्युतः १४ कथमायास निधनं वृष्णीनां कृ
त्स्नशो नृप तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः १५ तत्र स्म
त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः व्यसवः शेरते यत्र ज्ञातयो घ्नंत
आननं १६

तत्वास्सये यत्र पाय श्रिंति तत आसीत्तमाह दारुक इत्यादिना १४ १५ १६ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णरामावपश्यंतः १७ १८ १९ सद्उक्तिभिः सत्याअवितथागक्तयोयेषु

देवकीरोहिणीचैववसुदेवस्तथासुतौ कृष्णरामावपश्यंतःशोकार्त्ताविजहुःस्मृ
तिं १७ प्राणांश्चविजहुस्तत्रभगवद्विरहातुराः उपगुह्यप तींस्तांस्ताश्चितामा
रुरुहुस्त्रियः १८ रामपत्न्यश्चतद्देहमुपगुह्याग्निमाविशन् वसुदेवपत्न्यस्तद्गा
त्रंप्रद्युम्नादीन्हरेःस्नुषाः कृष्णपत्न्योविशन्नग्निंरुक्मिण्याद्यास्तदात्मिकाः १९
अर्जुनःप्रेयसःसख्युःकृष्णस्यविरहातुरः आत्मानंसांत्वयामासकृष्णगीतैः
सद्उक्तिभिः २०
तैः नाहंप्रकाशःसर्वस्ययोगमायासमावृतः मूढोयंनाभिजानातिलोकोमामज ३२२
मव्ययमित्यादिभिः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदानापतातितदाकिंकर्त्तव्यंतत्राहशयीतेति अनुपक्रमः निरुद्यमः दिष्टभुक्दैवमे
वप्राप्तकामिति धैर्यवान् ३ ननुसमर्थोपिशयितैवकिं ॐ मित्याहऊंजरति ऊंज्ञ इंद्रि

शयीताहानिभूरीणि निराहारोनुपक्रमः यद्दिनोपनमेद्ग्रासो महाहिरि
वदिष्टभुक् २ ऊंजः सहोबलयुतं बिभ्रद्देहमकर्मकं शयानोवीत
निद्रश्चनेहेतेंद्रियवानपि ४ श्रीकृष्णजयकृष्ण ७ ॥७ ॥७॥

यबलंसहोमनोबलं बलंशारीरमेवत्तयुक्तमपिदेहमकर्मकमेव बिभ्रत्शयानए
वभवेत् वीतनिद्रः स्वार्थेदत्तदृष्टिश्चभवेत्नपुनरीहेत इंद्रियवानपीतिदर्शनादिव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुद्राच्छिक्षितमाहमुनिरिति बहिःप्रसन्नश्चासौ अंतर्गंभीरश्च दुर्विगाह्यः एवंभू
तश्चतिपरिकलयितुमशक्यः अलक्ष्याभिप्रायत्वात् दुरत्ययः अनतीक्रमणीयः
तेजस्वित्वात् अनंतपारःकालतोदेशतश्चापरिछेद्यःस्वरूपाविर्भावात् अक्षोभ्यः

मुनिःप्रसंन्नगंभीरोदुर्विगाह्योदुरत्ययः अनंतपारोह्यक्षोभ्यःस्तिमि
तोदइवार्णवः ५ समृद्धकामोहीनोवानारायणपरोमुनिः नोत्सर्प्पे
तनशुष्येतसरिद्भिरिवसागरः ६

अविकार्यःरागाद्यभावात् स्तिमितोदः
निश्चलोदकोऽर्णवोयथातद्वदेतैर्गुणैर्भवेदित्यर्थः ५ किंच वर्षासुसरिद्भिःसमृद्धोपि
सागरोयथानोत्सर्प्पेतग्रीष्मेतद्विहीनोपिनशुष्येत् तथासमृद्धकामस्तद्विहीनोवा ७
नहृष्येत् नशोचेदित्यर्थः अत्रहेतुःनारायणपरःनतुविषयपरइति ६ नमोनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपगंधस्पर्शशब्दरसैः पंचाभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीनाहताः अ
तस्तेषु नासक्तो पंचैते गुरवः तदुक्तं पतंगमातंगकुरंगभृंगमीनाहताः पंचभिरेव

दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः प्रलोभितः पतत्यंधे तमस्य
ग्नौ पतंगवत् ७ योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मू
ढः प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ८ नमः

पंच एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंचेति तत्र रूपविलाससमोहि
तो नश्यतीति पतंगाच्छिक्षितमाह दृष्ट्वेति तस्याः भावैः प्रलोभितः ७ स्त्रियमुपलक्ष
णीकृत्यैतत्प्रपंचयति योषिदिति ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰
१८

क

मधुँराछि ाश्रितमाहस्तोकमिति गृहानगृहस्थान् अहिंसन् अपीडयन् अयंभावः य
थु थामैकरोविशिष्टगंधलोभेनैकास्मिन्नेवपद्मेवसन्स्तमयेमुकुलितेतस्मिन्बध्य

स्तोकंस्तोकंयसेङ्ग्रासंदेहोवर्त्तेतयावृत्त्या गृहानहिंसन्नातिष्ठेद्
त्तिंमाधुरींमुनिः ९ अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यःकुशलोन
रः सर्वतःसारमादद्यात्पुष्पेभ्यइवषट्पदः १०

क

तेएवंमुनिरपिगुणलोभेनैकमेवगृहमाश्रितस्तन्मोहेनबध्यतेइति ॥ किंच अणुभ्य

श्री १० ॥

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विविधोमधुकृत मधुकृंततिपुष्पादाछिद्यगृह्णातीतिमधुकृद्भ्रमरः मधुकरोति
आहारत्वेनस्वरूपेण चेतिमधुमक्षिकाच तत्रप्रथमाछिक्षितमुक्तंद्वितीयाछिक्षि
तमाह सायमिदंभोक्ष्यामिश्वः इदंभोक्ष्यामीतिभिक्षितमन्नादिनसंगृह्णीतकिं

सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षितं पाणिपात्रोदरा
मत्रोमाक्षिकेवनसंग्रही ॥ सायंतनंश्वस्तनंवानसंगृ
ह्णीतभिक्षुकः मक्षिकाश्वसंगृह्णन्सहतेनाविनश्यति ४२

सायंतनमिति ४

तुपाणिपात्रस्तन्मात्रग्राहीयद्वाउदरमेवामत्रंपात्रंयस्यसः एकभिक्षायामुदरमा
त्रग्राहीभवेत् संग्रहीतुमाक्षिकेवनभवतिनजीवतीत्यर्थः ॥ एतद्विवृणोतिपुनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्पर्शसक्तिर्नाश हेतुरिति गजाच्छिक्षितमित्याह पदापीति पादेनापिदारवींदारुम रू
यीमपि गजोहि करिणीं प्रदर्शनि खातेतृण पिहित गर्त्ते निपात्य बध्यते १३ किंच ना
धिगच्छेदिति नोपगच्छेत् १४ त्यागभोगविहीनो धनसंचयः परगामी भवत्यत्र मधु

पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि स्पृशन् करीव बध्येत करिण्या अंगसंगतः १३ संग
नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः बलाधिकैः स हन्येत गजैरन्यैर्गजो
यथा १४ न देयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितं भुंक्ते तदपि तच्चान्यो मधुहेवा
र्थविन्मधु १५

हा गुरुरित्याह न देयमिति न दत्तो बलवान् भुंक्ते तदप्यन्यस्तच्चान्यः म
धुहा माक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ननु सुगुप्तं धनं कथमन्यो ज्ञास्यतीति ह ७९
रिष्यति चेति तत्राह अर्थवित् लिंगैरर्थं तदुपायं च वेत्तीत्यर्थवित् यथा मधुहा न द्रूको
टरादिगतं मधु वेत्ति हरति च १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वोयमं विनापि भोगः संभवतीत्यत्रापि स एव गुरुरित्याह सुखदुःखेति आशासा
नानामिति विभक्त्यंवेवर्णलोप आर्षः यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ त
योरन्नमदत्त्वा तु भुक्त्वा चांद्रायणं चरेदिति गृहिणामावश्यकत्वेन दानविधाना

सुखदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः मधुहेवाग्रतो भुंक्ते यन्निर्वैरगृहमेधि
नां १६ ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमो
हितात् १७ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां आसां क्रीडनको वश्य
ऋष्यशृंगो मृगीसुतः १८

त् १६ हरिणाच्छिक्षितमाह ग्राम्येति भगवद्गीतं तु शृणुया
देव मृगयोर्लुब्धकस्य १७ हरिणशब्दादेव हरिणीसुत ऋष्यशृंगोऽपि गुरुर्ज्ञातव्य इत्या
ह नृत्येति वश्यो बभूवेति शेषः १८ ७ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसासक्तिर्नाशहेतुरितिमीनाच्छिक्षितमित्याहजिह्वयेति अतिप्रमाथिन्याअतिक्षो
भिकयादुर्जयया ऋच्छतिप्राप्नोतिबडिशैः आमिषवद्भिर्लोहकंटकैः १९ दुर्जयत्वमु
पपादयतिइंद्रियाणीतिद्वाभ्यां अयंभावः यथाहारत्यजनेनान्येंद्रियजयः केवलं

जिह्वयातिप्रमाथिन्याजनोरसविमोहितः मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु
बडिशैर्यथा १९ इंद्रियाणिजयंत्याशुनिराहारामनीषिणः वर्जयित्वा
तुरसनंतन्निरन्नस्यवर्द्धते २०

भवति रसनेंद्रियंवर्द्धते यदितुभुज्यतेतर्हि
पुनश्चरसासक्त्यासर्वेंद्रियक्षोभः स्यात् अतोरसासक्तिंपरित्यज्यौषधवद्भुंजीते
तिप्राणवृत्त्यैवसंतुष्येदित्यत्रोक्तमपिरसनस्यातिदुर्जयत्वज्ञापनायोक्तमत्रेतिवि
शेषः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१ पिंगलायानैराश्यंशिक्षितमितिवक्तुंतदाख्यानमाहपिंगलेत्यादिना मेमयाशिक्षि
तं २२ स्वैरिणीकामचारिणी संकेतेरतिस्थाने २३ तानुवितवतःसधनानअतए

॥ तावज्जितेंद्रियोनस्याद्विजितान्येंद्रियःपुमान् नजयेद्रसनंयावज्जि
तंसर्वंजितेरसे २१ पिंगलानामवेश्यासीद्विदेहनगरेपुरा तस्यामेशि
क्षितंकिंचिन्निबोधनृपनंदन २२ सास्वैरिण्येकदाकांतंसंकेतउपनेष्य
ती अभूत्कालेबहिर्द्वारिबिभ्रतीरूपमुत्तमं २३ मार्गआगच्छतोवीक्ष्य
पुरुषान्पुरुषर्षभ तांछुल्कदान्वित्तवतःकांतान्मेनेर्थकामुका २४

वशुल्कदानमूल्यदानकांतानुसुरतार्हान २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए
७

अपिसंभावनायांअन्योपिमामुष्यैपैतीत्येवंदुराशयेसुत्तरेणान्वयः २५ द्वार्यवलंव
मानापुनःप्रविशतीपुनर्निर्गछती एवंकुर्वतीनिशीथंअर्द्धरात्रंप्राप २६ निर्वेदंअलं

आगतेष्वःपयातेषुसासंकेतोपजीविनी अथन्योवित्तवान्कोपिमामुप्ये
ष्यतिभूरिदः २५ एवंदुराशयाध्वस्तनिद्राद्वार्यवलंबनी निर्गछतीप्र
विशतीनिशीथंसमपद्यत २६ तस्याविताशयाशुष्यद्वक्राया दीनचेत
सः निर्वेदःपरमोजज्ञेचिंताहेतुःसुखावहः २७ तस्यानिर्विणचित्तायागी
तंशृणुयथामम २७

बुद्धिः वित्तचिंतैवहेतुर्यस्यसः यथायथावत् ममम‍ंत्रःशृणु २७ नमोरामचंद्राय

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प

ननुकिंनिर्विण्णायागीतश्रवणेनतत्राह हियस्मात्पुरुस्याशापाशानां निर्वेदोऽसिःयथा शा

त्वयाछेत्तातत्र [illegible] हेतुः नहीति अंगहेराजन् २८ अविजितात्मत्वेहेतुः याहंबालि

निर्वेदआशापाशानांपुरुषस्ययथात्यसिः नह्यंगाजातनिर्वेदोदेहबंधंजिहा

सति २८॥पिंगलोवाच॥ अहोमेमोहविततिंपश्यताविजितात्मनः याकांताद

सतः कामंकामयेयेनबालिशा २९ संतंसमीपेरमणंरतिप्रदंवित्तप्रदंनित्यमिमंविहा

य अकामदंदुःखभयाधिशोकमोहप्रदंतुच्छमहंभजेज्ञा ३० नमोभगवते

शाविवेकशून्यात्स्याः कुतः येनकारणेनअसतः तुच्छान्नरात्कामंकामये २९ बा

लिशात्वंप्रपंचयतिसंतमितिचतुर्भिः समीपेसंतं अंतर्यामित्वात् रमंअपरोक्षसमीश्वरं

३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए
८२

अतिविगर्ह्यांविनिंद्यायग्रवार्त्ताजीविकातया कुतः सांकेत्येनयावृत्तिःतया बहुव्रीहि
णास्वविशेषणंवा परितापंप्रपंचयातिस्त्रैणादिति स्त्रीलंपटात् अथच अर्थतृषो

अहोमयात्मापरितापितोरथ्यासांकेत्यवृत्त्याऽतिविगर्ह्यवार्त्तया
स्त्रैणान्नरादर्थतृषोनुशोच्यात्क्रीतेनवित्तंरतिमात्मनेछ्तानी ३१

लुब्धात् अतएवानुशोच्यान्नरात् याहंवित्तंरतिंचेछ्तीतयावृत्त्यात्मापरितापितः
केनवित्तामिछ्तीति तेननरेणक्रीतेनस्वयंविक्रीतेनात्मनादेहेन ३१ रामजीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहोधिकुमांयाहमतिबीमास्तिंतंभजामीत्याहयदिति वंशोनामस्थूणासुनिहित
स्तिर्यग्वेणुः वंश्यास्तास्मिनुभयतोनिहितावेणवः आस्थिभिरेवनिर्मितावंशादयो
यस्मिन्तत् तत्रपृष्ठेदीर्घमास्थियत्सवंशः पार्श्वास्थीनि वंशानिस्थूणाहस्तपादा

यदास्थिभिर्निर्मितवंशपवंश्यस्थूणंत्वचारोमनखैःपिनद्धं क्षरन्नवद्वारमगारमेतत्
विण्मूत्रपूर्णंमदुपैतिकान्या ३२ विदेहानांपुरेह्यस्मिन्नहमेकैवमूढधीः यान्यमिछ
त्य सत्यस्मादात्मदात्कामम्च्युतात् ३३

स्थीनितथात्वचारोमभिर्नखैश्चपिनद्धं
छादितंतथाःपिक्षरंतिनिवद्वाराणियास्मिन्तत्एवंभूतागाररूपंन्शरीरमेतत् मत्
मत्तोःन्याकावाकांतबुध्याउपैतिसेवते ३२ सत्संगतौसत्सामप्य ... होममंमोहइत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ए
८३

हविर्देहानामिति याऽहमसती अच्युतादन्यं कामं भोगमिछती सा ३३ एवं निर्विण्णासती
अतः परमेव करिष्यामीत्याह सुहृदिति अयमीश्वरः आत्मनैव आत्मानमेव निवे
घतं विक्रीय विशेषेण क्रीत्वा अनेनैव सह रेमे रमा लक्ष्मीर्यथा ३४ अन्यस्यासेव्य

सुहृत्प्रेष्ठतमो नाथ आत्माचायं शरीरिणां तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ३४
कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः आद्यन्तवन्तो भार्याया देवा वा कालविद्रु
ताः ३५

तं दर्शयति कियदिति आद्यन्तवन्तो ये कामाः विषयाः कामदा नरा वा देवा वा कालकलि
ताः भार्यायाः कियत्प्रियं कृतवन्तः न किंचित् अतो नेहामुत्र च तद्व्यतिरिक्तः कोपि से
व्योस्तीत्यर्थः ३५ ८३

एवंनिश्चिंस्यस्वभाग्यमाभिनंदतिनूनमिति दुष्टाआशायस्यास्तस्याःमे ३६ ननुधना
प्राप्त्याक्लिष्टाऽसिकथंविष्णुःप्रीतः तत्राहमैवमिति मंदभाग्यायेदहंस्यांतर्ह्येवंनिर्वे

नूनंमेभगवान्प्रीतोविष्णुःकेनापिकर्मणा निर्वेदोयंदुराशायायन्मेजा
तःसुखावहः ३६ मैवंस्युर्मंदभाग्यायाःक्लेशानिर्वेदहेतवः येनानुबंधं
निर्हृत्यपुरुषःशममृच्छति ३७ तेनोपकृतमादायशिरसाग्राम्यसं
गताः स्त्यक्त्वादुराशाः शरणंव्रजामितमधीश्वरं ३८

दहेतवःक्लेशानस्युरित्य
र्थः येननिर्वेदेनअनुबंधंगृहादिकंनिर्हृत्यपरित्यज्य ३७ अतःतैश्रीविष्णुनाउपकृ न
तंकृतमुपकारंनिर्वेदलक्षणं ग्राम्येषुनरेषुविषयेषुवासंगताः ३८ नमोभगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंभ्रजसितदाहसंतुष्टेति ३९ ननुब्रह्मादीन्हित्वाअमुनैवेतिकोयंनियमःतत्राह
संसारेति मुषितेक्षणंअपहृतविवेकं ४० तर्हिकिमात्मत्राणोपाधिनाभजिष्यसि
नतत्रसर्वतोनिर्विघ्नभगवद्भजनेप्रवृत्तस्यात्मनएवसमर्थत्वादित्याह आत्मैवेति

संतुष्टाश्श्रद्दधत्येतयथालाभेनजीवति विहराम्यमुनैवाहमात्मनारमणेनवै
३९ संसारकूपेपतितंविषयैर्मुषितेक्षणं ग्रस्तंकालाहिनात्मानंकोऽन्यस्त्रातु
मर्थीश्वरः ४० आत्मैवह्यात्मनोगोप्तानिर्विद्येतयदाखिलात् अप्रमत्तइदंपश्ये
त्ग्रस्तंकालाहिनाजगत् ४१

यदाएवंजगत्पश्येत्तत्श्चाप्रमत्तः सन्निखिलात्इहामुत्रभो
गान्निर्विद्येततदाहिआत्मैवात्मनोगोप्तेत्यन्वयःअतः केवलंप्रेम्णैवभजामीतिभावः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कांतस्यतर्षोभि लाषस्ततोजातं ४२ ४३ इतिश्रीभागवते महापुराणे एकादशस्कंधे टीकायां अष्टमोध्यायः ॥८॥ नवमेकुररादिभ्योदेहतश्चोपशिक्षितं श्रुत्वायदुः कृता

ब्राह्मण उवाच एवंव्यवसितमतिर्दुराशांकांततर्षजां छित्वोपशममास्थायशय्या मुपविवेशसा ४४ आशाहिपरमंदुःखंनैराश्यंपरमंसुखं यथासंछिद्यकांताशांसु खंसुष्वापपिंगला ४५ इतिश्रीभागवते एकादशस्कंधे अष्टमोध्यायः ॥८॥ ७ श्री ब्राह्मण उ० ॥ परिग्रहोपिदुःखाययद्यत्प्रियतमंनृणां अनंतंसुखमाप्नोतितद्विद्वान्

यस्त्वकिंचनः

र्थोपि कृदितिलक्ष्णेनवर्णितं १ कुररा च्छिक्षितमाह परिग्रहोहीति यद्यत्प्रियतमंतस्य तस्यपरिग्रहः तद्विद्वान् परिग्रहो दुःखमितिविद्वान् सन्यस्त्वकिंचनः सत्क्वापरिग्रहः न

भा०टी०

तदाहसामिषमिति अर्भकान्शिक्षितमाहनेति गेहपुत्रिणांनह्लतांयाभवतिसाचिंता। चमेनास्ति आत्मनैवक्रीडायस्य आत्मनिरतिःप्रीतिर्यस्य २ नन्वज्ञसर्वज्ञयोः किंसा।

सामिषंकुररंजघ्नुर्बलिनोयेनिरामिषाः तदामिषंपरित्यज्यसस्सु
खंसमविंदत २ नमेमानावमानौस्तोनचिंतागेहपुत्रिणां आत्म
क्रीडआत्मरतिर्विचरामीहबालवत् २ द्वावेवचिंतयामुक्तोपर
मानंदआप्लुतौ योविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः ४७

इत्ययंनैश्चिंत्यंपरमसुखमित्याहद्वाविति विमुग्धःअज्ञःजडः अनुद्यमः एवंभूतोयो बालः यश्चप्रकृतेः परमीश्वरंप्राप्तः तौद्वौ ४ वासुदेवाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमार्याः शिक्षितं वक्तुमाख्यायिकामाह कश्चिदित्यादिना घ्राणानान् स्वजरणायागतान् बंधुषु पित्रादिषु ५ शंखाः शंखवलयाः महर्घ यथा भवति तथा स्वनं चक्रुः ६ सा महती

कश्चित्कुमारी तात्मानं घ्राणानान् गृहमागतान् स्वयं तानर्हयामास सख्या पियातेषु बंधुषु ५ तेषामभ्यवहारार्थं शालीन्लहसि पार्थिव अवघ्नंसाः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ६ सा तत्तज्जुगुप्सितं मत्वा महती व्री डिता ततः बभंजैकैकशः शंखान् द्वौ द्वौ पाण्योरशेषयत् ७

बुद्धिमती तत्स्वयं शाल्यवहननं जुगुप्सितं च दरिद्रताद्योतकं एकैकशः क्रमेणैक मेकं बभंज स्वकराद पसारितवती ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
८६

निराभिदवथकूलनवती ॰ ननुकुमार्यास्तवचकथंसंगतिः तत्राह लोकानिति ९

उभयोरथ्यःभ्रूत्ताघोषोल्पःवर्घ्यं स्याःस्मशंखयोः तत्राप्येकंनिर
पिदद्देकस्मान्नामवत्ध्वनिः ८ अन्नाशिक्षामिमंतस्याउपदेशा
मरिंदम लोकाननुचरन्नेताल्लोकतत्वविवत्सया ९ वासेबहू
नांकलहोभवेद्वार्ताद्वयोरपि एकएवचरेत्तस्मात्कुमार्याइव
कंकणः १०

वासइति प्रथमांतपाठेकलहहेतु र्वार्तागोष्टीहेतुर्भवेदित्यर्थः १० नमोभगवते० ८६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्तैकाग्रतादृढतास्फूर्तिलक्षणसमाधिहेतुरितिशरकाराछिक्षितमित्याह मनइति तत्रो
पायमाह जितेति आसनजयेश्वासाधीनंमनोनिश्चलंभवति ननुक्षणंनिश्चलंसद

मनएकत्रसंयुंज्याज्जितश्वासोजितासनः वैराग्या
भ्यासयोगेनध्रियमाणमतंद्रितः ११ नमोनमः

पिमनोविषयवासनयायादिविक्षिप्येतसुषुप्ताविवसर्वथालीयतवातदाकिंत
त्राह वैराग्येति वैराग्येणाविक्षिप्यमाणंअभ्यासयोगेनलक्ष्येध्रियमाणंस्थिरीक्रि

कुमारं ९१

एकत्रेतिकुत्रतदाहयस्मिन्निति यत्तल्लयविक्षेपात्मकंमनः एतद्यस्मिन्परमानंदरूपे
भगवतिलब्धास्पदंसत्कर्मरेणन्कर्मवासनामुंचातितस्मिन् ननुकर्मवासनात्या
गेपिसुषुप्तिवल्लयोदुर्वारः नसत्त्वेनेतिवृद्धेनउपशमात्मकेनरजस्तमसोरभावेविक्षे

॥८७॥ यस्मिन्मनोलब्धपदंयदेतछनैः शनैर्मुंचतिकर्मरे
णुन् सत्वेनवृद्धेनरजस्तमश्चविधूयनिर्वाणमुपैत्यनिंधनं
१२

पलयाभावान्निर्वाणंअवृत्तिकंध्येयाकारेणावस्थानमुपैतिकुतः अनिंधनं इंधनंगुणाः
तत्कार्यंचतद्रहितं तदुक्तंयोगशास्त्रेमनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः याऽसं
प्रज्ञातनामासौसमाधिरभिधीयतइति १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चनद्वैतस्फूर्तिरित्याहतदेति बहिर्दर्शनादिनाअंतरंस्मृत्वा इषौगतात्मातस्यऋ
जुकरणेदत्तचित्तः भेरीघोषेरंतिकेव्रजंतंनृपतिमपिनवेदतद्वत् १३ सर्पात्शिक्षि
तमाहएकचारीति योगिसंमर्दस्यापित्यागेकुमारीगुरुः जनसंगत्यागेसर्पः सय

तदैवमात्मन्यवरुद्धचित्तोनवेदकिंचिद्बहिरंतरंवा यथेषुकारोनृपतिंव्रजंतमिषौग
तात्मानददर्शपार्श्वे १३ एकचार्यनिकेतःस्यादप्रमत्तोगुहाशयः अलक्ष्यमाण
आचारैर्मुनिरेकोल्पभाषणः १४

याजनाद्यंक्रमानएकाकीविचरतीतिनियतनिके
तरहितश्चसदाऽप्रमत्तश्चएकांतवासीच आचारैर्गतिभिः सविषोनिर्विषोवेतिन
लक्ष्यतेच असहायश्चमितभाषीचतद्वत्मुनिर्वर्तेतेत्यर्थः १४ रामकृष्णपरमा०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचग्रहारंभइति अध्रुवात्मनः नश्वरदेहस्य सुखंयथाभवतितथावर्द्धते १५ कारकसा
मग्रीनिरपेक्षात्केवलादीश्वराद्विश्वसृष्टिसंहारौवर्णनाभिदृष्टांतेनमयासंभाविनिव
क्तं प्रथमंसंहारप्रकारमाह एकइतिसार्द्धत्रयेण एकः कारकनिरपेक्षः पूर्वसृष्टमि

ग्रहारंभोतिदुःखाय विफलश्चाध्रुवात्मनः सर्पःपरकृतंवेश्म प्रविश्यसुखमेधते
१५ एकोनारायणोदेवः पूर्वसृष्टंस्वमायया संहृत्यकालकलयाकल्पांतइदमीश्वरः
१६ एकएवाद्वितीयोभूदात्माधारोखिलाश्रयः कालेनात्मानुभावेनसाम्यंनीता॰
सुशक्तिषु १७

दंजगत् कालकलयाकालरात्र्या संहृत्य १६ एकएवाद्वितीयः सजाती
यविजातीयभेदशून्योऽभूत् कारणभूतासुसत्वादिषुशक्तिष्वपिसाम्यंनीतासुस
तीषु १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणसाम्यंप्रधानं तदुपाधिः पुरुषः तयोरीश्वरः परावराणांपरेब्रह्मादयः अवरेअन्ये
चमुक्ताजीवास्तेषांपरमः प्राप्यआस्तेकुतःकैवल्यसंज्ञितः मोक्षशब्दाभिधेयः तत्र
हेतुः केवलेति निर्विषयः स्वप्रकाशः आनंदानांसंदोहः समूहः परमानंदरूपस्यर्थः

सत्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः परावराणांपरमआस्तेकैवल्यसं
ज्ञितः केवलानुभवानंदसंदोहोनिरुपाधिकः १८ केवलात्मानुभावेनस्व
मायांत्रिगुणात्मिकां संक्षोभयन्सृजत्यादौतयासूत्रमरिंदम १९ ७ ७

कुतः निरुपाधिकः १८ अतः केवलादेवसृष्टिंदर्शयति केवलेनात्मानुभावेनकाले
नसूत्रंक्रियाशक्तिप्रधानं महत्तत्वंसृजति जीवसंसारहेतुभूतेसूत्रेसृष्टेपितंमा
मैरितिसंबोधयतिअरिंदम अरीन्रागादीन्दमयितुंसमर्थ १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए
८९

सूत्रस्यैवव्यक्तिशब्देनोच्य मानस्यतामितिस्त्रीलिंगेनपरामर्शः त्रिगुणव्यक्तिंगु
णत्रयस्यकार्यं अतएवविश्वतोमुखंनानाविधं त्रिगुणात्मकंविश्वमहंकारद्वारे
णसृजं तीत्रिगुणकार्यस्यसूत्रसंज्ञायांकारणमाह यस्मिन्निति कारणभूतेसुम प्राणरूपेणतुजीवः संसरति २०

तामाहुस्त्रिगुणव्यक्तिंसृजंतीविश्वतोमुखं
यस्मिन्प्रोतमिदंविश्वंयेनसंसरतेपुमान् २०

ष्टिरूपेयस्मिन् इदंविश्वंप्रोतंग्रथितं वायुर्वैगौतमतत्सूत्रं वायुनावैगौतमसूत्रे
णायंचलोकः परश्चलोकः सर्वाणिचभूतानिसंदृब्धानीतिश्रुतेः येनवायात्मना ८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदेवंशिक्षितमर्थमुक्त्वाद्दृष्टांतमाहयथोति हृदयाउद्धृतांवक्त्रतः वक्त्रेणसंतत्यप्र
सार्यवितत्यक्रीडित्वा २१ भगवद्ध्यानपराणांतत्सारूप्यंनचित्रमितिपेशस्कृ
तोभ्रमरविशेषात्ज्ञानमित्याह यत्रयत्रेति सकलंएकाग्रं २२ कुड्यांप्रवेशितः

यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्त्रतः तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्व तू
रं २१ यत्रयत्रमनोदेहीधारयेत्सकलंधिया स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्सरू
पतां २२ कीटःपेशस्कृतंध्यायन्कुड्यांतेनप्रवेशितः यातितत्सात्मतांराजन्पूर्व
रूपमसंत्यजन् २३

निरुद्धः भयेनध्यायन् सात्मतां तत्सारूप्यंसाम्यतामितिपाठेत्वा
र्षता पूर्वरूपमसंत्यजन्नित्यस्याऽयमभिप्रायः यदातेनैवदेहेनान्यसारूप्यंदृश्य
तेतदाकिंवक्तव्यंदेहांतरेणसारूप्यंघटतइति २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स्क॰
९०

स्वदेहादेवाशिक्षितमाह स्वात्मेति स्वात्मनो देहाच्छिक्षितं २४ गुरुत्वे हेतुः विरक्ति
विवेकयोर्हेतुः विरक्तिहेतुत्वमाह सत्वनिधनं उत्पत्तिविनाशौ बिभ्रद्वस्म किं
च सततं संततं आर्त्युदर्कं दुःखमेवोत्तरोत्तरफलं बिभ्रत् यद्वा सततं आर्त्तिरेव उ

एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः स्वात्मोपशिक्षितां बुद्धिं शृणु मे वद
तः प्रभो २४ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्वनिधनं सततार्त्यु
दर्कं तत्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसंगः
२५

दर्क उत्तरफलं यस्य तत् सत्वनिधनं बिभ्रत् विवेकहेतुत्वमाह तत्वानीति यथा
यथावत् एवमस्युपकारित्वेऽपि देहे नैवास्था कर्त्तव्येत्याह तथापीति पारक्यं ९०
श्वसृगालादिभक्ष्यमिति निश्चितवान् २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सततात्स्युदर्कतां प्रपंचयतिजायेतिद्वाभ्यां यस्यदेहस्य प्रियचिकीर्षया भोगसंपा
दनेच्छायाजायादिवर्गान्वितन्वन्पुष्णातिपुरुषः कथंभूतः सक्लिष्टं यथाभवतित

॥७॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णातियत्प्रियचिकीरष
यावितन्वन् स्वांतेसकृच्छ्रमरुद्धधनः सदेहः सृष्ट्वाऽस्यबीजमवसीद
तिवृक्षधर्मा॥२६

याऽवरुद्धानिसंचितानिधनानियेनसः देहविशेषणंवासदेहः स्वांतेस्वस्यायुषों
तेअवसीदतिनश्यति किंच देहनाशेपिनदुःखसमाप्तिरित्याह अस्यपुरुषस्य
देहांतरबीजंकर्मसृष्ट्वेति वृक्षस्येव धर्मोयस्यसः २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच जिह्वेति अमुं देहं तदभिमानिनं पुरुषं वा एकतः रसं प्रति जिह्वा अपकर्षति आच्छिन
त्ति कर्हिकदाचित् तर्षापिपासाजलं प्रति शिश्नोऽवायं प्रति त्वक्स्पर्शं प्रति उदरं

॥ ॥ ८॥ जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं क
तश्चित् घ्राणोऽन्यतश्चपलदृक्क्वच कर्मशक्तिर्बह्व्यः सपत्न्य इव गेह
पतिं लुनंति २७

अन्नमात्रं प्रति श्रवणं शब्दं प्रति घ्राणो गंधं प्रति चपलदृक् रूपं प्रति क्वचकचित्
स्वस्वविषयं प्रति कर्मशक्तिः अन्यदपि कर्मेंद्रियं लुनंति त्रोटयंति २७ नमो भगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंदेहोगुरुरित्यादित्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्यदेहस्यातिदुर्लभ
त्वंदर्शयन्नीश्वरनिष्ठांविधत्तेसृष्ट्वेतिद्वाभ्यां पुराणिशरीराणिपुरुषंपुरुषदेहं ब्रह्म

सृष्ट्वापुराणिविविधान्यजयात्मशक्त्यावृक्षान्स
रीसृपपशून्खगदंशमत्स्यान् तैस्तैरतुष्टहृदयःपु
रुषंविधायब्रह्मावलोकधिषणंमुदमापदेवः २८

णोवलोकायअपरोक्षायधिषणाबुद्धिर्यस्मिंस्तं तदुक्तं तासांमेपौरुषीप्रियेति श्रुति
श्चपुरुषत्वेचाविस्तरामात्मेत्यादि ईश्वरोहिकरणाधिष्ठात्रीरग्न्यादिदेवतोगादिभिः

वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहस्रष्टवान् ताश्चतं प्रतिभोगार्थं शरीरमयाचंत सचताभ्योगोशरीरं अश्वश
रीरं पुरुषशरीरं यथाक्रममानीतवान् ततस्तादेवताः सोब्रवीत् यथायतनंच
क्षुरादिस्थानं अस्मिन् देहे प्रविशतेति तदाहताभ्यइत्यादि तथाताभ्योगामा
नयत्ताअब्रुवन्नवैनोयमलमिलिताभ्योऽश्वमानयत्ता अब्रुवन्नवैनोयमलमि
तिताभ्यः पुरुषमानयत्ताअब्रुवन्सुकृतंबतेतिच २० नमोरामचंद्रायनमः॥७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात् बहूनां संभवानां जन्मनामंते मानुष्यं अनित्यमप्यर्थदं पुरुषार्थप्रापकं देवा
लुब्ध्वा इह अनु मृत्यु अन्वनु निरंतरं मृत्युर्वा यस्पतत् यावन्नपतेत्तावदेव तूर्णं शीघ्रं
निश्रेयसाय यतेत विषयः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव २९ तदेवं हेयोपा

लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः तूर्णं यतेत न
पतेदनुमृत्यु यावन्निश्रेयसाय विषयः खलु सर्वतः स्यात् २९ एवं संजातवैराग्यो वि
ज्ञानालोक आत्मनि विचरामि महीमेतां मुक्तसंगोऽनहंकृतिः ३० नमो भगवते ३०

देयविवेकं बहुधा निरूप्येदानीं य उक्तस्त्वं तु कल्पः कविर्दक्ष इत्यादि तत्रोत्तरमाह एव
मिति एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः सम्यक्
तं वा आत्मविशेषणं आत्मनि स्थित एवमहं ही विचरामि ३० नमो नमः वासुदेवाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit,University Ramtek Collection

ननुकिंबहुभिर्गुरुभिः नहिश्वेतकेतुभृगुप्रमुखैर्बहवोगुरवआश्रिताः तत्राहनत्वेक
स्मादिति बहुधासप्रपंचनिःप्रपंचभेदादिभिः अयंभावः नैतेपरमार्थोपदेशगुरवः
किंत्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्त्तकाः तेषांचबहुत्वंयुक्तमेवे

नत्वेकस्माद्गुरोर्ज्ञानंसुस्थिरंस्यात्सुपुष्कलं ब्रह्मैतदद्वितीयंवैगीयतेबहु
धर्षिभिः ३१ श्रीभगवानुवाच इत्युक्त्वासयदुंविप्रस्तमामंत्र्यगभीरधीः
वंदितोभ्यर्चितोराज्ञाययोप्रीतोयथागतं ३२

ति ज्ञानप्रदंगुरुमेकमेववक्ष्यति
मदभिज्ञंगुरुंशांतमुपासीतेति उक्तंच तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयउत्तममिति ३१ ८३
विप्रोदत्तात्रेयः योगर्द्धिमापुरुभयींयदुहैहयाद्याधारस्युद्भूतात् यथागतंतथैवयदृच्छया
ययाविसर्पः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ भगवान्स्वीयंब्रह्मवित्कुलमितिश्लाघतेनः पूर्वेषांपूर्वजइति अत्रसंग्रहश्लोकाः कपो
तमीनहरिणकुमारीगजपन्नगाः पतंगःकुररश्चाष्टौहेयार्थेगुरवोमताः १ मधुहृन्म

अवधूतवचःश्रुत्वापूर्वेषांनःसपूर्वजः सर्वसंगविनिर्मु
क्तःसमचित्तोबभूवह ३३ इतिश्रीभागवतेमाहापुराणे
एकादशस्कंधेनवमोध्यायः॥९॥ श्रीकृष्णार्पणमस्तु ॥

धुहृत्तचिपिंगलाचद्वयोस्त्रयः उपादेयार्थविज्ञानेशेषाः पृथ्व्यादयोमताः २ तदवां
तंभेदश्चतत्रतत्रस्फुटीकृतः अध्यायत्रितयेचाष्टनवाष्टावीरिताः क्रमात् ३३
इतिश्रीभागवतेमाहापुराणेएकादशस्कंधेटीकायांनवमोध्यायः॥९॥ नमोनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१४

चतुर्विंशतिगुर्वाख्यालब्धसंभावनाभुवः उद्धवस्यात्मतत्वाप्त्येसाधनोक्तिरतःपरैः दश
मेदेहसंबंधात्संसरतिर्नात्मनः स्वतः इत्येतद्वर्णयामासमतांतरनिरासतः तदेवमन्व

नवर्णाद्याचारमनु २

श्रीभगवानुवाच मयोदितेष्ववहितःस्वधर्मेषुमदाश्रयः व
र्णाश्रमकुलाचारमकामात्मासमाचरेत् १ नमोभगवते

यव्यतिरेकाभ्यामुत्पन्नविवेकज्ञानस्यतत्वज्ञानायादितआरभ्यसाधनान्युपदिशति १४
भगवान्मयेति मयापंचरात्राद्युक्तवैष्णवधर्मेष्ववहितः अप्रमत्तःसन्नूतदविरोधे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमकामात्मतासंभवतितत्राह अन्वीक्षेतेति स्वधर्मै विशुद्धचित्तः सन्देहिनांवि
षयेषुसत्यत्वाभिनिवेशेनयेसर्वेआरंभास्तेषांफलवैपरीत्यंपश्येत् एवंफलवैपरी

॥१७॥ अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां गुणेषु तत्त्व
ध्यानेन सर्वारंभविपर्ययं २ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः नानात्मकत्वाद्विफलस्तथा भेदात्म धीर्गुणे: ३

स्यादकामःस्यात् २ किंचकाम्यविषयाणांमिथ्यात्वादपिसाहसुप्तस्येति विफलः
अर्थशून्यः अत्रैवंप्रयोगः इंद्रियैर्याबाह्येनानाबुद्धिःसाविफलानानात्मकत्वाद्दैहं
यकवाच्चमनोजन्यस्वप्नमनोरथवदिति ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोक्षार्थीनप्रवर्तेततत्रकाम्यनिषिद्धयोः नित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहास
याइतिस्मृति अतः प्रवृत्तंकाम्यंकर्मत्यजेन्निवृत्तंनित्यनैमित्तिकमेवकुर्यात् आत्म

निवृत्तंकर्मसेवेतप्रवृत्तंमत्परस्त्यजेत् ७
जिज्ञासायांसंप्रवृत्तोनाद्रियेत्कर्मचोदनां ४

६. विचारेतुसम्यक्प्रवृत्तकर्मचोदनामपिनाद्रियेत् ४ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतुयमानहिंसादीन् अभीक्ष्णमादरेणसेवेत शौचादींस्तुनियमान्क्वचित्य
दाशक्ति सदाआत्मज्ञानाविरोधेन यमान्द्वादश निय [illegible] मां
श्चैकोनविंशेध्यायेवक्ष्यति किंच यमेष्वप्यादरंपरित्यज्यगुरुमुपासीतेत्याह

यमानभीक्ष्णंसेवेतनियमान्मत्परः क्वचित् मदभिज्ञंगुरुंशांतमु
पासीत् मदात्मकं ५ अमान्यमत्सरोदक्षोनिर्ममोदृढसौहृदः असत्व
रोऽर्थजिज्ञासुरनसूयुरमोघवाक् ६

मदभिज्ञमिति मदात्मकंमद्रूपं ५ गु
रुसेवकस्यधर्मानाह अमानीति दक्षः अनलसः निर्ममः जायादिषुममताशून्यः
गुरौतुदृढसौहृदः असत्वरः अव्यग्रः अमोघवाक् वृथालापरहितः एतान्येवशिष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुस्वजायादिषुकथंनिर्ममःस्यात्तत्राहजायेति औदासीन्यहेतुंविवेकंदर्शयति आत्मनोर्थंप्रयोजनंसर्वत्रसममेवपश्यन्निति अयंभावःसर्वदेहेष्वात्मनएकत्वा

जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु उदा
सीनःसमंपश्यन्सर्वेष्वर्थमिवात्मनः ७ ७

ज्जायादिदेहेःस्मिंश्चदेहेआत्मनोःर्थःसुखादिःसमएवकेनविशेषेणैतेष्वेवममता ९६
भिनिवेशइत्येवमुदासीनःसन्गुंप्रपद्येतेति ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहोकोसौदेहव्यतिरिक्तआत्मायस्यैक्यादर्थः सर्वेषुसमः स्यात्तमाहविलक्षणइति ॰
स्थूलसूक्ष्मदेहद्वयादात्माऽन्यः यतोविलक्षणः द्वेधावैलक्षण्यंदर्शयति ईक्षितास्वदृ

विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षितास्वदृक् यथाः
ग्निर्दारुणोदाह्याद्दाहकोऽन्यः प्रकाशकः ८ श्रीकृष्ण

गिति द्रष्टाहिदृश्याद्विलक्षणः स्वप्रकाशश्चजडात्विलक्षणस्तयोरन्यत्वेदृष्टांतः यथा
ग्निर्दाहकः प्रकाशकश्चदाह्यात्प्रकाश्याच्चदारुणः काष्टादन्यस्तद्वदिति ८ ८७ रामजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०
१७

अनेनैवदृष्टांतेननित्यत्वानादित्वविभुत्वैकत्वादयोपिसिद्धंतीत्याहनिरोधेति यथाच
दारुघनः प्रविष्टोऽग्निस्तत्कृतान्नाशादीन्प्राप्नोतिनतुस्वतोनाशादिमान् एवंदेहगु

निरोधोत्पत्त्यणुबृहत्त्वनानात्वंतत्कृतान्गुणान्
अंतःप्रविष्टआधत्तएवंदेहगुणान्परः १७

णाननित्यत्वादीन्देहात्परोनित्यादिस्वरूपोप्यात्माऽनुभवति ततश्चनित्यत्वादिभिर १७
पिवैलक्षण्यादन्यत्वमितिभावः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते आत्मनस्त्वसंगत्वात्कथंदेहेनतद्धर्मैर्वासंबंधः
संबंधेवाकुतस्तन्निवृत्तिस्तत्राह योऽसाविति पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योसौ
सूक्ष्मः अयंचस्थूलोदेहोविरचितः पुंसोजीवस्यायंसंसारः तन्निबंधनः तदध्यासकृ

योसौगुणैर्विरचितोदेहोयंपुरुषस्यहि संसारस्तन्निबंधोयंपुंसोविद्याछिदात्मनः १०
तस्माज्जिज्ञासयात्मानमात्मस्थंकेवलंपरं संगम्यनिरसेदेतद्वस्तुबुद्धिंयथाक्रमं ११

तः हियस्मादेवंतस्मादात्मविद्यातन्निवर्त्तिकेत्याह आत्मनोविद्याविज्ञानंतस्याछित् छेत्री
आछिदितिवापदछेदः १० यस्मादेवंतस्माज्जिज्ञासयाविचारेणआत्मनिकार्यकारण
संघातएवास्थितंसम्यक्कृत्वात्वाएतत्तएतस्मिन्देहादौवस्तुबुद्धिंस्थूलसूक्ष्मक्रमेणनि
रसेत्त्यजेत् ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰
१७

अनेनैवदृष्टांतेननित्यत्वानादित्वविभुत्वैकत्वादयोपिसिध्यंतीत्याहनिरोधेति यथाच
दारुधंतःप्रविष्टोऽग्निस्तत्कृतान्नाशादीन्नप्राप्नोतिनतुस्वतोनाशादिमान् एवंदेहगु

निरोधोत्पत्त्यणुबृहत्त्वनानात्वंतत्कृतान्गुणान्
अंतःप्रविष्टआधत्तएवंदेहगुणान्परः १७

णाननित्यत्वादीन्देहात्परोनित्यादिस्वरूपोप्यात्मानुभवति ततश्चनित्यत्वादिभिर १७
पिवैलक्षण्यादन्यत्वमितिभावः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते आत्मनस्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधः
संबंधे वा कुनस्तन्निरत्तिस्तत्राह योऽसाविति पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योऽसौ
सूक्ष्मः अयंच स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारः तन्निबंधनः तदध्यासकृ

योसौ गुणैर्विरचितो देहोयं पुरुषस्य हि संसारस्तन्निबंधोयं पुंसो विद्याछिदात्मनः १०
तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परं संगम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमं ११

तः हि यस्मादेवं तस्मादात्मविद्यातन्निवर्त्तिकेत्याह आत्मनो विद्या विज्ञानं तस्याछित् छेत्री
आछिदिति वा पदछेदः १० यस्मादेवं तस्माज्जिज्ञासया विचारेण आत्मनि कार्यकारण
संघातएव स्थितं सम्यक्कृत्वा एतत् एतस्मिन् देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण नि
रसेत् त्यजेत् ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰प॰
१८

गुरोर्लब्धाविद्याः विद्यातत्कार्यनिरसनक्षमेतिस्फुटीकर्तुं विद्योत्पत्तिमस्युत्पत्तिरूपके
णनिरूपयतिआचार्यइति आद्यः अधरः तत्संधानतयोर्मध्यमंमथनकाष्ठंप्रवच

आचार्योरणिराद्यःस्यादंतेवास्युत्तरारणिः तत्सं
धानंप्रवचनंविद्यासंधिःसुखावहः १२ ७ ७

नसुदैपेशाः विद्यातुसंधिःसंधोभवन्नाग्निरिव तथाचश्रुतिः आचार्यःपूर्वरूपं
अंतेवास्युत्तररूपंविद्यासंधिःप्रवचनंसंधानमिति १२ नमोभगवतेकृष्णाय ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निसादृश्यमेवाह वैशारदीति विशारदोतिनिपुणः तेनाशिष्येण प्राप्तानेनगुरुणोप
दिष्टावा अतिविशुद्धाबुद्धिः गुणकार्यरूपामायांनिवर्त्तयति यदात्मकमेतद्द्वंद्वंजी
वस्यसंसृतिनिमित्तंतान्गुणांश्चदग्ध्वा असमितृनिरिंधनः तस्मात्कार्येणकारणे

वैशारदीसातिविशुद्धबुद्धिर्धुनोतिमायांगुणसंप्रसूतां गुणांश्चसंदह्ययदात्ममेत
त्स्वयंचशाम्यत्यसमिद्यथाग्निः १३ अथैषांकर्मकर्तॄणांभोक्तॄणांसुखदुःखयोः
नानात्वमथनित्यत्वंलोककालागमात्मनां १४

नविधयाचव्यवधानाभावात्साक्षा
त्परमानंदरूपोभवतीति १३ एवंतावत्स्वप्रकाशज्ञानस्वरूपोनित्यएकएवात्माकर्तृ
त्वादयश्चधर्मास्तस्यदेहोपाधिकाः तद्व्यतिरिक्तंचसर्वमनित्यंमायामयंच अतःस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वतोविरक्तः सन्नात्मज्ञानेन मुच्यत इ सुक्तं विलक्षणः स्थूलसूक्ष्मादिसादिना तदेवं श्रु
तिसमन्वयेन निर्णीते ऽप्यर्थे मतांतरविरोधेन संदेहो माभू दिति तन्मतं निराकर्त्तुमु
पक्रमयति अथेति अथमन्यसे एषां जीवात्मनां कर्मकर्तृणां सुखदुःखयोः भोक्तृणां
च नानात्वमिति एवं हि जैमिनीया मन्यंते अहंप्रत्ययविज्ञेय एवात्मा स च प्रतिशरी
रं भिन्नः कर्तृभोक्तृरूपश्च न तु तत्स्वरूपभूतो निर्विकार एकः परमात्मास्तीति यथा
हुः अहंप्रत्ययविज्ञेयो ज्ञातव्यः सर्ववेदेषु हीति तथा वैराग्यं च न संभवति तथा हि
भोगस्थानानामनित्यत्वाद्वैराग्यं भवेत् भोगकालस्य वा तदुपायकर्मबोधकाग
मस्य वा भोक्तुरात्मनो वानंत्यं तदस्तीत्याह अथ नित्यत्वं लोककालागमात्मनां मन्य

सइति १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचसर्वभोग्यानांविछेदान्मायामयत्वाद्वावैराग्यंस्यादित्याह सर्वभावानांस्त्र
कृचंदनांदीनांसंस्थास्थितिः औत्पत्तिकीप्रवाहरूपेणनित्यातथाचवदंतिन

मन्यसेसर्वभावानांसंस्थात्यौत्पत्तिकीयया
तत्तदाकृतिभेदेनजायतेभिद्यतेचधीः १५

कदाचिदनीदशंजगदिति अतस्तत्कर्त्ताकश्चिदीश्वरोपिनास्तीतिभावः किं
च यथायथावत् नतुमायामयीत्यर्थः नचात्मरुपभूतंनित्यमेकंज्ञानम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ग॰
१००

स्त्रीत्याहतत्तदिति घटपटाद्याकारभेदेनधीर्जायते अतोनित्या
भियतेच अयंमूढोभिप्रायः नहिनित्यज्ञानरूपआत्मा अपितुज्ञानपरि
णामवान् नचविकारित्वेनानित्यत्वप्रसंगः यथाहुः विक्रियाज्ञानरूपस्य
निर्नेत्पत्तेविरोस्यतइति अतोमुक्ताविंद्रियादिराहितस्यपरिणामासं
भवाज्जडत्वेनतत्प्राप्तेरपुरुषार्थत्वात्प्रवृत्तिरेवश्रेयसीन
निवृत्तिरिति १५ ७

१००

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रतावत्तदुक्तमंगीकृत्यवैराग्योपपादनायप्रवृत्तिमार्गस्यानर्थहेतुत्वंप्रपंचयतिए
वमपीत्यादिनालोकानांलोकपालानामिसत्तः प्राकृतेनेनग्रंथेनअंगहेउद्धव काला
वयवतः संवत्सरादिरूपात् १६ अत्रापीतिस्वातंत्र्यपक्षेदुष्कर्मणोदुःखभोगस्य

एवमप्यंगसर्वेषांदेहिनांदेहयोगतः कालावयवतः संतिभावाजन्मादयोऽसकृत् १६
अत्रापिकर्मणांकर्तुरस्वातंत्र्यंचलक्ष्यते भोक्तुश्चदुःखसुखयोःकोन्वर्थोविवशंभजे
त् १७ नदेहिनांसुखंकिंचिद्विद्यतेविदुषामपि तथाचदुःखंमूढानांवृथाहंकरणंपरं १८

वासंभवादित्यर्थः १७ नतुयेसम्यक्कर्मकर्तुंजानंतितेसुखिनएवयेतुनजानंतितए
वदुःखिनइतिचेत्तत्राहनेति विदुषामपिकिंचित्सुखंनविद्यते तथामूढानामपिदुःखंन
विद्यतेअतोवयंकर्मकुशलत्वात्सुखिनइतितेषांकेवलंवृथैवाहंकारइत्यर्थः १८ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगीकृत्याप्याहयदीति तंपोगंडपायंनविदुर्यथासाक्षान्मृत्युर्नप्रभवेत् १९ तथापि

यदिग्राम्यंविधातंचजानंतिसुखदुःखयोः तेप्यद्धानविदुर्योगंमृ
त्युर्नप्रभवेद्यथा १९ कोन्वर्थःसुखयत्येनंकामोवामृत्युरंतिके
आघातंनीयमानस्यवध्यस्येवनतुष्टिदः २० श्रीरामचंद्राय

यावज्जीवंसुखंभविष्यतीतिचेत्तत्राहकोन्विति यतः अंतिकेवर्त्तमानोमृत्युर्न
तुष्टिंददाति आघातंवधस्थानंप्रति २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमस्मिन्लोकेसुखंनास्तीत्युक्तंलोकांतरेपितथैवेत्याहश्रुतमिति श्रुतंस्वर्गादित
दपिदुष्टं स्पर्द्धापरसुखासहनं असूयापरगुणेदोषाविष्करणं अस्ययोनाशःव्ययो
पक्षयः तैर्दुष्टं यद्वाव्ययोनाशः अत्ययोऽन्यस्यातिशयः तं दृष्ट्वातदप्राप्त्यादुःख

श्रुतंचदृष्टवत्दुष्टंस्पर्द्धासूयात्ययव्ययैः बहं
तरायकामत्वात्कृषिवच्चापिनिष्फलं २१

मित्यर्थः किंच बहवोंतरायाविघ्नाःगुण्यादिरूपाविघ्नायस्मिन्कामेसुखेतस्यभाव
स्तत्वंतस्मात्कृषिर्यथाबहुविघ्नातद्वत् बहुसुखत्वेन श्रुतमपिनिःफलं २१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विघ्नैर्वै गुण्यापयभावमंगीकृत्यापि नाशाऊः खंडः परिहरमित्याह अंतरायैरिति पंचभिः
निर्जितं साधितं २२ पश्चैर्देवतारंद्रादिरूपाः इष्ट्वा २३ स्वपुण्यैरुपचितं सर्वभोगसं

अंतरायैरविहतो यदि धर्मः स्वनुष्ठितः तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु २२ इ
ष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः भुंजीत देववत्तत्र भोगान्दिव्यान्निजार्जिता
न् २३ स्वपुण्योपचिते शुभ्रे विमान उपगीयते गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् २४
स्त्रीभिः कामगयानेन किंकिणीजालमालिना क्रीडन्नवेदात्मपातं सुराक्रीडेषु निर्वृ
तः २५

पत्नी देवीनां मध्ये विहरन् गंधर्वैरुपगीयते २४ कामेन इच्छया गच्छता विमानेन किं
किणीजालमालिना क्षुद्रघंटिकासमूहशोभिना सह स्त्रीभिः सुराक्रीडेषु नंदनादिषु
क्रीडन् आत्मपातं न वेद २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालेनचालितः पालितः २६ प्रवृत्तिर्द्विविधाविध्यनुसारेणकाम्येकर्मणिवा तल्लंघ
नेनाधर्मेवातत्रकाम्यकर्मप्रवृत्तेर्गतिरुक्ता अधर्मप्रवृत्तेर्गतिमाहयदीति यदिवेस

तावत्प्रमोदतेस्वर्गेयावत्पुण्यंसमाप्यते क्षीणपुण्यःपतत्यर्वागनि
च्छन्कालचालितः २६ यद्यधर्मरतःसंगादसतांवाजितेंद्रियः का
मात्माकृपणोलुब्धःस्त्रैणोभूतविहिंसकः २७ पशूनविधिनाल
भ्यप्रेतभूतगणान्यजन् नरकानवशोजंतुर्गत्वायात्युल्बणंतमः
२८

न्वयः अजितेंद्रियत्वात्कामात्मा अतःकृपणः अतोलुब्धोभोगतृष्णाकुलः अतः
स्त्रैणः स्त्रीलंपटः तदर्थंभूतविहिंसकः २७ किंचउष्टजनप्रलोभितोधनाद्यर्थंपशू
न्तुअविधिनाहत्वातमःस्थावरतांयाति २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं कर्मसु प्रवृत्तस्य न सुखं न च दुःखनिवृत्तिरित्युपसंहरति कर्माणीति २९ तथापि लोकानां नित्यत्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेत्तत्राह लोकानामिति द्वौ परार्द्धौ परमायुर्यस्य तस्य ब्रह्मणोपि तथा च श्रुतिः भीषास्माद्वातः पव

कर्माणि दुःखोदर्काणि कुर्वन् देहेन तैः पुनः देहमाभजते तत्र किं सुखं मर्त्यधर्मणः
लोकानां लोकपालानां मद्भयं कल्पजीविनां ब्रह्मणोपि भयं मत्तो द्विपरार्द्धपरायुषः ३०

ते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति अतः प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्विरक्तस्य ततो निवृत्तिरेव युक्तेति तात्पर्यार्थः एतेनैव स्वयमीश्वरत्वाविष्कारेणेश्वराभावांगीकारः परित्यक्तः ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यदपि श्रेोढ्यात्पूर्वमंगीकृतं निराकरोति चतुर्भिः तत्र यदुक्तं कर्त्तृभोक्तृरूप एवा
त्मेति तन्निराकरोति गुणा इति गुणा इंद्रियाणि कर्माणि सृजंति नत्वात्मा आत्मैवेंद्रि
याणि प्रवर्त्तयन्कर्माणि करोतीति चेन्नेत्याह गुणा इति गुणः सत्वादिर्गुणानिंद्रियाणि

गुणाः सृजंति कर्माणि गुणोऽनुसृजते गुणान् जीवस्तु गु
णसंयुक्तो भुंक्ते कर्मफलान्यसौ ३१ नमो नमः ७

अनुसृजते प्रवर्त्तयति नत्वात्मा अतः कर्त्तृत्वं तावन्नास्ति भोक्तृत्वमप्यौपाधिकमि
त्याह जीवस्त्विति गुणसंयुक्त इंद्रियादिसंयुक्तः कुत इत्यत आह असौ तेषु अहंका [illegible]

यच्चोक्तमात्मनोनानात्वंतदप्यौपाधिकमित्याह यावत्स्यादिति गुणानांवैषम्यंअ
हंकारादिकार्यरूपं ३२ नन्वात्मनएकत्वेकथंपारतंत्र्यमुक्तंकथंवालोकपाला
दीनामपिमृत्युभयमित्युक्तंतत्राह नानात्वमिति यच्चगूढमभिप्रेतंप्रवृत्तिरेवश्रे

॥ यावत्स्याद्गुणवैषम्यंतावन्नानात्वमात्मनः नानात्वमात्म
॥नोयावत्पारतंत्र्यंतदैवहि ३२ यावदस्यास्वतंत्रत्वंतावदीश्व
रतोभयं यएतत्समुपासीरंस्तेमुह्यंतिशुचार्पिताः ३३

यसीतितत्राहयएतदिति एतद्गुणवैषम्यंतत्कृतंभोगंकर्मचेत्यर्थः उपासीरन्नसे
वेरन् तेलोकादीनामनित्यत्वाच्छुचार्पिताः शोकंसंतोमुह्यंति ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकेवलं अनित्यतामात्रं किंतु मायामयत्वमपीत्याह काल इति स्वभावो दैवत्वादि परि
णामहेतुः धर्मस्तद्योगकारणं गुणव्यतिकरे मायाक्षोभे सति मामेव प्राहुः नतु मद्व्य

कालआत्मागमोलोकःस्वभावोधर्मएवच इति
मांबहुधाप्राहुर्गुणव्यतिकरेसति ३४ ७ ७

तिरिक्ताःसंति नत्तोनिवृत्तिरेवमुक्तिहेतुत्वाच्छ्रेयसीतिसिद्धं ३४ नमोभगवते०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंतावदेकएवात्मातस्यचगुणकार्यदेहसंबंधकृतः संसारः आत्मज्ञानाच्चमुक्ति
रित्युक्तंविलक्षणः स्थूलसूक्ष्मादित्यादिना तदेवचमतांतरनिरासेनदृढीकृतंअथै
षामित्यादिना तत्रपृछतिगुणेष्विति अयमर्थः गुणेषुअसत्सुमुक्तिः सत्स्ववा आ

उद्धव उवाच गुणेषुवर्तमानोऽपिदेहजेष्वनपावृतः
गुणैर्नबध्यतेदेहीबध्यतेवाकथंविभो ३५ ७

द्येज्ञानसाधनाभावान्नमुक्तिः द्वितीयेचगुणेषुवर्त्तमानोऽपितत्कार्यदेहजेषुकर्मसु
सुखादिषुचकथंनबध्यते तथापिनैराकाशवदनासक्तत्वान्नबध्यतइति [illegible] चेत्तर्हि
बंधोनसंभवतीत्याह अनपावृतःकथंबध्यतइति ३५ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदितुसत्त्वेवतदहंकारेणबध्यतेतन्निरस्याचमुच्यतइतिमतंतर्हितत्कथंज्ञातव्य
मितिपृच्छतिबद्धोमुक्तोवाकथंवर्त्तेतेत्यादिकिंभुंजीतकथंभुंजीतेत्यर्थः ३६ एत

॥ ॥ कथंवर्त्तेतविहरेत्कैर्वाज्ञायेतलक्षणैः किंभुंजीतोतविसृजेच्छ
यीतासीतयातिवा ३६ एतदच्युतमेब्रूहिप्रश्नंप्रश्नविदांवर नि
त्यमुक्तोनित्यबद्ध एकएवेतिमेभ्रमः ३७ इतिश्रीभागवते०एका
दश०दशमो० १०

त्एतद्विषयंप्रश्नं किंचएकएवात्मानादिगुणसंबंधान्नित्यबद्धःमुक्तेर्ज्ञानयलेशःनित्य
त्वग्रसंगान्नित्यमुक्तः इत्यप्यंगीकार्यंस्यात् तत्रमेभ्रमोभवतीत्याह नित्यबद्धइति ३७
इतिअध्यायः॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशेतुबद्धानांमुक्तानांचाथलक्षणं साधूनांचतथाभक्तेर्लक्षणंहरिणेरितं नित्य
बद्धोनित्यमुक्तएकएवेतिमेभ्रमइतियदुक्तंतत्किंवस्तुतो विरोधात्प्रतीतितोवा ना

श्रीभगवानुवाच॥ बद्धोमुक्तइतिव्याख्यागुणतोमे
नवस्तुतः गुणस्यमायामूलत्वान्नमेमोक्षोनबंधनं

यः बंधमोक्षयोर्वास्तवत्वाभावादित्याह बद्धोमुक्तइतिद्वाभ्यां आत्माबद्धोमुक्तश्चमे
गुणतः मदधीनसत्वादिगुणोपाधितः नतुवस्तुतः नचौपाधिकत्वेऽपितंडुलपाका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिवद्धास्तवत्वं किं न स्यात् तत्राह गुणस्य मायामूलत्वात् बंधनं नास्ति अत एव मोक्ष
श्च नास्तीति ननु कथं सर्वशास्त्रविरुद्धमुच्यते तत्राह इति मे व्याख्येति एवं मत्कृतो नि
र्णयः अलमतिकुतर्कैरित्यर्थः अथवैवमन्वयः आत्मा बद्धो मुक्त इति या व्याख्या त

शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वा

स्तवी २

क्तिः सा मे गुणतः मत्कृणपारतंत्र्यात् अत्र हेतुत्वेन गुणनियंतरि त्वास्मिंस्तव्यतिरे
कमाह अत एव न मे बंधनं मोक्षश्चेति अन्यत्समानं १ एवं कारणभूतगुणानां मा
यामयत्वात् तत्कार्यसंसृतिर्मायेति प्रपंचयति शोकमोहाविति यथा स्वप्नः आत्मनः
बुद्धेरेव ख्यातिर्विवर्त्तः तद्वत् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोवस्तुविरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकीघटत्वइत्साहविद्येइति तन्येनेमो
क्षबंधाभावाभ्यामिति तत्रशक्ती कुतः मेमाययाविनिर्मिते मायावृत्तिरूपत्वात्
बंधमोक्षकरीस्येकवचनंद्विवचनार्थे ननुतत्कार्यत्वेबंधमोक्षयोरनादित्वनित्यत्वे

विद्याविद्येममतनूविद्ध्युद्धवशरीरिणां मोक्षबंध
करीआद्येमाययामेविनिर्मिते ३ श्रीकृष्णपरमा॰

नस्यातां न आद्येनादी अतोयावदविद्यांप्रवर्तयामितावद्बंधः यदाविद्यांददामि १०७
तदामोक्षःस्फुरतीत्यर्थः तथाचस्कंदपुराणेबंधकोभवपाशेनभवपाशाच्चमोचकः
कैवल्यदःपरब्रह्मविष्णुरेवसनातनइति ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रशरीरिणामितिबहुवचननिर्देशाद्विषयभेदेनाविरोधउक्तइतिभावःलिंगंव्यावर्त्तयन्
बंधमोक्षव्यवस्थामुपपादयति एकस्यैवेति तर्हिकिमात्माभेदान्नवापिबंधः नही
नहीत्याह अस्यजीवस्यैवेति नन्वात्माभेदेजीवोनामकोन्योऽस्तिपृथक् कथंचबं
धमोक्षसुखदुःखादिव्यवस्थातत्राह ममांशस्यअयंभावः यथैकस्यापिचंद्रादेर्ज

एकस्यैवममांशस्यजीवस्यैवमहामते बंधोस्याविद्ययाऽनादिर्विद्ययाचतथेतरः ४

लाद्युपाधिनाबिंबप्रतिबिंबरूपोभेदः यथाचतत्रजलकृताः कंपादयःप्रतिबिंब
स्यैव यथाचतत्रप्रतिबिंबानामप्युपाधिभेदेनभेदादेकस्मिन्उदककुंभेभग्नेत
त्प्रतिबिंबस्यैवबिंबैक्यंनान्यगतस्यतथाविद्यायांप्रतिबिंबितस्यमदंशस्यजी
वस्यैव [illegible] तत्कृतोबंधः तस्यचोपाधितोभेदान्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यवस्थेति तथा चाहुः यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते न सर्वे संप्रयुज्यंते
तथा जीवाः सुखादिभिरिति एतच्चातिरहस्यं स्वबुध्यानिश्चेतव्यमिति संबोधयति
हे महामते इतरो मोक्षः ४ तदेवं व्यवस्थामुपपाद्य कथं वर्त्तेते साद्विलक्षण्यप्रश्न
स्योत्तरमाह अथेति तच्च वैलक्षण्यं द्विविधं जीवेश्वरयोरेकं जीवानां चैकं तत्र जी

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि
सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे एकस्तयोः खादति पिप्प
लान्नमन्यो निरन्नोऽपि बलेन भूयान् ६

वेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरि
तिसार्द्धद्वयेन शोकानंदधर्मवतोः एकस्मिन् धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थि
तयोः ५ सुपर्णौ वृक्षात्पक्षिणाविव देहात्पृथग्भूतौ सदृशौ चिद्रूपत्वात् सखायौ १०८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवियोगादैकमत्याच्च यदृच्छयाऽनिरुक्तयामायया वृक्ष्यतश्चतिरस्कोदेहः ऊर्ध्वमूल
मवाक्शाखं वृक्षं योवेदसंप्रतिश्रुतेः ऊर्द्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययमिति
स्मृतेः तास्मिन्वृक्षे तं नीडं निकेतनं हृदयरूपं प्राप्तौ तयोर्मध्यएकोजीवः पिप्पलान्नं
पिप्पलोऽश्वत्थः देहस्तास्मिन् अदनीयं कर्मफलमिसर्षः स्वादति भक्षयाति अन्यः
ईश्वरः निरन्नः अभोक्तापिनिजानंदतृप्तोबलेनशानादिशक्त्या भूयान् अधिकः श्रु
तिश्च द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते तयोरन्यः पिप्पलंस्वा
द्वत्त्यनश्नन्नन्योअभिचाकशीति ६७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलाधिक्यमेवाह आत्मानमिति अतोयो॰ विद्ययायुक्तः सतुनित्यबद्धः अनादिब
द्धः यस्तुविद्याप्रधानः सतुनित्यमुक्तः मायाया अनावरकत्वादाश्रयाद्यामोहकत्वाच्च
३७ इदानींबद्धमुक्तजीवानामेवमिथोवैलक्षण्यमाह देहस्थो॰पीतिदर्शाभिः विद्वान

आत्मानमन्यंचसवेदविद्वानपिप्पलादोनतुपिप्पलादयः यो॰विद्ययायुक्तसतुनित्य
बद्धोविद्यामयोयः सतुनित्यमुक्तः ७ देहस्थोपिनदेहस्थोविद्वान्स्वप्नाद्यथोत्थितः
अदेहस्थोपिदेहस्थः कुमतिः स्वप्नदृग्यथा ८ मुक्तः संस्कारवशेनदेहस्थो॰पिदेहस्थो
नभवति यथास्वप्नादुत्थितः स्मर्यमाणेस्वप्नदेहेस्थितोपितत्रस्थोनभवतितत्कृतसु
खदुःखाद्यभावात्तद्वत् तथावस्तुतः अदेहस्थोपिकुमतिः अविद्वान्देहस्थः तन्निमि
त्तसुखदुःखभाक् यथास्वप्नदेहगतः इति ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रहेतुत्वेनवैलक्षण्यांतरमाहद्वाभ्यां इंद्रियैरिंद्रियार्थेषुगृह्यमाणेष्वपियस्तुविद्वा
न्सः नाहंकुर्यात् अहंगृह्णामीतिमतिंनकुर्यादित्यर्थः कुतःगुणैर्गुणेषुगृह्यमाणेषु
अतएवअविक्रियः रागादिशून्यः तदुक्तंगीतासु तत्त्ववित्तुमहाबाहोगुणकर्मविभा
गयोः गुणागुणेषुवर्त्तंतइतिमत्वानसज्जतइति ९ अबुधस्तुवपुःकर्माधीनेस्मिंछरी

इंद्रियैरिंद्रियार्थेषुगुणैरपिगुणेषुच गृह्यमाणेष्वहंकुर्यान्नविद्वान्यस्त्वविक्रियः ९
देवाधीनेशरीरेस्मिन्गुणभाव्येनकर्मणा वर्त्तमानोऽबुधस्तत्रकर्त्ताऽस्मीतिनिबध्यते १०

रेवर्त्तमानःगुणैरिंद्रियैर्भाव्येनकर्मणातत्रदेहादौनिबध्यते कुतः कर्त्ताऽस्मीत्यहंकार
ण तदुक्तंतत्रैवप्रकृतेःक्रियमाणानिगुणैः कर्माणिसर्वशः अहंकारविमूढात्माक
र्ताहमितिमन्यतइति एतैस्त्रिभिःश्लोकैः कथंवर्त्ततेस्यस्यप्रश्नस्यसुखदुःखशून्योनिर
भिमानश्चदेहेवर्त्ततेइत्युत्तरमुक्तंभवति १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

भा॰
११०

वैलक्षण्यांतरं वदन् किं भुंजीतेत्यादिप्रश्नस्योत्तरमाह एवमिति त्रिभिः अन्यगमैनेवकर्म
मां बध्नातीत्येवं विरक्तो विद्वान् तथाऽविद्वान् निवशयनासनादिषु न बध्यते कुतः विषयेषु
गुणानिंद्रियाणि आदयन् भोजयन् तत्साक्षित्वेन वर्त्तमानः न तु स्वयमदन् ॥ एतदेवकु

एवंविरक्तः शयनआसनाटनमज्जने दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥ नत
था बध्यते विद्वांस्तत्र तत्राऽऽदयन् गुणान् प्रकृतिस्थोप्यसंसक्तो यथा खं सवितानिलः
१२ वैशारद्येक्षयाऽसंगशितयाछिन्नसंशयः प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्त्तते ॥

तत्तत्राह प्रकृतिस्थोऽपीति सार्द्धेन यथा खं सर्वत्रास्थितमपि न सज्जते यथा सविता ज
ले प्रतिबिंबितोऽपि यथाऽनिलः सर्वत्र संचरन्नपि तद्वत् असंगेन वैराग्येण शितया ति ११०
क्ष्णया छिन्नाः संशया असंभावनादयो यस्य सः नानात्वात् देहादिप्रपंचात् १३ श्री७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंविहरेदित्यस्योत्तरत्वेनवैलक्षण्यांतरमाहयस्यस्युरिति नतद्गुणैर्देहगुणैः संकल्पशून्या
भिः प्राणादिवृत्तिभिर्विहरन्मुक्तइत्यर्थः १४ एवंतावद्बद्धमुक्तयोः स्वसंवेद्यमेववैल
क्षण्यमुक्तं इदानींकैर्बाह्यैर्ज्ञायेतलक्षणैरित्यस्योत्तरतयापरैरपिसुज्ञेयंवैलक्षण्य

यस्यस्युर्वीतसंकल्पाःप्राणेंद्रियमनोधियां वृत्तयःसविनिर्मुक्तोदेहस्थोपिहितद्गुणैः
यस्यात्माहिंस्यतेहिंस्रैर्येनकिंचितयदृच्छया अर्च्यतेवाक्वचित्तत्रनव्यतिक्रियतेबुधः १५

माहयस्यात्मेतित्रिभिः हिंस्रैर्दुर्जनैरन्यैर्वाप्राणिभिर्यस्यात्मादेहः पीड्यतेयदृच्छया ये
नकेनापिक्वचित्किंचिदर्च्यतेवासबुधश्चेत्तत्रनव्यतिक्रियतेनातिविक्रियतइत्यर्थः
तदुक्तंयाज्ञवल्क्येन यः कंटकैर्वितुदतिचंदनैर्यश्चलिंपति अक्रुद्धोपरितुष्टश्चसम
स्तस्यचतस्यतस्यचेति १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

किंच साध्वसाधुवाकुर्वतोवदतोवाजनान् नस्तुवीतनचनिंदेत् योलौकिकव्यवहारेवि
मुखः समुत्कइत्यर्थः १६ अपिचनकुर्यादिति योदैहिकेपिकर्मण्युदासीनः समुक्त
इतरोबद्धइत्यर्थः एतान्येवसर्वाणिमुमुक्षोः साधनानिज्ञातव्यानि १७ यस्तुके

नस्तुवीतननिंदेत्कुर्वतः साध्वसाधुवा वदतोगुणदोषाभ्यांवर्जितः समदृङ्मुनिः १६
नकुर्यान्नवदेत्किंचिन्नध्यायेत्साध्वसाधुवा आत्मारामोनयावृत्त्याविचरेज्जडवन्मुनिः
शब्दब्रह्मणिनिष्णातोननिष्णयात्परेयदि श्रमस्तस्यश्रमफलोह्यधेनुमिवरक्षतः

वलंशब्दब्रह्मण्यभिज्ञः पांडित्यमात्रश्लाघीनतुतैः साधनैस्तदर्थंनिष्ठोभवेत् तंनिंदति
शब्दब्रह्मणिनिष्णातः अर्थतः पारंगतोपिपरेब्रह्मणिननिष्णायात् ध्यानाद्यभि १११
योगंनकुर्यात्तस्यशास्त्रश्रमः श्रमैकफलः नतुपुरुषार्थपर्यवसायी अधेनुंत्विरक्षत
तां १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेवान्यार्थनिदर्शनैः प्रपंचयति गामिति दुह्यतइतिदोहः पयः दुग्धोदोहोनोत्तरत्रदो
ह्योस्तियस्याः तां अर्थशून्यां असतींभार्यांकामशून्यां देहंपराधीनं प्रतिक्षणंदुःख
हेतुं असत्प्रजांदृष्टादृष्टसाधनशून्यंपुत्रं अतीर्थीकृतं आगतेपात्रे ऽदत्तं वित्तंदुःकी

गांदुग्धदोहामसतींचभार्यांदेहंपराधीनमसत्प्रजांच वित्तंत्वतीर्थीकृतमंग
वाचंहीनांमयारक्षन्तिदुःखदुःखी १९ यस्यांनमेपावनमंगकर्मास्थित्युद्भवप्राण
निरोधमस्य लीलावतारेप्सितजन्मवास्याद्वंध्यांगिरंतांबिभृयान्नधीरः २०

त्तिदुरितापादकं अंगहेअद्भुत दुःखानंतरंदुःखमेवयस्यस्यःरक्षति १९ मयाहीनांवा
चमितुक्तांविवृणोति यस्यांमेजगतःशोधकंचरित्रंनस्यात् अस्यविश्वस्यास्थित्यादि
रूपंनहेतुरित्यर्थः लीलावतारेषुईप्सितंजगतः प्रेमास्पदंश्रीरामकृष्णादिजन्मवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

नरस्यात्तूतांनिष्फल्गांगिरंधीरोधीमान्नधारयेत् २० उक्तंज्ञानमार्गमुपसंहरति ए
वंनिश्चितस्वविचारेणात्मनिनानात्वभ्रमंदेहाद्यध्यासंनिरस्यनिर्मलंमनोमयिसर्व
गेपरिपूर्णेसमर्प्यसंधार्यउपारमेत् नरागास्त्रपांडिस्समात्रेणेत्यर्थः २१ यद्यनीशः

एवंजिज्ञासयापोह्यनानात्वभ्रममात्मनि उपारमेतविरजंमनोमय्यर्प्यसर्वगे २१
यद्यनीशोधारयितुंमनोब्रह्मणिनिश्चलं मयिसर्वाणिकर्माणिनिरपेक्षःसमा
चर २२ श्रद्धालुर्मेकथाःशृण्वन्सुभद्रालोकपावनीः गायन्ननुस्मरन्कर्मजन्म
चाभिनयन्मुहुः २३

अशक्तः तर्हिआस्तामिदंमद्भ क्त्यैवकृतार्थोभविष्यसीत्या
हमयीति मदर्पणेन २२ कर्मभिर्विशुद्धसत्वस्यांतरंगांभक्तिमाहश्रद्धालुरिति
द्वाभ्यां अभिनयन्स्वयमनुकुर्वन् २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचरन्सेवमानः २४ तथानेन प्रकारेण मयि सत्संगेन लब्धया भक्त्या स भक्तः मां उपा
सिता ध्याता भवति स च ध्यानशीलः सद्भिर्दर्शितं वै निश्चितं सुखेनैव मे पदं स्वरूपं
प्राप्नोति २५ सत्संगलब्धया भक्त्येत्युक्तं तत्र सतां भक्तेश्च विशेषं पृच्छति साधुरिति

मदर्थेधर्मकामार्थानाचरन्मदपाश्रयः लभतेनिश्चलांभक्तिंमय्युद्धवसनातने २४
सत्संगलब्धयाभक्त्यामयिमांसउपासिता सवैमदर्शितंसद्भिरंजसाविंदतेपदं २५
उद्धवउवाच साधुस्तवोत्तमश्लोकमतःकीदृग्विधःप्रभो भक्तिस्त्वय्युपयुज्येतकी
दृशीसद्भिरादृता २६

साधवः स्वस्वमतिपरिकल्पिताः सन्ति बहवः भवतः कीदृशाः
संमतः भक्तिरपि बहुविधा लोके कीदृशी पुनस्त्वय्युपयुज्येत सद्भिश्च नारदादिभिरा
दृता २६

यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

एतच्चकथ्यतां इदंचातिगुह्यंत्वयवक्तव्यमितिसैश्वर्यमाविष्करोति हेपुरुषाध्यक्षेत्यादि
नाब्रह्मादिनियंतः २७ अत्रहेतुःत्वमिति व्योमवदसंगः यतः प्रकृतेःपरःस्वेषामिछ
यात्तपात्तंपृथकूपरिमितंवपुर्येनसः २८ तत्रत्रिंशल्लक्षणैःसाधुंनिरूपयतिकृपालु

एतन्मेपुरुषाध्यक्षलोकाध्यक्षजगत्प्रभो प्रणतायानुरक्तायप्रपन्नायचकथ्यतां २७
त्वंब्रह्मपरमंव्योमपुरुषःप्रकृतेःपरः अवतीर्णोसिभगवन्स्वेछोपात्तपृथग्वपुः २८
श्री**भगवा**नु॰॥कृपालुरकृतद्रोहस्तितिक्षुःसर्वदेहिनां सत्यसारोनवद्यात्मासमःस
र्वोपकारकः २९

रितिपंचभिः कृपालुःपरदुःखासहिष्णुः सर्वदेहिनांकेषांचिदपिअकृतद्रोहःतिति
क्षुःक्षमावान्सत्यसारःस्थिरंबलंवायस्यसः अनवद्यात्माअसूयादिरहितः सुखदुः
खयोःसमःयथाशक्तिसर्वेषामुपकारकः २९ ११३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामैरक्षुभितचित्तः दांतः संयतबाह्येंद्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अ
किंचनः अपरिग्रहः अनीहः दृष्टक्रियाशून्यः मितभुकुलघ्वाहारः शांतः नियतांतः
करणः स्थिरः स्वधर्मे मच्चरणः मदेकाश्रयः मुनिः मननशीलः ३० अप्रमत्तः साव

कामैरहतधीर्दांतोमृदुःशुचिरकिंचनः अनीहोमितभुक्शांतः स्थिरोमच्छरणो
मुनिः ३० अप्रमत्तोगंभीरात्माधृतिमान्जितषड्गुणः अमानीमानदः कल्यो
मैत्रः कारुणिकः कविः ३१

धानः गंभीरात्मानिर्विकारः धृतिमान्विपद्यप्यकृपणः
षितषड्गुणः क्षुत्पिपासेशोकमोहोजरामृत्यूषड्र्मयः एतेजितायेनसः अमानीनमा
नाकांक्षी अन्येभ्योमानदः कल्यः परबोधनेदक्षः मैत्रः अवंचकः कारुणिकः करुणये
वप्रवर्तमानः नदृष्टलोभेनकविः सम्यक्ज्ञानी ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

भा॰ए॰
११४

किंच मयावेदरूपेणाऽदिष्टानपिस्वधर्मान्संत्यज्य योमांभजेत्सोपिएवंपूर्वोक्तवत्सत्त
मः किमज्ञानान्नास्तिक्याद्वा न धर्माचरणेसत्वशुद्ध्यादीन्गुणान् विपक्षेदोषांश्चआ
ज्ञायज्ञात्वाऽपिमद्ध्यानविक्षेपकतयामद्भक्त्यैवसर्वंभविष्यतीतिदृढनिश्चयेनैवध

आज्ञायैवंगुणान्दोषान्मयादिष्टानपिस्वकान्
धर्मान्संत्यज्ययःसर्वान्मांभजेत्ससत्तमः ३२

र्मान्संत्यज्य यद्वाभक्तिदार्ढ्येननिवृत्ताधिकारतयासंत्यज्य अथवाविद्धैकादशी
कृष्णैकादश्युपवासानुपवासानिषेधश्राद्धादयोयेभक्तिविरुद्धाधर्मास्तान्संत्यज्येत्यर्थः
३२

११४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचयावान्देशकालापरिछिन्नः यश्चसर्वात्मायादृशःसच्चिदानंदादिरूपः तंमां
ज्ञात्वाअज्ञात्वापि यद्वा विशेषतःपुनःपुनर्ज्ञात्वाएकांतभावेनयेभजंतीति ३३
साधुलक्षणमुक्त्वाभक्तेर्लक्षणमाहमल्लिंगेत्यष्टाभिः लिंगानिप्रतिमादीनि ३४

ज्ञात्वाज्ञात्वाथयेवैमांयावान्यश्चास्मियादृशः भजंत्यनन्यभावेनतेमेभक्ततमा
मताः ३३ मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं परिचर्यास्तुतिःप्रह्वगुणकर्मानुकी
र्तनं ३४ मत्कथाश्रवणेश्रद्धामदनुध्यानमुद्धव सर्वलाभोपहरणंदास्येनात्मनि
वेदनं ३५

सर्वलाभोपहरणंसर्वस्यलब्धस्यसमर्पणं ३५ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

सर्वाणिजन्माष्टम्यादीनितदनुमोदनं ३६ बलिविधानंपुष्पोपहारादिसमर्पणं ससर्व
वार्षिकपर्वसुचातुर्मास्यैकादश्यादिष्वविशेषतः ३७ उद्यानादिकरणेसामर्थ्येसति

मज्जन्मकर्मकथनंममपर्वानुमोदनं गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः ३६
यात्राबलिविधानंचसर्ववार्षिकपर्वसु वैदिकीतांत्रि कीदीक्षामदीयव्रतधारणं
३७ ममार्चास्थापनेश्रद्धास्वतःसंहत्यचोद्यमः उद्यानोपवनाक्रीडपुरमंदिरकर्मणि
३८ संमार्जनोपलेपाभ्यांसेकमंडलवर्त्तनैः गृहशुश्रूषणंमह्यंदासवद्यदमाय
या ३९

स्वतः असतिचान्यैःसंभूयोद्यमः उद्यानंपुष्पप्रधानं उपवनंफलप्रधानं
वनं आक्रीडःक्रीडास्थानं ३८ संमार्जनंरजसोपाकरणंउपलेपःगोमयोदकाभिरि
राल्लेपनं सेकः तैरेवप्रोक्षणं मंडलवर्त्तनंसर्वतोभद्रादिकरणंमह्यंमम ३९ ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयमन्येनवानिवेदितंनस्वीकुर्यात्एतच्चसाधारणस्थावरविषयं रामग्रामविषयं
वाभक्तस्यानुग्राह्य मेवषड्भिर्मासोपवासैस्तुयत्फलंपरिकीर्त्तितं विष्णोर्नैवेद्यसिक्थेन
पुण्यंतद्भुंजतांकलौ हरिरूपंमुखेनामनैवेद्यमुदरेहरेः पादोदकंचनिर्माल्यंमस्तकेयस्य

अमानित्वमदंभित्वं ह्य तस्याऽपरिकीर्त्तितं अपिदीपावलोकंमेनोपभुंज्यान्निवेदितं ४०

सोऽच्युतइत्यादिवचनेभ्यः यद्वा अन्यस्मैनिवेदितंमेनोपयुंज्यात् मर्त्यंननिवेदयेदि
त्यर्थः विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरं पितृभ्यश्चैव तद्देयंतदानंत्यायकल्पते
पितृशेषंतुयोदद्याद्धरयेपरमात्मने रेतोधाः पितरस्तस्य भवंतिक्लेशभागिनइत्यादि
वचनेभ्यः ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४१ इदानीमेकादश पूजाधिष्ठानान्याह सूर्य इति हे भद्र ४२ अधिष्ठानभेदेन पूजासा
धनान्याह सूर्य इति त्रिभिः त्रय्या विद्यया सूक्तैरुपस्थानादिना अंग हे उद्धव यवसादि
नात्तृणादिना ४३ बंधुसत्कृत्या बंधुवत्संमानेन हृदि खे हृदयाकाशे मुख्यधिया

यद्यदिष्टतमं लोके यच्चापि प्रियमात्मनः तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते ४१
सूर्योग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं भूरात्मा सर्वभूतानि भद्र पूजापदा
नि मे ४२ सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत मां आतिथ्येन तु विप्राग्र्ये गोष्वंग
यवसादिना ४३ वैष्णवे बंधुसत्कृत्या हृदि खे ध्याननिष्ठया वायौ मुख्यधिया तो
येद्रव्यैस्तोयपुरस्कृतैः ४४

प्राणदृष्ट्या तोये तोयादिभिर्द्र व्यैस्तर्पणादिना ४४ राम ४४

CG-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थंडिले भुवि मंत्र हृदयैः रहस्यमंत्रन्यासैः ४५ सर्वाधिष्ठानेषु ध्येयमाह धिष्ण्येष्वेष्वि
ति इति अनेन प्रकारेण एषु धिष्ण्येषु ४६ उक्तायाभक्तेः फलमाह इष्टापूर्तेनेति स
द्भक्तिं दृढां भक्तिं अस्याभक्तेरंतरंगसाधनमाह इत्थमत्स्मृतिः साधुसेवया भवति

स्थंडिले मंत्रहृदयैर्भोगैरात्मानमात्मनि क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ४५
धिष्ण्येष्वेष्विति मद्रूपं शंखचक्रगदांबुजैः युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहि
तः ४६ इष्टापूर्तेन मामेवं यो यजेत समाहितः लभते मयि सद्भक्तिं मत्स्मृतिः
साधुसेवया ४७

यद्वा स्मृतिर्ज्ञानं ततश्च दृढभक्तिमतः पुंसः साधुसेवया मत्तत्त्वज्ञानं भवतीत्यर्थः ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

ज्ञानभक्तिमार्गाविुक्तौतत्रज्ञानमार्गादपिभक्तिमार्गः श्रेष्ठइत्याहप्रायेणेति सत्संगेन
योभक्तियोगः तेनविनोपायः संसारतरणेनविद्यते सत्संगेनेत्यत्रहेतुमाह हिय
स्मात्सतामहंप्रायणंप्रकृष्टमयनं आश्रयः अतःसत्संगोमय्यंतरंगइत्यर्थः ४८

प्रायेणभक्तियोगेनसत्संगेनविनोद्धव नोपायोविद्यतेसध्र्यङ्प्रायणंहिसताम
हं ४८ अथैतत्परमंगुह्यं श्रृ॰॰॰ण्वतोयदुनंदन सुगोप्यमपिवक्ष्यामित्वंमेभृत्यः
सुहृत्सखा ४९ इतिश्रीभागवतेमा॰ ए॰ ११॥

इदानींसांख्ययोगादीनि साधनांतरसव्य
पेक्षाणिसव्यभिचारीणिच सत्संगस्तुस्वतंत्रएवसमर्थःफलाव्यभिचारीचेतिवि
र्णयितुमाह अथेति एतद्वक्ष्यमाणंपरमंगुह्यंअतः श्रृणु॰॰॰॰र्थः ४९ एकादशोध्या
यः ११

११७

द्वादशेसाधुसंगस्यमहिमावर्णितः पुरा कर्मानुष्ठानतत्त्यागव्यवस्थाचततः परं नरो
धयतिनवशीकरोति योगः आसनप्राणायामादि सांख्यंतत्वानांविवेकः धर्मःसा
मान्यतोऽहिंसादिः स्वाध्यायोवेदजपः तपः कृच्छ्रादित्यागःसंन्यासः इष्टापूर्तंइष्टं

श्रीभगवानुवाच नरोधयतिमांयोगोनसांख्यंधर्मएवच नस्वाध्यायस्तप
स्त्यागोनेष्टापूर्तंनदक्षिणा १ व्रतानियज्ञश्छंदांसितीर्थानिनियमायमाः
यथावरुंधेसत्संगःसर्वसंगापहोहिमां २

चपूर्तंच तत्रेष्टमग्निहोत्रादि॥
पूर्तंकूपारामादिनिर्माणं दक्षिणाशब्देनसामान्यतोदानंलक्ष्यते १ व्रतानिएकादश्यु
पवासादीनि यज्ञःदेवपूजा छंदांसिरहस्यमंत्राः अवरुंधेवशीकरोति २ नमोनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यातुधानाराक्षसाः २४ त्वाष्ट्रोवृत्रःकायाधवःप्रह्लादः५ ऋक्षोजांबवान् गध्रो

सत्संगेनहिदैतेयायातुधानाम्रगाःखगाः गंधर्वाप्सरसोनागासिद्धाश्चा
रणगुह्यकाः २ विद्याधरामनुष्येषुवैश्याःशूद्राःस्त्रियोंत्यजाः रजस्तमः
प्रकृतयस्तस्मिंस्तस्मिन्युगेनघाः ४ बहवोमत्पदंप्राप्तास्त्वाष्ट्रकायाध
वादयः वृषपर्वाबलिर्बाणोमयश्चाथविभीषणः ५ सुग्रीवोहनुमानृ
क्षोगजोगृध्रोवणिक्पथः व्याधःकुब्जाव्रजेगोप्योयज्ञपत्न्यस्तथापरे

जरायुः वणिक्पथस्तुलाधारः व्याधःधर्मव्याधः यज्ञपत्न्यःदीक्षितभार्याः ६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषांसत्संगव्यतिरिक्तसाधनांतराभावमाहतइति नअधीताः श्रुतिगणायेः तदर्थं
चनउपासितामहत्तमायैस्तेतथाकिंच अव्रतातप्ततपसः नव्रतानियेषांनतप्तानि
तपांसियेः तेचतेचतथा सत्संगादितिसङ्गिः संगोनाममय्येवसंगस्तस्यापिप्रेत्योक्तं
यद्वास्वसंगस्यापिसत्संगत्वंविवक्ष्यते स्वस्यापिसत्वात् यद्वामदीयसंगादित्यर्थः ७

तेना धीत श्रुतिगणानोपासितमहत्तमाः अव्रतातप्ततपसः सत्संगान्मामुपागताः
केवलेनहिभावेनगोप्योगावोनगामृगाः येन्येमूढधियोनागाः सिद्धामामीयुरंजसा ८

तत्रवृत्रादीनांभवतुनामकथंचित्साधनां तरंगोपीप्रभृतीनांतुन्यान्यदस्तीत्याहकेवले
नेति सत्संगलब्धेन केवलेनैवभावेन प्रीतासानगाः यमलार्जुनादयः नागाः कालियादयः
यद्वा तदानींतनानांसर्वतरुगुल्मादीनामपिभगवतिभावोस्तीतिगम्यते तदुक्तंभग

वंतेव अहोअमीदेववरामरार्चितंपादांबुजंतेसुमनःफलार्हणं नमंत्युपादायशिखा
भिरात्मनस्तमोपहत्यैतरुजन्मयत्कृतमित्यादि सिद्धाः कृतार्थाः संतः ईयुः प्रापुः ८

यंनयोगेनसांख्येनदानव्रततपोध्वरैः व्याख्या
स्वाध्यायसंन्यासैःप्राप्नुयाद्यत्नवानपि ९

स्वप्राप्तेर्दुर्लभतामाहयमिति योगादिभिः कृतप्रयत्नोपियन्नप्राप्नुयात्तमामी
युरितिपूर्वेणान्वयः अत्रचप्रथमंयागोप्युःपश्चाद्योवाश्रीकृष्णेनसहसंगताः ११९
तुसंतः नत्संगोऽन्येषांसत्संगः तेनचतेषांभक्तिरितिज्ञातव्यं ९ नमोभगवते ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोपीनां भावं प्रपंचयति रामेणेति चतुर्भिः श्वाफल्किना अक्रूरेण मयि प्रणीते सति मे
मत्तोऽन्यं सुखायन ददृशुः कुतः वियोगेन तीव्रा उः सह आधियः सांताः अत्र हेतुः म
यि विगाढेन अतिदृढेन भावेन प्रेम्णा अनुरक्तानि चित्तानि यासां ताः ९० तीव्राधिलब्ध

रामेण सार्द्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः विगाढभावेन न मे वियो
गतीव्राधयोऽन्यं ददृशुः सुखाय १० तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगो
चरेण क्षणार्द्धवत्ताः पुनरंग तासां हीना मया कल्पसमा बभूवुः ११ श्रीरामचंद्राय

नकिनास्ताः इति मया सहया एव क्षपा रात्रयः क्षणार्द्धवन्नीतास्ता एव पुनः मया ही
नास्तासां कल्पसमा बभूवुः कथंभूताः वाचामगोचराइत्यर्थः ११ सर्वथा कृष्णयनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit.University Ramtek Collection

किंच एवंतीव्राधयस्ताः मोहमिषेणसमाधिंप्राप्ताइत्याहताइति मय्यनुषंगेणआ
सक्त्याबद्धाधियोयाभिस्ताः स्वमात्मानंस्वदेहं अदः दूरस्थंइदंसन्निहितंचनाविदन्
यद्वास्वंपतिपुत्रादिममतास्पदंआत्मानंअहंकारास्पदं अदः परंलोकंचनाविदन्नि

तानाविदन्मय्यनुषंगबद्धधियः स्वमात्मानमदस्तथेदं यथासमाधौमुनयोब्धितोये
नद्यःप्रविष्टाइवनामरूपे ॥१२॥ मत्कामारमणंजारमस्वरूपविदोऽबलाः ब्रह्ममांपर
मंप्रापुःसंगाच्छतसहस्रशः ॥१३॥

इति यथामुनयः समाधौनामरूपेनविदुःतद्वत् किं
तु अब्धितोयेनद्यश्चमपिप्रविष्टाइत्यन्वयः ॥१२॥ एवंताः अबलाः केवलंमत्कामाः अ
स्वरूपविदः स्वरूपंतुनजानंतितथापिसत्संगात् जारंब्रह्मजारबुद्धिंवेयमपिब्रह्मस्वरू
पमेवमांपरमंप्रापुरित्यर्थः ॥१३॥ १२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मादेवंभूतोमङ्गजनप्रभावः तस्मात्त्वंचोदनांश्रुतिं प्रतिचोदनांस्मृतिंच यद्वाविधिं
चनिषेधंचव्युत्सृज्य १४ मांशरणंयाहिमयैवाकुतोभयःस्याःभव १५ पूर्वंत्वावन्म
योदितेषवहितः स्वधर्मेष्वित्यादिनाकर्मकर्तव्यमित्युक्तंइदानींतुतत्सर्वंत्यक्त्वामां

तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां प्रवृत्तंचनिवृत्तंचश्रोतव्यंश्रुतमेवच १४
मामेकमेवशरणमात्मानंसर्वदेहिनां याहिसर्वात्मभावेनमयास्याह्यकुतोभयः १५
उद्धव उ०॥०॥ संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर ननिवर्ततआत्मस्थोयेनभ्राम्यति
मेमनः १६

शरणंयाहीत्युच्यते तत्रकिमात्मनः कर्तृत्वायास्तिनास्तिवेत्यात्मस्थःआ
त्मविषयःसंशयोननिवर्तते यद्वाकर्मकार्यंत्याज्यंवेत्यात्मस्थः हृदिस्थःसंशयोननि
वर्ततइतिपृच्छतिसंशयइति येनसंशयेन १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit-University Ramtek Collection

उत्तरं स एष इत्यर्धाभिः अयं भावः ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मना भाति तस्य
पंचाध्यासात्स्वजीवानामनाद्यविद्यया कर्तृत्वादि ततो विधिप्रतिषेधाधिकारः तदा
नीं सत्वशुद्ध्यर्थं कर्माणि कुर्वित्युक्तं सत्वे च शुद्धे पुनः कर्मजाड्यपरिहाराय भक्तिं विधे

श्रीभगवानुवाच सएषजीवोविवरप्रसूतिः प्राणेन घोषेण
गुहां प्रविष्टः मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण
इति स्थविष्टः १७

पकं कर्मादरं परित्यज्य मद्विश्वासेन भजेत्युक्तं आज्ञायां तु विधायां न किंचित्कर्तव्यम १२१
स्तीति तत्र तावदीश्वराद्वागादींद्रियद्वारा जीवसंसृतिकारणभूतप्रपंचो ऽमममाहसार्धै

श्चतुर्भिः सएषः अपरोक्षः जीवयतीतिजीवः परमेश्वरः अपरोक्षत्वेहेतुः विवरेषुआ
धारादिचक्रेषुप्रसूतिरिवप्रसूतिराभिव्यक्तिर्यस्यसः तामेवाभिव्यक्तिमाह घोषे
णेति घोषेणपराख्येननादवताप्राणेनसहगुहा आधारचक्रं प्रविष्टः सन्मनोमयं
सूक्ष्मंरूपंपश्यंत्याख्यंमध्यमाख्यंचमणिपूरकचक्रेविशुद्धिचक्रेचउपेत्यप्राप्यवक्त्रे
रु मात्राँखादिः स्वरउदात्तादिः वर्णः अकारादिरित्येवंवैखर्याख्यः स्थविष्टः अतिस्थू
लोनानावेदशाखात्मकोभवति तथाचश्रुतिः चत्वारिवाक्परिमितापदानितानि
विउर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेगयंतितुरीयंवाचोमनुष्यावदंतीति
अभियुक्तश्लोकश्च यासामित्रावरुणसदनादुच्चरंतीत्रिषष्टिंवर्णानंतःकंप्रेटर क
णैः प्राणसंगात्प्रसूते तांपश्यंतींप्रथममुदितांमध्यमांबुद्धिसंस्थांवाचंवक्त्रेकर
णविशदांवैखरींचप्रपद्यइति ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit.University Ramtek Collection

ना.ए.
१२२

१२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अव्यक्तस्यसतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौदृष्टांतः यथेति यथाग्निः खेऽउष्माअ
व्यक्तोष्मरूपः दारुणि अधिकंमथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फु
लिंगादिरूपोभवति पुनः प्रकृष्टोजातोहविषासंवर्द्धतेतथैवेयंवाणीममाभिव्यक्तिः

यथानलः खेऽनिलबंधुरुष्माबलेनदारुण्य[illegible]धिमथ्यमानः अणुः प्रजातोहविषा
समिध्यतेतथैवमेव्यक्तिरियंहिवाणी १८ एवंगदिः कर्मगतिर्विसर्गोघ्राणोर
सोदृक्स्पर्शःश्रुतिश्च संकल्पविज्ञानमथाभिमानः सूत्रंरजः सत्वतमोविकारः

१८ उक्तांवाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तिश्चातिदिशति एवंगदिः गदनंभाषणंमे
व्यक्तिरित्युपसंहारः कर्महस्तयोर्वृत्तिः गतिः पादयोः विसर्गःपायूपस्थयोः इतिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेंद्रियाणांघ्राणंअवघ्राणं रसोरसनं हकूदर्शनं स्पर्शःस्पर्शनं श्रुतिःश्रवणमितिज्ञा
नेंद्रियाणां संकल्पोमनसः विज्ञानंबुद्धिचित्तयोः अभिमानोहंकारस्य सूत्रंप्रधान
स्य सत्वरजस्तमसांविकारोधिदैवादिस्त्रिविधःप्रपंचः मेव्यक्तिरितिपूर्वेणान्वयः १९
तस्मा दीश्वराभिव्यक्तिरुपःप्रपंचोनेश्वाराद्भिन्नोस्तीत्याह अयतिमि अयंजीवइ
अयंहिजीवास्त्रिरद्भ्ञयोनिरव्यक्तएकोवयसासआद्यः विश्लिष्टशक्तिर्बहुधेवभा
ति बीजानियोनिंप्रतिपद्ययद्भूत् २० श्वरः आदावव्यक्तएकएव वयसाकालेनवि
श्लिष्टाविभक्तावागीदींद्रियरुपाःशक्तयोयस्य यद्वाविशेषेणाश्लिष्टाआलिंगितामा
याशक्तियेंनसबहुप्रकारइवाभाति यतःसएवआद्यःत्रिवृत्त्रिगुणाश्रयः अज्ञयो
निर्लोकपद्मस्यकारणभूतः एकस्यबहुधाभानेदृष्टांतःयोनिंक्षेत्रंप्राप्यबी

श्रीधरटी० १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्तन्मायाविलासितत्वात्तदाश्रयमिदंजगन्नततः पृथगितिसदृष्टांतमाहयस्मिन्नि
ति तंतुवितानेसंस्थास्थितिर्यस्यसः पटोयथातथायास्मिन्निदंविश्वमोतंदीर्घतंतुषुपट
इव प्रोतंतिर्यक्कृततंतुष्विव एवंभूतंसमाष्टिमध्यात्मकंविश्वमाविषयात्मन्यध्यस्तं

यस्मिन्निदंप्रोतमशेषमोतंपटोयथातंतुवितानसंस्थः यएष
संसारतरुः पुराणःकर्मात्मकःपुष्पफलेप्रसूते २७

देहरूपंजीवस्यकर्तृत्वादिसंसारहेतुः अतस्तद्विवेकज्ञानेनकर्मादिसर्वंत्याज्य
मित्युक्तमित्या शयेनाहयएषइतिसार्द्धैस्त्रिभिः पुराणः अनादिः कर्मात्मकः प्र
वृत्तिस्वभावः पुष्पफलेभोगापवर्गौकर्मतत्फलेवाप्रसूतेजनयाति २७ रामजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit.University Ramtek Collection

वृक्षरूपकंप्रपंचयतिद्वेइति द्वेपुण्यपापेअस्यबीजे सचशतमूलःशतंअपरिमि
तावासनाःमूलानियस्य त्रयोगुणाःनालानिप्रकांडाःयस्य पंचभूतानिस्कंधाय
स्य पंचरसाः शब्दादिविषयास्तेषांप्रसूतिर्यस्मात् दशचएकाचशाखाइंद्रिया

द्वेअस्यबीजेशतमूलस्त्रिनालःपंचस्कंधःपंचरसप्रसूतिः दशै
कशाखोद्विसुपर्णनीडस्त्रिवल्कलोद्विफलोऽर्कंप्रविष्टः २२ ७

णियस्यद्वयोःसुपर्णयोर्जीवपरमात्मनोर्नीडंयस्मिन् त्रीणिवल्कलानित्वचोवात
पित्तश्लेष्माणोयस्यद्वेसुखदुःखेफलेयस्यसः अर्कंप्रविष्टःसूर्यमंडलपर्यंतंव्या १२४
प्तःतंनिर्भिद्यगतस्यसंसाराभावात् २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्फलभोक्तृनाह गृध्यंतीतिगृध्राः कामिनः ग्रामेचराः गृहस्थाः अस्यवृक्षस्यै
कंफलंदुःखमदंति परिणामतः स्वर्गादेरपिदुःखस्वरूपत्वात् हंसाविवेकिनोण्य

अदंतिचैकंफलमस्यगृध्राग्रामेचराएकमरण्यवासाः
हंसायएकंबहुरूपमिज्यैर्मायामयंवेदसवेदवेदं २३

वासाः सन्यासिनएकंफलंसुखमदंति एकंपरमात्मानंमायामयमेवंबहुरूपंइज्यैः
पूज्यैर्गुरुभिः कृत्वायोवेदसवेदवेदं तत्वार्थंवेद २३ श्रीकृष्णपरमात्म०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit.University Ramtek Collection

त्वंचैवंज्ञात्वाकृतकृत्यःसर्वंसाधनंत्यजेत्याह एवमिति एकांतभक्त्याशितेनतीक्ष्णे
नज्ञानकुठारेण स्वतंत्रतावाह्योर्ज्ञानिभक्त्योः जीवोपाधिंत्रिगुणात्मकंलिंगशरी

एवंगुरूपासनयैकभक्त्याविद्याकुठारेणशितेनधीरः विवृश्च्य
जीवाशयमप्रमत्तःसंपद्यचात्मानमथत्यजास्त्रं २४ इतिश्रीभाग
वतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेद्वादशोध्यायः॥१२॥

रंविवृश्च्यछित्वापरमात्मानंचसंपद्यप्राप्यअथास्त्रंसाधनंत्यजेति २४. इतिश्रीभाग
वतेमहापुराणेएकादशस्कंधेटीकायांद्वादशोध्यायः॥१२॥श्रीकृष्णार्पणमस्तु छ १२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रति

त्रयोदशेथसत्वस्यवृध्याविद्योदयक्रमः हंसेतिहासतश्चित्तगुणविश्लेषवर्णनं
विद्याकुठारेणजीवाशयंवृश्च्यसाधनंस्यजेत्सुक्तं नतुतत्रतमआदिगुणत्रयवृ
त्तिबंधेसतिकथंविद्योत्पत्तिरित्याशंक्यतन्निवृत्त्याविद्योत्पत्तिप्रकारमाह सत्वमि

श्रीभगवानुवाच सत्वंरजस्तमइतिगुणाबुद्धेर्नचात्मनः सत्वेनान्यतमौहन्यात्स
त्वंसत्वेनचैवहि १

मितिसप्तभिः तत्रयथानंदा त्मधर्मागुणाःस्युस्तर्हितत्स्वरू
पत्वात्तेषांनिवृत्त्याविद्योत्पत्तिर्नस्यात् नत्वेतदस्तीत्याह बुद्धेःप्रकृतेर्गुणाःनत्वात्म
नइति अतः सत्वेनसत्ववृद्ध्याऽन्यतमौहन्यात्रजस्तमोवृत्तिर्जयेदित्यर्थः सत्वंचस
त्वदयादिवृत्तिरूपमुपशमात्मकेनसत्वेनैवहन्यात्

रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१२६

ननुगुणत्रयवृत्तीनांपरस्परोपमर्दरूपत्वात्कथंसत्ववृत्त्यैवेतरवृत्त्योर्नियमेनहंत
व्यास्तत्राहहंत्वादिति मङ्क्तिंलक्ष्यतियोधर्मःसभक्तिरूपएववासत्वमेवकथंव
र्द्धतेतत्राह सात्विकानांपदार्थानामुपासयासेवयासत्वंभवतीत्यर्थः २ सचधर्मो

सत्वाद्धर्मोभवेद्वृद्धात्पुंसोमद्भक्तिलक्षणः सात्विकोपासयासत्वंततोधर्मःप्रवर्त्त
ते २ धर्मोरजस्तमोहन्यात्सत्ववृद्धिरनुत्तमः आशुनश्यतितन्मूलोह्यधर्मउभयेहते

रजस्तमश्चहन्यात् कुतः नविद्यतेउत्तमोयस्मात्सः सर्वोत्तमः यतः सत्ववृद्धिःसत्वस्य
वृद्धिर्यस्मात् कारणात्सः अतएवतत्कार्योधर्मप्रतिबंधोपिनास्तीत्याह तस्मिन्नुभ १२६
यस्मिन्हतेतन्मूलः तेरजस्तमसीरागद्वेषादिनाप्रमादालस्यादिनाचमूलंयस्यसः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सात्विकोपासनयासत्वंवर्द्धतइत्युक्तं तानेवसत्ववृद्धिहेतून्दर्शयितुंसामान्यतोगु
णत्रयवृद्धिहेतूनाह आगमः शास्त्रं अपः आपः क्वचिदागमोऽर्थइतिपाठः ४ एषु

आगमोपः प्रजादेशः कालः कर्मचजन्मच ध्यानंमंत्रोथ
संस्कारोदशैतेगुणहेतवः ४ ततःसात्विकमेवैषांयद्वृद्धाः
प्रचक्षते निंदंतितामसंतत्तद्राजसंतदुपेक्षितं ॥ ॥५॥

सात्विकादिनिर्णयमाह एषांमेवमध्येयद्वृद्धाः प्रचक्षतेप्रशंसंति यच्चनिंदंतितत
त् यत्तुतैर्वृद्धैरुपेक्षितंनस्तुतंनचनिंदितंतद्राजसं ५ नमोभगवतेकृष्णायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
१२७

सात्विकान्येवेतिनिवृत्तिशास्त्राण्येवसेवेतनप्रवृत्तिपाषंडशास्त्राणि तीर्थपएवन
गंधोदकसुरायाः प्रजाः जनाः निवृत्तान्जनानन्नप्रवृत्तदुराचारान्विविक्तदेशंनर
ध्याघ्रतदेशान् कालंब्राह्ममुहूर्त्तादिकंध्यानादौनप्रदोषनिशीथादीन् कर्मचनित्यंन
काम्याभिचारादीति जन्मचवैष्णवशैवदीक्षालक्षणं नशाक्तक्षुद्रदीक्षारूपं ध्यानं

सात्विकान्येवसेवेतपुमान्सत्वविवृद्धये ततोधर्मस्ततोज्ञानंयावत्स्मृतिरपोहनं ६

श्रीविष्णोः नृकामिनीविद्विषां मंत्रंप्रणवादिकंनकाम्यक्षुद्रान् संस्कारंआत्मनः शोध
कंनतुकेवलंदेहगृहादीनां ननुज्ञानंमहावाक्यश्रवणादेवोत्पत्तेःकिंतत्रसत्ववृद्ध्याध १२७
र्मेणवाअतआह यावत्स्मृतिः आत्मापारोक्ष्यं यावच्चदेहद्वयतत्कारणभूतगुणापोहः
तावत्पर्यंतंज्ञानंभवतीत्यर्थः ६

ध

ननुगुणव्यतिकराज्जातोदेहः कथंस्वाश्रयभूतान्गुणान्स्वतएवोत्पन्नयाविद्यया
पोत्थस्वयमप्युपरमेत्तत्राह वेणूनांसंघर्षाज्जातोग्निर्यथास्वतएवोत्पन्नाभिर्ज्वा
लाभिस्तद्वनंसर्वंदग्ध्वास्वयंशाम्यति एवंदेहोपि तत्क्रियः तस्याग्नेरिवक्रियाव्यापा

वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनं एवंगुणव्यत्ययजोदेहःशाम्यतितत्क्रियः ७
उद्धवउवाच विदंतिमर्त्याः प्रायेणविषयान्पदमापदां तथापिभुंजतेकृष्णतत्कथंश्वखरा खं
जवत् ८
रोयस्पसः ७ ननुनियतेंद्रियतयासात्विकसेवायामियानास्तिपुरुषार्थः तथापिराज
सादीन्विषयान्दुःखमितिजानंतोऽपिकथंसेवंतइतिपृच्छति विदंतीति पदंस्थानं
श्वानोयथाभर्त्स्यमानाअपि खरायथापदाहताउपमानाअपिखरीमनुधावंति अजाय
यानिर्लज्जाः हंतुमानीताअपितद्वत् ८

व

मिथ्याभिनिवेशेनभुंजतइतिसहेतुकमाह अहमितित्रिभिः प्रमत्तस्याविवेकस्यन्यँदे स्य
हादावहमितिमिथ्याबुद्धिर्हृदियथायथाँउत्सर्पति ततोहंबुद्धेश्चवैकारिकँप्रधानमपि सत्त्व
मनः प्रतियोरंदुःखात्मकंरजःउपसर्पतिमनोव्याप्नोतीत्यर्थः ९ इदमेवंइदमेवंभोग्य

श्रीभगवानुवाच॥ अहमित्यन्यथाबुद्धिः प्रमत्तस्ययथाहृदि उत्सर्पतिरजोघोरंततोवैकारिकंमनः ९ रजोयुक्तस्यमनसः संकल्पः सविकल्पकः ततःकामोगुणध्यानात्दुःसहः स्याद्धिदुर्मतेः १० करोतिकामवशगः कर्माण्यविजितेंद्रियः दुःखोदर्काणिसंपश्यन्रजोवेगविमोहितः ११

मितिसविकल्पः संकल्पः स्यात् ततश्चअहोरूपमहोभावइति गुणध्यानात् दुर्द्धरः कामःस्यात् १० ततोविषयान्भोक्तुंकर्माणिकरोति १२ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंचेन्नकस्यापिदुःखनिवृत्तिःस्यादित्याशंक्याह यदपियद्यपिरजस्तमोभ्यांविक्षि
प्तधीर्मूढधीश्चतथापिविद्वान्विवेकीपुनर्मनोनिरुंधन्नसज्जते १२ विषयदोषदृ
ष्ट्यापिमनोनिरो धाशक्तौसुखंतन्निरोधोपायमाह अप्रमत्तइति अनिर्विण्णः

करोतिकाम वशगःकर्माण्यविजितेंद्रियः दुःखोदर्काणिसंपश्यन्रजोवेगविमोहि
तः ११ रजस्तमोभ्यांयदपिविद्वान्विक्षिप्तधीःपुनः अतंद्रितोमनोयुंजन्दोषदृ
ष्टिर्नसज्जते १२ अप्रमत्तोनुयुंजीतमनोमय्यर्प्पयंछनैः अनिर्विण्णोयथाकालंजि
तश्वासोजितासनः १३ एतावान्योगआदिष्टोमच्छिष्यैःसनकादिभिः सर्वतोमनआ
कृष्यमय्यद्धावेश्यतेयथा १४

अनलसःयथाकालंत्रिष वणंमयिपरमानंदरूपेऽर्प्पय
न्समादध्यात् १३ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१२९

विषयैः संग्रथितस्यमनसस्तद्वियोगेनेश्वरनिष्ठत्वमसंभावितंमन्यमानंप्रतितन्नि
रूपणायेतिहासमुपक्षिपन्निएतावानिति यथावन्मयावेश्यतइस्येतावानित्यर्थः १४

उद्धव उवाच ॥ यदात्वंसनकादिभ्योयेनरूपेणकेशव योगमादिष्टवानेतद्रू
पमिच्छामिवेदितुं १५ श्रीभगवानुवाच पुत्राहिरण्यगर्भस्यमानसाः सन
कादयः पप्रच्छुःपितरंसूक्ष्मांयोगस्यैकांतिकींगतिं १६ भवायनमः ७

मद्विधैरिसुक्तेतेषामतिउपायसामनेनरूपेणनिरूपणासंभवात्पृच्छतियदेति त्वं
कालंनदेतद्रूपंचवेदितुमिच्छामितत्कथयेति १५ मानसाः पुत्राः सूक्ष्मांदुर्ज्ञेयां ऐकांति १२९
कींगतिंपरांकाष्ठां १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवाह गुणेष्विति विषयेषु स्वभावतो रागादिवशश्चेतः प्रविशंति चानुभूता विष
यावासनारूपेण चेतसि प्रविशंति अतितितीर्षोः विषयानतिक्रमितुमिच्छोः १७
एवमिति महान् देवोपि स्वयंभूरपि भूतानां स्रष्टापि ध्यायमानः विचारयन्नपि

सनका दय ऊचुः ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो कथमन्योन्यसंत्यागो
मुमुक्षोरतितितीर्षोः १७ श्रीभगवानुवाच एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ध्या
यमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः १८ स मामचिंतयद्देवः प्रश्नपारतितीर्षया
तस्याहं हंसरूपेण सकाशमगमं तदा १९

प्रश्नस्य बीजं यद्ज्ञानादयं प्रश्नः तन्नावि
दत् यतः कर्मविक्षिप्तधीः १८ प्रश्नस्य पारमुत्तरमभिप्रायो वा तस्य तितीर्षया जि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मासयाहंसरुपेणोति यथाहंसोनीरंक्षीरंचपृथक्कर्तुंशक्तः एवमहंगुणांश्चेतश्चेति
घोनयितुंहंसरुपेणगतोस्मीति १९ २० इत्यहंमुनिभिः पृष्टइति पृथग्वाक्यं यद
वोचमितिपृथक् अतोस्मछ्श्वारत्तिरदोषः तेभ्योयदवोचंतन्मेवचनंनिबोध २१

दृष्ट्वामांतउपव्रज्यकृत्वापादाभिवंदनं ब्रह्माणमग्रतःकृत्वाप्रप्रछुःकोभवानिति
इत्यहंमुनिभिः पृष्टस्तत्वजिज्ञासुभिस्तदा यदवोचमहंतेभ्यस्तदुद्धवनिबोधमे २१
वस्तुनोयद्यःनानात्वआत्मनःप्रश्नईदृशः कथंघटेतवोविप्रावक्तुर्वामेकआश्रयः
२२
देहादिविविक्तात्मज्ञानेसतितन्निष्ठस्यरागाद्यसंभवात्त्वयमेवविषयचेतसोर्विश्ले
षोभवतीतिवक्तुंप्रश्नखंडनमिषेणैवतावदात्मानात्मविवेकमाहवस्तुनइतित्रिभिः
किमात्मनोयंप्रश्नः तदुपाधेर्भूतसंघस्यवा यद्यात्मनः तर्हितस्यवस्तुनःपरमार्थरूप १३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यअनानात्वेसन्तिहेविप्राः वः युष्माभिः [illegible]तः ईदृशः बहुषु निर्द्धारणरूपः कथं घटेत
वक्तुरुनरदातुर्वामिममकआश्रयः अविशेषेआत्मनिकंजातिगुणादिविशेषमा
श्रित्सोत्तरंवक्ष्यामीत्यर्थः २२ भूतसंघाविषयत्वेपि अयंवः प्रश्नः वाचारंभः वाङ्मा
त्रेणारब्धः यतोनर्थकः कुतः भूतेषुदेवमनुष्यादिदेहेषुपंचभूतात्मकेषुअतःस

पंचात्मकेषुभूतेषुसमानेषुचवस्तुतः कोभवानितिवः प्रश्नोवाचारंभोत्यनर्थकः २३
मनसावचसादृष्ट्याग्रह्यतेऽन्यैरपीन्द्रियैः अहमेवनमत्तोन्यदितिबुध्यध्वमंजसा २४

मानेषु आभिन्नेषुपुनश्चवस्तुतः परमकारणात्मनाअभिन्नेषु वाचारंभणंविकारो
नामधेयंमृत्तिकेत्येवसत्यमितिश्रुतेः २३ तत्रपंचात्मकत्वंप्रत्यक्षादिसिद्धमेवेति
परमकारणाभेदमेवोपपादयतिमनसेतिमनआदिभिर्यद्गृह्यतेतत्तदहमेवेत्य

र्थः अंजसातत्वविचारेण एतेनैवसर्वात्मकोऽहमित्यंजसाऽच्युतरमुक्तंभवति २४
एवंप्रश्नस्वंडनमिषेणैवात्मस्वरूपंसामान्यतोनिरूप्यब्रह्मणोपिदुष्परिहरंयत्प्र
ष्टतत्रोत्तरमाह गुणेष्वित्यादिनायावदध्यायसमाप्ति अयमभिप्रायः यदिकर्तृत्व
भोक्तृत्वादिरूपतया विषयैः संग्रथितंचित्तंबुध्यादिशब्दवाच्यमेवजीवस्यस्वरूपंभ

गुणेष्वाविशतेचेतोगुणाश्चेतसिचप्रजाः जीवस्यदेहउभयंगुणाश्चेतोमदात्मनः २५

वेत् ततः तद्वियोगेनघटेतनस्यतुस्वरूपंमहब्रह्मैवचित्ताध्यासेनतुतत्स्वभावतया
विषयैःसंग्रथितं अतःस्वस्यब्रह्मत्वभावनयाविषयाणांचमिथ्यात्वानुसंधानेन
सर्वतोनिर्विघ्नंभगवंतंभजंते भवत्येवपरिपूर्णस्वरूपावस्थानमिति हेप्रजाःपुत्रकाः
सत्यंगुणेषुचेतआविशतिगुणाश्चचेतसि एवंगुणाश्चेतश्चोभयंग्रथितं मदात्मनोब्रह्म १२१
स्वरूपस्यजीवस्यदेहः अध्यस्तउपाधिःनतुस्वरूपं २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादभीक्ष्णंपुनःपुनर्गुणसेवयातत्संस्कारेणगुणेष्वाविशच्चित्तंतेचपुनर्वासनारू
पेणचित्तेप्रकर्षेणभवंतीतितथातेगुणाश्चेतश्चएवंद्वयमुभयंतन्मद्रूपःसन्त्यजेत् २६
ननुजाग्रदाद्यवस्थावतःकुतःकूटस्थत्वंतद्रूपतातत्राह जाग्रत्जागरःस्वप्नःसुषुप्तं

गुणेषुचाविशच्चित्तमभीक्ष्णंगुणसेवया। गुणाश्चचित्तप्रभवा।
मद्रूपउभयंत्यजेत् २६ जागरस्वप्नःसुषुप्तंचगुणतोबुद्धिवृत्त
यः तासांविलक्षणोजीवःसाक्षित्वेनविनिश्चितः २७

चेतिबुद्धेरेतावृत्तयः ताश्चनस्वाभाविक्यः किंतुसत्वाज्जागरणंविद्याद्रजसास्वप्नमा
दिशेत् प्रस्वापंतमसाजंतोस्तुरीयंत्रिषुसंततमितिवक्ष्यमाणक्रमेणगुणतएव
जीवस्तुविलक्षणःतदवस्थारहितएवनिश्चितःकुतःतासांसाक्षित्वेन २७ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तुतर्हिकथंअहंजार्गर्मीस्यादिप्रत्तीतिस्तत्राह यर्हियस्मात् सम्यकूस्टतिः सरण
मनयेतिसंसरतिर्बुद्धिः तयाबंधोऽयमात्मनोगुणरूतिर्ददाति तस्मान्मयितुर्येस्थि
तःसन्निमंसंसरतिवंधंजत्यात् तत्तदागुणचेतसांगुणानांचेतसश्चान्योन्यंसा

॥ यर्हिसंसरतिबंधोयमात्मनोगुणवृत्तिदः मयितुर्येस्थितोजत्यात्त्यागस्तद्गुणचेतसां २८ अहंकारकृतंबंधमात्मनोर्थविपर्ययं विद्वान्निर्विद्यसंसारचिंतांतुर्येस्थितस्त्यजेत् २९ ॥

गोभवति २८ कथंसंसत्साबंधःकथचतंजत्यात्तदाह अहंकारेणकृतंबंधंआ
त्मनः अर्थविपर्ययंआनंदायावरणेनानर्थहेतुंविद्वान्जानन्सन्निर्विद्यदुःखमे
तदितिज्ञात्वातुर्येस्थितोभूत्वासंसारचिंतांसंसारोबुद्धिःतास्मिन्चिंताअभिमानंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावदेवंनसृजेत्तावत्तस्यकर्मज्ञानादिसंबंध्यर्थमित्याहयावदिति यद्यपिजागर्त्ति
कर्मादिषु तथापिस्वपन्नूस्वभान्पश्यन्निवभवति यतोज्ञः असम्यक्दर्शी अत्र
जागरस्यस्वप्नत्वेदृष्टांतः स्वप्नइति ३० ननुकथंवेदप्रमितवर्णाश्रमकर्मादिनाना

॥यावन्नानार्थधीःपुंसोननिवर्त्तेतयुक्तिभिः जागर्त्यपि
स्वपन्नज्ञःस्वप्नेजागरणंयथा ३० असत्वादात्मनोन्येषां
भावानांतत्कृताभिदा गतयोहेतवश्चास्यमृषास्वप्नदृशो
यथा ३१

धीर्निवर्त्तेततत्राहअसत्वादिति भावानांदेहादीनांतत्कृताभिदावर्णाश्रमादिरूपा
गतयःस्वर्गादिफलानिहेतवः कर्माणिचास्यात्मनोमृषा अविद्यावद्विषयोवेदइतिभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युक्तिभिरित्युक्तंताएवयुक्तीराह यइति अर्थान्स्थूलान्देहादीन्समस्तकरणैः चक्षु
रादिभिःभुंक्ते कथंभूतान्अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः य
श्चस्वप्नेहृदिजागरदृष्टसदृशान्वासनामयान्भुंक्ते यश्चसुषुप्तेतान्सर्वानुपसं
हरतिसएकः कुतः त्रिगुणवृत्तिदृक्अवस्थात्रयद्रष्टा ननुजाग्रदवस्थायांसर्वेंद्रियाणि

योजागरेबहिरनुक्षणधर्मिणोर्थान् भुंक्तेसमस्तकरणैर्हृदितत्सदृक्षान् स्वप्नेसुषु
प्तउपसंहरतेसएकःस्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः ३२

पश्यंति स्वप्नंमनः
सुषुप्तिंतत्संस्कारशेषाबुद्धिः कथमात्मातद्द्रष्टातत्राह इंद्रियेशः ननुइंद्रियेशाअपि
विश्वतैजसप्राज्ञाभिन्नाःनकुतः स्मृत्याप्रतिसंधानेनसर्वावस्थास्वन्वयात् यःस्वप्ना
न्द्राक्षंयश्चतदनंतरंनकिंचिदवेदिषंसएवसन्तर्हिजागर्मीति उपाधिभेदेन विविश्वा
दिव्यवहारइतिभावः एतेनबाल्ययुवाद्यवस्थास्वपिप्रतिसंधानेनात्मैक्यंद्रष्टव्यं ३२ १३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः किं अतआह एवमिति गुणतोयाएतामनसस्त्र्यवस्थाः ताः मद्विषयामायिक्ल
तानततलतः संतीतिनिश्चितआत्मरूपोऽर्थोयैः तेयूयं अखिलसंशयानामाधियं

एवं विमृश्य गुणतोमनसस्त्र्यवस्थामन्मायया मयिकृताइतिनि
श्चितार्थाः संछिद्यहार्दमनुमानसदुक्तितीक्ष्णज्ञानासिनाभजत
माखिलसंशयाधि ३३

तेऽस्मिन्त्रिसाधिरहंकारः तंसंछिद्यहार्दंहृदिस्थितंमांभजत केनछित्वातदाह अ
नुमानैः सदुक्तिभिः सतामुपदेशैः श्रुतिभिश्चतीक्ष्णज्ञानखड्गेन ३३ नमोरामाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

अनुमानानिदर्शयतिईक्षेतेति इदंजगत्विभ्रममीक्षे तत्रहेतवः मनोविजृंभि
तत्वात्विनाशित्वाच्चस्वप्नवत् अतिचंचलत्वाच्चअलातचक्रवत् ननुभ्रमो

ईक्षेतविभ्रममिदंमनसोविलासंदृष्टंविन
ष्टमतिलोलमलातचक्रं विज्ञानमेवमुरुधे
वविभातिमायास्वप्नस्त्रिधागुणविसर्गकृतो
विकल्पः ३४

पिनिर्विषयःकथंस्यात्तत्राहविज्ञानमितिनिगमनं तस्मात्त्रिधासोऽयंगुणपरि
णामकृतोविकल्पोभेदःसमायेति ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्ततो दृश्याद्दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवेत् तन्नैश्चल्यार्थं च निवृत्त
तृष्णः तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्यापाररहित इत्यर्थः ननु देहवतः सर्व
थाद्वैतदृष्टिप्रतिनिवर्तनायोगात्पुनः संसारः स्यादेव तत्राह संदृश्यत इति क्वचिदा

॥१७ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो नि
रीहः संदृश्यते क्वच यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानि
पातात् ३५

वश्यकाहारादिषु यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या त्यक्तं तत्पुनर्मोहाय
न भवेदेव किंतु देहपातपर्यंतं स्मृतिरविस्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

निर्गतं

एतद्देहोपपादयन्ति देहमिति आसनादुत्थितं उत्थाय तत्रैव स्थितं तं वा ततः क्वचिदपेतं पुनस्तत्रै
वोपेतं वा देहमपि नानुसंधत्ते कुतो ऽन्यत् यतः येन देहेन स्वरूपमध्यगमत् ज्ञानवा

देहं च नश्वरमथ स्थितमुत्थितं वा सिद्धो न पश्यति यतो ऽध्यग
मत्स्वरूपं दैवादुपेतमुत दैववशादपेतं वासो यथा परिकृतं म
दिरामदान्धः ३६

नूतं देहं यतः कारणादितिवा परिकृतं परिहितं वासो गतं स्थितं वा यथा नवेति तद्

१३५

ननुचयः परिपाल्यमानोपिम्रियतितं चेन्नपश्यतितर्हिपतेदेवनेत्याह देहोऽपीति
दैववशेनगछन् स्वारंभकंकर्मयावद्स्तितावत्पर्यंतंप्रतिसमीक्षतएवजीवत्येव
सासुः प्राणेंद्रीयसहितः ननुतर्हितस्मिन्कदाचिदासज्जेतापिनेत्याहतमिति

देहोपिदैववशगः खलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएव
सासुः तंसप्रपंचमधिरूढसमाधियोगः स्वाप्नंपुनर्नभजते
प्रतिबुद्धवस्तुः ३७

स्वाप्नंस्वप्नतुल्यं अधिरूढः प्राप्तः समाधिपर्यंतोयोगोयेन अतएवप्रतिबुद्धंज्ञातंपरमा
र्थवस्तुयेनसः तथाचश्रुतिः तस्यतावदेवचिरंयावन्नविमोक्ष्येअथसंपत्स्य इति ३७ नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तार्थेतेषांविश्वासार्थंस्वस्वरूपमाहमयेति सांख्यमात्मानात्मविवेकः योगोष्टांगः
तयोर्गुह्यंरहस्यंयज्ञंविष्णुं युष्मद्धर्मविवक्षयेत्यनेनधर्मोअप्युपदिष्टाइतिज्ञेयंअत

॥ ७ ॥ मयैतदुक्तंवोविप्रागुह्यंयत्सांख्ययोगयोः जानी
तमागतंयज्ञंयुष्मद्धर्मविवक्षया ३९ अहंयोगस्यसांख्य
स्यसत्यस्यर्त्तस्यतेजसः परायणंद्विजश्रेष्ठाः श्रियःकी
र्तेर्दमस्यच ४० योगात्मने०

एवयत्तेनहंसरूपेणब्रह्मणेत्याख्यमाधवेत्यनुवादोभविष्यति ३८ ऋतंप्रमीयमा
णोधर्मः सत्यंअनुष्ठीयमानोधर्मः तेजःप्रभावः एतेषांपरमयनं ३९ श्रीराम ७ १३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच मामिति कथंभूताः अगुणाः गुणपरिणामरूपानभवंतिकिंतुनित्याइत्यर्थः

मांभजंतिगुणाःसर्वेनिर्गुणंनिरपेक्षकं सुहृदंप्रियमात्मानंसाम्यासं
गाद्योगुणाः ४० इतिमेछिन्नसंदेहामुनयः सनकादयः सभाजयि
त्वापरयाभक्त्याःगृणतसंस्तवैः ४१ नैरहंपूजितःसम्यक्संस्तुतःप
रमर्षिभिः प्रत्येयायस्वकंधामपश्यतःपरमेष्ठिनः ४२ इतिश्री
भागवतेमाहापुराणेएकादशस्कंधेत्रयोदशोध्यायः॥१३॥ नमोभगवते

४० मेमयाअगृणन्तमांतुष्टुवुः ४१ प्रत्येयायप्रत्यागतोस्मि ४२ इतिश्री॥ ० ए०
टिकायांत्रयोदशोध्यायः॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit,University Ramtek Collection

भाग
१३७

चतुर्दशे परंश्रेयोभक्तिरेवनचेतरत् इत्येतद्वर्ण्यतेध्यानयोगश्चसहसाधनैः एवंताव
द्भगवताभक्त्यामोक्षइत्युक्तं अन्येत्वन्यानिसाधनानिवदंति तत्राविशेषानिर्द्धा
रणायपृच्छतिश्रेयांसिश्रेयःसाधनानिकिंविकल्पेनप्राधान्यंउताहोकिंवाएकस्यै

उद्धव उ० वदंतिकृष्णश्रेयांसिबहूनिब्रह्मवादिनः तेषांविकल्पप्राधान्यमुताहोए
कमुख्यता १ वदतोदाहृतःस्वामिन्भक्तियोगोनपेक्षितः निरस्यसर्वतःसंगंये
नत्वय्याविशेन्मनः २

वमुख्यता १ एकमुख्यतापक्षोत्यानेकारणंभवतीति अन भ
पेक्षितंअपेक्षायस्मिन्सः अहेतुकः अयमर्थः भवतायोगयुक्तः अन्येचयानि
श्रेयःसाधनानिवदंति तेषांकिंसाक्षात्फलसाधनत्वेनप्राधान्यमेवसर्वेषांउताङ्गां १३७
गित्वं प्राधान्येपिकिंविकल्पेनसर्वेषांतुल्यफलत्वंयद्वाकश्चिदस्तिविशेषइति २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीय
स्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि क्षुल्लकफलानीतिवि

श्रीभगवानुवाच ॥ कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता मयादौ ब्रह्मणे प्रोक्ता
धर्मो यस्यां मदात्मकः ३ तेन प्रोक्ता चपुत्राय मनवे पूर्वजाय सा ततो भृग्वादयो
गृह्णन्सप्त ब्रह्ममहर्षयः ४ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः
मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ५

वेक्तुं प्रकृत्यनुसारेण बहुधा वेदार्थ
प्रतिपत्तिमाह कालेनेति सप्तभिः मदात्मकः मय्येवात्मा चित्तं येन सः ३ भृग्वाद
यः भृगुश्च मरीचिरंगिरसौ पुलस्त्यः पुलहः क्रतुरित्येते च सप्त ब्रह्माणः प्रजाप
तयः ते च ते महर्षयश्च ४ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंदेवाः क्लमखेदृदौर्गंध्यादिराहित्येनकिंदेवाः मनुष्यावेतिसंदेहास्पदभूताः द्वीपां
तरमनुष्याः एवंकिंनराः किंचिन्नराइवमुखतः शरीरतोवाकिंपुरुषाः किंचित्पुरुषा

किंदेवाः किंनरानागा रक्षःकिंपुरुषादयः बह्व्यस्तेषांप्रकृत
योरजःसत्वतमोभुवः ६ याभिर्भूतानि भिद्यंतेभूतानांमत
यस्तथा यथाप्रकृतिसर्वेषांचित्रावाचःस्रवंतिहि ७ ७

स्ववानरादयः प्रकृतयः वासनाः बह्व्यः कुतः रजःसत्वतमांसिभुवः जन्मस्थाना
नियासांताः ६ भूतानिदेवासुरमनुष्यादीनि चित्रावाचःवेदार्थव्याख्यानविषया १२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमित्युक्तोपसंहारः केषांचिदध्ययनानिमूल्यानामस्युपदेशपारंपर्य्येण अपरे
पाखंडमतयः वेदविरुद्धार्थमतयः ८ तत्प्रकृतीनांमायागुणमूलत्वान्मन्माया

एवंप्रकृतिवैचित्र्याद्भिद्यंतेमतयोनृणां पारंपर्य्येणकेषांचि
त्पाषंडमतयोपरे ८ मन्मायामोहितधियःपुरुषाःपुरुष
र्षभ श्रेयोवदंत्यनेकांतंयथाकर्मयथारुचि ९ महादेव

मोहितधियः अनेकांतंनानाविधं ९ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवाह धर्ममितिसार्द्धेन धर्मं कर्ममीमांसकाः तदुक्तं मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनि
षिद्धयोः नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेत्यादि यशः काव्यालंकारकृतः य
थाहुः यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते तावद्वर्षसहस्राणि स्वर्गलोके म

धर्ममेके यशश्चान्ये कामं सत्यं दमं शमं अन्ये वदंति स्वार्थं वा ऐश्वर्यं
त्यागभोजनं केचिद्यज्ञतपोदानं व्रतानि नियमान्यमान् १० नमः॥

हीयते इति कामं वात्स्यायनादयः सत्यं शमं च योगशास्त्रकृतः अन्ये दृष्टार्थवादिनो
दंड नीतिकृतः वैप्रासिद्धं ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति अतः सामाद्युपाया एव
श्रेयः साधनमिति तेषां मतं तथैव त्यागं भोजनं च लोकायतिकाः यज्ञं तपो दानं यज्ञो १३९
देवतानां पूजनं तपश्चरानं च १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हुआ

तेषांतुछफलत्वमाँयंतवंतइति एषांलोकाः एतैःसाध्यानिफलानि तमोनिष्ठाःमोहा
वसानाः भोगकालेप्यसूयादिभिःशुचार्पिताःव्याप्ताः ११ भक्तेर्सुखमाह म

आद्यंतवंतएवैषांलोकाःकर्मविनिर्मिताः दुःखोदर्कास्तमोनिष्ठाःक्षुद्रानंदाःशुचा
र्पिताः ११ मय्यर्पितात्मनःसभ्यनिरपेक्षस्यसर्वतः मयात्मनासुखंयत्तत्कुतःस्या
द्विषयात्मनां १२ अकिंचनस्यदांतस्यशांतस्यसमचेतसः मयासंतुष्टमनसःस
र्वाःसुखमयादिशः १३

यीतियावत्समाप्ति हेसभ्य मयापरमानंदरूपेण आत्म
नास्वरूपत्वेनस्फुरता १२ किंच अन्येषांतत्रलोकादिपरिछिन्नंसुखंभक्तस्यतुपरिपू
र्णमित्याह अकिंचनस्येति १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिपूर्णतामेवाहनपारमेष्ठ्यं॑इति रसाधिपत्यंपातालादिस्वाम्यंअपुनर्भवंमोक्षम
पि मद्विनामांहित्वाअन्यन्नेछति अहमेवतस्यप्रेष्ठइत्यर्थः १४ ममापिसएवप्रेष्ठ
इत्याहनतथेतिद्वाभ्यां आत्मयोनिर्ब्रह्मापुत्रोपि शंकरोमत्स्वरूपभूतोऽपि संकर्ष

नपारमेष्ठ्यंनमहेंद्रधिष्ण्यं नसार्वभौमंनरसाधिपत्यं नयोगसिद्धीरपुनर्भवंवाम
य्यर्पितात्मेछतिमद्विनाऽन्यत् १४ नतथामेप्रियतमआत्मयोनिर्नशंकरः नच
संकर्षणोनश्रीर्नैवात्माचयथाभवान् १५ निरपेक्षंमुनिंशांतंनिर्वैरंसमदर्शनं
अनुव्रजाम्यहंनित्यंपूयेयेत्यंघ्रिरेणुभिः १६

णः भ्रातापि श्रीर्भार्यापि आत्मामूर्ति
रपि यथाभक्तइतिवक्तव्येतिहर्षेणाहभवानिति १५ पूयेयमहंतवर्तिब्रह्मांडानिपवित्री
कुर्यामितिभावेनेत्यर्थः १६

१४०

किंच मद्भक्तानां सुखं एतावदेवं भूतमिति वा को वक्तुं समर्थः यतस्तत्स्वसंवेद्यनि
रूपमामित्याह निःकिंचना इति महांतः निरंहमानाः अनालब्धधियः अस्पृष्टचि
त्ताः निष्किंचनत्वादीनां पथेष्टं हेतुहेतुमद्भावः एवंभूताः मम मदीयाः यत्सुखं जु

निःकिंचना मय्यनुरक्तचेतसः शांता महांतोऽखिलजीववत्सलाः
कामैरनालब्धधियो जुषंति यं तन्नैरपेक्ष्यं न विदुः सुखं मम १७ ७

षंति मे यं तेन तत्सुखं त एव विदुः लभंते नान्ये कुतः नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते निर
पेक्षास्तैः केवलभ्यं न तु मोक्षापेक्षैरपीत्यर्थः यद्वा एवंभूताः संतो ये मम मामित्यर्थः जु
षंते प्रीणंति त एव यन्नैरपेक्ष्यं सुखं तद्विदुर्नान्य इत्यन्वयः १७ नमो भगवते वासुदेवाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपिच आस्तांतावदुत्तमभक्तकथा यतः प्राकृतोपि भक्तः कृतार्थ एवेत्याह बाध्यमान
इति द्वाभ्यां विषयैराकृष्यमाणोऽपि प्रगल्भया समर्थया १८ पाकाद्यर्थं प्रज्वालि

बाध्यमानोपिमद्भक्तो विषयैरजितेंद्रियः प्रायः प्रगल्भया भक्त्या विषयैर्नाभि
भूयते १८ यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् तथा मद्विषया
भक्तिरुद्धवैनांसि कृत्स्नशः १९ नसाधयति मां योगो न सांख्यं धर्म उद्धव नस्वा
ध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता २०

तोऽप्यग्निर्यथा काष्ठानि भस्मीकरो
ति तथा रागादिनाऽपि कथंचिन्मद्विषया सती भक्तिः समस्त पापानीति भगवानपि स्व
भक्तिमहिमाश्चर्येण संबोधयति अहो उद्धव विस्मयं श्चाण्विति १९ भक्त्या भावेऽन्यसा
धनं व्यर्थमित्याह द्वाभ्यां धर्म इति २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या

श्रद्धयाभक्तिस्तया संभवात्‌जातिदोषादपीत्यर्थः २१ भक्त्स्य भावोऽन्यस्साधनस्य र्थमित्याहद्वाभ्यांधर्मइति २२ रोमहर्षादिकंविनाकथंभक्तिर्गम्यते भक्त्याचविना

भक्त्याऽहमेकयाग्राह्यः श्रद्धयात्माप्रियःसतां भक्तिःपुनातिमन्निष्ठाश्वपाकानपिसं भवात्‌ २१ धर्मःसत्यदयोपेतोविद्यावातपसान्विता मद्भक्त्यापेतमात्मानंनसम्य क्प्रपुनातिहि २२ कथंविनारोमहर्षंद्रवताचेतसाविना विनानंदाश्रुकलयाशुध्ये द्भक्त्याविनाशयः २३ वागाद्गदाद्रवतेयस्यचित्तंरुदत्यभीक्ष्णंहसतिक्वचिच्च विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनंपुनाति २४ कथमाशयःशुद्धेदिति २३ किंच भक्तिःस्वाश्रयंशोधयतीतिकिंवव्यंक्तयतोगद्गदवागादिलक्षणोमद्भक्ति युक्तोलोकंसर्वंपुनातीत्याहवागिति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी

अपिच मत्सेवात्मशुद्धिं न्य तरतिसदृष्टांतमाहयथेति यथाग्निनाध्मातंतापि
तमेवहेमसुवर्णंअंतर्मलंजहातिनक्षालनादिभिः स्वंनिजरूपंचभजते कर्मानुश

यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेचरूपं
आत्माचकर्मानुशयंविधूयमद्भक्तियोगेनभजत्यथो
मां २५

यंकर्मवासनां मांभजेनमद्रूपतामापद्यते २५ नमोभगवतेकृष्णायनमोनमः ७ १४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुब्रह्मविदाप्नोतिपरंतमेवविदित्वातिमृत्युमेत्यादिश्रुतिभ्योज्ञानादेवाविद्यानिवृत्त्या
त्मावाप्तिरवगम्यतेकुतोभक्तियोगेनेत्युच्यतेतत्राहयथायथेति आत्माचित्तंपरि

यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः तथात
थापश्यतितत्त्वसूक्ष्मंचक्षुर्यथैवांजनसंप्रयुक्तं २६ विषयान्ध्याय
तश्चित्तंविषयेषुविषज्जते मामनुस्मरतश्चित्तंमय्येवप्रविलीयते
२७

मृज्यतेशोध्यतेमत्पुण्यकथानांश्रवणैरभिधानैश्च भक्तैरेवांतरव्यापारोज्ञानंन
पृथगित्यर्थः २६ ज्ञानंनामचित्तस्यमदाकारपरिणामः सचमांभजतःस्वभावतए
वभवतिनचयत्नांतरमपेक्षतइतिसदृष्टांतमाहविषयानिति २७ नमोभगवतेहं०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.ए.
१५८

यस्मादन्यत्सा धनंतत्फलंचस्वप्नमनोरथवदसदभिध्यानमात्रंतस्मात्तद्विहायमय्ये
वमनःसमाहितंकुर्विति प्रकरणार्थमुपसंहरातितस्मादितिमद्भावभावितंमद्भावे

तस्मादसदभिध्यानंयथास्वप्नमनोरथं हित्वामयिसमा
धत्स्वमनोमद्भावभावितं २८ स्त्रीणांस्त्रीसंगिनांसंगंत्य
क्त्वादूरतआत्मवान् क्षेमेविविक्तआसीनश्चिंतयेमामतंद्रि
तः २९

नभजनेनैवशोधितं २८ विशेषतोवास्यापनायुक्तकाममार्गाःपरित्याज्याइत्याहस्त्री
णामिति आत्मवान्धीरःसन् क्षेमेनिर्भयेदेशे विविक्तेविजने २९ नमोरामचंद्राय १५२

CC-0. In Public Domain,Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदुपपादयतिनतथेतिअस्यपुंसःयथान्तस्संगिसंगतः क्लेशोभवेत् यथाचबंधो
योषित्संगतः तथान्यप्रसंगतोनभवेदिति ३० मांचिंतयेदित्युक्तंतत्प्रकारंपृच्छति
यथेतिध्यानांगप्रश्नः यादृशमितिध्येयविशेषणप्रश्नः यदात्मकमितियस्यैता

नतथास्यभवेत्क्लेशोबंधश्चान्यप्रसंगतः योषित्संगाद्यथा
पुंसोयथातत्संगिसंगतः ३० यथात्वामरविंदाक्षयादृशंवाय
दात्मकं ध्यायन्मुमुक्षुरेतन्मेध्यानंमेवक्तुमर्हसि ३१

३१

तानिविशेषणानितत्स्वरूपप्रश्नः एतत्मेध्यानमेवक्तुमर्हसीतिपाठः तत्रायमर्थः मुमु
क्षुस्त्वांयथाध्यायेत्तन्मेवक्तुमर्हसिइतिजिज्ञासोः कथनायमेपुनरेतत्त्वद्दास्यमेवपु
रुषार्थः ननुध्यानेनकस्यमस्तीति तदुक्तंत्वयोपयुक्तस्रगंधेत्यादि त्वंवक्तुमर्हसीतिपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्ति

तत्रध्यानांगत्वेनासनप्राणायामप्रकारमाह समइतिचतुर्भिः समेनात्युछ्रितेनाति
नीचेआसनेकंबलादौ समकायः सन्यथासुखमासीनइतिन्यास्तिकादिनियम
मस्युक्तं नासाग्रनिरीक्षणंचचित्तस्थैर्यपि अंतर्लक्ष्योबहिर्दृष्टिः स्थिरचित्तःसु

॥श्रीभगवानु॰॥ समआसनआसीनःसमकायोयथासुखं हस्तावुत्संगआधाय
स्वनासाग्रकृतेक्षणः ३२ प्राणस्यशोधयेन्मार्गंपूर कुंभकरेचकैः विपर्ययेणा
पिशनैरभ्यसेन्निर्जितेंद्रियः ३३

सुसंयतइतियोगशास्त्रोक्तेः ३२ विपर्ययेणरे
चकपूरककुंभकक्रमेणापि यद्वा वामनाड्यापूरितंदक्षिणयात्यजेत् तयावापू
रितंवामयेत्येवंविपर्ययेण यथोक्तंयोगे इडयापूरयेद्वायुंत्यजेत्पिंगलयाततइति नि
र्जितेंद्रियइतिप्रत्याहारउक्तः ३३

क

राम
९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति तत्र श्रेष्ठत्वात्सगुणवगर्भमाह तद्दीति द्वाभ्यां मू
लाधाराद्वारभ्य अविछिन्नं संततं घंटानादतुल्यमोंकारं तदिसंतं प्राणेन उदीर्य ऊर्द्धं
द्वादशांतपर्यंतं नीत्वा कथं बिसोर्णवत् कमलनालतंतुवत् तत्र मात्रातीतेस्वरूपे

२ तद्दाविछिन्नमोंकारं घंटानादं बिसोर्णवत् प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं
३४ वं प्रणव संयुक्तं प्राणमेव समभ्यसेत् दशाकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः
३५
चंद्रशांबिंदुसंवेशयेत् अथ पुनरित्यस्यतं च बिंदुशिरस्कं कुर्यादित्यर्थः यद्वा मूला
धाराद्दारभ्य मूर्द्धांतपर्यंतं विसतंतुवत्सूक्ष्मम विछिन्नं संततं तद्ध्वनिमनासि प्राणेनो
दीर्याभिव्यज्य अथ पुनस्तत्रोंकारे घंटानादतुल्यं स्वरं उदात्तं नादं स्थिरं कुर्यादिति
३४ मासादर्वाक् जितानिलो भवति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंध्यानांगमुक्त्वायाद्दशामित्यस्योत्तरंवक्तुंध्येयपीठमाह हृत्पुंडरीकमितिसार्द्धेन अं
तस्थंदेहांतर्वर्ति ऊर्द्ध्वनालमधोमुखंमुकुलितंचकदलीदपुष्पसंकाशंयदास्तितद्विप
रीतं ध्यात्वेत्यर्थः न्यसेत्चिंतयेत् ३५ सविशेषणंध्यानमाहवन्हिमध्यइतिषड्भिः

हृत्पुंडरीकमंतस्थमूर्द्धनालमधोमुखं ध्यात्वोर्द्धमुखमुन्निद्रमष्टपत्रंसकर्णिकं कर्णि
कायांन्यसेत्सूर्यसोमाग्निनुत्तरोत्तरं ३६ वन्हिमध्येस्मरेद्रूपंममैतत्ध्यानमंगलं स
मंप्रशांतंसुमुखंदीर्घचारुचतुर्भुजं ३७ सुचारुसुंदरग्रीवंसुकपोलंशुचिस्मितं स
मानकर्णविन्यस्तस्फुरन्मकरकुंडलं ३८

ध्यानंमंगलंध्यानस्यशुभंविषयं समंभनु
रूपावयवं दीर्घाश्चारवः चत्वारोभुजायस्मिन्तत् ३७ सुचारुअतिरम्यंसमानयोःक
र्णयोर्विन्यस्तेस्फुरंतिमकराकारेकुंडलेयस्मिन्तत् ३८ १५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीवत्सास्त्रियोर्निकेतनं वक्षसिदक्षिणवामतस्ताभ्यांयुक्तमित्यर्थः ३९ द्युमद्भिः कि
रीटादिभिः आसमंताद्युतंअलंकृतं ४० प्रसादेन शोभनंसुखमीक्षणंचयस्मिन्‌तत्

हेमांबरंघनश्यामंश्रीवत्सश्रीनिकेतनं शंखचक्रगदापद्मवनमालावि
भूषितं ३९ नूपुरैर्विलसत्पादंकौस्तुभप्रभयायुतं द्युमत्किरीटकटक
कटिसूत्रांगदायुतं ४० सर्वांगसुंदरंहृद्यंप्रसादसुमुखेक्षणं सुकुमार
मभिध्यायेत्सर्वांगेषुमनोदधत्‌ ४१ इंद्रियाणींद्रियार्थेभ्योमनसाकृ
ष्यतन्मनः बुध्यासारथिनाधीरः प्रणयेन्मयिसर्वतः ४२ नमोनमः ७

सुकुमारमतिकोमलं ४१ सविशेषणंध्यानमुपसंहरतिइंद्रियाणीति प्रकर्षेणनयेत्‌

सर्वतः सर्वोषकि ४

त

याहृशमित्यस्योत्तरत्वेनसविशेषणमुक्त्वायदात्मकमित्यस्योत्तरंयाशतैर्विशेषणत्यागे
नध्यानमेवसमाधिपर्यंतमाहतदितित्रिभिः एकत्रांगे अन्यान्यंगानिनचिंतयेत् एक
त्रेति यदुक्तंतदेवांगंदर्शयतिसुस्मितमिति ४२ व्योम्निसर्वकारणरूपेतत्रकारणत्वम

तत्सर्वव्यापकंचित्तमाकृष्यैकत्रधारयेत् नान्यानिचिंतयेद्भूयःसुस्मितंभावयेन्मुखं
४३ तत्रलब्धपदंचित्तमाकृष्यव्योम्निधारयेत् तच्चत्यक्त्वामदारोहोनकिंचिदपिचिंतये
त् ४४ एवंसमाहितमतिर्मामेवात्मानमात्मनि विचष्टेमयिसर्वात्मन्ज्योतिर्ज्योतिषि
संयुतं ४५

पित्यक्त्वामदारोहः मयिशुद्धेब्रह्मण्यारूढःसन् नकिंचित् ध्यातृध्येयविभा
गमपिनचिंतयेत् ४४ मामेवात्मनिविचष्टेआत्मानंचसर्वात्मनिमयिसंयुतंविचष्टेज्यो
तिर्ज्योतिषिसंयुक्तमिवेत्यन्वयः ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंभूतसमाधिपर्यंतध्यानस्य फलमाह ध्यानेनेति मनोयुंजतः समादधतः द्रव्यज्ञानक्रि
याभ्रमः अधिभूताधिदैवाध्यात्मरूपः दृश्यद्रष्टृदर्शनरूपोवाभ्रमः निर्वाणंशांतिंसम्य
ग्यास्यतीति ४६ इतिश्रीभागवते माहापुराणे एकादशस्कंधे टीकायांचतुर्दशोध्यायः ॥१४॥ त

ध्यानेनेत्थंसुतीव्रेणयुंजतोयोगिनोमनः संयास्यत्याशुनिर्वाणंद्रव्यज्ञानक्रियाभ्रमः
४६ इतिश्रीभागवतेमाहापुराणेएकादशस्कंधेचतुर्दशोध्यायः॥१४॥ श्रीभगवानुवाच॥
जितेंद्रियस्ययुक्तस्यजितश्वासस्ययोगिनः मयिधारयतश्चेतउपतिष्ठंतिसिद्धयः १

तःपचदशप्रोक्ताः सिद्धयोधारणानुगाः श्रीविष्णुपदसंप्राप्तावंतरायतयामताः एवं
मनोयुंजतोयोगिनोंतराविर्भवंत्यः सिद्धयोप्यंतरायप्रायाएव अतस्ताः परित्यज्यपरमे
श्वरपरएवभवेदितिवक्तुंसिद्धीराह जितेंद्रियस्येति युक्तस्यस्थिरचित्तस्य १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्विदिति वितर्के कास्वित् किंनामा कथंस्वित् कीदृशी वा धारणाश्च कतीति प्रश्नांतरे
वाशब्दः त्वमेवैतज्जानासि नान्यस्त्वाशयेनाह योगिनामिति २ धारणाश्च अष्टाद

॥ उद्धव उवाच ॥ कया धारणया कास्वित् कथंवा सिद्धिरच्युत कति वा सि
द्धयो ब्रूहि योगिनां सिद्धिदो भवान् २ ॥ श्रीभगवानुवाच ॥ सिद्धयोष्टादश प्रो
क्ता धारणा योगपारगैः तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ३

शेत्यनुषंगः योगपारगैरिति त्रिकालज्ञत्वादिस्तुद्रसिद्धिरन्येपि जानंतीति भावः
अहमेव प्रधानं मुख्यः स्वभावत आश्रयो यासां ताः मत्सारूप्यं प्राप्तेषु किंचिन्न्यूनाभ
वंतीति भावः गुणहेतवः सत्वोत्कर्षहेतुकाः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताःस्वरूपेणोपदिशातिअणिमेतिसार्द्धैः पंचभिः अणिमामहिमा लघिमाद्यमूर्त्तेर्देह
स्यतिस्रः सिद्धयःप्राप्तिर्नामसिद्धिः सर्वप्राणिनामिंद्रियैःसहतत्तदधिष्ठातृदेवतारू
पेणसंबंधइत्यर्थः श्रुतेषुपारलौकिकेषुदृष्टेषुदर्शनयोग्येष्वपिसर्वेषुभूविवरादिपि

अणिमामहिमामूर्त्तेर्लघिमाप्राप्तिरिंद्रियैः प्राकाश्यंश्रुतदृष्टेषुशक्तिप्रेरणमीशि
ता ४ गुणेष्वसंगोवशितायत्कामस्तदवस्यति एतामेसिद्धयःसौम्यअष्टावौत्पत्ति

कामताः ५

हितेष्वपिप्राकाश्यंभोगदर्शनसा मर्थ्यंसिद्धिः शक्तीनांमायायाः तदंशाभू
तानांप्रेरणंतत्रेश्वरेमायायाः अन्येषुतदंशानांप्रेरणंईशितानामसिद्धिः ४ विषय
भोगेष्वसंगोवशिताशिद्धिंयत्कामःयद्यत्सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰
१४८

खंकामयतेतत्तदवस्यतितस्यसीमानंप्राप्नोतीतिसिद्धिः औत्पत्तिकाःस्वाभाविक्यो
निरतिशयाश्चेत्यर्थः ५ गुणहेतूः सिद्धीराह अनूर्मिमत्वंक्षुत्पिपासादिराहित्यं दूरे
श्रवणंदर्शनंचेतिद्वेसिद्धि मनोवेगेनदेहस्यगतिः कामितरूपप्राप्तिः परकायेप्र

अनूर्मिमत्वंदेहेस्मिन्दूरेश्रवणदर्शनं मनोजवःकामरूपंपरका
यप्रवेशनं ६ स्वछंदमृत्युर्देवानांसहक्रीडानुदर्शनं यथासंकल्प
संसिद्धिराज्ञाप्रतिहतागतिः ७

शः ६ स्वेच्छामृत्युः अप्सरोभिःसहदेवानांयाःक्रीडास्ता
सामनुदर्शनंप्राप्तिः संकल्पानुरूपप्राप्तिः अप्रतिहताआसमंतात्तिर्यस्याःआज्ञाचेत्यता १४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुद्रसिद्धीश्चपंचाह त्रिकालज्ञत्वमिति अद्वंद्वंशीतोष्णाद्यनभिभवः अग्न्यादीनांसं
स्तंभनं ८ तत्कारणाभिःसहविशेषतोनिरूपयतियथेतियावत्समाप्तिः ९ भूत

त्रिकालज्ञत्वमद्वंद्वपरचित्ताद्यभिज्ञता अग्न्यर्काम्बुविषादीनांप्रतिष्टं
भोऽपराजयः ८ एताश्चोद्देशतःप्रोक्तोयोग धारणसिद्धयः ययाधा
रणयायास्याद्यथावास्यान्निबोधमे ९ भूतसूक्ष्मात्ममयितन्मात्रं
धारयन्मनः अणिमानमवाप्नोतितन्मात्रोपासकोमम १०

सूक्ष्मोपाधौमयितन्मात्रंभूतसूक्ष्माकारं तन्मात्रोपासकः ममदीयमणिमानं १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थानशक्तिमहत्त्वोपाधौमयि यथासंस्थंमहत्तत्त्वाकारं भूतानांचेति आकाशादिभूतोपा
धौचमयिमनोधारयन् ततद्भूतमहिमानंप्राप्नोतीत्यर्थः ११ वाय्वादिभूतानांयेपरमा
णवः तन्मयेतदुपाधौचित्तंमयिरंजयन् योगी कालसूक्ष्मार्थतांकालपरमाणुतामि
महत्यात्मन्मयिपरेयथासंस्थंमनोदधत् महिमानमवाप्नोतिभूतानांचपृथक्पृथक्
परमाणुमयेचित्तं भूतानांमयिरंजयन् कालसूक्ष्मार्थतांयोगीलघिमानमवाप्नुयात्
१२ धारयन्मय्यहंतत्त्वेमनोवैकारिकेखिलं सर्वेंद्रियाणामात्मत्वंप्राप्तिंप्राप्नोतिमन्म
भा: १३
ति १२ वैकारिकाहंकारोपाधौमयि अखिलंएकाग्रं आत्मत्वंअधिष्ठातृत्वं अत्रहेतुः
मन्मनाःमयिमनोधारणप्रभावादेवभवतिनात्रातीवहेतुरनुसंधेयइतिभावः एवंम
द्धारणानुभावेनमद्योगबलमाश्रयरस्यारिषुद्धरत्वं १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रियाशक्तिप्रधानंमहत्तत्वमेवसूत्रंतदुपाधौमयिसः मेपारमेष्ठ्यंसर्वोत्कृष्टंप्राका
श्यंविंदते कथंभूतस्यअव्यक्ताज्जन्मयस्यतस्यसूत्रस्यतदुपाधेर्ममेत्यर्थः १४ त्र्य

महत्यात्मनियःसूत्रेधारयेन्मयिमानसं प्राकाश्यंपारमेष्ठ्यंमेविं
दतेव्यक्तजन्मनः १४ विष्णौत्र्यधीश्वरेचित्तंधारयेत्कालविग्रहे
सईशित्वमवाप्नोतिक्षेत्रज्ञक्षेत्रचोदनां १५

धीश्वरेत्रिगुणमायानियंतरि अ
तएवकालविग्रहेआकलयितृरूपेणअंतर्यामिणि ईशित्वंविशिनष्टि क्षेत्रज्ञानांजीवा
नांक्षेत्राणांतदुपाधीनांचचोदनांप्रेरणंनतुविश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुरीयाख्ये विराड्हिरण्यगर्भश्चकारणंचेत्युपाधयः ईशस्ययत्त्रिभिर्हीनंतुरीयंतत्त
दंविदुरित्येवंलक्षणे ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययो
श्चैवषण्णांभगइतींगना तद्वतिभगवच्छब्दशब्दितेषड्विधैश्वर्यसंपन्ने १६ यत्रप

नारायणेतुरीयाख्येभगवच्छब्दशब्दिते मनोमय्यादधद्योगीमद्धर्मा
वशितामियात् १६ निर्गुणेब्रह्मणिमयिधारयन्विशदंमनः पर
मानंदमाप्नोतियत्रकामोवशीयते १७

रमानंदरूपेसर्वोपिकामस्तदंशभूतोवसीयतेसमाप्यतेतं १७ श्रीरामकृष्णपर॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः परं गुणहेतुकाः सिद्धिराह शुद्धे सत्वात्मके श्वेततां शुद्धरूपतां १८ आकाशा
त्मायः प्राणः समष्टिरूपस्तद्रूपे मयि मनसा घोषं नादं चिंतयन् असौ हंसो जीवः
तत्र आकाशे उपलब्धा ज्ञातास्ता नूनं तत्रस्थाः विचित्राः वाचः शृणोति यद्वा तत्राका

श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि धारयं छ्वेततां याति षडूर्मिरहितो नरः १८
मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् तत्रोपलब्धा भूतानां हंसो वाचः शृणो
त्यसौ १९ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि मां तत्र मनसा ध्यायन् विश्वं पश्य
ति सूक्ष्मदृक् २०

शे उपलब्धा अभिव्यक्ताया भूतानां वाचस्ता दूरतः शृणोतीति १९ त्वष्टा आदित्य
स्तस्मिन्नपरिछिन्ने चक्षुः संयोज्य तं च चक्षुषि संयोज्य तत्रोभयसंयोगे मां ध्यायन् वि
श्वं दूरतः पश्यति २०

बि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोदेहंचतदनुवर्त्तिनावायुनासहमयिसुसंयोज्ययामद्धारणाक्रियनेतस्याःप्रभावे
नयत्रमनोयातितत्रात्मादेहोयातीत्यर्थः यद्वामनःकर्तृआत्मानंवायुनासहदेहं
चमयिसुसंयोज्ययत्रयातितदनुतत्रदेहोपातीति २१ मनःउपादायउपादानंका

मनोमायिसुसंयोज्यदेहंतदनुवायुना मद्धारणानुभावेनतत्रात्माय
त्रवैमनः २१ यद्वामनउपादाययद्यद्रूपंबुभूषति तत्तद्भवेन्मनोरू
पंमद्योगबलमाश्रयः २२

रणंकृत्वायद्यद्देवादिरूपंभवितुमिच्छतितत्तत्
मनोरूपंमनसोभीष्टंरूपंयोगीभवेत् कुतः यतोमद्योगबलंयोहमचिंत्यशक्ति
ननिाकार भूतास्मिन्मयिमनसोयोगोधारणातस्यंबलंप्रभावःसएवाश्रयःकारणं

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रप्रविविक्षतितत्रात्मानंचिंतयेत् ततः पिंडंस्वदेहंहित्वाप्राणः प्राणप्रधानलिंगश
रीरोपाधिः वायुभूतः बाह्य वायोभूतः प्रविष्टस्तेनमार्गेणेत्यर्थः षडंघ्रिवत् भृंगो
यथापुष्पात्पुष्पांतरमनायासेनप्रविशतितद्वत् २३ पिंडंहित्वेत्युक्तंतस्यप्रकारंकथ

परकायंविशन्सिद्धआत्मानंतत्रभावयेत् पिंडहित्वाविशे
त्प्राणोवायुभूतःषडंघ्रिवत् २३ पार्ष्ण्यापीड्यगुदंप्राणंहृदु
रःकंठमूर्द्धसु आरोप्यब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुं २४

यत्स्वछंदमत्सुमाह पार्ष्ण्यापार्ष्णिनागुदंविरुध्यप्राणंप्राणोपाधिमात्मानंब्रह्म
रंध्रेणमूर्द्धद्वारेणब्रह्मेत्युपलक्षणं ब्रह्मवाअन्यद्वाअपेक्षितंस्थानंमनसानीत्वा २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्स्थंमन्मूर्त्तिरूपंशुद्धंसत्त्वंचिंतयेत् तदासत्त्ववत्तयः सत्त्वांशाभूताः २५ यदावाअ
कालेपि यथावेतिपाठेयथावायेनकेनापिप्रकारेणबुद्ध्यासंकल्पयेत्तत्तथाय
थावत्प्राप्नोतीत्यर्थः यद्वायथासंकल्पयेत् यथावामत्परोमयिविश्वासवानूभ

॥७॥ विहरिष्यन्सुराक्रीडेमत्स्थंसत्त्वंविभावयेत् विमानेनोपतिष्ठं
तिसत्त्ववृत्तीः सुरास्त्रियः २५ यथासंकल्पयेद्बुध्यायदावामत्परःपु
मान् मयिसत्सेमनोयुंजंस्तथातत्समुपाश्नुते २६ योवैमद्भावमाप
न्नईशितुर्वशितुःपुमान् कुतश्चिन्नविहन्येततस्यचाज्ञायथामम २७

वतितयातदनुरूपंसर्वंप्राप्नोतीत्यर्थः किंकुर्वन्सत्येसत्यसंकल्पेमयिमनोयुंजन् २६
मदितिरथकूपदंममेत्यर्थः ईशितुःसर्वनियंतुः वशितुःस्वतंत्रस्य ममभावंस्वभावं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः परं सुग्रः धारणाविदइतित्रिकालज्ञेत्यपरधारणासूचिता त्रैकालिकी त्रिकाल
वस्तुविषया स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता अनयैव परचित्ताद्यभिज्ञताऽपि
व्याख्याता २८ अग्न्यादिसर्वोपघातशून्यो भगवानिस्येवंभूतयोगमयंतेनाभिभू

मद्भक्त्याशुद्धसत्त्वस्ययोगिनोधारणाविदः तस्यत्रैकालिकीबुद्धिर्जन्ममृत्युपबृंहिता
२९ अग्न्यादिभिर्नहन्येतमुनेर्योगमयंवपुः मद्योगशांतचित्तस्ययादसामुदकंयथा
मद्विभूतिरभिध्यायंछ्रीवत्सास्त्रविभूषिताः ध्वजातपत्रव्यजनैःसभवेदपराजितः

येत अत्रहेतुः मद्योगेतियादसामुदकंयथाभिघातकंनभवतितथातस्यवपुषोऽ
ग्न्यादयइत्यर्थः अनयैवाहंकृताःपिव्याख्याता २९ मद्विभूतीःममावतारान् ध्वजादि
भिःसह ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰ए
१५३

उपसंहरति उपासकस्येति एवं पृथक् धारणादिभिः ३१ यद्वा किं नाना धारणाप्रयासे न एकयैव सर्वाः सिद्धयो भवंतीत्याह जितेंद्रियस्येति मद्धारणां नारायणे तुरीयाख्ये

॥ उपासकस्य मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः ३१ जितेंद्रियस्य दांतस्य जिताश्वासात्मनो मुनेः मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा ३२ अंतरायान्वदंत्येता युंजतो योगमुत्तमं मयासंपद्यमानस्य कालक्षपणहेतवः ३३

इत्यत्रोक्तां या सा सुदुर्लभा स्यात् सा का न का चिदित्यर्थः ३२ यद्यप्येवं तथापि न प्रार्थ्या इत्याह अंतरायानिति ३३ ७

१५३

तस्मादहैतुकीयमेवधारणाकार्यानान्याःकाम्याइत्याह जन्मनैवकाश्चित्सिद्धयोभ
वंतियथादेवानांयथाचपादसामुद्रकस्तंभः पक्ष्यादीनांखेचरत्वादि तदुक्तंपातंज
ले जन्मौषधितपोमंत्रयोगजाःसिद्धयइति योगेनमद्धारणामित्युक्तेन योगग

॥ जन्मौषधितपोमंत्रैर्यावतीरिहसिद्धयः योगेनाप्नोतिताः
सर्वानान्यैर्योगगतिंव्रजेत् ३४ सर्वासामपिसिद्धीनांहेतुःप
तिरहंप्रभुः अहंयोगस्यसांख्यस्यधर्मस्यब्रह्मवादिनां ३५

गतिंमत्सालोक्यादिरूपां ३४ तत्रकुत इत्यतआहसर्वासामित्यर्धेन प्रभुत्वोपपादनं हे
तुः कारणंपतिःपालयिताचेतिकिंच नकेवलंसिद्धीनामेवप्रभुःअपितुमोक्षादी
नामपीत्याहमिति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए
१५५

योगोमोक्षः सांख्यं तत्साधनं ज्ञानं धर्मस्य तदुपदेष्टृणां ब्रह्मवादिनां च ३५ कुतः तत्रा
ह अहमिति सर्वदेहिनां जीवानामात्मा यतः आंतरः अंतर्यामी एष त आत्मांतर्या
म्यमृत इति श्रुतेः तर्हि किमंतर्वर्त्तित्वात्परिछिन्नः नबाह्यश्च व्यापक इत्यर्थः तत्र

अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनां यथा भूतानि भूतेषु बहि
रंतः स्वयं तथा ३६ इति श्री भागवते ॥ ११ एकादश॰ पंचदशोध्यायः ॥ १५ ॥

हेतुः अनावृतः एतत्सदृष्टांतमाह भूतेषु चतुर्विधेषु महाभूतानि यथा बहिश्चांत
श्च भवंति स्वयं अहमपि तथेत्यर्थः ३६ इति श्री भागवते॰ ॥ ११ टिकायां पंचदशोध्यायः ॥ १५

१५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोडशेतु हरेराविर्भावियुक्ताविभूतयः ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः अंत
श्चितेनयद्ध्यानमशक्यमकृतात्मनां अतस्तद्योग्यतापत्त्यैविभूत्यादिनिरूपणं एवं
तावत्ताभ्याध्यायाभ्यामष्टप्रश्नानिरूपिताः ब्रह्मत्वसंभवेतावत्समादिचतुष्टये बंध
मुक्त्योस्तुनिर्द्धारेसङ्गत्योश्चततःपरे द्वादशेनंतरं कर्मत्कृतिसागव्यवस्थितो हंसेति

उद्धव उ० ॥ त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतं सर्वेषामसिभावानांत्राणस्थित्यप्ययो

उ०पु०१

हासततोयोगनिष्ठायांत्रयोदशे अयःसाधननिष्ठ्रिध्यानेनैवचतुर्दशे धारणा
सिद्धिभेदेचप्रसंगेननिरंतरे उद्धवप्रश्नतोदत्तमुत्तरंहरिणोचितं षोडशेभूतिविस्तारेद्व
योर्वर्णाश्रमव्रते ज्ञानादिनिर्णयेचातोयमादीनांचनिर्णये योगत्रयाधिकारेतुविंशे
चतदनंतरे तत्वसंख्याविवादेचपुंप्रकृत्योर्विवेचने जन्ममृत्युप्रकारेचद्वाविंशेदत्तमुत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रं परापराधसहनेचतुर्भिस्तदनंतरैः सप्तविंशेक्रियायोगप्रश्नेतदुपवर्णनं अष्टाविंशे
ततःप्रोक्ताज्ञानयोगोपसंहृतिः संसारासंभवप्रश्नेतन्मध्येदत्तमुत्तरं तदशक्तस्यापुनःप्र
श्नेभक्तियोगोपसंहृतिः एवंप्रश्नोत्तराण्यत्रक्रमेणैतानि विंशतिः अहमात्मांतरे॰
बाह्योः नावृतः सर्वदेहिनां यथाभूतानिभूतेषु बहिरंतःस्वयंतथेत्युक्तं तत्रभूता
नियथाकचित्केनचिद्गुणविशेषेणोद्रिक्तानिवर्त्तंते कचित्सामान्यरूपेणैव ॥
तथात्वमपिकथंवर्त्तसइति विभूतीः प्रष्टुंप्रथमंतावदुक्तमेवसर्वात्म
कत्वमनुवदति त्वंब्रह्मेति अपावृत्तंनिरावरणंस्वतंत्रंवा अतएवसर्वे
षामपित्राणंरक्षणंस्थितिर्जीवनं त्राणस्थितिसहितौ अप्ययोद्भवौ
यस्मात्तुसत्त्वं उपादानकारणमित्यर्थः १ श्रीकृष्णपरमात्मने १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रसदाचारंप्रमाणमाह याथातथ्येनयथार्थत्वेनसर्वमूलकारणंत्वांब्राह्मणाः
वेदनात्सर्यविदः २ एवंकारणत्वेनसर्वात्मत्वमनुधाविभूतीःपृच्छतियेष्विति उपा

।।उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः उपासतेत्वांभगवन्याथातथ्येनब्रा
ह्मणाः २ येषुयेषुचभावेषुभक्त्यात्वांपरमर्षयः उपासीनाःप्रपद्यंतेसंसि
द्धिंतदूदस्वमे ३ गुढश्चरसिभूतात्माभूतानांभूतभावन नत्वांपश्यंतिभूता
निपश्यंतंमोहितानिते ४

सीनाःसेवमानाःसंतः ३ दुर्ज्ञेयत्वमेवाह गूढःअस्फ
टः भूतानांप्राणिनांमध्ये अत्रहेतुः भूतानामात्माअंतर्यामी अत्रापिहेतुः हेभूतभाव

गीताटीका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताएवसाकल्येनपृच्छति हेमहाविभूतेयाःकाश्चिद्भूम्यादिषुतेविभूतयः रसायांर
सातलेअनुभाविताः त्वयैवकेनचिच्छक्तिविशेषेणसंयोजिताः तीर्थानांपदं च
तदंघ्रिपद्मं च ५ नरावतारभूतार्जुनप्रश्नसंवादित्वात्तवायंप्रश्नःसाधीया

याःकाश्चभूमौदिविवैरसायांविभूतयोदिक्षुमहाविभूते तामह्यमाख्या
ह्यनुभावितास्तेनमामितेतीर्थपदांघ्रिपद्मं ५ ॥श्रीभगवानुवाच॥ एवमेत
दहंपृष्टः प्रश्नंप्रश्नविदांवर युयुत्सुनाविनशनेसपत्नैरर्जुनेनवै ६ ज्ञात्वा
ज्ञातिवधंगर्ह्यमधर्मंराज्यहेतुकं ततोनिवृत्तोहंताहंहतोयमितिलौकिकः ७

नितितावदनुमोदतेएवमितित्रिभिः प्रश्नंपृष्टव्यं सपत्नैर्योद्धुमिच्छता विनशनेकुरुक्षेत्रे १६
६ युयुत्सोर्विभूतिप्रश्नेकः प्रसंगस्तत्राहज्ञात्वेति लौकिकःप्राकृतमतिःसन् ७ नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सचयदातत्तोज्ञानिवधान्निवृत्तः तदामयाप्रतिबोधितः सन्यथात्वमामभिभाषसेए
वंसंग्राममुखेमामभ्यभाषत तद्वदेवतत्रापिकथयिष्यामीतिभावः १ ताः विभूतीः
कथयाति अहमिति अस्मच्छब्दसमानाधिकरणाः प्रथमांताद्वितीयांताश्चसर्वा

सतथापुरुषोव्याघ्रोयुत्सामेप्रतिबोधितः अभ्यभाषतमामेवंयथात्वंरणमूर्द्धनि २
अहमात्मोद्धवामीषांभूतानांसुहृदीश्वरः अहंसर्वाणिभूतानितेषांस्थित्युद्भवाप्ययः

विभूतयः तास्ताश्चोपासनार्थंकथ्यंते षष्ठीचवक्तविनिर्धारणेसंबंधेचवक्तविषयायो
ग्यंद्रष्टव्या तत्रश्चामीषांभूतानांआत्मेतिसुहृदितिईश्वरइतिचसामान्येनाहमुपा
स्यइत्यर्थः एवंसर्वत्रतेषांस्थित्युद्भवाप्ययःतद्धेतुरित्यर्थः २ नमोनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषत्तो विभूतीराह कलयतांवशीकुर्वतांमध्ये गुणानांमध्येसाम्यंसर्वत्रसमत्वं
गुणानांसत्वादीनां साम्यं अव्याकृतंवागुणिनिधर्मिणिउत्पत्तिकः स्वाभाविकोगु
णः सोहं १० सूत्रंप्रथमंकार्यं महान् महत्तत्वं सूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वाच्चजीव

अहंगतिर्गतिमतांकालःकलयतामहं गुणानांचाप्यहंसाम्यंगुणिन्यौत्पत्तिकोगुणः
१०गुणिनामप्यहंसूत्रंमहतांचमहानहं सूक्ष्माणामप्यहंजीवोदुर्जयानामहंमनः ११
हिरण्यगर्भोवेदानांमंत्राणांप्रणवस्त्रिवृत् अक्षराणामकारोस्मिपदानिछंदसामहं
१२

स्यसूक्ष्मत्वं बुद्धेर्गुणेनात्मगुणेनचैवमाराग्रमात्रोह्यवरोपिदृष्टइतिश्रुतेः ११ वेदा
नांसंबंधीतेषामध्यापकः पदानित्रिपदागायत्रीत्यर्थः १२ नमोभगवतेकृष्णाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३ हंकिर्द्धानीकामधेनुः १४ १५ नक्षत्रौषधीनांप्रभुंसोमं यक्षरक्षसांप्रभुं १६ या

इंद्रोहंसर्वदेवानांवसूनामास्मिहव्यवाट् आदित्यानामहंविष्णु रुद्राणांनी
ललोहितः १३ ब्रह्मर्षीणांभृगुरहंराजर्षीणामहंमनुः देवर्षीणांनारदो
हंहविर्द्धान्यास्मिधेनुषु १४ सिद्धेश्वराणांकपिलःसुपर्णोहंपतत्रिणां प्रजा
पतीनांदक्षोहंपितॄणामहमर्यमा १५ मांविद्धुरुद्धवदैत्यानांप्रह्लादमसुरेश्व
रं सोमंनक्षत्रौषधीनांधनेशंयक्षरक्षसां १६ ऐरावतंगजेंद्राणांयादसां
वरुणंप्रभुं तपतांद्युमतांसूर्यंमनुष्याणांचभूपतिं १७ श्रीकृष्णपरमा०

दसांप्रभुं तपतांतापयतांद्युमतांदीप्तिमतांचमध्ये १७ मोरत्नार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संयमतांदंडयतामित्यर्थः १८ श्रृंगिणांदंष्ट्रिणांचमध्येतेषांप्रभुर्वा तुर्यः संन्यासः

उच्चैःश्रवास्तुरंगाणां धातुनामास्मिकांचनं यमःसंयमतांचाहंसर्पाणा
मस्मिवासुकिः १८ नागेंद्राणांमनंतोहंमृगेंद्रःशृंगिदंष्ट्रिणां आश्रमा
णामहंतुर्योवर्णानांप्रथमोनघ १९ तीर्थानांस्रोतसांगंगासमुद्रःसर
सामहं आयुधानांधनुरहंत्रिपुरघ्नोधनुष्मतां २० धिष्ण्यानामस्म्यहं
मेरुर्गहनानांहिमालयः वनस्पतीनामश्वत्थओषधीनामहंयवः २१

प्रथमः ब्राह्मणः १९ स्रोतसां प्रवाहानांच सरसांस्थिरोदकाशयानां २० धिष्ण्या
नांनिवासस्थानानां गहनानांदुर्गमानां २१ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मिष्ठानांवेदार्थनिष्ठानांसेनान्यांचभूपतीनां अग्रण्यांसन्मार्गप्रवर्त्तकानांअजःब्रह्मा
२२ शुचीनांशोधकानामपिमार्जनतक्षणघर्षणादीनांमध्येवाय्वादिरूपःशोधकोहं
२३ योगानांयोगांगानामष्टानांमध्येआत्मसंरोधःसमाधिरहंमंत्रोनीतिः कौशलांवि नां

पुरोधसांवसिष्ठोहंब्रह्मिष्ठानांबृहस्पतिः स्कंदोहंसर्वसेनान्यामग्रगण्यांभगवान
जः २२ यज्ञानांब्रह्मयज्ञोहंतानामविहिंसनं वाधर्म्यक्षोंबुवागात्मास्युचिनामप्यहं
शुचिः २३ योगानामात्मसंरोधोमंत्रोस्मिविजिगीषतां आन्वीक्षिकीकौशलानांवि
कल्पः ख्यातिवादिनां २४
वेकादिनेपुण्यानांमध्ये आन्वीक्षिकीआत्मानात्मविवेक
विद्या अख्यात्यन्याख्यातिशून्यख्यातिसत्ख्यात्यसत्ख्यातिनिर्वचनीयख्यातिवादिनां
एवमिदमेवंवेतियोडरंतोविकल्पःसोहं २४

ब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰सु॰
१५९

कुमारः सनत्कुमारः २५ सन्यासः भूताभयदानं क्षेमाणां अभयस्थानानां मध्येअव
हिर्मतिः अंतर्निष्ठा सूनृतं प्रियवचनं मौनंच नहिप्रियभाषणे मौनेचपुरुष
स्याभिप्रायोज्ञायते अजः प्रजापतिः यस्यदेहार्द्धाभ्यां मिथुनमभूत्तसएवसृष्टं मिथु

स्त्रीणांतुशतरूपाहंपुंसांस्वायंभुवोमनुः नारायणोमुनीनांचकुमारोब्रह्मचारिणां
धर्माणामास्मिसंन्यासःक्षेमाणामबहिर्मतिः गुह्यानांसूनृतंमौनं मिथुनानामजस्त्व
हं २६ संवत्सरोस्म्यनिमिषामृतूनांमधुमाधवौ मासानांमार्गशीर्षोहंनक्षत्राणांत

थाभिजत् २७

नं अर्द्धेवाएषआत्मनोयत्पत्नी इतिश्रुतेः २६ अनिमिषां अनिमिषाणां
अप्रमत्तानां मधुमाधवौ वसंतऋतुरित्यर्थः आभिजित् उत्तराषाढा चतुर्थपादः तथा
चश्रुतिः अभिजिन्नामनक्षत्रंउपरिष्टादाषाढानांअधस्ताच्छ्रोणायाइत्यादि २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतं कृतयुगं देवलः असितश्च व्यासानां वेदविभागकर्तॄणां कवीनां विदुषां काव्यः
शुक्रः २८ भगवतां उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स

अहं युगानां च कृतं धीराणां देवलोऽसितः द्वैपायनोऽस्मि व्यासानां कवीनां
काव्य आत्मवान् २८ वासुदेवो भगवतां त्वं तु भागवतेष्वहं किंपुरुषा
णां हनुमान् विद्याधराणां सुदर्शनः २९ रत्नानां पद्मरागोऽस्मि पद्मकोशः सु
पेशसां कुशोऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं ३० नमो नमः॥

वाच्यो भगवानित्येवंलक्षणानां ३० सुपेशसां सुंदराणां दर्भजातीनां काशकुशादी
नां हविःषु चरुपुरोडाशादिषु घृतेषु वा ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit Uniyersity Ramtek Collection

लक्ष्मीः धनादिसंपत् ३२ बलवतांउजःसहस्थ सात्वतांभागवतानांभक्त्याच्छतंक
र्महमित्यर्थः तेषामेवनवव्यूहार्चनेवासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणह

व्यवसायिनामहंलक्ष्मीः कितवानांछलग्रहः तितिक्षास्मिति तिक्ष्
णांसत्वंसत्ववतामहं ३२ ओजःसहोबलवतांकर्माहंविद्धिसात्वतां
सात्वतांनवमूर्तीनामादिमूर्तिरहंपरा ३३ विश्वावसुःपूर्वचित्तिर्गंध
र्वाप्सरसामहं भूधराणामहंस्थैर्यंगंधमात्रमहंभुवः ३४ नमोनमः

व यग्रीवश्रीवराहनृसिंहब्रा मनइतियावन्मूर्तयस्तासांमध्येवासुदेवाख्या ३३ गंध
र्वाणांविश्वावसुः अप्सरसांपूर्वचित्तिः गंधमात्रंअविकृतं ३४ १६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमः मधुरः परारव्यः शरः ३५ अर्जुनः पार्थः भूतानांप्राणिनां प्रतिसंक्रमः प्रलयः
३६ गत्सादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयोज्ञानेंद्रियव्यापाराः तत्रलक्षणंद

अपांरसश्चपरमस्तेजिष्ठानांविभावसुः प्रभास्मिसूर्येंदुतारणांत्राष्टोहं
नभसः परः ३५ ब्रह्मण्यानांबलिरहंवीराणामहमर्जुनः भूतानांस्थि
तिरुत्पत्तिरहंवैप्रतिसंक्रमः ३६ गत्सुत्सुत्सर्गोपादानमानंदस्पर्श
लक्षणं आस्वादश्रुत्स्पर्शघ्राणमहंसर्वेन्द्रियेंद्रियं ३७

र्शनं सर्वेंद्रियाणामिंद्रियंतत्तदर्थग्रहणशक्तिरप्यहं ३७ श्रीरामजयरामजयश्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंतत्र तत्रनिर्द्धारणेनतत्संबंधेनचविशेषतोविभूतिर्निरूप्येदानींसामान्यतःस
र्वाअपिनिरूपयतिपृथिवीतिसार्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणिविवक्षितानि
अहंअहंकारः महान्महत्तत्वंएताःसप्तप्रकृतिविकृतयः विकाराःपंचमहाभूतानि
एकादशेंद्रियाणिचेत्येवंषोडशसंख्याकःपुरुषोजीवः अव्यक्तंप्रकृतिः एवंपंचविं

पृथिवीवायुराकाशआपोज्योतिरहंमहान् विकारःपुरुषोऽव्यक्तंरजःसत्वतमःपरं अ
हमेतत्प्रसंख्यानंज्ञानंतत्वविनिश्चयः ३८

शतितत्वानि तदुक्तं मूलप्रकृतिरविकृति
र्महदाद्याःप्रकृतिविकृतयःसप्त षोडशकस्तुविकारोनप्रकृतिर्नविकृतिःपुरुषइति
किंच रजःसत्वंतमइतिप्रकृतेर्गुणास्तुपरंब्रह्मचतदेतत्सर्वमहमेव किंच एतत्प्रसं
ख्यानंएतेषांपरिगणनं एतेषांलक्षणतोज्ञानंचतत्फलंतत्वविनिश्चयस्त्वाहमेव ३८ १६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेवसंक्षिप्याहममेति जीवेश्वररूपोद्विविधोयोभावः यश्चगुणगुणिरूपः यश्चक्षे
त्रज्ञक्षेत्ररूपः ससर्वोपिमयाविनामद्व्यतिरेकेणनास्ति अहमेवसर्वमित्यर्थः ३९
ननुसामान्यतः किमेवंसंक्षिप्यकथयसिपूर्ववन्निर्द्धारणसंबंधाभ्यांविशेषतः स
मयेश्वरेणजीवेनगुणेनगुणिनाविना सर्वात्मनापिसर्वेणनभावोविद्यतेकश्चि
त् ३९ संख्यानंपरमाणूनांकालेनक्रियतेमया नतथामेविभूतीनांसृजतोंऽडानि
कोटिशः ४०
वाः कथयेतिचेत्तत्राह संख्यानंप थिव्यादिपरमाणूनांकालेनमह
तापिमयैवक्रियते कृत्वावक्तुंशक्यते तथामेविभूतीनांसंख्यानंकर्तुंनशक्य
तेकुतइत्यतआह सृजतोंऽडानीति यदामयासृज्यमानानांब्रह्मांडानामेवतावत्सं
ख्यानास्तियदाकुतस्तत्रस्थानांविभूतीनांसंख्येत्यर्थः ४०

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ग
१६२

तथापिविशेषतएवसर्वाअपिसंक्षेपतःकथयामीत्याह तेजःप्रभावः श्रीःसंपत् सौ
म भगं सौभाग्यंधनाह्लादकत्वं भगःभाग्यं वीर्यंबलं अंशकःविभूतिः ४१ उपसंहरतिए

यद्यद्विभूतिमत्सत्त्वमि

तेजःश्रीःकीर्तिरैश्वर्यंह्रीस्त्यागःसौभगंभगः वीर्यंतिति
क्षाविज्ञानंयत्रयत्रसमेंशकः ४१ एतास्तेकीर्तिताःसर्वाः
संक्षेपेणविभूतयः मनोविकारएवैतेयथावाचाभिधीय
ते ४२

ताइति एतेचविभूतिभेदा मयिचित्तावतारायकथिताः अतोनात्रातीवाभिनिवे
शःकर्तव्यइत्याहमनोविकाराएवनतुपरमार्थः यथाकिंचित्खपुष्पादिवाङ्मात्रेणा

१६२

CC-0: In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्वागादीन्नियछ आत्मानंबुद्धिंआत्मनासत्वसंपन्नयातयैवनियछ अध्वनेसंसा
रमार्गाय ४२ असंयमनेदोषमाहयश्शति असंयछन्नसंयछति ४४ परिसमाप्यते

वाचंयछमनोयछप्राणंयछेंद्रियाणिच आत्मानमात्मनायछनभूयःकल्पसेध्वने
४२ योवैवाङ्मनसीसम्यगसंयछन्धियायातिः नतस्यव्रतंतपोदानंस्त्रवत्सा मघटां
बुवत् ४४ तस्माद्वचोमनःप्राणान्नियछेन्मत्परायणः मद्भक्तियुक्तयाबुध्याततःप
रिसमाप्यते ४५ इतिश्रीभागवतेमाहापुराणेकाद०म॥ विभूतिर्नाम षोडशोध्यायः १६

ष्टतत्कृत्सोभवतीत्यर्थः ४५ इतिश्रीभागवतेमाहापुराणेटीकायांषोडशोध्यायः॥१६॥ ६७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततःसप्तदशोष्टदशेस्वधर्मेभक्तिलक्षणे हंसोक्तंधर्ममन्वाहब्रह्मचारिगृहस्थयोः क्रमीहं
विहिंसात्वतामित्यत्रभक्त्याहृतंकर्ममोक्षसाधनंमद्विभूतिरित्युक्तं भक्तिसाधनत्वं
चकर्मणांमयोदितेष्वव्यवहितः स्वधर्मेष्वित्यादिनातत्रतत्रोक्तं नचकर्मानुष्ठात्नृणांनि

उधव उवाच॥ यस्त्वयाभिहितःपूर्वंधर्मस्त्वद्भक्तिलक्षणः वर्णा
श्रमाचारवतांसर्वेषांद्विपदामपि १ नमोभगवतेवासुदेवाय॰

यमेनभक्तिर्दृश्यते अतःपृच्छतियस्त्वयेतिसप्तभिः पूर्वंकल्पादौत्वद्भक्तिलक्षणः तत्
साधकः तत्साधनमित्यर्थः वर्णाश्रमहीनानामपिद्विपदांनराणां १॰नमोभगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथायेनप्रकारेणानुष्ठीयमानेनस्वधर्मेण २ ननुसंप्रदायादेवज्ञास्यतेकिंपुनर्वर्णने
नतत्राहपुरेति परमकंपरमश्चासौकःसुखरूपश्चतं यत्वयं हंसरूपेण धर्मोऽप्यु

यथानुष्ठीयमानेनत्वयिभाक्तिर्नणांभवेत् स्वधर्मेणारविंदाक्षतन्ना
माख्यातुमर्हसि २ पुराकिलमहाबाहोधर्मंपरमकंप्रभो यत्तेनहंसरू
पेणब्रह्मणेऽभ्यात्थमाधव ३ सइदानींसुमहताकालेनामित्रकर्शन
नप्रायोभविताामर्त्यलोकेप्रागनुशासितः ४

कएवनत्तुयोगमात्रं जानीतमा
गतंयज्ञंयुष्मद्धर्मविवक्षयेसुकत्वात् २ प्रागनुशासितोऽपिनभविनभविष्यति ४

ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रहेतुमाहवक्तेतिद्वाभ्यांतेत्वत्तोऽन्यः कलावेदायाः ५ ६ तत्तस्मात्नःअस्माकं

वक्ताकर्त्ताऽवितानान्योधर्मस्याऽच्युततेभुवि सभायामपिवैरिंच्यांयत्र
मूर्त्तिधराःकलाः ५ कर्त्राऽवित्राप्रवक्त्राचभवतामधुसूदन त्यक्तेमही
तलेदेवविनष्टंकःप्रवक्ष्यति ६ तत्त्वंनःसर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्ष
णः यथायस्यविधीयेततथावर्णयमेप्रभो ७ ॥श्रीशुक उ०॥ एवंस्वभृत्यमु
ख्येनपृष्टःसभगवान्हरिः प्रीतःक्षेमायमर्त्यानांधर्मानाहसनातनान्

मनुष्याणांमध्येयस्ययथाविधीयते ७ धर्म्मोधर्माद्नपेतः कुतःनैश्श्रेयसकरः भ
क्तिजनकः अतःमेमत्तः तंधर्मंनिबोध ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीभगवानुवाच ॥ धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणां ॥ वर्णाश्रमाचारवतां तमुद्धव निबोध मे ॥ ९ ॥ अस्य व्याख्या

॥ [illegible] ॥

तत्रादौ मदुपासनालक्षण एव मुख्यो धर्म आसीत् आचारलक्षणस्तु पश्चात्प्रवृत्तः सर्वैर्वमनुष्ठितो भक्तिहेतुरिति वर्णयितुमाह आसाविति कल्पादौ यत् कृतयुगं तस्मिन् ते च तदा मामुपासत एव केवलं नान्यत् कुर्वंतीति वक्तुं कृतयुगनाम निरुक्तिमाह कृ

आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः कृतकृत्याः प्रजाजात्या तस्मात् कृतयुगं विदुः

९ वेदः प्रणव एवाग्रे धर्मोहं वृषरूपधृक् उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः १०

तकृत्येति जात्या जन्मनैव ९ किंच विधायकाभावादपि तदानीं नान्यत् कर्मास्तीत्याह वेद इति धर्मश्च मनोविषयोहमेव वृषरूपधृक् चतुष्पात् न क्रियाविशेषो यज्ञादिः अतः तपोनिष्ठाः मनसश्चेंद्रियाणां च यत्स्यैकाग्र्यं परमं तप इति वचनादेकाग्रतया हंसं शुद्धं मां ध्यायंतीत्यर्थः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पश्चात्त्रेतायुगप्रवेशे मे वैराजरूपस्य प्राणान्निमित्तात् हृदयात्सकाशात् तस्यास्त्र
य्याः सकाशात् हौत्राध्वर्यवौद्गात्रैः त्रिवृत् त्रिरूपः यज्ञो वै विष्णुरिति श्रुतेः ११ वर्णाना

त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ११
विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः
१२ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम वक्षःस्थलाद्वने वासो न्यासः शीर्षणि संस्थि
तः १३

माश्रमाणां स्वधर्मान्वक्तुं तेषामुत्पत्तिमाह विप्रेति द्वाभ्यां आत्माचारः स्वधर्म एव लक्ष
णं ज्ञापको येषां २ मम वैराजरूपस्य हृदः वक्षसो अधस्तात् ब्रह्मचर्यं मिंतिनैष्ठिकाभि
प्रायं १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषामधिकारिविशेषेणस्वभावानाहवर्णानामितिपंचभिः जन्मस्थानानुसारिण्यः
नीचैरित्यव्ययं अतोयमर्थः मंदाभिर्जन्मभूमिभिर्मंदाः उत्तमाभिरुत्तमाश्चेति १४

वर्णानामाश्रमाणांचजन्मभूम्यनुसारिणीः आसन्प्रकृतयोनृणांनी
चैर्नीचोत्तमोत्तमाः १४ शमोदमस्तपःशौचंसंतोषःक्षांतिरार्जवं मद्भक्ति
श्चदयासत्यंब्रह्मप्रकृतयस्त्विमाः १५ तेजोबलंधृतिःशौर्यंतितिक्षौ
दार्यमुद्यमः स्थैर्यंब्रह्मण्यतैश्वर्यंक्षत्रप्रकृतयस्त्विमाः १६

तपआलोचनं १५ तेजःप्रतापः एतैरेवाश्रमस्वाभावाअपिज्ञेयाः १६ नमोभगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.ए.
१६६

७ १८ तद्वात्यानांस्वभावानाह अशौचामिति शुष्कविग्रहः निर्मूलकलहः तर्षः तृ

आस्तिक्यंदाननिष्ठाचअदंभोब्रह्मसेवनं अतुष्टिरर्थोपचयैर्वैश्यप्र
कृतयस्त्विमाः १७ शुश्रूषणंद्विजगवांदेवानांचाप्यमायया तत्रल
ब्धेनसंतोषः शूद्रप्रकृतयस्त्विमाः १८ अशौचमनृतंस्तेयंनास्तिक्यं
शुष्कविग्रहः कामःक्रोधश्चतर्षश्चसस्वभावोंतेवसायिनां १९ अहिंसा
सत्यमस्तेयमकामक्रोधलोभता भूतप्रियहितेहाचधर्मोयंसार्वव
र्णिकः २०

ष्णा १९ तत्रतावत्सर्वसाधारणंधर्म माहअहिंसेति वर्णग्रहणमुपलक्ष राम
णार्थं वर्णधर्मान्रहस्यप्रकरणेवक्ष्याति २० ७ ७ १६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त

प्रथमंतावदाश्रमेषुब्रह्मचारिणोधर्मावर्ण्यंतेसचद्विविधः उपकुर्वाणिकोनैष्ठिक
श्चतत्राहद्वितीयमितिनवभिः द्विजः त्रैवर्णिकः आनुपूर्व्यागर्भाधानादिसंस्कार
क्रमेणद्वितीयमुपनयनाख्यंजन्मप्राप्याचार्येणाहूतोब्रह्मवेदमधीयीत चका

द्वितीयंप्राप्यानुपूर्व्याज्जन्मोपनयनंद्विजः वसन्गुरुकुलेदांतोब्रह्माधीयीतचा
हूतः २१ मेखलाजिनदंडाक्षब्रह्मसूत्रकमंडलून् जटिलोऽधौतदद्वासोऽरक्तपीठः
कुशान्दधत् २२

रात्तदर्थंचविचारयेत् २१ कि च मेखलादीन्कुशांश्चदधत्
तत्राक्षशब्देनाक्षमाला कथंभूतः जटिलः अनभ्यंगादिनाजातजटः तथाअधौत
दद्वासोरक्तपीठः दंताश्चवासश्चदद्वासांसिनधौतानियस्यसः अधौतदद्वासाः स
चासावरक्तपीठश्चनकौतुकादिनारक्तंपीठमासनंयस्यसः २२ नमोभगवतेकृष्णाय

नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जपश्चतुर्थ्चारोमूत्रपुरीषोत्सर्गश्चजपोच्चारंतास्मिन्वाग्यतःमौनीभवेत् २२ रेतो
बुद्धिपूर्वंनावकिरेत्नोत्सृजेत् ब्रह्मव्रतधरः अग्रहस्थः स्वयमेवकथंचिदवकीर्णे

स्नानभोजनहोमेषुजपोच्चारेचवाग्यतः नछिंद्यान्नखरोमाणिकक्षोपस्थ
गतान्यपि २३ रेतोनावकिरेज्जातुब्रह्मव्रतधरःस्वयं अवकीर्णेवगाह्या
प्सुयतासुस्त्रिपदींजपेत् २४ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुरांशुचिः
समाहितउपासीतसंध्येचयतवाग्जपन् २५

अवगाह्यस्नात्वाय तासुसंकृतप्राणाया १६७
मः त्रिपदींगायत्रींजपेत् २४ संध्येचद्वेयतवाक्जपन्नुपासीतमध्यान्हेसंध्यानिमि
त्तंमौनंनास्तीतिद्विवचनं २५नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६ अन्यदपियत्संप्राप्तंतच्चनिवेदयेत् तेनानुज्ञातंतुसंयतःसन्नुपयुंजीतेत्यर्थः २७
यानशय्यासनस्थानैःयांतंपृष्ठतोयानेन निद्रितंमप्रमत्तत्तयासमीपेशयनेन वि

आचार्यंमांविजानीयान्नावमन्येतकर्हिचित् नमर्त्यबुद्ध्यासूयेतसर्वदेव
मयोगुरुः २६ सायंप्रातरुपानीयभैक्षंतस्मैनिवेदयेत् यच्चान्यदप्यऽ
नुज्ञातमुपयुंजीतसंयतः २७ शुश्रूषमाणआचार्यंसदोपासीतनीच
वत् यानशय्यासनस्थानैर्नातिदूरेकृतांजलिः २८ नमोनमः ७ ७

श्रांतंपादसंवाहनादिभिःसमीपासनेन आसीनंकृतांजलिर्नियोगप्रतीक्षया ॥
नातिदूरेऽवस्थानेनेत्यर्थः २८ ७

एवंभूतंव्रतंयस्यसः २९ एवमुपकुर्वाणस्यधर्मानुक्त्वा नैष्ठीकस्य विशेषधर्मानाहय
दीतिषड्भिः असौब्रह्मचारी यदिछंदसांलोकंमहर्लोकंततोब्रह्मलोकंचारोक्ष्यन्
आरोढुमिछतीत्यर्थः यद्वाछंदसांलोकमितिब्रह्म लोकविशेषणं यत्रमूर्त्तिधराः

एवंव्रतोगुरुकुलेवसेद्भोगाविवर्जितः विद्यासमाप्यतेयावद्विभ्रद्व्रत
मखंडितं २९ यद्यसौछंदसांलोकमारोक्ष्यन्ब्रह्मविष्टपं गुरवेवि
न्यसेद्देहंस्वाध्यायार्थंबृहद्व्रतः ३०

कलाइत्युक्तत्वात् नर्हिबृहद्व्रतःसन्बृहत्नैष्ठिकंव्रतंयस्यसः विन्यसेत्समर्पये
त् अधिकस्वाध्यायार्थं अधीतनिःक्रयार्थंवा ३० श्रीगोपालकृष्णायनमोनमः १७८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मवर्च्चः वेदाभ्यासजंतेजः तद्वान् ३१ तस्यैव वनस्थयतिसाधारणं धर्मानाह
स्त्रीणामिति निरीक्षणं भावगर्भं क्ष्वेलनं परिहासः एवमादिकं त्यजेत् मिथुनी

अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं अपृथग्धीरुपासीत ब्रह्मव
र्चस्व्यकल्मषः ३१ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं प्राणि
नो मिथुनीभूतानगृहस्थोग्रतस्त्यजेत् ३२ शौचमाचमनं स्नानं
संध्योपासनमार्ज्जवं तीर्थसेवा जपोस्पृश्याभक्ष्यासंभाष्यवर्ज्जनं
३३

भूतानग्रतस्त्यजेत् न पश्येदित्यर्थः ३२ तस्यैव सर्वाश्रमधारणं धर्ममाह शौचमि
तिद्वाभ्यां ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४ निष्कामनैष्ठिकस्यचमोक्षंफलमाहएवमिति अमलः निष्कामश्चेत्दग्धःक
र्माशयोंतःकरणंयस्यतथाभूतःसन् मद्भक्तोभवति ३५ उपकुर्वाणस्यसमाव

सर्वाश्रमप्रयुक्तोयंनियमःकुलनंदन मद्भावःसर्वभूतेषुमनोवाक्कायसं
यमः ३४ एवंबृहद्व्रतधरोब्राह्मणोग्निरिवज्वलन् मद्भक्तस्तीव्रतप
सादग्धकर्माशयोमलः ३५ अथानंतरमावेक्ष्यन्यथाजिज्ञासितागम
मः गुरवेदक्षिणांदत्वास्नायाद्गुर्वनुमोदितः ३६

र्तनप्रकारमाहअथेति अ
नंतरंद्वितीयाश्रमंआवेक्ष्यन्प्रवेष्टुमिच्छन्यथायथावद्विचारितवेदार्थःस्ना १६९
यात्अभ्यंगादिकंकृत्वासमावर्तेतेत्यर्थः ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह गृहमिति सकामश्चेद्गृहं अं
तःकरणबुध्यादिकामश्चेद्वनं प्रविशेत् शुद्धांतःकरणः सच द्विजोत्तमः ब्रा

गृहंवनंवोपविशेत्प्रव्रजेद्वा द्विजोत्तमः आ
श्रमादाश्रमंगच्छेन्नाऽन्यथामत्परश्चरेत् ३८

ह्मणश्चेत्प्रव्रजेदित्यर्थः यद्वा आश्रमादाश्रमांतरंगच्छेत् अन्यथाअनाश्रमी
प्रतिलोमंचनाचरेदित्यर्थः अमत्परइतिवाछेदः ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰प॰
७०

स्वभक्तस्याश्रमनियमाभावस्यवक्ष्यमाणत्वात् विवाहनियमपूर्वकंवर्णधर्मैः
सहगृहस्थधर्मानाहगृहार्थीति सदृशींसवर्णां अजुगुप्सितांकुलतोलक्ष
णतश्चानिंदितां कामतस्तुयामन्यामुद्वहेत् तांसवर्णामनुतस्याअनंतरं तत्रा

गृहार्थीसदृशींभार्यामुद्वहेदजुगुप्सितां यवीयसींतुवयसायां
सवर्णामनुक्रमात् ३७ इज्याध्ययनदानानिसर्वेषांचद्विजन्म
नां प्रतिग्रहोध्यापनंचब्राह्मणस्यैवयाजनं ३८

पिवर्णक्रमेणोद्वहेदित्यर्थः तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमं ब्राह्मणक्ष
त्रियविशांभार्याःस्वाःशूद्रजन्मनइतिस्मृतेः ३७ इज्यादयस्त्रैवर्णिकानामावश्य ७०
काधर्माः प्रतिग्रहादित्रयंतुवृत्तिः साचब्राह्मणस्यैव ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रापिमुख्यांमुख्यतमांचान्यांवृत्तिमाहप्रतिग्रहमिति तयोर्याजनाध्यापनयो
रपिकार्पण्याप्यादिदोषंपश्यन्शिलैः स्वामिसत्कैः क्षेत्रपतितैः कणिशैः ३९ एवंचवृ

प्रतिग्रहंमन्यमानस्तपस्तेजोयशोनुदं अन्याभ्यामेवजीवेत शिलैर्वादोषदृक्तयोः
३९ ब्राह्मणस्यहिदेहोयंक्षुद्रकामायनेष्यते कृच्छ्रायतपसेचेह प्रेत्यानंतसुखा
यच ४० शिलोंछवृत्त्यापरितुष्टचित्तोधर्मंमहांतंविरजंजुषाणः मय्यर्पितात्मा
गृहएवतिष्ठन्नातिप्रसक्तःसमुपैतिशांतिं ४१

त्तिकार्श्यंब्राह्मणेनसोढव्यमि
त्याहब्राह्मणस्येति ४० उंछवृत्तिर्नामविपण्यादिपतितकणोपादानंतांशिलवृत्त्यैकी
कृत्यतयानुष्टचित्तस्यमोक्षंफलमाहशिलोंछेति महांतंआतिथ्यादिलक्षणं ४१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमधनस्यमहत्फलमुक्त्वासधनानामप्याहत्रिभिः समुद्धरंतिदारिद्र्याद्उत्तारयंति

समुद्धरंतियेविप्रंसीदंतंमत्परायणं तानुद्धरिष्येनचिरापद्भ्योनौरिवा
र्णवात् ४२ सर्वाःसमुद्धरेद्राजापितेवव्यसनात्प्रजाः आत्मानमात्म
नाधीरोयथागजपतिर्गजान् ४३ एवंविधोनरपतिर्विमानेनार्कवर्च
सा विधूयेहाशुभंकृत्स्नमिंद्रेणसहमोदते ४४

विप्रमित्युपलक्षणं मत्प
रायणंयंकमपि ४२ राज्ञस्त्वावश्यकमेतदित्याहसर्वाइति ४३ ४४ नमोभगवते॰ १७१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वेषामापद्वृत्तीराह त्रिभिः पण्यैर्विक्रयार्हैः नतु सुरालवणाद्यैः तत्राप्यापदाक्रांत
श्चेत्खड्गेनक्षत्रियवृत्त्यावा यद्यपि गौनमोनंतरां पापीयसीं वृत्तिमातिष्ठेदितिस्म

सीदन्विप्रोवाणिग्वृत्त्यापण्यैरेवापदं तरेत् खड्गेनवाऽप
दाक्रांतोनश्ववृत्त्याकथंचन ८५ वैश्यवृत्त्यातु राजन्योजीवे
न्मृगयया ऽपदि चरेद्वाविप्ररूपेणनश्ववृत्त्याकथंचन ८६ श्री

रन् खड्गधारणं पण्यविक्रयाच्छ्रेष्ठं मन्यते तथापिहिंसातोवणिक् वृत्तिरेवश्रेष्ठेति
भगवतोमतं नतुश्ववृत्त्यानीचसेवया ८५ तत्राप्यापदिमृगयया विप्ररूपेणवाअध्या
पनादिना ८६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारवः प्रतिलोमजविशेषाः बुरुडादयः तेषां वृत्तिं कटादिक्रियां आपदुत्तीर्णस्तु ग
नुकल्पेन वर्त्तेतेत्याह कृच्छ्रादिति तदेवं वृत्तिव्यवस्थामुक्त्वा पुनर्गृहस्थस्यावश्य

शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत क
र्मणा ४९ वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं देवर्षिपितृभूतानि मद्रूपा
ण्यन्वहं यजेत् ५०

कान्यंच यज्ञानाह वेदाध्ययनं ब्रह्मयज्ञः तेन ऋषीन् स्वधाका
रेण पितॄन् स्वाहाकारेण देवान् बलिहरेण भूतानि अन्नाद्यैरन्नोदकादिभिर्मनु
ष्यानिति ज्ञातव्यं यथोदयं विभवानुसारतः तेष्वीश्वरदृष्टिं विधत्ते मद्रूपाणीति ५० १७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आवश्यकंधर्ममुक्काशास्त्यनुसारंधर्ममाह यद्छेद्दयात्ऽयमंविनाऽपार्ज्जितेनवाशु
क्लेनस्ववस्यालब्धेनशुद्धेनधनेनवा भृत्यान्पोष्यान् ५० गृहस्थास्यापिनिवृत्तिनि

५॥ यद्दृच्छयोपपन्नेनशुक्लेनोपार्ज्जितेनवा धनेनापीडयन्भृत्या
न्यायेनैवाहरेत्क्रतून् ५० कुटुंबेनैंनसज्जेतनप्रमाद्येत्कुटुंब्यपि
विपश्चिन्नश्व[illegible]रंपश्येददृष्टमपिदृष्टवत् ५१ नमोभगवतेकृष्ण॥

बु

ष्टामेवाहकुटुंबेष्विति त्रिभिः नप्रमाद्येतईश्वरानिष्ठायांप्रमत्तोनभवेत् ननुदृष्टादृ
ष्टार्थकर्मासक्तस्यकथमप्रमादः विचारेणेत्याहविपश्चिदिति ५१ नमोभगवते०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रापिदृष्टेष्वासक्तेरधिकत्वात्तेषांनश्वरतांप्रपंचयति पुत्रादीनामेकत्रसंगमः
पांथानांप्रपायांसंगमइव तत्रहेतुः अनुदेहंप्रतिदेहमेतेवियंतिनश्यंति निद्रानु

पुत्रदाराप्तबंधूनांसंगमःपांथसंगमः अनुदेहंवियंत्येतेस्वप्नोनिद्रानुगो
यथा ५२ इत्थंपरिमृशन्मुक्तोगृहेष्वतिथिवद्वसन् नगृहैरनुबध्येत
निर्ममोनिरहंकृतः ५३ कर्मभिर्गृहमेधीयैरिष्ट्वामामेवभक्तिमान् ति
ष्ठेद्वनंवोपविशेत्प्रजावान्वापरिव्रजेत् ५४

वान्तिस्वप्नोनिद्रापायेयथेति ५२
अतिथिवत्तदुदासीनः ५३ अस्याप्याश्रमविकल्पमाहकर्मभिरिति गृहाश्रमएवतिष्ठे
त् यदिप्रजावांस्तर्हिप्रव्रजेद्वा ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहाद्यासंगे दोषमाह यस्त्विति त्रिभिः ५५ बंधमेवाभिनयेन दर्शयति अहो इति बालाआत्मजा यस्याःसा आत्मजाश्च मां विनाथाः संतः कथं जीविष्यंतीति ः ५६

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्य
ते ५५ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः अनाथा मामृते दीनाः कथं
जीवंति दुःखिताः ५६ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं अतृप्तस्ताननुध्या
यन्मृतोंधं विशते तमः ५७ ॥ इति श्रीभागवते महापुराणे ए॰ द॰ सप्तदशोध्यायः ॥ १७ ॥

गृहे य आशयो वासना तेन आ सर्वतः । क्षिप्तं हृदयं यस्य सः अंधं तमः अतितामसीं योनिं ५७ इति अध्यायः ॥ १७ ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टादशोवदद्धर्मंवनस्थयतिगोचरं अधिकारविशेषेण विशेषंचापितत्कृतं क्र॥
मप्राप्तान्वनस्थधर्मानाहवनमिति आयुषःतृतीयंभागंपंचसप्ततिवर्षपर्यंतं

श्रीभगवानुवाच वनंविविक्षुःपुत्रेषुभार्यांन्यस्यसहैववा वनएववसेछांतस्तृतीयं
भागमायुषः १ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिंप्रकल्पयेत् वसीतवल्कलंवासस्तृ
णपर्णाजिनानिच २ केशरोमनखश्मश्रुमलानिबिभृयाद्दतः नधावेदप्सुमज्ज
मज्जेतत्रिकालंस्थंडिलेशयः ३

ततःपरंक्षीणेंद्रियस्यैषाद्विरागेऽपिसंन्यासाधि
कारःस्यादितिभावः १ वसीतपरिदधीत २ दतः दंतान्नधावेत्नशोधयेत् त्रिका
लमप्सुमज्जेतमुशलवत्स्नायात् स्थंडिलेशयः भूमिशायी ३ नमोनमःनमः ४ ११५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः श्रीगुरुंपरमानंदंवंदेआनंदविग्रहं यस्यस्मरणमात्रेणवि
ह्यानंदायतेवपुः जयंतिश्रीपरानंदकृपापांगलसद्दृशः यानित्यमनुवर्त्ततेसं
पदोविगताक्लशः उक्तस्त्रयोदशाध्यायैर्द्वादशेत्राश्रयःसतः अधिष्ठानावधि
ताभ्यामाश्रयश्चेश्वरःसतः २ उक्तोलयावधित्वेनप्राकृतात्यंतिकेलये अधि
ष्ठानतयाचोक्तोमहापुरुषवर्णने ३ तत्रादौषड्भिरध्यायैःशुकःप्राहपरीक्षितं
शेषैस्तत्राखिलान्याहसूतःपृष्टोथसत्रिभिः ४ स्वाश्रयश्रवणेकार्योनविलंबो
मनीषिणा इत्येषस्यात्कालवैषम्यंचतुर्भिस्तावदुच्यते तत्रतुप्रथमेभाविमाग
धान्वयभूमिपान् कलिप्रभावतःप्राहसंकरादिमलीमसान् ६ एवंस्वतेसोम
वंशेमुकुंदस्यैरक्रीडावर्णिताव्यासततोत्र वंशोभावीवर्ण्यतेकृष्णभक्तिमुक्ताशु १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]मुक्त्यैवर्त्मनास्तीतिवक्तुंतदेवंवैवस्वतमनुवंशेसोमवंशप्रस्तावेनश्रीकृष्णा
वतारचरितानिसप्रपंचमनुवर्णितानि अथेदानींभाविसोमवंश्याः कलौद्विजा
तीयसंकराद्गमलीमसोवैराग्यद्वाराश्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यंते त

श्रीगजाननायनमः श्रीराजोवाच स्वधामानुगतेकृष्णेयदुवं
शविभूषणे कस्यवंशोभवत्पृथ्व्यामेतदाचक्ष्वमेमुने १ राम

त्रतुसोमवंशशाखासुचिरकालानुवर्तिनयामागधवंशोनुवर्ण्यते तत्रपुरोर्वं
शेत्रपरिचरोवसुस्तस्यबृहद्रथस्तस्यजरासंधस्तस्यसहदेवः पुत्रोभूदितिसुक्तं
नवमस्कंधे तत्रैवसहदेवान्मार्जारिस्ततःश्रुतश्रवाइत्यादयोरिपुंजयांताविंश
तिभाविनोराजानोनिरूपिताः१ श्रीकृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नउपरितनंवंशंसंकरादिदोषैः प्रपंचयति योंत्य इति रिपुंजयएवपुरंजयः स्वा

श्रीशुकउवाच योंत्यःपुरंजयोनामभविष्योबारहद्रथः तस्यामात्यस्तु
शुनकोहत्वास्वामिनमात्मजं प्रद्योतसंज्ञंराजानंकर्तायत्पालकःसु
तः २ विशाखयूपस्तत्पुत्रोभविताराजकस्ततः नंदिवर्द्धनस्तत्सुतः
पंचप्रद्योतनाइमे अष्टत्रिंशोत्तरशतंभोक्ष्यंतिपृथिवींनृपाः ३
शिशुनागस्ततोभाव्यःकाकवर्णस्तुतत्सुतः क्षेमधर्मातस्यसुतःक्षे
त्रज्ञःक्षेमधर्मजः ४

मिनंपुरंजयंहत्वास्वपुत्रंप्रद्योतंराजानंकरिष्यति तस्यपालकोनामसुतोभवि
ष्यति २ प्रद्योतनसंज्ञाः ३ ४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ ६ ७ नंदोनामकश्चिन्महापद्मसंख्यायाः सेनायाः धनस्यवापतिर्भविष्य

विधिसारसुतस्तस्या जातशत्रुर्भविष्यति दर्भकस्तत्सुतोभावीद
र्भकस्याजयःस्मृतः ५ नंदिवर्द्धनआजेयोमहानंदिःसुतस्ततः शि
शुनागादशैवैतेषष्ट्युत्तरशतत्रयं ६ समाभोक्ष्यंतिपृथिवींकुरु
श्रेष्ठकलौनृपाः महानंदिसुतोराजन्शूद्रीगर्भोद्भवोबली ७ म
हापद्मपतिःकश्चिन्नंदःक्षत्रविनाशकृत् ततोनृपाभविष्यंति
शूद्रप्रायास्त्वधार्मिकाः ८

ति अतएवमहापद्मइत्यपित स्यनाम ८ नमोकृष्णो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकमेवछत्रंयस्यांतांपृथिवींशासिष्यतिपालयिष्यति क्षत्रोत्सादनेदृष्टांतः भार्ग
वः परसुरामइव ९ समाः संवत्सरान् १० नवनंदान्नंदंचतत्सुत्रांश्चेसेवंनव प्र

सएकछत्रांपृथिवीमनुलंघितशासनः शासिष्यतिमहापद्मोद्वितीय
इवभार्गवः ९ तस्यचाष्टौभविष्यंतिसुमाल्यप्रमुखाः सुताः यइमांभो
क्ष्यंतिमहींराजानः स्मशतंसमाः १० नवनंदान् द्विजः कश्चित्प्रपन्नानुद्ध
रिष्यति तेषामभावेजगतींमौर्याभोक्ष्यंतिवैकलौ ११ नमोनारायण

पन्नान् विश्वस्तान्निरव्यातान् वाद्विजः कौटिल्य वात्स्यायनादिपर्यायश्चाणक्यउ
द्धरिष्यतिउन्मूलयिष्यतिमौर्याः मौर्यसंज्ञाः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंभोक्ष्यंतितदाहसएवेतिचंद्रगुप्तंमौर्यंप्रथमं १२ १३ तेषांप्रथमोदशरथः

सएवचंद्रगुप्तंवैद्विजोराज्येभिषेक्ष्यति तत्सुतोवारसारस्तुततश्चाशो
कवर्द्धनः १२ सुयशाभवितातस्यसंगतःसुयशःसुतः शालिशूकस्त
तस्तस्यसोमशर्माभविष्यति १३ शतधन्वाततस्तस्यभवितातद्बृह
द्रथः मौर्यास्त्वेतेदशन्टपाःसप्तत्रिंशच्छतोत्तरं १४ समाभोक्ष्यंतिप
थिवींकलौकुरुकुलोद्वह १५ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोऽथभ
विष्यति वसुमित्रोभद्रकश्चपुलिंदोभवितासुतः १५ पराशरादिभिरु
क्तोऽत्राप्यनुसंधेयस्तेनसहमौर्यादशासप्तत्रिंशतोत्तरसप्तत्रिंशउत्तरंशतंसमाः

१९४

१६ वृहद्रथस्यसेनापतिः पुष्पमित्रोनामस्वामिनंहत्वाराज्यंकरिष्यतिसचशुंगानां
प्रथमः ततोग्निमित्रादयोनवेत्येवंशुंगाःदशवर्षशताधिकंद्वादशाधिकंवर्षशतं

ततोघोषःसुतस्तस्माद्वज्रमित्रोभविष्यति ततोभागवतस्तस्माद्देव
भूतिरितिश्रुतः १५ शुंगादशैतेभोक्ष्यंतिदशवर्षशताधिकं ततःक
ण्वानियंभूमिर्यास्यत्यल्पगुणान्नृप १७ शुंगंहत्वादेवभूतिंकण्वो
मात्यस्तुकामिनं स्वयंकरिष्यतेराज्यंवसुदेवोमहामतिः १९

१७ कथंकण्वा
न्यास्यतिनदाहशुंगमितिपरस्त्रीकामिनंदेवभूतिनामानंशुंगंहत्वातदमात्योव
सुदेवनामाकण्वोराज्यंकरिष्यति १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कण्वानांचतुर्थःसुशर्माइमेवसुदेवादयः कण्वायनाः वर्षाणांत्रीणिशतानिपं

तस्यपुत्रस्तुभूमित्रस्तस्यनारायणःसुतः कण्वायनाइमेभूमिंचत्वारिं

शच्चपंचच शतानित्रीणिभोक्ष्यंतिवर्षाणांचकलौयुगे १९ हत्वाकाण्वं

सुशर्माणंतद्भृत्योवृषलोबली गांभोक्ष्यत्यांध्रजातीयः कंचित्कालम

सत्तमः २० कृष्णनामाथतद्भ्राताभविताष्पृथिवीपतिः श्रीशांतकर्णस्त

पुत्रःपौर्णमासस्तुतत्सुतः २१ लंबोदरस्तुतत्पुत्रस्तस्माच्चिबिलकोनृ

पः मेघस्वातिश्चिबिलकादटमानस्तुतस्यच २२ चचत्वारिंशद्वर्षाणिच

भूमिंभोक्ष्यंति १९ कण्वानामंतिमंसुशर्माणंहत्वाबलिनामातद्भृत्योगांभोक्ष्यति २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द्वा॰
५

२२ यत्रयेषुबहुसंज्ञेषुअष्टसुनवमः शिवस्वातिनामभविता २४ २५ २६ आ

अनिष्टकर्माहालेयस्तलकस्तस्यचात्मनः पुरीषभीरुस्तत्पुत्रस्ततोरा
जासुनंदनः २३ चकोरोनवमोयत्राशिवस्वातिररिंदम तस्यापिगोमती
पुत्रः पुरीमान्भविताततः २४ मेदशिराः शिवस्कंदोयज्ञश्रीस्तत्सुतस्त
तः विजयस्तत्सुतोभाव्यश्चंद्रविज्ञः सलोमधिः २५ एतेत्रिंश न्नृपतय
श्चत्वार्यब्दशतानिच षट्पंचाशच्चपृथिवींभोक्ष्यंतिकुरुनंदन २६
सप्ताभिराआवभृत्यादशगर्दभिनोनृपाः कंकाः षोडशभूपालाभवि
ष्यंतिचलोलुपाः २७

वभृत्याः अवभृतिनेंग रीतद्राज्ञानः २७ नमोकृष्णा
य

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ एतेआभीराद्यामौनव्यतिरिक्ताः पंचषष्टिनृपाएकोनशताधिकंवर्षस
हस्त्रंपृथिवींभोक्ष्यंतिततः पूर्वोक्ताएवैकादशमौनाः त्रीण्यष्ट शतानिक्षितिं

ततोष्टौयवनाभाव्याश्चतुर्दशाचतुंधकसः भुयोदशागुरुंडा
श्चमौनाएकादशैवतु २८ एतेभोक्ष्यंतिपृथिवींदशवर्षश
तानिच नवाःधिकांचनवतिंमौनाएकादशाक्षितिं भोक्ष्यंत्य
ममरामष्टशतान्यंगत्रीणितैःसंस्थितेततः २९

भोक्ष्यंतितैःसंस्थितेषुमौनेषुम्लेषुकिलिकिलायांपुर्यांनृपतयोभविष्यंती
त्युत्तरेणान्वयः २९

पु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधिकानिचषड्वर्षाणि ३० तेषांभूतनंदादीनांययाययंबाह्लिकास्तम्नामान
स्त्रयोदशसुताभविष्यंति अथपुष्पमित्रोनामान्योराजन्यः अस्यचदुर्मित्रो

किलिंकिलायांनृपतयोभूतनंदोथवंगिरिः शिशुनंदिश्चतद्भ्राता
यशोनंदिः प्रवीरकः इत्येतेवैवर्षशतंभविष्यंत्यधिकानिषट् ३० तेषां
त्रयोदशसुताभवितारश्चबाह्लिकाः पुष्पमित्रोथराजन्योदुर्मित्रोस्यत
थैवच ३१ एककालाइमेभूपाः सप्तांध्राः सप्तकौशलाः वैदूर्यपतयोभा
व्याः नैषधास्ततएवहि ३२

नामपुत्रः ३१ तथाआंध्राः कौशलाः वैदूर्यपत
यः निषधाश्चएतेचतत्तद्देशनामाभिः प्रख्यातास्तुल्यकालाः खंडमंडलेषुभू
पाः ततएतेभ्योबाह्लिकेभ्यएवप्राय्याभविष्यंति ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता स च पूर्वोक्तात्पुरंजयादपरः पुरंज
यादिति प्रसिद्धः सन् वर्णान् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञान् म्लेच्छप्रायान् क
रिष्यति अपरानितिपाठे अन्यान्पुलिंदादिसंज्ञान्वर्णान् करिष्यतीत्यर्थः ३३ स च

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः करिष्यत्यपरान्वर्णान् पुलिं
दयदुमद्रकान् ३३ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः वीर्यवा
क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि अनुगंगामाप्रयागं गुप्तां भोक्ष्यति मेदिनीं

एवं कृत्वा अब्रह्मभूयिष्ठाः अत्रैव वर्ण्यप्रचुराः सतीः प्रजाः स्थापयिष्यति पालयिष्य
ति स च पद्मवत्यां पुरि अनुगंगां गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां पालितां मेदिनीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदनंतरंचसौराष्ट्रादिदेशवर्त्तिनोद्विजाः व्रात्याउपनयनरहिताभविष्यंति ३५ अब्र
वर्चसः वेदाचारशून्याः ३६ इमेचम्लेछप्रायोभूभृतः तुल्यकालाभविष्यंति किंच

सौराष्ट्रावंत्याभीराश्चशूद्रा अर्बुदमालवाः व्रात्याद्विजाभविष्यंतिशूद्रप्राया
जनाधिपाः ३५ सिंधोस्तटंचंद्रभागांकौंतींकाश्मीरमंडलं भोक्ष्यंतिशूद्रा
व्रात्याद्याम्लेच्छाश्चाब्रह्मवर्चसः ३६ तुल्यकालाइमेराजन्म्लेछप्रायाश्च
भूभृतः एतेधर्मान्नतपराः फाल्गुदास्तीव्रमन्यवः ३७ नमोभगवते७

एतेअधर्मानृतपराः अधर्मेअनृतेचपरिनिष्ठिताः फल्गुदाः अल्पदातारः ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदितास्तमितप्रायाः हर्षशोकादिबहुलाः ३८ असंस्कृताः गर्भाधानादिसंस्काररहिताः प्रजाः भक्षयिष्यंतिधनायपहारादिनापीडयिष्यंति ३९ किंचतन्नाथाःते

स्त्रीबालगोद्विजघ्नाश्चपरदारधनाहृताः उदितास्तमितप्रायाअल्पसत्वाल्पकायुषः ३८ असंस्कृताःक्रियाहीनारजसातमसावृताः प्रजास्तेभक्षयिष्यंतिम्लेछराजन्यरूपिणः ३९ तन्नाथास्तेजनपदास्तच्छीलाचारवादिनः अन्योन्यतोराजभिश्चक्षयंयास्यंतिपीडिताः ४० इति श्रीभागवते महापुराणेद्वादशस्कंधेराजवंशानुकीर्तनंनाम प्रथमोध्यायः॥१॥

नाथायेषांतेजनपदाःदेशवर्तिनोमनुष्याःतछीलाचारवादिनःतेषामिवशीलमाचारोवाद

भा॰टी॰स्कं॰१२ अ॰१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितीयेतुकलेर्दोषवृद्धौ कल्क्यवतारस्तः अधर्मिष्ठेजनेनष्टेपुनः कृतयुगागमः
कलिधर्मान्प्रपंचयति ततश्चेत्यादिना १ धर्मन्याययोर्व्यवस्थायांबलमेव २ दां

श्रीशुकउवाच ततश्चानुदिनं धर्मः सत्यंशौचंक्षमादया कालेनबलिनाराजन्
नंक्ष्यत्यायुर्बलंस्मृतिः १ वित्तमेवकलौनॄणांजन्माचारगुणोदयः धर्मन्या
यव्यवस्थायांकारणंबलमेवहि २ दांपत्येभिरुचिर्हेतुर्मायैवव्यावहारिके
स्त्रीत्वेपुंस्त्वेचहिरतिर्विप्रत्वेसूत्रमेवहि २

पत्न्येभार्यापतिभावे अभिरुचिरेवहेतुः नकुलगोत्रादिः व्यावहारिकेक्रयविक्रया त्रा
दौस्त्रीत्वेपुंस्त्वेचतयोः श्रेष्ठ्येरतिकौशलमेवहेतुर्नकुलमाचारोवा ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आश्रमाणांख्यातौज्ञानेलिंगमेवदंडाजिनादिकंहेतुर्नलाचारविशेषः अन्योन्या
पत्तिकारणंच आश्रमादाश्रमांतरप्राप्तौच कारणं यद्वा बहूदकहंसादीनामन्यो

लिंगमेवाश्रमाख्यातावन्योन्यापत्तिकारणं अवृत्यान्यायदौर्बल्यंपां
डित्येचापलंवचः ४ अनार्यत्वेवासाधुत्वेसाधुत्वेदंभएवतु स्वीका
रएवचोद्वाहेस्नानमेवप्रसाधनं ५

× मलंकारः ५

न्यापत्तौनमस्कारादिव्यवहारेकारणं अवृत्यामुद्रार्पणादावसामर्थ्येन्यायदौ
र्बल्यंपराजयः चापलंवचः बहुभाषणं ४ असाधुत्वेचौर्याद्यभियोगे प्रसाधन"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूरेवर्त्तमानंवार्य्ययनंजलाशायस्तीर्थेनगुर्वादिः लावण्येसुंदरत्वेकेशाधारणंक

दूरेवार्य्ययनंतीर्थेलावण्येकेशधारणं उदरंभरतास्वार्थेः सस्यबंधा
र्य्यमेवहि ६ दास्पंकुडुंबभरणंयशोर्थेधर्मसेवनं एवंप्रजाभिर्दु
ष्टाभिराकीर्णेक्षितिमंडले ७ ब्रत्मविट्क्षत्रशूद्राणांयोबलीसभवि
तान्नृपः ७ प्रजाहिलुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मभिः आछिन्नदार ४
द्रविणायास्यंतिगिरिकाननं ८ शाकमूलामिषक्षौद्रफलपुष्पादि
भोजनाः ९

चादिः स्वार्थःपुरुषार्थः ६७ आछिन्नाअपहृतादाराद्रविणानिचयासांताः अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१० क्षीयमाणेष्विसादीनाऽत्थंकलौगतप्रायऽतिपंचमेनान्वयःक्षीयमाणेषुअल्प

अनावृष्ट्याविनंक्ष्यंतिदुर्भिक्षकरपीडिताः शीतवातातपप्रावृड्हिमैरन्यो
न्यतःप्रजाः ९ क्षुत्तृड्भ्यांव्याधिभिश्चैवसंतापेनचचिंतया त्रिंशद्विंशतिव
र्षाणिपरमायुःकलौनृणां १० क्षीयमाणेषुदेहेषुदेहिनांकलिदोषतः व
र्णाश्रमवतांधर्मेनष्टेवेदपथेनृणां ११ पाखंडप्रचुरेधर्मेदस्युप्रायेषुरा
जसु चौर्यानृतवृथाहिंसानानावृत्तिषुवैनृषु १२

प्रायेषु ११ दस्युप्रायेषुचौरतुल्येषुचौर्याऽनृतवृथाऽहिंसायानानावृत्तयोयेषांते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वा॰
१०

छागप्रायासु प्रमाणतः क्षीरतश्च अजातुल्यासु १२ स्यात्सुषु वृक्षेषु विद्युत्प्राये
षु तडिद्वहुलेषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु १४ जनेषु खरधर्मि

शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु गृहप्रायेष्वाश्रमेषु यो[illegible]नप्रायेषु बंधु
षु १३ अणुप्रायास्वोषधीषु शमीप्रायेषु स्यात्सुषु विद्युत्प्रायेषु मेघेषु शून्य
प्रायेषु सद्मसु १४ इत्थं कलौगतप्राये जनेषु खरधर्मिषु धर्मत्राणाय सत्वेन णि
भगवानवतरिष्यति १५

णिः सह चेष्टिते कलौ गतप्राये समाप्तप्राये १५ नमो भगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्प्रपंचयतिचतुर्भिःचराचरगुरोरीश्वरस्यैव॥ धर्मत्राणेहेतुः॥ गुरुत्वेश्वरत्व
योरुपपादनंअखिलस्यविश्वस्यात्मनःकारणस्येतिएवंभूतस्यविष्णोर्जन्मसा

चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः॥ धर्मत्राणायसाधू
नांजन्मकर्मापनुत्तये॥१६॥ शंभलग्राममुख्यस्यब्राह्मणस्य
महात्मनः॥ भवनेविष्णुयशसः कल्किः प्रादुर्भविष्यति॥१७॥

धूनांधर्मत्राणाय॥ धर्मत्राणप्रयोजनमाह॥ कर्मापनुत्तयेमोक्षाय॥१६॥ शंभ
लग्रामेमुख्यस्यप्रधानस्यनाम्नाविष्णुयशसोब्राह्मणस्यभवनेगृहे॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मत्राणप्रकारमाह॥ अश्वमिति॥ असाधवोदस्यंनेयेननमश्वमास्थायासिनाद
स्यून्कोटिशोनिहनिष्यतीत्युत्तरेणान्वयः॥ असाधुदमनइतिपाठेकल्किविशेष

अश्वमाशुगमारुह्यदेवदत्तंजगत्पतिः॥ असिनासाधुदमनम
ष्टैश्वर्यगुणान्वितः॥१८॥ विचरन्नाशुनाक्षोण्यांहयेनाप्रति
मद्युतिः॥ नृपलिंगछदोदस्यून्कोटिशोनिहनिष्यति॥१९॥

णं॥१८॥ तत्प्रपंचः॥ आशुनाशीघ्रगामिनातेनहयेनक्षोण्यांविचरन्॥ अणिमा
द्यष्टैश्वर्याणिगुणाश्वसत्यसंकल्पादयस्तैरन्वितःनृपलिंगछदःराजवेषछन्नान्॥१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चपुनः कृतयुगप्रवृत्तिंवक्तुमाह अथेतिसार्द्धद्वाभ्यांतेषांपौरजानपदानां मनांसिविशदानिभविष्यंति तत्रहेतुः वासुदेवस्यांगरागेणचंदनादिनाउ तिपु

अथतेषांभविष्यंतिमनांसिविशदानिवै वासुदेवांगरागातिपुण्यगंधानिल स्पर्शात्पौरजानपदानांवैहतेष्वखिलदस्युषु २० तेषांप्रजाविसर्गश्चस्थविष्ठः संभविष्यति वासुदेवेभगवतिसत्वमूर्त्तौहृदिस्थिते २१ यदावतीर्णोभग वान्कल्किर्धर्मपतिर्हरिः कृतंभविष्यतितदाप्रजासूतिश्चसात्विकी २२ ७

ण्यगंधोः निलैसंस्पर्शात्तीति तथातेषां २० स्थविष्ठः स्थूलतरः २१ कृतयुगप्रवृ त्तिमाहयदावतीर्णइति प्रजानांसूतिःप्रसूतिः २२

स्कं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदवतारकालोपलक्षणमाह यदाचंद्रश्चेति तिष्यः पुष्यः अयमर्थः चंद्रसूर्य
बृहस्पतीनांयदापुष्यनक्षत्रेयोगः तदातत्कृतयुगंभविष्यतीति यद्यपिचप्र
सिद्धादशाब्दं कर्कराशौबृहस्पतौवर्तमाने छित्रोमावास्यासुतेषांत्रयाणामपि स्व

यदाचंद्रश्चसूर्यश्चतथातिष्यबृहस्पती एकराशौसमेष्यंतितदाभवतितत्कृ
तं २३ येऽतीतावर्तमानायेभविष्यंतिचपार्थिवाः तेनउद्देशतः प्रोक्तावंशीयाः
सोमसूर्ययोः २४

पुष्ययोगः संभवतिन थापितेषांसहप्रवेशोत्रविवक्षितः
समेष्यंतीतिवचनात् अतोनातिप्रसंगः २३ एवंनमेवेरुकंधमारभ्यानुक्रांतंवैव
स्वतमनोर्वंशद्वयंनिगमयतियेऽतीताइतिउद्देशतः संक्षेपतः २४ नमोरामाय १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलियुगावांतरविशेषंवक्तुमाह आरभ्येत्यादिना वर्षसहस्रं पंचदशोत्तरंशतंचे
तिकयापि विवक्षयाऽवांतरसंख्येयं वस्तुतस्तु परीक्षिन्नंदयोरंतरंद्वाभ्यामूनंव
र्षाणांसार्द्धसहस्रंभवति यतः परीक्षित्समकालमागधमार्जारिमारभ्यरिपुंज

आरभ्यभवतोजन्मयावन्नंदाभिषेचनं एतद्वर्षसहस्रंतुशतंपंचदशोत्तरं २५

यांताविंशतिराजानः सहस्रंसंवत्सरंभोक्ष्यंतीत्युक्तंनवमस्कंधेयेबार्हद्रथभूपा
लाभाव्याःसाहस्रवत्सरमिति ततः परंचप्रद्योतनाअष्टत्रिंशोत्तरशतंशिशुना
गाश्चषष्टयुत्तरंशतत्रयंभोक्ष्यंतिपृथिवीमित्यत्रैवोक्तत्वात् २५ नमोरामचंद्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालेप्रवृत्तिंवृद्धिंचनिरूपयितुंकालज्ञानोपलक्षणमाह सप्तर्षीणांत्विति अयम
र्थः प्रागग्रशकटाकारंतारासप्तकंसप्तर्षिमंडलं तत्रकिंचिदुन्नतरेषाग्रस्थानीयो
मरीचिः ततःपश्चादानम्रयुगकंधराकारोवसिष्ठःसभार्यः ततःपश्चादीषदुन्न त
सप्तर्षीणांतुयेपूर्वौदृश्येतेह्युदितौदिवि तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि
स्तेषांमूलस्थानीयोंगिराः ततःपश्चा च्चतुरस्रताराचतुष्केऐशान्यामत्रिः ततो
दक्षिणतःपुलस्त्यः पुलस्त्यात्पश्चिमतःपुलहः ततउत्तरतः क्रतुः एवंस्थितेतेषांम
ध्येयौपूर्वौउदयसमयेप्रथममुदितौदृश्येते पुलहक्रतुसंज्ञौतयोस्तुमध्येतयोः
पूर्वयोश्चमध्येयत्समंदक्षिणतःसमदेशावस्थितमश्विन्यादिषुयदन्यतमंनक्षत्रंदृ
श्यते २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनतथैवयुक्तान्त्वणामष्टशतंतिष्ठंतितेचद्विजास्त्वदीयेकालेऽधुनामघाआश्रितावं
र्त्तंते २७ यदाविष्णोर्भानुःभातीतिभानुःशुद्धसत्वात्मकोदेहःदिव्यंवैकुंठंगतः तदा

तेनैवऋषयोयुक्तास्तिष्ठंत्यष्टशतंनृणां तेत्वदीयेद्विजाःकालेअधुनात्वा
श्रितामघाः २७ विष्णोर्भगवतोभानुःकृष्णाख्योसौदिवंगतः तदाविश
त्कलिर्लोकेपापेयद्रमतेजनः २८ यावत्सपादपद्माभ्यांस्पृशन्नास्तेरमा
पतिः तावत्कलिर्वैपृथिवींपराक्रांतुंनचाशकत् २९

कलियुगमाविशत्
यत् यस्मिन्युगेजनःपापेरमतइतिकलियुगलक्षणं २८ ननुश्रीकृष्णेपृथिव्यां
वर्त्तमानेपिसंध्यास्वरूपेणकलिःप्रविष्टएवासीत् सत्यंतथातावत्तस्यपराक्रमोना
भवदित्याहयावदिति पराक्रांतुंअभिभवितुं २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याह

अतोयथोक्तएवकलिप्रवेशकालः यदादेवर्षयइतिद्वादशाब्दशतात्मकइतिदि
व्येनमानेनसंध्यासंध्यांशाभ्यांसहयोद्वादशाब्दशतात्मकः सकलिः तदासंध्या

यदादेवर्षयःसप्तमघासुविचरंतिहि तदाप्रवृत्तस्तुक
लिर्द्वादशाब्दशतात्मकः ३० यदामघाभ्योयास्यंतिपू
र्वाषाढांमहर्षयः तदानंदात्प्रभृत्येषकलिर्वृद्धिंगमिष्य
ति ३१

मतिक्रम्यप्रविष्टइत्यर्थः ३० कलेःप्रवेशकालमुक्त्वातस्यवृद्धिकालमाह यदे
ति तदाप्रद्योतनात्प्रभृतिवृद्धिंगच्छन्नंदात्प्रभृत्यतिवृद्धिंगमिष्यतीत्यर्थः ३१ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयदाकलेर्लिंगमुपलब्धंतदैवप्रविष्टइतियुक्तंततःपरंवृद्धिरित्यत्रकिंप्रमाणं
तत्राह यास्मिन्निति प्रतिपन्नंप्रविष्टमितिज्ञातं पुराविदःपूर्वेज्ञातारः ३२ कलेर

यस्मिन्कृष्णोदिवंयातस्तस्मिन्नेवतदाहनि प्रतिपन्नंक
लियुगमितिप्राहुःपुराविदः ३२ दिव्याब्दानांसहस्रांतेचतु
र्थेतुपुनःकृतं भविष्यतियदान्नृणांमनआत्मप्रकाशकं
३३

नंतरंकृतयुगप्रवेशमाहदिव्याब्दानामिति चतुर्थेकलौप्रवेशनाद्परिमितेनां
शेनापिसहातीतेसतीत्यर्थः कृतयुगप्रवेशचिन्हमाह यदान्नृणांमनःआत्मप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काशकं भविष्यति तदेति ३३ राजवंशोक्तां स्थितिं ब्राह्मणादिवंशेष्वप्यतिदिशति
इत्येष इति यथायाभिरुच्चनीचावस्थाभिः तास्ताः अवस्थाः वंशा इति च पाठः

इत्येष मानवो वंशो यथासंख्यायते भुवि तथा विट्शूद्रविप्राणां
वंशास्ते ये यायुगेयुगे ३४ एतेषां नाम लिंगानां पुरुषाणां महात्म
नां कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ३५ नमोन

३४ एतत्कीर्तनस्य वैराग्योपयोगतामाह एषांतेमिति नामैवलिंगंज्ञापकंये
षां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेवस्थिता न तु राज्यं पुत्रादयो वा ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्पावुत्सन्नानांराजवंशादीनांपुनःप्रवृत्तिप्रकारमाह देवापिः सोमवंशजःमरुस्तु
सूर्यवंशजः कलापग्रामोनामयोगिनामावासःप्रसिद्धः ३६ ३७ इममेवप्रकारं

देवापिःशंतनोर्भ्रातामरुश्चेक्ष्वाकुवंशजः कलापग्राममआसातेमहायोगब
लान्वितौ ३६ ताविहैत्यकलेरंतेवासुदेवानुशिक्षितौ वर्णाश्रमयुतंधर्मंपूर्व
वत्प्रथयिष्यतः ३७ कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगं अनेनक्रमयोगेन
भुविप्राणिषुवर्त्तते ३८ राजन्नेतेमयाप्रोक्तानरदेवास्तथापरे भूमौममत्वंकृ
त्वांतेहित्वेमांनिधनंगताः ३९

प्रतिचतुर्युगंदर्शयति कृतमिति ३८ एतेषांनामलिंगानामित्यादियउक्तंतत्प्रपंच
यतिराजन्नितिपंचभिः ३९ नमोनारायणाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममत्वंकृत्वेत्यनेनस्तूचितांभूतद्रोहप्रवर्तिनीं इतिक्रिमीति राजनाम्नःराज्ञोतिनाम
यस्यतस्यापिदेहस्यांतेक्रि मयोविड्भस्मेतिवासंज्ञाभविष्यति तत्कृतेतदर्थं
योभूतधुक् भूतेभ्योद्रुह्यतिसकिंस्वार्थंवेदकुत्तरस्यपेक्षायांहेतुत्वेनभूतद्रोहंवि

क्रिमिविड्भस्मसंज्ञांतेराजनाम्नोपियस्यच भूतधुक्तत्कृतेस्वार्थंकिंवेदनि
रयोयतः ४० कथंसेयमखंडाभूः पूर्वैर्मेपुरुषैर्धृता मत्पुत्रस्यचपौत्रस्यमत्पू
र्ववंशजस्यच ४१

शिनाश्चियतोभूतद्रोहान्निरयोभवतीति ४० ममत्वप्रकारंप्रपंचयतिकथमिति
सेयमखंडाभूः मेपूर्वजैःपुरुषैःधृतासतीइदानींमत्पूर्वाचसतीमत्पुत्रादेःकथंस्या
दित्येवं ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उभौमहींकायंच अदर्शनंमृत्युं ४१ उपसंहरातियेयश्चतितेसर्वेचकिलासुक्रियमा
णासुकथामात्राः कालेनकृताः ॥४३॥ इश्रीभा०॥ टिकायांद्वितीयः ॥२॥ तृतीयेभूमिगी

तेजो॰ वन्नमयंकायंगृहीत्वात्मतयाः बुधाः महींममतयाचोभौहित्वां
तेदर्शनंगताः ४२ येयेभूपतयोराजन्भुजंतिभुवमोजसा कालेनते
कृताः सर्वेकथामात्राः कथासुच ४३ इतिश्रीभागवतेमाहापुराणेद्वाद
शस्कंधेद्वितीयोध्यायः ॥२॥ श्रीकृष्णायनमोनमः ॥ ५७॥

तैश्वराज्यदोषादिवर्ण्यते कलौचदोषभूयिष्ठेदोषहंत्रीहरेर्नोतिः १ नमोरामाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहेऽहंतांअहंमोचममतांकुर्वंत्यतोबुधाइत्युक्तंतद्देवभूमिगीतैःप्रपंचयतिदृष्ट्वेत्यादि
ना आत्मनिराज्यंजयेव्ययान्अभ्युक्तान् हासप्रकारमेवाहअहोइति १ येनकामे

श्रीशुकउवाच॥ दृष्ट्वात्मनिजयेव्यग्रान्नृपान्हसतिभूरियं अहोमांवि
जिगीषंतिमृत्योःक्रीडनकान्नृपाः ११ कामएषनरेंद्राणांमोघःस्याद्वि
दुषामपि येनफेनोमपेपिंडेयेतिविश्रंभितान्नृपाः २ नमोभगवते

नफेनोपमेपिंडेदेहेविश्रंभिता विश्वासंनीतायेतेषांनरेंद्राणांसएवकामोमोघएव
वस्यात् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काममेवदर्शयतिपूर्वमितिद्वाभ्यां इंद्रियार्थलंपटस्यनराज्यप्राप्तिःस्यादितिअथममिं
द्रियषड्वर्गंनिर्जित्यराजमंत्रिणोजेष्यामः वशीकरिष्यामःसचिवाअमात्याःकरींद्राह
स्तीपाःतांश्चजेष्यामःकंटकान्प्रतिपक्षान्अस्यअपास्य अथकंटकानितिवापा

पूर्वंनिर्जित्यषड्वर्गंजेष्यामोराजमंत्रिणः ततःसचिवपौरासकरींद्रानस्यकंटकान्
३ एवंक्रमेणजेष्यामपृथ्वींसागरमेखलां इत्साशाबद्धहृदयानपश्यंत्यंतिकेंतकं
४ समुद्रावरणांजित्वामांविशंत्यब्धिमोजसा कियदात्मजयस्यैतन्मुक्तिरात्मजये

फलं ५

ऊ: ३ इतिएवंकेचिदाशाबद्धहृदयाः ४ एवंकेचित्पुनर्मांजित्वाप्यतितृष्णया
अब्धिंविशंति तदेवमिंद्रियजयेनयेराज्यंसाधयितुमिच्छंतितेःतिमंदाइत्साहकियदिति

५

अंतकं न पश्यंतीत्युक्तं तदेवाह यामिति कुरूद्वहेति भूमिगीतं कथयन् शुकः संबोधय
ति कुलोद्वहे तिच पाठः सुगमः ६ अबुद्धय इत्युक्तं तत्प्रपंचयति मत्कृत इति ७ ८

यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह गता यथागतं युद्धे तां मां जेष्यंत्य
बुद्धयः ६ मत्कृते पितृपुत्राणां भ्रातॄणां चापि विग्रहः जायते ह्यस
तां राज्ये ममताबद्धचेतसां ७ ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः
स्पर्द्धमाना मिथो घ्नंति म्रियंते मत्कृते नृपाः ८ पृथुः पुरूरवा गाधिर्न
हुषो भरतोऽर्जुनः मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः

रामो नाम कश्चिद्राजा यद्वा लोकदृष्ट्या दाशरथिरेव निर्दिष्टः ९ नमो नारायणायनमः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० लोकंरावयतिरोदयतीतिलोकरावणः ११ १२ मयिकृत्स्नैर्मममतांकृत्वायेअवर्तंत

तृणबिंदुर्ययातिश्चशर्यातिःशंतनुर्गयः भगीरथःकुवलयाश्वःककुत्स्थो
नैषधोनृगः १० हिरण्यकशिपुर्वृत्रोरावणोलोकरावणः नमुचिःशं
बरोभौमोहिरण्याक्षोथतारकः ११ अन्येचबहवोदैत्याराजानोयेमही
श्वराः सर्वेसर्वविदःशूराःसर्वेसर्वाजितोजिताः १२ ममतांमय्यवर्त्त
तकृत्स्नैर्मर्त्यधर्मिणः कथावशेषाःकालेनत्यक्तार्थाःकृताविभो १३

तेकालेनकथावशेषाःकृताःविभोइतिसंबोधनंकुरुद्वहेतिवत् १३ नमोरामचंद्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजवंशानुकथनस्य तात्पर्यमाह कथा इति विज्ञानं विषयासारत्वाज्ञानं ततो वैरा
ग्यं तयोर्विवक्षया परेयुषां मृतानां वचो विभूतीः वाग्विलासमात्ररूपाः पारमार्थ्यं

कथा इमास्ते कथिता महीयसां वितायलोकेषु यशः परेयुषां विज्ञान
वैराग्यविवक्षया विभो वचो विभूतीर्नतु पारमार्थ्यं १४ यस्तूत्तमश्लो
कगुणानुवादः संगीयते भीक्ष्णममंगलघ्नः तमेव नित्यं शृणुयाद
भीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः १५

परमार्थं युक्तं कथनं न भवतीत्यर्थः १४ कस्तर्हि पुरुषाणामुपादेयः परमार्थः तमाह
यस्त्विति नित्यं प्रत्यहं तत्राप्यभीक्ष्णं १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलिदोषोपचयेसतिभक्तेरसंभवंमन्यमानः पृछतिकेनोपायेनेति विधा[illegible]ष्यंतिना
शयिष्यंतियथायथावत् १६ कलियुगेकः परमोधर्मइतिबुभुत्सयापृछतियुगानीति

राजोवाच केनोपायेनभगवन्कलेर्दोषान्कलौजनाः विधमिष्यंत्यु
पचितांस्तन्मेब्रूहियथामुने १६ युगानियुगधर्मांश्चमानंप्रलयकल्प
योः कालस्येश्वररूपस्यगतिंविष्णोर्महात्मनः १७ नमोभगवते॰

ब्रूहीत्यनुषंगः आत्यंतिकजिज्ञासयापुनः पृछतिप्रलयकल्पयोः संहारस्थितिका
लयोः नचायंबहिर्मुखः प्रश्नइत्याहकालस्येति १७ नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्चयुगधर्मोस्त्यावदाह कृतइति तज्जनैस्तत्कालीनैः दानंअरागद्वेषतयाअभय
दानं तदेवप्रथमस्कंधेशौचशब्देनोक्तं विभोः संपूर्णस्यधर्मस्य १८ तदानींतनज

श्रीशुकउवाच॥ कृतेप्रवर्त्ततेधर्मश्चतुष्पात्तज्जनैर्धृतः सत्यंदया
तपोदानमितिपादाविभोर्नृप १८ संतुष्टाः करुणामैत्राः शांतादां
तास्तितिक्षवः आत्मारामाः समदृशः प्रायशः श्रमणाजनाः १९
त्रेतायांधर्मपादानांतुर्यांशोहियतेशनैः अधर्मपादैरनृतहिंसा
संतोषविग्रहैः २०

नानाहसंतुष्टारतिमैत्राः कृतमैत्रीयुक्ताः श्रमणाआत्माभ्यासवंतः १९ २०

GC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मोत्तराः ब्राह्मणाधिकाः २१ अन्नतेनसर्वं हिंसयादया असंतोषेणतपः विग्रहे
णदानमितियथासंख्यंयोज्यं हिंसातुष्यन्नतद्वेषैरित्यपक्रमोनविवक्षितः धर्म

तराक्रियातपोनिष्ठानातिहिंसानलंपटाः त्रैवर्गिकास्त्रेतीवद्धावर्णा
ब्रह्मोत्तरात्रप २१ तपःसत्यदयादानेष्वर्द्धंह्रसतिद्वापरे हिंसातुष्यन्न
तद्वेषैर्धर्मस्याधर्मलक्षणैः २२ यशस्विनोमहाशालाः स्वाध्याया
ध्ययनेरताः आद्याःकुटुंबिनोलक्ष्यावर्णाःक्षत्रद्विजोत्तमाः २२

स्यार्द्धंह्रसतिक्षीयते अधर्मस्यलक्षणैः चिन्हैः पादैरित्यर्थः २२ यशःस्विनःकीर्ति
प्रियाःक्षत्रद्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलौधर्मपादानांतुर्यांशः चतुर्थोंशोऽवशिष्यते २४ शूद्रदाशोत्तराः शूद्रकैवर्त्तादिप्र
धानाः २५ युगानामेवंभूतवैषम्यकारणमाहसत्वमितिपंचभिः २६ मनश्चबुद्धि

कलौतुधर्महेतूनांतुर्यांशोऽधर्महेतुभिः एधमानैःक्षीयमाणोह्यंतेसो
पिविनंक्ष्यति २४ तस्मिंल्लुब्धादुराचारानिर्दयाःशुष्कवैरिणः दुर्भगा
भूरितर्षाश्चशूद्रदाशोत्तराःप्रजाः २५ सत्वंरजस्तमइतिदृश्यंतेपुरु
षेगुणाः कालसंचोदितास्तेवैपरिवर्त्तंतआत्मनि २६ प्रभवंतियदा
सत्वेमनोबुद्धींद्रियाणिच तदाकृतयुगंविद्यात्ज्ञानेतपसियद्रुचिः २७

श्चेंद्रियाणिचसत्वेयदाप्रभवंति अतिशयेनवर्त्तंते २७ श्रीराधाकृष्णायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदाकर्मादिषुभक्तिःप्रीतिस्तदारजोवृत्तिप्रधानंत्रेतायुगमितिजानीहि २८ काम्या
नांकर्मणांविषयेयदाप्रीतिस्तदारजस्तमःप्रधानंद्वापरंजानीहि २९ विषादनंदुः

यदाकर्मसुकाम्येषुभक्तिर्भवतिदेहिनां तदात्रेतारजोवृत्तिरितिजानीहिबुद्धिमन्
२८ यदालोभस्त्वसंतोषोमानोदंभोथमत्सरः कर्मणांचापिकाम्यानांद्वापरंतद्रज
स्तमः २९ यदामायानृतंतंद्रानिद्राहिंसाविषादनं शोकोमोहोभयंदैन्यंसकलिस्ता
मसःस्मृतः ३० यस्मात्क्षुद्रदृशोमर्त्याः क्षुद्रभाग्यामहाशनाः कामिनोवित्तहीना
श्चस्वैरिण्यश्चस्त्रियोसतीः ३१

खं ३० कलिदोषान्प्रपंचयतियस्मादित्यादिनायस्मात्कलेर्हेतोः क्षुद्रदृशःमंदमतयः क्षुद्रभाग्याः अल्पभाग्याः महाशनाः बह्वाहाराः
वित्तहीनाअपिकामिनः स्वैरिण्यः पुंश्चल्यः असतीःअसत्यः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द्वा॰
२१

दस्यवःउत्कटाःप्रचुरायेषुते ३२ अव्रताविहिताचारशून्याः अशौचाः शौचशून्या श्च
वटवोब्रह्मचारिणोभविष्यंतिकुटुंबिनश्चगृहस्थाः स्वयंभिक्षाटनपराभविष्यंतिनतु

दस्यूत्कटा जनपदा वेदाःपाखंडदूषिताः राजानश्चप्रजाभक्ष्याःशिश्नोदरप
राद्विजाः ३२ अव्रताबटवोशौचाभिक्षवश्चकुटुंबिनः तपस्विनोग्रामवासा
न्यासिनोल्पधर्यलोलुपाः ३३ ह्रस्वकायामहाहाराभूर्य्यपत्यागतह्रियः शश्व
त्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ३४

भिक्षांदास्यंतितपस्विनोवनस्थाः वनानिहित्वाग्रामवासाभविष्यतिन्यासिनोयतयःअ
तिधनादिलोलुपाभविष्यंति ३३ पुनरपिस्त्रीणांस्वभावमाहह्रस्वकायाइति कटुक
भाषिण्यः अप्रियवादिन्यःचौर्यंचमायाचकपटंउरुसाहसंयासां ३४

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचकिराताः वाणिजः पणयिष्यंतिक्रयविक्रयादिव्यवहारंप्रवर्त्तयिष्यंति किंचसर्वे
जनाः अनापद्यपिजुगुप्सितांनिंदितांवार्तांरतिंसाधुमंस्यंते ३५ सर्वोत्तममपिप

पणयिष्यंतिवैक्षुद्राः किराताःकूटकारिणः अनापद्यपिमंस्यंतेवा
र्तांसाधुजुगुप्सितां ३५ पतिंसस्यंतिनिर्द्रव्यंभृत्याअप्यखिलोत्त
मं भृत्यंविपन्नंपतयः कौलंगाश्चापयस्विनीः ३६ नमोनारायण

तिंद्रव्यहीनंभृत्यास्त्यक्ष्यंतिपतयश्चविपन्नंरोगादिभिर्व्यापाराक्षमंकौलंकुलपरंप
रयापातंत्यक्ष्यंति अपपयस्विनीर्दुग्धदोहाः ३६ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौरतंसुरतनिमित्तंसौहृदंयेषांतेअतएवननंदारीत्रभार्याभगिन्यः श्यालाः भार्या

पितृभ्रातृसुहृज्ज्ञातीन्हित्वासौरतसौहृदाः ननंदृश्यालसंवाददीनाः
स्त्रैणाः कलौनराः ३७ शूद्राः प्रतिग्रहीष्यंतितपोवेषोपजीविनः धर्मं
वक्ष्यंत्यधर्मज्ञाअधिरुह्योत्तमासनं ३८ नित्यमुद्विग्नमनसोदुर्भिक्ष
करकर्शिताः निरन्नेभूतलेराजन्ननावृष्टिभयातुराः ३९ वासोन्नपान
शयनव्यवायस्नानभूषणैः हीनाः पिशाचसंदर्शाभविष्यंतिकलौप्र
जाः ४०

भ्रातरः तैः संवादोमंत्रालोचनंयेषांतेननदुरितिवापाठः ३७ ३८ ३९ पिशाचसंद
र्शाः पिशाचसदृशाः ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काकिणिके विंशतिवराटकमात्रेप्यर्थे विषयभूते विगृह्य वैरं कृत्वा ४१ ४२ महांतमनर्थ
माहकलाविति द्वाभ्यां त्रैलोक्यनाथैरवनतं नमस्कृतं पादपद्मं यस्य तं न यक्ष्यंति न

कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः त्यक्ष्यंति हि प्रियान्प्रा
णान्हनिष्यंति स्वकानपि ४१ नरक्षिष्यंति मनुजाः स्थविरौ पितराव
पि पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ४२ कलौ न राजन्
जगतां परं गुरुं त्रैलोक्यनाथानतपादपंकजं प्रायेण मर्त्या भगवंत
मच्युतं यक्ष्यंति पाखंडविभिन्नचेतसः ४३

पूजयिष्यंति पाखंडैर्विभिन्नम
न्यथाकृतं चेतो येषां ते ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवेशोग्रणन् विमुक्ताः कर्मरूपाः अर्गलाः प्रतिबंधा यस्य सः ४४ तदेवं कलिदोषान्
प्रपंच्य प्रस्तुतं तन्निस्तारोपायमाह पुंसामिति षड्भिः द्रव्यदेशात्मभिः संभवो येषां

यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन् वा विवशो गृणन् पुमा
न् विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ४४
पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसंभवान् सर्वान् हरति चित्तस्थो
भगवान् पुरुषोत्तमः ४५ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि
वा नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभं ४६ नमो नमः॥

तान् चित्तस्थः चित्तस्फुरितः ४५ ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयमेवोपायोनान्यइतिसदृष्टांतमाहयथेति धातुजंतांम्रादिसंश्लेषजातंहेम्नोदुर्वर्णं
मालिन्यंतत्रास्थितोवह्निरेवहरतिनतुतोयादिकमित्यर्थः एवंयोगिनामपिविष्णुरेव

यथाहेम्निस्थितोवह्निर्दुर्वर्णंहंतिधातुजं एवमात्मगतोविष्णुर्योगिना
मशुभाशयं ४७ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदान
जप्यैः नात्यंतशुद्धिंलभतेंतरात्मायथाहृदिस्थेभगवत्यनंते ४८ त
स्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवं ध्रियमाणोह्यवहितस्ततो
यातिपरांगतिं ४९

नतुयोगादिकमित्यर्थः ४७ एतदेवविवृणोतिविद्येतिविद्यादेवतोपासना ४८ ४९

आत्मभावंस्वस्वरूपं ५० इदानींकलिस्तौतिद्वाभ्यां कलेर्द्दोषनिधेराजन्निति ५१ तस्य
र्हरिकीर्त्तनादेवकलौभवति ५२ इतिश्रीभागवतेमाहापुराणेद्वाद॰॥ तृतीयोध्यायः॥३॥

म्रियमाणैरभिध्येयोभगवान्परमेश्वरः आत्मभावंनयत्यंगसर्वात्मास
र्वसंश्रयः ५० कलेर्द्दोषनिधेराजन्नस्तिह्येकोमहान्गुणः कीर्त्तनादेवकृ
ष्णस्यमुक्तबंधःपरंव्रजेत् ५१ कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतोमखैः
द्वापरेपरिचर्यायांकलौतद्धरिकीर्त्तनात् ५२ इतिश्रीभागवतेमाहापुराणे
द्वादशस्कंधेतृतीयोध्यायः॥३॥ श्रीगणेशायनमः॥

चतु र्थेतुचतुर्द्धोक्तालयानैमित्तिकादयः तत्रसंसारनिस्तारोहरिकीर्त्तेर्वर्ण्यते १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलिदोषनिवर्त्तकं हरिनामसंकीर्त्तनादिकं स एव च कलौ परमो धर्म इति प्रश्नद्वयस्यो
त्तरमुक्तं यच्चान्यत्पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति तदिदानीं तृतीयस्कंधोक्तकाला
नुवादपूर्वकं निरूपयति कालइति स कालः परमाणुर्वै यो भुंक्ते परमाणुतामित्यादि

श्रीशुक उवाच॥ कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप कथितो युग
मानं च शृणु कल्पलयावपि १ चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते
स कल्पो यत्र मनवश्चतुर्दश विशांपते २

नाकालः कथितः चत्वारि त्रीणि द्वे
चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि चेति युगमानं
च कथितं १ तत्र कल्पमानमाह चतुर्युगेति यत्र चतुर्दश मनवः क्रमेण भवंति २ नम:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रलयस्तु चतुर्विधः नैमित्तिकः प्राकृतिकः आत्यंतिको नित्यश्चेति तत्र नैमित्तिकं प्र
लयं मानसहितमाह तदंतरइति द्वाभ्यां तावान् चतुर्युगसहस्रप्रमाणः सैव ब्राह्मी
रात्रिः ३ नैमित्तिकत्वं दर्शयति यत्र यदा विश्वसृक् श्रीनारायणः विश्वमात्मसात्कृ

तदंते प्रलयस्तावान् ब्राह्मीरात्रीरुदाहृता त्रयो लोका इमे यत्र कल्पंते
प्रलयायहि ३ एष नैमित्तिकः प्रोक्तः प्रलयो विश्वेयत्रेसृक् शेतेनंता
सनो विश्वमात्मसात्कृत्य चात्मभूः ४

त्यस्वास्मिन्नुपसंहृत्य शेते आत्मभूः ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा ब्र
ह्मण एवानंतासनत्वमुक्तं ब्रह्मनिद्रां निमित्तीकृत्य प्रवर्त्तमानो लोकत्रयप्रलयो नैमित्ति २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राकृतिकं प्रलयमाहद्वाभ्यां द्विपरार्द्धेतुब्रह्मण आयुषि· सप्तप्रकृतयः महदहंकार
पंचतन्मात्राणि ५ संघातः महदादिकार्यभूतः प्रकृतीनांतत्कार्यब्रह्मांडस्यचलया

द्विपरार्द्धेव्यतिक्रांतेब्रह्मणःपरमेष्ठिनः तदाप्रकृतयःसप्तकल्पंतेप्रल
यायवै ५ एषप्राकृतिकोराजन्प्रलयोयत्रलीयते आंडकोशस्तुसं
घातोविघातउपसादिते ६ पर्जन्यःशतवर्षाणिभूमोराजन्नवर्षति
तदानिरन्नेह्यन्योन्यंभक्ष्यमाणाःक्षुधार्दिताः ७

तत्प्राकृतिकइत्यर्थः विघातेविघातकारणेउपसादितेसति ६ तदेवाह पर्जन्यइ
त्यादिना बुद्धींद्रियादिरूपेणेत्यतःप्राकृतेनग्रंथेन ७ नमोरामचंद्रायनमोनमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·द्वा·
२७

सामुद्रिकं सर्वरसं रविः पिबते आकर्षति ॥ अनिलवेगोत्थः वायुवेगोद्भूतः अनिल
वेगो वा इति पाठे अनिलेन वेगो यस्य सः वा रविणा रश्मिभिः पीतमुदकं च दहतीस्य

क्षयं यास्यंति शनकैः कालेनोपद्रुताः प्रजाः सामुद्रं दैहिकं भौमं रससं
वर्त्तको रविः रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति ॥ ततः संवर्त्तको
वह्निः संकर्षणमुखोत्थितः दहत्यनिलवेगोत्थः शून्यान् भुविवरान्
थ ९ उपर्यधः समंताच्च शिखाभिर्वह्निसूर्ययोः दह्यमानं विभात्यंडं
दग्धगोमयपिंडवत् १

थः अनिलवेगो वेत्यत्र तु पाठः सुगमः भुविवरान्
पातालादीन् शून्यान् रविणा दैहिकरसाकर्षणात्प्राणिरहितान् ९ शिखाभिर्ज्वाला २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचिदधिकंवर्षाणांशतंसंवर्त्तकः परोवायुर्वातितदारजसावृतं खं धूम्रंभवति ११ र
भसस्वनैः तीव्रगर्जितैः ब्रह्मांडविवरांतरं ब्रह्मांडविवरमध्यगतंविश्वंएकोदकंएका

ततः प्रचंडः पवनोवर्षाणामधिकंशतं परः संवर्त्तकोवातिधूम्रंखंरज
सावृतं ११ ततोमेघकुलान्यंगचित्रवर्णान्यनेकशः शतंवर्षाणिवर्षंति
नदंतिरभसस्वनैः ततएकोदकंविश्वंब्रह्मांडविवरांतरं १२ तदाभूमेर्गं
धगुणंग्रसंत्यापउदप्लवे ग्रस्तगंधातुपृथिवीप्रलयत्वायकल्पते १३

र्णवोदकव्याप्तंभवति १२ उदप्लवेउदकेनाप्लाविनेसातिप्रलयत्वाय अभावाय १३ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१४ १५ भूतादिःतामसोहंकारः गुणैर्वृत्तिभिःसह १६ अव्याकृतंप्रधानं १७

अपांरसमथोतेजस्तालीयंतेथनीरसाः ग्रसतेतेजसोरूपंवायुस्त
द्रहितंतदा १४ लीयतेचानिलेतेजोवायोःखंग्रसतेगुणं सवैविशति
खंराजंस्ततश्चनभसोगुणं १५ शब्दंग्रसतिभूतादिर्नभस्तमनुली
यते तेजसश्चेंद्रियाण्यंगदेवान्वैकारिकोगुणैः १६ महान्ग्रसत्यहं
कारंगुणाःसत्वादयश्चतं ग्रसतेव्याकृतंराजन्गुणान्कालेनचोदि
तं १७

श्रीरामकृष्ण परमात्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यतुलयेनास्तीत्याहनतस्येति कालावयवैरहोरात्रादिभिः गुणाः भावविकाराः परि
णामो विपरिणामः अव्यक्तं अस्तित्वविकारशून्यं नित्यंसर्वदैकरूपंवृद्धिरहितमित्य

नतस्यकालावयवैः परिणामोदयोगुणाः अनाद्यनंतमव्यक्तंनित्यंकारणमव्ययं १
नयत्रवाचोनमनोनसत्वंतमोरजोवामहदादयोमी नप्राणबुद्धींद्रियदेवतावान
संनिवेशःखलुलोककल्पः १९ नस्वप्नजाग्रन्नचतत्सुषुप्तंनखंजलंभूरनिलो
ग्निरर्कः संसुप्तवच्छून्यवदप्रतर्क्यंतन्मूलभूतंपदमामनंति २० र्थः अव्ययंअप
क्षयशून्यं सर्वत्रहेतुःकारणमिति १८ किंचवागादिगोचरस्यसविशेषस्याविकारा
भवंतिइदंतुनतथेत्याहनयत्रेतिद्वाभ्यां लोककल्पः लोकरूपःसन्निवेशोरचनाविशे

स्वप्नजाग्रत्स्वप्नजागरावस्थायुक्तं सुषुप्तवत् इंद्रियाभावात् शून्यसादृश्येहेतुः
अप्रतर्क्येनपुनः शून्यमेवेत्याहतदिति २० उपसंहरतिलयइति शक्तयःसत्वाद
यः २१ आत्यंतिकंलयमाहबुद्धींद्रियेतिद्वादशाभिः आत्यंतिकलयोमोक्षःसचब्र

लयःप्रकृतिकोऽस्येषपुरुषाव्यक्तयोर्यदा शक्तयःसंप्रलीयंतेविवशाःकालविद्रु
ताः २१ बुद्धींद्रियार्थरूपेणज्ञानंभातितदाश्रयं दृश्यत्वाऽव्यतिरेकाभ्यामाद्यंतव

द्वस्तुयत् २२

त्मज्ञानेनसर्वप्रपंचलयात्मकः नचप्रपंचस्यात्मवत्सत्त्वलयः
संभवेत्तीतिज्ञानरूपात्ब्रह्मणः पृथक्भूतस्यतस्यासत्वमुपपादयतिबुद्धिश्चइं
द्रियाणिचअर्थश्चेत्येवंग्राहककरणग्राह्यरूपेणतेषामाश्रयंज्ञानमेवभातिनप्र

२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थकूतत्रहेतुमाह दृश्यत्वाव्यतिरेकाभ्यामिति अतोयदाद्यंतवत्तदवस्तु अत्रैवंप्रयोगः वि
मतंसन्नभवति दृश्यत्वात्कारणाव्यतिरेकात् आद्यंतवत्वाच्चरज्जुसर्पादिवदिति २२ तत्रा
व्यतिरेकंदृष्टांतेनप्रपंचयतिदीपइति दीपचक्षुरूपाणांतेजोविशेषाणांयथातेजसोनव्य

दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेत् एवंधीःखानिमात्राश्चनस्युरन्यतमादृतात्
२३ बुद्धेर्जागरणंस्वप्नः सुषुप्तिरितिचोच्यते मायामात्रमिदंराजन्नानात्वंप्रत्यगात्म
नि २४

तिरेकः तथाधीःकर्त्रीखानिकरणानिमात्राविषयाः ऋतात् ब्रह्मणःपृथक्नस्युः
ब्रह्मकार्यत्वात् नन्वेवंकार्यकारणयोरभेदेकार्यस्तित्वेकारणस्याप्यसत्त्वंप्रसज्येततत्रा
ह अन्यतमादितिकार्यादृश्यंतव्यतिरिक्तात्ब्रह्मणोस्तिव्यतिरेकः प्रपंचस्यतुततोना
स्तिव्यतिरेकइत्यर्थः २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदात्तु बुद्धेरसत्वं तदा हन्त दवस्थानां सुतरामसत्वमित्याशयेनाह बुद्धेरिति ननु वि
श्वतैजसप्राज्ञानां एता अवस्थान बुद्धेरित्याशंक्याह मायामात्रमिति इदं विश्वतै
जसप्राज्ञरूपं २४ आद्यंतवत्वादित्यस्य हेतोरसिद्धिमाशंक्य सावयवत्वेन साध

यथा जलं जराद्यो अम्भिमवंति न भवंति च ब्रह्मणीदं तथा विश्वं मन्ययत्वुदया
प्ययात् २५

यति यैयवं तदाद्यंतवत् घटादि यतीति अवयवीति यत्सावयवं वादित्य
र्थः अत उदयाप्ययात् आद्यंतवत्वाद्विश्वं सन्न भवतीत्यर्थः यद्वा पृथगेवाऽगमा
पायित्वाद्विश्वं मिथ्या ब्रह्म तु तदवधित्वात्सत्यमित्यनेन साध्यते दृष्टांतस्तु पूर्वो
क्त एव यथा जलधराद्यो अम्भीति दृष्टांतस्यागमापायितदवधित्वमात्रेन तु मिथ्यात्व १०
इति २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यतमाद्भत्तादितिप्रतिज्ञातंकारणस्यसत्त्वमुपपादयतिसत्संहीतिअवयवः
कारणंप्रोक्तःवाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतिभिः अ

सत्यंत्ववयवःप्रोक्तःसर्वावयविनामिह विना
र्थेनप्रतीयेरन्पटस्यैवांगतंतवः २६ नमोनमः

त्रयुक्तिमपिदर्शयतिविनेति अंगहेराजन्हियस्मात् अर्थेनअवयविनापृथगे
वाअवयवाःप्रतीयेरन् यथापटस्यावयवास्तंतवःपटात्पृथक्प्रतीयंतेनतद्वदिति

२६

ननुकार्यभावेकारणत्वंब्रह्मणःकुतोघटेतसत्यंतदपिनातीवसत्यमित्याहयदिति ॥
सामान्यंकारणंविशेषःकार्यंतद्रूपेण अन्योन्यापाश्रयत्वात्परापेक्षत्वेननिरूपणास
हत्वादित्यर्थः अतःकारणत्वमवधित्वंव्यापकत्वमित्यादिकमपियत्परापेक्षत्वादाद्यंत

यत्सामान्यविशेषाभ्यामुपलभ्येतसभ्रमः अन्योन्यापाश्रयात्सर्वमाद्यंतव
दवस्तुयत् २७

वत्तत्सर्वमवस्त्वित्यर्थः यद्वातंत्रे वहेत्वंतरमेतत् यदुपलभ्येतसभ्रमःसा
मान्यविशेषविशेषणरूपत्वात्स्वभ्रमवत् अन्योन्यापाश्रयादितीदमपिहेत्वंतरंगुणगु
णिविशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेणपरस्पराधीनसिद्धित्वात्तत्तयाभ्रमस्त्व
मवदिति निगमनंअतःयदाद्यंतवत्तत्सर्वमवस्त्विति २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमनेकैर्हेतुभिः प्रपंचस्यासत्वंप्रतिपादितंतत्रशंका ननुप्रपंचस्यापिप्रकाशमान
त्वादात्मवत्सत्वंकिंनस्यादिति तत्राहविकारइति ख्यायमानःप्रकाशमानोपिविकारः

विकारःख्यायमानोपिप्रत्यगात्मानमंतरा ननिरूप्यो
रूप्यणुरपिस्याच्चेच्चित्समआत्मवत् २८ नमोनमः

प्रपंचःप्रत्यगात्मप्रकाशंविनाऽणुमात्रोपिननिरूप्योस्तितंविनारूप्यःस्याच्चेत्तर्हिसोपि
चित्समःस्यात्चिद्रूपेणात्मनासमःस्वप्रकाशोभवेत्तथाचसतिसोप्यात्मवत्स्यात्तएक
रूपःस्यादित्यर्थः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुतस्त्यत आह नहीति ननु सत्यस्याप्यात्मनो जीवब्रह्मरूपं नानात्वमस्त्येव तत्राह य
घेवं नानात्वं मन्यते तर्हि अविद्वान् कथं तर्हि तयोर्भेदव्यवहारः उपाधिकृत इत्याह
नानात्वमिति तत्र छिद्रयोर्घटाकाशमहाकाशयोरिवेति परिछेदापरिछेदे दृष्टांतः

नहि सत्यस्य नानात्वमविद्वान्यदि मन्यते
नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव ॥ २९ ॥

ज्योतिषोः आकाशजलस्थसूर्ययोरिवेत्युपाधिकृतविकारसदसद्भावे वातयोर्बाह्य
शरीरस्थयोर्वाय्वोरिवेति क्रियाभेदे २९ नमो रमाकांताय गोविंदाय नमो नमः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मणएवप्रपंचव्यवहारालंबनत्वंहष्टांतेनस्पष्टयति यथे तिक्रियाभिः तत्तद्व

नामभेदैः बहुधाकटककुंडलादिरूपेणलौकिकवैदिकैर्वचोभिः जनैरहंकारोपहि

यथाहिरण्यंबहुधासमीयतेनृभिः क्रियाभिर्व्यवहारवर्त्मसु

एवंवचोभिर्भगवानधोक्षजोव्याख्यायतेलौकिकवैदिकैर्ज

नैः ३० यथाघनोर्कप्रभवोर्कदर्शितोह्यर्कांशभूतस्यचचक्षु

षस्तमः एवंत्वहंब्रह्मगुणस्तदीक्षितोब्रह्मांशकस्यात्मन

आत्मबंधनः ३१

तैः ३० नन्वहंकारस्यकथंब्रह्मस्वरूपावरणेनभेदव्यवहारहेतुत्वंतस्यस्यकारणम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तब्रह्मावरकत्वासंभवात् आवरणेवास्वस्यापिप्रकाशाभावादित्याशंक्य
सदृष्टांतमाह यथेति अर्करश्मयएवमेघरूपेणपरिणतावर्षंति अग्नौ
प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततः
प्रजा इत्यादिवचनात् तस्मादर्कप्रभवः अर्केणैवदर्शितः प्रकाशित
श्च तमःस्वरूपभूतार्कदर्शनप्रतिबंधकोभवति अहंअहंकारःब्रह्म
गुणःब्रह्मकार्यभूतःतदीक्षितस्तेनैवप्रकाशितश्चआत्मनोजीवस्यआ
त्मबंधनःब्रह्मस्वरूपदर्शनप्रतिबंधकोभवति ३१ नमोरामायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत एवाहंकारनाशे स्वरूपदर्शनं भवतीति तेनैव दृष्टांतेनाह घनरुति आत्मनउपाधिः
जिज्ञासया विचारेण तर्हि तदा अनुस्मरेत् ब्रह्माहमितिपश्यतीत्यर्थः ३२ सोयमात्स्यंति

घनोयदार्कप्रभवोविदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा यदात्यहं
कारउपाधिरात्मनो जिज्ञासयानश्यति तर्ह्यनुस्मरेत् ३२ यदैवमे
तेन विवेकहेतिना मायामयाहंकरणात्मबंधनं छित्वाच्युतात्मा
नुभवोवतिष्ठते तमाहुरात्यंतिकमंगसंप्लवं ३३

कः प्रलयस्तु उपसंहरति यदैवमिति विवेकहेतिना ज्ञानशस्त्रेण अहंकरणमेवात्मबं
धनं अच्युतं परिपूर्णमात्मानमनुभवतीत्यर्थः ३३ श्रीकृष्णपरमात्मनेनमः ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द्वा॰
३४

नित्यप्रलयमाहनित्यदेति ३४ कुतस्त्यत आह कालेति परिणामिनांनदीप्रवाहप्रदीपज्वा
लादीनांयानत्र्युच्चनीचावस्थास्ताः कालरूपस्त्रोतसोवेगेनाशुह्रियमाणस्यदेहादेः दृश्यमा

नित्यदासर्वभूतानांब्रह्मादीनांपरंतप उत्पत्तिप्रलयावेकेसूक्ष्मज्ञाः
संप्रचक्षते ३४ कालस्त्रोतोजवेनाशुह्रियमाणस्यनित्यदा परिणा
मिनामवस्थास्ताजन्मप्रलयहेतवः ३५ ७

नाः तद्वदेवनित्यदाजन्मप्रलयहेतवोभवंतिदेहः प्रतिक्षणप्रध्वंसीप्रातिक्षणंअव
स्थाभेदस्यविद्यमानत्वात्प्रदीपादिवदित्यनुमानं ३५ नमोभगवतेनारायणायनमः॥ ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदिप्रतिक्षणमवस्थाभवंतितर्हिकिंनदृश्यंतेअतोहेतुरसिद्धइत्याशंक्याह अनाद्यंत
वताकालेनजायमानाअवस्थानैवलक्ष्यंते आकाशेगच्छतांज्योतिषांचंद्रादिनांग

अनाद्यंतवतानेककालेनेश्वरमूर्त्तिना अवस्थानैवदृश्यंतेवियतिज्यो
तिषामिव ३६ नित्योनैमित्तिकश्चैवतथाप्राकृतिकोलयः आत्यंति
कश्चकथितःकालस्यगतिरीदृशी ३७ ७

मनावस्थाविशेषाययानैवलक्ष्यंतेतद्वत् अतोयथालेषांप्रदेशांतरप्राप्त्याप्रतिक्षणं
गत्यवस्थाःकल्प्यंतेतद्वदत्रापिबाल्यतारुण्यादिदर्शनेनमध्यवर्त्तिन्योःवस्थाःकल्प्यंत
इतिनहेतुरसिद्धइत्यर्थः ३६ उपसंहरतिनित्यइति ३७ नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुराणार्थमुपसंहरति एताइति लीलाविषयाः कथाः अजोब्रह्मापि कार्त्स्न्येनाभिधातुं
नेशः ३८ ननु यदि साकल्येनाभिधातुं न शक्यंते तर्हि किं तदभिधानेन तत्राह संसारे
ति विविधं दुःखमेव दवो दावानलस्तेनार्दितस्य पीडितस्य अतन्गर्ति तीर्षोः पुंसः भग

एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्वधाम्नः लीलाकथास्ते कथिताः स
मासतः कार्त्स्न्येन नाजोप्यभिधातुमीशः ३८ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्ना
न्यः प्लवो भगवतः पुरुषोत्तमस्य लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुः
खदवार्दितस्य ३९

वतोयालीलास्तासां कथास्ता सारसस्तन्निषेवणमंतरेणान्यः प्लव
स्तरणसाधनं न भवेत् उपायांतरासंभवात्तत्कथाश्रवणमेव यथाशक्ति निषेव्यमिति
र्थः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रोतुरादरदार्ढ्याय संप्रदायप्रवृत्तिमाह पुराणसंहितामितित्रिभिः ४० सर्वैर्बादरायणः
प्रीतः सन्मह्यं इमां संहितां प्राहेति पूर्वेणान्वयः असौ सूत इति पुरतः स्थितमंगुल्यानि

पुराणसंहितामेतामृषिर्नारायणोव्ययः नारदाय पुरा प्राह कृष्णद्वैपा
यनाय सः ४० सर्वैर्मह्यं महाराज भगवान्बादरायणः इमां भागवतीं
प्रीतः संहितां वेदसंमितां ४१ एतां वक्ष्यत्यसौ सूतऋषिभ्यो नैमिषा
लये दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ४२ इति श्री भागवते म ति
हापुराणे द्वादशस्कंधे चतुर्थोध्यायः ॥४॥

दिश्याह नैमिषालये नैमिषारण्यस्थाने ४१ ४२ इति श्री० टिकायां चतुर्थोध्याय ः॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमेतुसमासेन परब्रह्मोपदेशतः राज्ञस्तक्षकसंदशान्मृत्युभीतिनिवारणं १ एत
त्पुराणंशृण्वन्नभयंप्राप्नोतीत्यभिप्रेत्यपुराणार्थमनुस्मारयाति अयंभावः जगतः
कर्त्ताब्रह्मापियस्यप्रसादजः प्रसादोत्ररजोवृत्तिर्हर्षः ततोजातत्वात्तत्परतंत्रः सर्व

श्रीसूत उवाच॥ अत्रानुवर्ण्यतेभीक्ष्णंविश्वात्माभगवान्हरिः यस्य
प्रसादजोब्रह्मारुद्रःक्रोधसमुद्भवः १

संहर्तारुद्रश्चयस्यक्रोधसंभवोनतुस्वतंत्रः सविश्वस्यात्मानियंताभगवानत्रानुव
र्ण्यते अतएवंभूतंभगवंतंशृण्वतः कुतोन्यस्माद्भयशंकेति १ नमोभगवतेश्री ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वंपुनःकृता-र्थएवेत्यनुस्मारयति त्वंत्विति पशुबुद्धिं अविवेकं यस्मान्नंक्ष्यसि कुतः
स्य आह नजात इति यथा देहः प्रागभूत एवायजातोनंक्ष्यति च नचैवंत्वंपूर्वमभूः नवाय

त्वंतुराजन्मरिष्येतिपशुबुद्धिमिमांजहि नजा
तःप्रागभूतोयदेहवत्त्वंननंक्ष्यसि २ श्रीराम

जातोसि अतोननंक्ष्यसि २ श्रीकृष्णपरमात्मनेनमोनमः रामचंद्रायनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·ह
३७

ननु बीजादंकुरवत्स्वस्मात्पुत्ररूपेणस्वयमेवभवति यथाहश्रुतिः अंगादंगात्सं
भवासिहृदयादधिजायसे आत्मावैपुत्रनामासिसजीवशरदःशतमिति ततः
पुनरंकुराद्बीजमिवपौत्ररूपेणापिस्वयमेवभवति पितापुत्रेणपितृमान्योनियोना

नभविष्यसिभूत्वात्वंपुत्रपौत्रादिरूपवान् बीजांकुरवद्देहादेर्व्यतिरि
क्तोयथाः नरुः ३

वितिश्रुतेः अतस्तेषुनश्यत्सुकथंनन क्ष्यामीतिचेत्तत्राहनभविष्य
सीति भूत्वापुत्रपौत्रादिरूपवान् बीजांकुरवन्नभविष्यासियस्माद्देहादेर्व्यतिरिक्त
स्त्वंयथाः नरुः काष्ठात् देहाद्देहोजायतेनात्मेतिभावः ३ नमोनमः ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य

जन्मादीनां देहधर्मत्वं दृष्टांतेन प्रपंचयति स्वप्नेयथाऽऽत्मनः शिरः छेदं स्वयं पश्यति ए
वं जागरणेपि यस्माद्देहं पंचत्वादिकं पश्यति ततस्तद्देवात्मनः इदं स्वप्नमात्रं वस्तु

स्वप्नेयथाशिरश्छेदं पंचत्वाद्यात्मनः स्वयं यस्मात्पश्यति
देहस्य ततआत्माह्यजोऽमरः ४

तस्मादात्मा अजोमरश्चेत्यर्थः तदुक्तं आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ न भ
वाप्ययवस्तूनामभिज्ञोऽन्यलक्षण इत्यादि ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्देहोपाधिकोयमात्मनोजन्मादिसंसारभ्रमः तस्मादुपाधिनिवृत्तौमुच्यतइति
सदृष्टांतमाहघटइतियथापुराघटोपाधेःपूर्वमिवपुनर्घटेभिन्नेतदंतर्वर्त्यवकाश
आकाशएवस्याद्यथा एवंदेहेमृतेतत्वज्ञानेनलीनेसति ५ ज्ञानेनलयंसंभावयि

घटेभिन्नेयथाकाशआकाशःस्याद्यथापुरा एवंदेहेमृतेजीवोब्रह्मसं
पद्यतेपुनः ५ मनः सृजतिवैदेहान्गुणान्कर्माणिचात्मनः तन्मनः
सृजतेमायाततोजीवस्यसंसृतिः ६

तुंमायाकृतमात्मनोदेहाद्युपाधिसंबंधप्रकारमाहमनइतिमनआत्मनोदेहादी
न्सृजतितच्चमनोमायासृजति ततोमायाद्युपाधिसमुदायात्जीवस्यसंसृतिःन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेवसदृष्टांतमाहसार्द्धेनस्नेहेतिदीपस्यज्योतिषः दीपत्वंज्वालारूपः परिणामः
तत्रतैलस्थानीयंकर्मतदधिष्ठानस्थानीयंमनः वर्त्तिस्थानीयोदेहः अग्निसंयोग

स्नेहाधिष्ठानवर्त्यग्निसंयोगोयावदीयते ततो
दीपस्यदीपत्वमेवंदेहकृतोभवः ७ नमोराम

स्थानीयश्चेतन्याध्यासः दीपस्थानीयः संसारइतियोऽयं देहकृतः देहनिबंधनः
यद्वादेहकृतोमनसोनत्वात्मनः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प आ टी
३

अतोदीपवत्संसारएवनश्यतिनत्वात्माज्योतिर्वदित्याहनेति ननुतत्रप्रतीयमानआ
त्माकुतस्त्यतआहयइतिव्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोःपरःअन्यः अतःस्व
यंज्योतिः परत्वंप्रपंचयति आकाशइवेति आधारोदेहादेः प्रपंचस्य ध्रुवोनिर्वि

॥ रजःसत्वतमोवृत्त्याजायतेथविनश्यति नतत्रात्मास्वयंज्योतिर्यो
व्यक्ताव्यक्तयोःपरः ७ आकाशइवचाधारोध्रुवोनंतोपमस्ततः एवमा
त्मानमात्मस्थमात्मनैवामृशप्रभो ९ बुद्ध्यानुमानगर्भिण्यावासुदेवा
नुचिंतया ९

कारः नास्यतउपमाचयस्यसोन ८ तोपमः ततोविभुः ८ अतस्त्व
मेवंचिंतयेत्याह एवमिति आत्मस्थंआमृश्यविचारय अनुमानगर्भिण्याइदृह
स्यान्वयव्यतिरेकयुक्तया ९

३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दि

एवंचसतित्वांतक्षकोनदहेत्स्याह चोदितइतितत्रहेतवः मृत्यवइतिमृत्युहेतवः १०
विमर्शप्रकारंदर्शयन्‌तक्षकादर्शनंदर्शयतिद्वाभ्यां योहंसब्रह्मैवयद्ब्रह्मतद्दहमे
वेतिसमीक्ष्य तत्राहंब्रह्मेतिभावनयाजीवस्यशोकादिनिवृत्तिः ब्रह्माहमितिभा

चोदितोविप्रवाक्येननत्वांधक्ष्यतितक्षकः मृत्यवोनोपधक्ष्यंतिमृत्यूनांमृत्युमीश्व
रं १० अहंब्रह्मपरंधामब्रह्माहंपरमंपदं एवंसमीक्षचात्मानमात्मन्याधायनिष्क
ले ११ दशंतंतक्षकंपादेलेलिहानंविषाननैः नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः

वनयाचब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीतिव्यतिहारोदर्शितः निष्कलेनिरुपाधौआत्म
निब्रह्मणि ११ विषयुक्तैराननैर्दशंतंतक्षकंलेलिहानंसर्पयद्वालेलिहानंजिह्वाभिरो
ष्ठप्रांतंसनिष्येषमास्वादयंतं आत्मनः पृथक्‌ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरेस्त्रैष्ठं आत्मात्वंयत्त्पृष्टवानृतदेत तेकथितं शिष्यस्यकृतार्थतापरीक्षणायपृछ
तिकिमिति १३ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेपंचमोध्यायः ॥५॥ षष्ठे
परीक्षित्तोमोक्षः सर्पहोमादितत्सुतात् वेदशाखा विभागोक्तोत्रिवेदीव्यासवर्ण

एतत्तेकथितंतातयथात्मापृष्टवान्नृप हरेर्विश्वात्मनश्चेष्टां किंभूयः श्रोतुमिछ
सि ॥१३॥ इतिश्रीभागवतेद्वादशस्त्रोप्रलयप्रमाणलक्षणंपंचमः ५ ॥सूत उ०॥ एतान्नि
शम्यमुनिनाभिहितंपरीक्षिद्व्यासात्मजेन निखिलात्मदृशासमेन तत्पादपद्म
मुपसृत्यनतेनमूर्ध्नाबद्धांजलिस्तमिदमाहसविष्णुरातः १ न एतत्पुराणंनिश
म्यनिखिलात्माहरिस्त्वंपश्यतिनिखिलंवात्मनिपश्यतीतितथातेन अतः समेन
नतेनभवननेनमूर्ध्नातत्पादपद्ममुपसृत्यपादौशिरसिनिधायेत्यर्थः १

CC-0, In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धः कृतार्थोस्मि यतः अनुगृहीतोस्मि अनुग्रहमेवाह यत् यस्मात् श्रावितः चश
ब्दात् प्राप्तिसाधनंच २ करुणात्मतामभिनंदति द्वाभ्यां नात्यद्भुतमिति २ अश्रौ

राजोवाच॥ सिद्धोस्म्यनुगृहीतोस्मि भवता करुणात्मना श्रावितोय
च्चमे साक्षादनादिनिधनो हरिः २ नात्यद्भुतमहं मन्ये महतामच्यु
तात्मनां अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ३ पुराणसंहिता
मेतामश्रौष्म भवतो वयं यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते

६

षमश्रुतवंतः भवतः सकाशात् ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धोस्मीत्युक्तं तदेवाविःकरोति भगवन्निति यतः त्वया दर्शितं ब्रह्म प्रविष्टः कथंभू
तं अभयं यतो निर्वाणं कैवल्यरूपं ५ किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्रासिद्धोहंन

भगवंस्तस्करादिभ्यो मृत्युभ्यो न बिभेम्यहं प्रविष्टो ब्रह्म निर्वाणमभयं
दर्शितं त्वया ५ अनुजानीहि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे मुक्तका
माशयं चेतः प्रवेश्य विसृजाम्यसून् ६

६ किंचिच्छ्रोतुमिच्छामि केवलमनुज्ञां दे
हीत्याह अनुजानीहीति वाचमित्युपलक्षणं सर्वेंद्रियाणां वाचं नियम्य किं करिष्य
सि न दाह मुक्ताः कामाशयास्तद्वासना येन तच्चेतः अधोक्षजे प्रवेश्य असून् विसृजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकिंप्राणत्यागेनकिंचित्कालंज्ञाननिष्ठोभवेतिचेत्तत्राह अज्ञानंचेति चकारात्तत्
संस्काराश्चनश्चतत्कल्पयैवेत्याहभवतेति ७ ८ आत्मनाबुध्याआत्मानंमनःआत्म

॥ अज्ञानंचनिरस्तंमेज्ञानविज्ञाननिष्ठया भवतादर्शितंक्षेमंपरंभग
॥वतःपदं ७ ॥सूतउ० ॥ इत्युक्तस्तमनुज्ञाप्यभगवान्बादरायणिः जगा
माभिक्षुभिःसाकंनरदेवेनपूजितः ८ परीक्षिदपिराजर्षिरात्मन्यात्मा
नमात्मना समाधायपरंदध्यावस्पंदासुर्यथातरुः

निप्रत्यकूप्रकाशेस
माधायपरमात्मानंदध्यौ अस्पंदासुःलीनप्राणःतथातरुःस्थाणुः ९ नमोनारायण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेवविशिनष्टिप्राक्कूलेप्रागग्रेबर्हिषिदर्भे १० तदेवंब्रह्मभूतेतस्मिन्तक्षकागमना
दिकंपिष्टपेषणमिवाभवदितिदर्शयातितक्षकइतित्रिभिः हेविप्राः ११ तंविषचिकि

प्राक्कूलेबर्हिष्यासीनोगंगाकूलउदङ्मुखः ब्रह्मभूतोमहायोगीनिःसंग
श्छिन्नसंशयः १० तक्षकःप्रहितोविप्राःक्रुद्धेनद्विजसूनुना हंतुकामोनृ
पंगच्छन्ददर्शपथिकश्यपं ११ तंतर्पयित्वाद्रविणैर्निवर्त्यविषहारिणं द्वि
जरूपप्रतिच्छन्नःकामरूपोदशन्नृपं १२ नमोरामाय

त्सयापरीक्षिद्रक्षणेनद्रव्यार्जनायागच्छंतंतत्रस्थालीढवटवृक्षस्यभस्मीभूतस्यपुन
रंकुरादिक्रमेणोत्थापनाद्विषहारिणंतदपेक्षितद्रविणैःसंतर्प्यततोनिवर्त्यद्विजरूपेण
तिरोहितःसन्नदशत् १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्वपुत्रत्वत्त्वमिवजातमित्याह ब्रह्मघ्नतस्येति १३ तत्रक्षणंसर्वेषांदुःखंचततः॥

परमुत्सवंचाहद्वाभ्यांहाहाकारइति १४ १५ प्रासंगिकमाहजनमेजयइत्यादिसर्पा

ब्रह्मघ्नतस्यराजर्षेर्देहोहिगरलाग्निना बभूवभस्मसात्सद्यःपश्यतां

सर्वदेहिनां १३ हाहाकारोमहानासीत्भुविखेदिक्षुसर्वतः विस्मिता

ह्यभवन्सर्वेदेवासुरनरादयः १४ देवदुंदुभयोनेदुर्गंधर्वाप्सरसोजगुः

ववृषुःपुष्पवर्षाणिविबुधाःसाधुवादिनः १५ जनमेजयःस्वपितरंश्रु

त्वातक्षकभक्षितं यथाजुहावसंक्रुद्धोनागान्सत्रेसहद्विजैः १६

भिचारसत्रेद्विजैःसहवर्त्तमानःयथावदाजुहावेतिवा सर्वसर्पवाहनेकारणमाहसंक्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ सु॰
४२

१७ १८ कस्मात्तक्षकोनदह्येतेत्युक्ताः संतोद्विजाऊचुस्त मितितेनइंद्रेणअसौसर्पः

सर्पसत्रेसमिद्धाग्नौदह्यमानान्महोरगान् दृष्ट्वेंद्रंभयसंविग्नस्तक्षकःशरणं
ययौ १७ अपश्यंस्तक्षकंतत्रराजापारिक्षितोद्विजान् उवाचतक्षकःक
स्मान्नदह्येतोरगाधमः १८ तंगोपायतिराजेंद्रशक्रःशरणमागतं तेन
संस्तंभितःसर्पस्तस्मान्नाग्नौपतत्यसौ १९ पारिक्षितइतिश्रुत्वाप्राह
द्विजउदारधीः सहेंद्रस्तक्षकोविप्रानाग्नौकिमितिपात्यते २० नमः

१९ ऋत्विजःप्रतिप्राहसहेंद्रःसहितः किमितिनपात्यते २० रामाचंद्रायनमोनमः ४२

इंद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्ब्राह्मणोवचःश्रुत्वाआजुहुवुः सात्क्षेपमाह्वानंदर्शयति तक्षकेतिइहागनाशुपतस्व

तच्छ्रुत्वाजुहुवुर्विप्राःसहेंद्रंतक्षकंमखे तक्षकाशुपतस्वेहसहेंद्रेणमरुत्व
ता २१ इतिब्रह्मोदितात्क्षेपैःस्थानादिंद्रःप्रचालितः बभूवसंभ्रांतमतिः
सविमानःसतक्षकः २२ तपंतंतंविमानेनसहतक्षकमंबरात् विलो
क्यांगिरसःप्राहराजानंतंबृहस्पतिः २३ नैषत्वयामनुष्येंद्रवधमर्हति
सर्पराट् अनेनपीतममृतमथवाअजरामरः २४ ह २२ २४

मरुत्वतामरुद्गणवताइंद्रेण
सह २१ ब्राह्मणोक्तैराक्षेपैःपरुषवाक्यैः सतक्षकः २२ अंगिरसःपुत्रोबृहस्पतिःप्राह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवतुनामाजरामरः तथापिपित्रमारकंधस्यामीतिचेत्तत्राह जीवितमिति गतिःप
रलोकः अतोदुर्मरणनिमित्तापितुर्दुर्गतिरनेनकृतेत्यपिनशंकनीयमित्यर्थः २५

जीवितंमरणंजंतोर्गतिःस्वेनैवकर्मणा राजंस्ततोन्योनास्त्यस्यप्रदाता
सुखदुःखयोः २५ सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप पंच
त्वमृच्छतेजंतुर्भुंक्तेआरब्धकर्मतत् २६

कथमन्यःदुःखसुखप्रदातानास्ती
सर्पादीनामुपलभ्यमानत्वादितिचेत्तत्राह सर्पादिनाजंतुःपंचत्वंमृत्युंऋच्छतिप्रा राम
प्नोतीतियत्तत्तदारब्धंकर्मैवभुंक्तेस्वकर्मप्रयुक्ताएवसर्पादयोनस्वतंत्राइतिभावः
२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्थीयेतसमाप्यतां आभिचारकंहिंसाफलं दिष्टंप्राचीनंकर्मअतः सर्पादष्टप्र
युक्तस्यतवाप्ययंनापराधइतिभावः २७ वाक्पतिंबृहस्पतिं २८ ननुकथंविदुषा

तस्मात्सत्रमिदंराजन्संस्थीयेताभिचारकं सर्पाअनागसोदग्धाजनैर्दिष्टं
हिभुज्यते २७ इत्युक्तःसतथेत्याहमहर्षेर्मानयन्वचः सर्पसत्रादुपरतः
पूजयामासवाक्पतिं २८ सैषाविष्णोर्महामायाऽबाधयाऽलक्षणायया मु
ह्यंत्यस्यैवात्मभूताभूतेषुगुणवृत्तिभिः २९ नमोनारायणायेति॥

मय्येवंसंमोहः यतोब्रह्मकोपात्परिक्षितोमृत्युः जनमेजयकोपात्सर्पाणामित्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दित्त्राह सैषेति तस्यामहत्वं दर्शयति अलक्षणानलक्ष्यतइत्यलक्ष
णा अप्रतर्क्येत्यर्थः कासावित्यतआह ययास्यविष्णोरेवआत्मभूता
आत्मांशभूताः प्राणिनः गुणरत्तिभिः क्रोधादिभिः भूतेषुदेहेषुमुत्यं
तिबाध्यबाधकतांव्रजंतीत्यर्थः ननुश्रवणादिनाबाधितयाकुतोमो
हःस्यात्तत्राह अबाधयाबाधितुमशक्यया २९ नमोभगवतेरामाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंतर्हिमायातत्कार्यनिवृत्तिरित्याशंक्यश्रीविष्णुस्वरूपनिरूपणपूर्वकंतद्भजना
त्सर्वानर्थनिवृत्तिरितिशास्त्रार्थमुपसंहरतिनयत्रेतिपंचभिः दंभीतियामायाकप
टवायंपुमानित्येवंभ्रतायांबुद्धावसकृदुल्लिख्यमानायामायेत्यर्थः साआत्मवादेक्रिय

नयत्रदंभीत्यभयाविराजितामायात्मवादेऽसकृदात्मवादिभिः नय
द्विवादोविविधस्तदाश्रयोमनश्चसंकल्पविकल्पवृत्तियत् ३० राम

माणेआत्मवादिभिर्यत्राभयानविराजितानप्रकाशिताकिंतुभीतेवस्वकार्यंमो
हादिकमकुर्वतीकथंचित्वर्ततइतिप्रतिपादितेत्यर्थः तदुक्तं तस्मैनमोभगवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासुदेवायधीमहि यन्मायया दुर्जययामांब्रुवंतिजगद्गुरुं विलज्यमा
नयायस्यस्थातुमीक्षापथेमुया विमोहिताविकत्थंतेममाहमितिदु
र्धियइति किंचयद्यास्मिन्नूनदाश्रयोमायाश्रयोविविधोवादोपिना
स्तिविशेषविषयत्वाद्विवादानांतस्यचविशेषाःनीलत्वादितिभावः
संकल्पविकल्पावृत्तयोयस्यतन्मनोपियत्रनास्तिसंकल्पविकल्प
नामपिविशेषविषयत्वात् ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचसज्यंकर्मस्रजताकारकवर्गेणसहउभयोःसज्यस्त्रष्टोः परंसाध्यंश्रेयःफलम
पिअताभ्यांत्रिभिः सज्यस्त्रष्टफलैरन्वितोजीवस्यअहंकारात्मकोयत्रनास्ति अतए

नयत्रसज्यंस्रजतोभयोः परंश्रेयश्वजीवास्त्रिभिरान्वितस्त्वहं तदे
तदुत्सादितबाध्यबाधकंनिषिध्यचोर्मीन्विरमेत्स्वयंमुनिः ३१

वउत्सादितौनिरस्तोबाध्यबाधकोयास्मिन्तदेतत्स्वयंआत्मस्वरूपमित्यर्थःतत
स्मात्ऊर्मीन्अहंकारादीन्निषिध्यविरमेत् विशेषेणक्रीडेदित्यर्थः ३१ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतस्तद्वैष्णवंपदमामनंतीत्याहपरमितियदेतत्तदेवपरंवैष्णवंपदंस्वरूपमामनंति
केअततआत्मव्यतिरिक्तंउत्सिसृक्षवः त्यक्तुमिच्छवः यतः अनन्यसौहृदाः नास्ति
अन्यस्मिन्सौहृदंयेषांते कुतः दौरात्म्यंदेहाद्यहंभावंविसृज्य देहेअहंकाराभावाद

परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः विसृज्यदौ
रात्म्यमनन्यसौहृदाहृदोपगृह्यावसितंसमाहितैः ३६ श्रीकृष्ण

न्यत्रसौहृदंनास्ती अतस्त्यक्तुमिच्छवइत्यर्थः कथंनेतिनेतीत्येवं अतद्विहृदनुभवम
पिप्रमाणयंति हृदोपगृह्यध्यानादिनाततःसमाहितैरवसितंनिश्चितं यद्वाअवसि
तंअवबद्धं आत्मतयागृहीतमित्यर्थः ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंप्राप्तावधिकारिणोदर्शयतितएतदितिदेहजमहमितिगेहजंममेति ३३ प्राप्त्यु
पायमाह अतिवादानिति ३४ शास्त्रसमाप्तौगुरुंप्रणमतिनमइति कृष्णायव्या

तएतदधिगछंतिविष्णोर्यत्परमंपदं अहंममेतिदौर्जन्यंनयेषांदे
हगेहजं ३३ अतिवादांस्तितिक्षेतनावमन्येतकंचन नचेमंदेह
माश्रित्यवैरंकुर्वीतकेनचित् ३४ नमोभगवतेतस्मैकृष्णायाकुं
ठमेधसे यत्पदांबुरुहध्यानात्संहितामध्यगामिमां ३५

साय अध्यगांअधिगतवानस्मि ३५ नमोभगवतेवासुदेवायनमोनमः ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमांसंहितामध्यगामिस्युक्तंतत्रपुराणसंहिताविभागंविशेषतोबुभुत्सुर्वेदविभा
गमपिप्रसंगात्पृच्छतिपैलादिभिरितिहेसौम्य ३६ तत्रप्रथमंवेदाविर्भावप्र

शौनक उवाच पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः वेदा
श्चकतिधाव्यस्ताएतत्सौम्याभिधेहिनः ३६ सूत उवाच समा
हितात्मनोब्रह्मन्ब्रह्मणःपरमेष्ठिनः हृद्याकाशादभून्नादोवृ
त्तिरोधाद्विभाव्यते ३७

कारमाह समाहितात्मनस्स्रष्टुः ब्रह्मणोहृदियआकाशस्तस्मान्नादोऽभूत्तयः
कर्णपुटपिधानेश्रोत्रवृत्तिनिरोधादस्मदादिष्वपिविभाव्यतेवितर्क्यते ३७ नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंगात्तादोपासकानांमोक्षफलमाह यस्यनादस्योपासनया आत्मनोमलंधू
त्वाअपोह्य कथंभूतंमलंतमाह द्रव्यमधिभूतं क्रियाअध्यात्मंकारकमधिदैवं
एवंत्रिधाभूताआख्यायस्येतितं ३८ त्रिवृत्त्रिमात्रः कंठोष्टादिभिः उच्चार्यमा

यदुपासनयाब्रह्मन्योगिनोमलमात्मनः द्रव्यक्रियाकारकाख्यंधू
त्वायात्यपुनर्भवं ३८ ततोभूत्त्रिवृदोंकारोयोव्यक्तःप्रभवःस्वराट् य
त्तल्लिंगंभगवतोब्रह्मणःपरमात्मनः ३९

णस्योंकारस्याक्षरसमाम्नायांत
र्भावात्सूक्ष्मतयातंविशिनष्टि अव्यक्तःप्रभवोयस्यसः तदेवाहस्वराट्स्वतएव
हृदिप्रकाशमानः तमैकार्येणलक्षयति यत्तदितिनपुंसकत्वंलिंगशब्दविशेषण
त्वात् लिंगंगमकं ३९

व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोसौपरमात्मातमाह श्रृणोतीति ई इमंस्फोटमव्यक्तमोंकारं ननुजीवएवतंश्रृणोतु
नेत्याहसुप्तस्यश्रोत्रेकर्णपिधानादिना आवृत्तिकेपिश्रोत्रेसतिजीवस्तुकरणाधीनज्ञा
नत्वात् नतदाश्रोतातदुपलब्धिस्तुतस्यपरमात्मद्वारिकैवेतिभावः ईश्वरस्तुनैवंय
तःशून्यहृत्कुशून्ये पीन्द्रियवर्गेहृत्कुज्ञानंयस्य तथाहिसुप्तोयदाशब्दंश्रुत्वाप्रबुध्य
श्रृणोतियइमंस्फोटंसुप्तस्यश्रोत्रेचशून्यहृत्कु येनवागभिव्यज्यतेयस्यव्य
क्तिराकाशआत्मनः ४९
तेननतदाजीवःश्रोताली नेन्द्रियत्वात् अतोयस्तदाशब्दं
श्रुत्वाजीवंप्रबोधयतिसयथापरमात्मैवतद्वत् कोसावोंकारः तंविशिनष्टिसार्द्धे
न येनवाकृवृह ती व्यज्यते यस्यचतद्दयाकाशे आत्मनःसकाशाद्व्यक्तिःअभिव्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच स्वधाम्नः स्वस्याश्रयः कारणं यत् ब्रह्म तस्य किंच परमात्मांशभूतं समस्त
देवतावाचकोपीत्याशयेनाह स इति सर्वमंत्राणामुपनिषद्रहस्यं सूक्ष्मं रूपमि
त्यर्थः तत्र हेतुः वेदानां बीजं कारणं बीजत्वेप्यविकारितामाह सनातनं सदैक

स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः स सर्वमंत्रोपनिषद्वेदबी
जं सनातनं ४१ तस्य ह्यासंस्त्रयो वर्णा अकाराद्यास्त्रगूद्वह धार्यंते ये
स्त्रयो भावा गुणनामार्थवृत्तयः ४२

रूपं तस्य ब्रह्मरूपत्वात् ४१ इदानीं त
तः सर्वप्रपंचोत्पत्तिप्रकारमाह तस्य हीति त्रयस्त्रिंसंख्यायुक्ताः भावाः यैरकारो
कारमकारैः धार्यंते तत्कारणत्वात् तानेवाह गुणाः सत्वादयः नामानि ऋग्यजुः
सामानि अर्थाः भूर्भुवःस्वर्लोकाः वृत्तयो जाग्रदाद्याः ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·टी
५०

ततस्तेभ्योवर्णेभ्यः अक्षराणांसमाम्नायंसमाहारं तमेवाह अंतस्थाः यरलवाः
ऊष्माणः शषसहाः स्वराः अकाराद्याः स्पर्शाः कादयः ह्रस्वदीर्घाश्चआदिशब्दाज्जि

ततोक्षरसमाम्नायमसृजद्भगवानजः अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घा
दिलक्षणं ४३ तेनासौचतुरोवेदांश्चतुर्भिर्वदनैर्विभुः सव्याहृतिका
न्सोंकारांश्चातुर्होत्रविवक्षया ४४

ह्वामूलीयादयः तएवलक्षणंस्वरूप
यस्यतं ४३ विभुश्चतुर्मुखरूपोभगवान्असृजदितिपूर्वस्यैवानुषंगः चातुर्होत्र
विवक्षयाचत्वारोहोत्रोपलक्षिताऋत्विजश्चतुर्होतारः तैरनुष्ठेयंहोत्राध्वर्यवादिकं ५०
कर्मचातुर्होत्रंतद्विवक्षया ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रान्मरीच्यादीन् तान्वेदान्ब्रह्मकोविदान्वेदोच्चारणादिनिपुणान् ४३ एवं
चतुर्युगेषुप्राप्ताः द्वापरमादिर्यस्यतदंत्यांशलक्षणस्यकालस्यतस्मिन् द्वापरां

पुत्रानध्यापयत्तांस्तुब्रह्मर्षीन्ब्रह्मकोविदान् तेतुधर्मोपदेष्टारःस्व
पुत्रेभ्यःसमादिशन् ४४ तेपरंपरयाप्राप्तास्तस्तच्छिष्यैर्धृतव्रतैः च
तुर्युगेष्वथव्यस्ताद्वापरादौमहर्षिभिः ४५ क्षीणायुषःक्षीणसत्वा
न्दुर्मेधान्वीक्ष्यकालतः वेदान्ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतनो

तेवेदविभागप्रसिद्धेः शंतनुसमकालव्यासावतारप्रसिद्धेश्च व्यस्ताविभक्ताः
४६ तत्रहेतुः क्षीणायुषोजनान् तर्हिपुरुषबुद्धिप्रभवत्वादनादरणीयंस्यादि
त्याशंक्याह हृदिस्थेति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसामान्यतोवेदविभागक्रममुक्त्वावैवस्वतमन्वंतरेविशेषतोनिरूपयितुमाह अ
स्मिन्नपीति ४८ अंशोमायानस्यांशः सतंतस्यकलया अंशोवतीर्णः सन् ४९

अस्मिन्नप्यंतरेब्रह्मन्भगवान्लोकभावनः ब्रह्मेशाद्यैर्लोकपालैर्या
चितोधर्मगुप्तये ४८ पराशरात्सत्यवत्यामंशांशकलयाविभुः अव
तीर्णोमहाभागवेदंचक्रेचतुर्विधं ४९ ऋगथर्वयजुःसाम्नांराशीनुद्धृ
त्यवर्गशः चतस्रःसंहिताश्चक्रेमंत्रैर्मणिगणाइव ५०

चातुर्विध्यमेवाह
ऋगितिऋगादिमंत्राणांराशीन्वर्गशः ततत्प्रकरणभेदैः उद्धृत्ययथाःनेकविध
मणिराशेःमणिगणाःपद्मरागादयोविविच्यउद्ध्रियंतेतद्वदुद्धृत्यतेमंत्रैश्चतस्रःऋ ५१
गादिसंहिताश्चक्रे ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासांसंहितानांमध्येएकैकां ५१ ऋक्समुदायरूपत्वात्बह्वृचाख्यां नितरांप्र
श्लेणगद्यमानत्वान्निगदाख्यं ५२ साम्नांसंबंधिनींछंदःसुगीयमानत्वात्छंदो

तासांसचतुरःशिष्यानुपहूयमहामतिः एकैकांसंहितांब्रह्मन्नेकैक
स्मैददौविभुः ५१ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह वैशंपा
यनसंज्ञायनिगदाख्यंयजुर्गणं ५२ साम्नांजैमिनयेप्राहतथाछंदो
गसंहितां अथर्वांगिरसींनामस्वशिष्यायसुमंतवे ५३ पैलःस्वांसं
हितामाहचेंद्रप्रमितयेमुनिः बाष्कलायचसोप्याहशिष्येभ्यःसंहि

गाख्यांसंहितां ५३ तत्रऋग्वेदेशाखाविभागमाहपैलइति स्वसंहितांद्वेधाविभज्य
इंद्रप्रमितयेबाष्कलायचउचे ५४

बाष्कलोपिस्वसंहितांचतुर्धाव्यवस्य बोध्यादिभ्यश्चतुर्भ्यः शिष्येभ्यः आहहेभार्ग
व ५५ इंद्रप्रमितिरपिस्वांसंहितांस्वसुतंमांडूकेयमध्यापयामास तस्यमांडूके

॥ चतुर्द्धाव्यस्यबोध्यायापयाज्ञवल्क्यायभार्गव पाराशरायाग्निमित्रेइंद्र
प्रमितिरात्मवान् ५५ अध्यापयत्संहितांस्वांमांडूकेयमृषिंकविं तस्यशि
ष्योदेवमित्रः सौभर्यादिभ्यऊचिवान् ५६ शाकल्यस्तत्सुतःस्वांतुपंचधा
व्यस्यसंहितां वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ५७

यस्यशिष्योदेवमित्रः ५६ तत्सुतः मांडूकेयसुतः शाकल्योवात्स्यादिषुपंचस्वधात
तानध्यापयामासेत्यर्थः ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छिष्यः शाकल्यशिष्यः स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरू
पं निरुक्तं च कृत्वा बलाकादिकेभ्यश्चतुर्भ्यो ददौ ५८ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य

जातूकर्ण्यस्य तच्छिष्यः स निरुक्तां स्वसंहितां बलाकपैजवैतालविर
जेभ्यो ददौ मुनिः ५८ बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहि
तां चक्रे बालायनिर्भज्यकासारश्चैवतां दधुः ५९ बह्वृचाः संहि
ता ह्येताः एभिर्ब्रह्मर्षिभिर्धृताः श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्र

पुत्रः प्रतिशाखाभ्यः उक्तसर्वशाखाभ्यः बालायन्यादयस्तामादधुः अधीतवंतः
५९ ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह बह्वृचा इति एतच्छंदसां एतेषां छंद

र ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपायनशिष्या इत्यादिना चरकना
मनिरुक्तिमाह यत् यस्माद्धेतोः गुरोरिति ब्रह्महत्यारूपमंहः क्षपयतीति तेन यान

वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् यच्चेरुर्ब्रह्महत्यांहः क्षपणं
स्वगुरोर्व्रतं ६१ याज्ञवल्क्यस्तु तच्छिष्य आहाहो भगवन् कियत् च
रितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरं ६२

स्वगुरोरनुष्ठेयं व्रतं तच्चरणाच्चरका इत्यर्थः ६१ तच्छिष्यः वैशंपायनशिष्यः
अल्पसाराणामेतेषां चरितेन कियत् सुदुश्चरमहं चरिष्यामीति ६२ नमोनारा॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्राणामवमंत्ताअवज्ञाकर्त्तामत्तोधीतमाशुत्यजेति ६३ देवरातसुतोयाज्ञवल्क्यः
६४ छर्दितस्यादानंविप्ररूपेणानुचितमितितित्तिराः पक्षिविशेषाभूत्वाआददुःतत

इत्युक्तोगुरुरप्याहकुपितोयात्यलंत्वया विप्रावमंत्राशिष्येणमदधी
तंत्यजाश्विति ६३ देवरातसुतःसोपिछर्दित्वायजुषांगणं ततोगतो
थमुनयोददृशुस्तान्यजुर्गणान्‌ ६४ यजूंषितित्तिराभूत्वातल्लोलुपत
याददुः तैत्तिरीयाइतियजुःशाखाआसन्सुपेशलाः ६५ श्रीराम

श्चतैत्तिरीयाइतिप्रसिद्धाःसुपेशलाःअतिरम्याःबहुवचनमवांतरभेदविवक्षया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काण्वमाध्यंदिनादिशाखाप्रसंगमाह याज्ञवल्क्यइत्यादिना गुरोर्वैशंपायनस्य
व्यासेनविभज्यानुक्तत्वादविद्यमानानिअधिअधिकानिगवेषयन्रूपस्येसम्य
ग्मीरेतिसूर्यस्य ६६

याज्ञवल्क्यस्ततोब्रह्मन् छंदांस्यधिगवेषयन्
गुरोरविद्यमानानिसूपस्थेर्कमीश्वरं ६६ ७

कुतुष्टावर्रश्वरं वेदानांरसाःवछिन्नं तथाचश्रुतिः ऋग्भिः पूर्वाण्हेदिविदेवर्रय
तेयजुर्वेदेनतिष्ठतिमध्येअन्हः सामवेदेनास्तसमयेमहीयतेवेदैरशून्यास्त्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमोभगवतेतुभ्यंआदित्याययोभवानेकएवेमांलोयाँत्रामनुवहतीत्यग्नयः
तदेवदर्शयति अखिलजगतामात्मस्वरूपेणांतर्हृदयेषु कालरूपेण चबहि
रपिवर्त्तमानइति अखिलजगतामित्यस्यप्रपंचः चतुर्विधेति हृदयांतर्व

याइ वल्कस्य ॥ ॐ नमोभगवतेआदित्यायाखिलजगतामात्मस्वरूपेणकाल
स्वरूपेणचचतुर्विधभूतनिकायानांब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषुबहि
रपिचाकाशइवोपाधिनाव्यवधीयमानोभगवानेकएवक्षणलवनिमेषा
वयवोपचितसंवत्सरगणेनापांदानविसर्गाभ्यामिमांलोकयात्रामनुवहति

त्तित्वपिजीववत्तेनोपाधिनाऽव्यवधीयमानः अनाछाद्यमानः कालस्वरूपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णत्वेसस्यप्रपंचः क्षणेति क्षणलवादयोयेअवयवास्तैरुपचिताः संवत्सरास्तेषां
गणेनप्रत्यहमपादानंशोषणंविसर्गोवृष्टिस्ताभ्यां अनेनगायत्रीप्रथमपादो
क्तवरेण्यतादर्शिता ६७ द्वितीयपादार्थानुवर्णनेनस्तौतियदुहेति हेविबुधर्ष
यदुहवाववविबुधर्षभसवितरदस्तपत्यनुसवनमहरहरहराम्नायविधिनोपति
ष्ठमानानामखिलदुरितवृजिनबीजावभर्जनभगवतःसमभिधीमहितपनमं

श्लो॰ ६८

महेसवितःयदप्यदोभगवतस्त्वमंडलंपतेतितत्समभिधीमहीसम्य
गाभिमुखेनध्यायेमपुनस्तस्यैवसंबोधनंप्रत्यहंत्रिषवणंवैदिककर्ममार्गेणस्तु
वतांभक्तानांयान्यखिलानिदुरितानितत्फलानिवृजिनानिदुःखानितेषांबीजमज्ञा ५५
नंचतेषामवभर्जनविनाशकहेतपनेति ६८

तृतीयपादेनस्तोतियएहेति योभगवान् स्थावरजंगमसमूहानांस्वाश्रयाणांजीवानां
मनइंद्रियप्राणगणान् अनात्मनोजडान्स्वयमात्मैवांतर्यामीसन्प्रचोदयति ६९

यएहवावस्थिरचरनिकराणांनिजनिकेतनानांमनइंद्रियासुगणाननात्मनः स्वय
मात्मांतर्यामीप्रचोदयति ६९ यएवंलोकमतिकरालवदनांधकारसंज्ञाजगरग्रह
गिलितंमृतकमिवविचेतनमवलोक्यानुकंपयापरमकारुणिकईक्षयैवोत्थाप्याहर
हरनुसवनंश्रेयसिस्वधर्माख्यात्मावस्थानेप्रवर्तयत्यवनिपतिरिवासाधूनांभय
मुदीरयन्नटति ७०

तृतीयपादमेवमंडलस्थपरतयाव्याचक्षाणःस्तौतियएवेति य
एकएवभगवान्अतिकरालवदनोयोंधकारसंज्ञोऽजगरग्रहस्तेनमिलितंअतएवमृतकमिव
वि

चेतनं स्वधर्मो ख्यंयदात्मावस्थानंप्रसकृप्रवणत्वंतदेवश्रेयस्तस्मिन्प्रवर्तयति किं
चयोभवानवनिपतिरिवाटतिगछति ७० आशापालैरिंद्रादिभिः कमलकोशयुक्तै

परितआशापालैस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः ७१
अथहभगवंस्तवचरणनलिनयुगलंत्रिभुवनगुरुभिर्वंदितमया
तयामयजुःकाममुपसरामीति ७२॥सूत३०॥एवंस्तुतःसभगवान्
वाजिरूपधरोरविः यजूंष्ययातयामानिमुनयेदात्प्रसादितः ७३

स्ततुल्यैरंजलिभिः उपहृतार्हणःस्तत्रार्यः ७१ यतएवंभूतस्त्वंअथअतःहस्फुटंअ
यातयामानिअन्यैर्यथावदविज्ञातानियानियजूंषितत्कामोहंउपसरामिभजामि ७२ ५६
एवंस्तुतः प्रसादितश्च ७३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचदशशाखाः याः शतैरपरिमितैर्यजुर्भिरकरोत् संनैरितिपादेसएवार्थः सए
षयाज्ञवल्क्यः तैर्यजुर्भिरकरोदिति जगृहुः अधीतवंतः रविणाअश्वरूपेणवाजे

यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः जगृहुर्वाजसन्यस्ताःका
ण्वमाध्यंदिनादयः ७४ जैमिनेः सामगस्यासीत्सुमंतुस्तनयोमु
निः सुत्वांस्तुतत्सुतस्ताभ्यामेकैकांप्राहसंहितां ७५ राम

भ्यः केसरेभ्यः वाजेनवेगेनवासन्यस्ताः त्यक्ताः शाखाः वाजसनिसंज्ञास्ताःशाखाइ
ति ७४ सामशाखाविभागमाह जैमिनेरिति तत्सुतः सुमंतुसुतः ताभ्यांपुत्रपौत्राभ्यां
क्रमेणैकैकांप्राह ७५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छिष्यः जैमिनेः शिष्यः महान् अतिमेधावी सहस्रं संहितारूपं भेदं चक्रे साम्नां तत्सं
हिताभेदं ततस्तदनंतरं ७६ सुकर्मणः शिष्यो एकः कौशल्यो हिरण्यनाभः पौष्यंजि

सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् सहस्रं संहिताभेदं
चक्रे साम्नां ततो द्विजः ७६ हिरण्यनाभः कौशल्यः पौष्यंजिश्च
सुकर्मणः शिष्यौ जगृहतुस्त्वन्ये आवंत्यो ब्रह्मवित्तमः ७७

नमैकः तौ जगृहतुः आवंत्यस्त्वन्यः तस्यैव शिष्यः सोपि जग्राह ७७ कृष्णपरमा ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौष्यंज्यावंत्सयोरपिचकाराद्धिरण्यनाभस्यापिपंचशतानिशिष्याआसन् तेतावतीः
शाखाः यथाययंजगृहुः तानुदीच्यान्सतः कालतः कांश्चित्प्राच्यांश्चप्रचक्षतइत्यर्थः
यथोक्तंवैष्णवे उदीच्याः सामगाः शिष्यास्तस्यपंचशतंस्मृताः हिरण्यनाभात्तावत्सः

उदीच्याः सामगाशिष्याआसन्पंचशतानिवै पौष्यंज्यावंसयोश्चा
पितांश्चप्राच्यान्प्रचक्षते ७८ लौगाक्षिर्मांगलिः कुल्यः कुशीदः कु
क्षिरेवच पौष्यंजिशिष्याजगृहुः संहितांतेशतंशतं ७९

संहितायेर्द्विजोत्तमैः गृहीतास्तेपिच्योच्यंतेपंडितैः प्राच्यसामगाइति ८० पुनरप्ये
तेषांत्रयाणांसुकर्मणः शिष्याणांशिष्यांतरैः शाखाबाहुल्यंदर्शयति लौगाक्षिरितिद्वा
भ्यां ८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतोनामहिरण्यनाभस्यशिष्यःस्वशिष्येभ्यःस्तुचेशेषाः अन्याअपियाः प्रसिद्धाःशा
खास्ताआवंत्यःस्वशिष्येभ्यस्तुचरति ८० इतिश्रीभागवतेमाहापुराणेद्वादशस्कंधेटी

कृतोहिरण्यनाभस्यचतुर्विंशतिसंहिताः शिष्यस्तुचेस्व
शिष्येभ्यःशेषाआवंत्यआत्मवान् ८० इतिश्रीभागवतेमा
हापुराणेद्वादशस्कंधेवेदशाखाप्रणयनेषष्ठोध्यायः॥६॥

कायांषष्ठोध्यायः॥६॥ सप्तमेऽथर्वविस्तारःपुराणव्यसनंततः पुराणलक्षणादीनिफ
लंभागवतस्युतेः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रमप्राप्तमथर्ववेदविभागमाह शिष्यंकबंधनामानं स्वकांस्वकीयांसंहितां सोपि
शिष्योपितांद्वेधाविभज्य तदुक्तंवैष्णवे अथर्ववेदंसमुनिःसुमंतुरमितद्युतिः शि

सूतउवाच॥ अथर्ववित्सुमंतुश्चशिष्यमध्यापयत्स्वकां संहितां
सोपिपथ्यायवेददर्शायचोक्तवान् १ शौल्कायनिर्ब्रह्मबलिर्मो
दोषःपिप्पलायनिः वेददर्शस्यशिष्यास्तेपथ्यशिष्यानथोशृणु
कुमुदःशुनकोब्रह्मन्जाजलिश्चाप्यथर्ववित् २ ष्यमध्यापयामासकबंधं

सोपितद्विधा कृत्वातुवेददर्शायतथापथ्यायदत्तवानिति १ तत्रवेददर्शःस्वसंहितां
चतुर्धाविभज्यचतुरःशिष्यानध्यापयामासपथ्यश्चत्रिधाविभज्यत्रीनितिसार्द्धे
नाहशौल्कायनिरिति २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगिरसः शुनकस्यशिष्योबभ्रुः सैंधवायनश्च तदुक्तं शुनकस्तुद्विधाकृत्वाददावेकांतुबभ्रवे द्वितीयांसंहितांप्रादात्सैंधवायनसंज्ञिनइति सावर्ण्याद्याः सैंधवायनादी

बभ्रुः शिष्योथांगिरसः सैंधवायनएवच अधीयेतांसंहितेद्वेसावर्ण्याद्यास्तथापरे ३ नक्षत्रकल्पः शांतिश्चकश्यपांगिरसादयः एतेआथर्वणाचार्याः शृणुपौराणिकान्मुने ४ त्रय्यारुणिःकश्यपश्चसावर्णिकृतव्रणः वैशंपायनहारीतौषड्वैपौराणिकाइमे ५

नांशिष्याः २ नक्षत्रकल्पः शांतिकल्पश्चेतिद्वौ तदुक्तं नक्षत्रकल्पोवेदानांसंहितानांतथैवच चतुर्थःस्यादांगिरसः शांतिकल्पश्चपंचमइति नक्षत्रकल्पादीनांकर्त्तारस्तन्नाममभिरुच्यंते ५ ५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्पितुर्मुखादितिप्रथमंव्यासः षट्संहिताःकृत्वामात्पित्रेरोमहर्षणायप्रादात्तस्य
चमुखादेतेत्रय्यारुण्यादयः एकैकांसंहितामधीयंत एतेषांषण्णांशिष्योहंताःस

॥ अधीयंतव्यासशिष्यात्संहितांमात्पितुर्मुखात् एकैकामहमेतेषांशि
ष्यःसर्वाःसमध्यगां ६ कश्यपोहंचसावर्णिरामशिष्योकृतव्रणः अधी
महिव्यासशिष्याच्चतस्रोमूलसंहिताः ७ पुराणलक्षणंब्रह्मन्ब्रह्म
र्षिभिर्निरूपितं शृणुष्वबुद्धिमाश्रित्यवेदशास्त्रानुसारतः ८

र्वाःसमधीतवान् ६ रामाशिष्योयोकृतव्रणः एवंचत्वारोवयं मूलसंहिताइत्य
नेनततःसंहिताबाहुल्यंसूचितं ७ शुकपरीक्षित्संवादेनिरूपितमपिपुराणल
क्षणंतद्भेदकथनायदर्शयतिपुरेणति ८
रा

अस्यविश्वस्य अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयः मन्वंतरेशानुकथानिरोधोमु
क्तिराश्रयइत्यत्रोक्तेस्थानपोषणेवृत्तिरक्षाशब्दाभ्यामुच्येते अंतराणिमन्वंतरा

सर्गोस्याथविसर्गश्चवृत्तिरक्षांतराणिच वंशोवंशानुचरितंसंस्था
हेतुरपाश्रयः १

णिवंशोवंश्यानुचरितंचेतीशानुकथाःसंस्थानिरोधः अनेनैवासंतिकल्पयरूपा
मुक्तिरप्युक्ताहेतुशब्देनजीवाश्रयवासनाशब्दवाच्याज्ञुतयोगृहीताः १ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशभिरेतैर्लक्षणैरर्थैर्युक्तंमहापुराणंविदुःकेचित्पंचविधं सर्गश्चप्रतिसर्गश्चवंशोम
न्वंतराणिच वंशानुचरितंचेतिपुराणंपंचलक्षणं पंचलक्षणमिति महापुराणंअल्पं

दशभिर्लक्षणैर्युक्तंपुराणंतद्विदो विदुः केचित्पंचविधंब्रह्मन्महदल्प
व्यवस्थया १०

चेतिव्यवस्थयायत्रदशापिलक्षणानिपृथक्निरूप्यंतेतन्महापुराणं यत्रत्वन्येषां
पंचस्वेवांतर्भावस्यविवक्षातदल्पमितिव्यवस्थयेत्यर्थः १० नमोभगवतेकृष्णाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्गादिलक्षणानिव्याचष्टे अव्याकृतेत्यादिना प्रधानस्यगुणानांक्षोभात्योमहान्
तस्माद्यः त्रिवृदहंकारस्तस्मात्भूतमात्राणांसूक्ष्माणामिंद्रियाणांचतदर्थानांस्थूला
नांतद्देवतानांचसंभवः सर्गः कारणसृष्टिः सर्गइत्यर्थः उच्यंतइतियथापेक्षमुत्तरत्रा

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोहमः भूतसूक्ष्मेंद्रियार्थानांसंभवः
सर्गउच्यते ११ पुरुषानुगृहीतानामेतेषांवासनामयः वि सर्गोयंस
माहारोबीजाद्बीजंचराचरं १२

प्यनुषंगः ११ विसर्गंव्याचष्टे पुरुषेणेश्वरेणानुगृही
तानांएतेषांमहदादीनांपूर्वकर्मवासनाप्रधानोयंसमाहारः कार्य्यभूतश्चराचरप्रा
णिरूपोबीजात्बीजमिवप्रवाहापन्नोविसर्गउच्यतइत्यर्थः १२ नमोभगवतेराम ६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चराणांभूतानांसामान्यतोऽचराणिचकाराच्चराणिचकामान्नृवृत्तिः तत्रतुनृणां
स्वेनस्वभावेनकामाच्चोदनयापिवायानियतावृत्तिर्जीविकाकृतासावृत्तिरुच्यत

वृत्तिर्भूतानिभूतानांचराणामचराणिच कृतास्वेननृणांतत्र
कामाच्चोदनयापिवा १३ रक्षाच्युतावतारेहाविश्वस्यानुयुगे
युगे तिर्यङ्मर्त्यर्षिदेवेषुहन्यंतेयैस्त्रयीद्विषः १४

इत्यर्थः १३ तिर्यङ्मर्त्यर्षिदेवेषुयेच्युतावताराः तेषामीहालीलासाविश्वस्यरक्षो
च्यतइत्यर्थः यैरवतारैरितिसमासान्तः कृष्यकथंचित्संबंधः त्रयीद्विषोदैत्याः १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षड्विधमन्वंतरमुच्यते षड्विधत्वमेवाह मनुरिति मन्वादयः षडेते वर्गाः स्वस्वाधि
कारेण प्रवर्त्तंते तत् मन्वंतरमित्यर्थः १५ वंशमाह ब्रह्मणः सकाशात् प्रसूतिर्येषां

मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ऋषयोंशावतारश्च हरेः षड्विध
मुच्यते १५ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोन्वयः वंश्यानुच
रितं तेषां वृत्तं वंशधराश्च ये १६ नैमित्तिकः प्राकृतिको नित्य आत्यं
तिको लयः संस्थेति कविभिः प्रोक्ता चतुर्द्धास्य स्वभावतः १७ ७

शुद्धानामित्यर्थः तेषामन्वयो वंशः तत्र भवा वंश्याः तेषां वृत्तं ये च तद्वंशधरास्ते
षां च वृत्तं वंश्यानुचरितमुच्यते १६ अस्य विश्वस्य स्वभावतो मायातो निष्पन्नस्य
यद्वा मायातश्चतुर्विधो लयरति १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यजगतःसर्गादेर्हेतुर्निमित्तंजीवःसोत्रहेतुरुच्यतइत्यर्थः तस्यनिमित्तता
माहअविद्ययाकर्मकारकः कर्मकर्त्ताजीवादृष्ट प्रयुक्तत्वाद्विश्वसर्गादेःसतु

हेतुर्जीवस्यसर्गादेरविद्याकर्मकारकः यं
चानुशयिनंप्राहुरव्याकृतमुतापरे १८ ७

तत्रहेतुरित्यर्थः नन्वनुशयीनिमित्तमितिकेचित् अव्याकृतमित्यपरे तत्राह
यमिति चैतन्यप्राधान्येनानुशयिनं उपाधिप्राधान्यविवक्षयाअव्याकृतं १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपाश्रयमाह व्यतिरेकेति जाग्रदादिष्ववस्थासु जीवतयावर्त्तंत इति जीवस्तयो
विश्वतैजसप्राज्ञाः तेषु मायामयेषु साक्षितयान्वयः समाध्यादौ च व्यतिरेकोय
स्य तद्ब्रह्म संसारप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रयश्च मतइत्यर्थः ११

व्यतिरेकान्वयौ यस्य जाग्रत्स्वप्नसुषुप्तिषु मायामयेषु तद्ब्रह्म जीववृत्तिष्व
पाश्रयः १२ पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु बीजादिपंचतांतासु ह्य
वस्थासु युतायुतं २
तदेव सदृष्टांतं प्रपंचयति पदार्थेषु घटादिषु द्रव्यं मृदादि
यथा युतं अन्वितं अयुतं च बहिरप्यवस्थानात् रूपनामसु च तन्मात्रं सत्तामात्रं
यथा एवं बीजं गर्भाधानमादिर्यासां तां [illegible] ते यासां तासु देहावस्थासु नवस्वपि
अधिष्ठानत्वेनान्वयुतमयुतं च यत्तदपाश्रय इति २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंदशापिलक्षणानिव्याख्यायवर्णयंतिमहात्मनइतियउक्तंतदाह विरमेतेति य
दासर्गादीनांमायामयत्वानुसंधानेनवामदेवादेरिवस्वयमेवचित्तंविरमेत् रहै

विरमेतयदाचित्तंहित्वावृत्तित्रयंस्वयं योगेनवातदात्मानं
दे वैहायानिवर्त्तते २१ एवंलक्षणलक्ष्याणिपुराणानिपुरा
विदः मुनयोष्टादशप्राहुःक्षुल्लकानिमहांतिच २२ नमोनमः

वानुष्ठितेनयोगेनवादेवहूत्यादिवत् तदाविक्षेपाभावादात्मानंवेदतदाचाविद्या
निवृत्तेरीहायाः संसाररूपायाःनिवर्त्ततइत्यर्थः २१ पुराणविभागप्रस्तावेनतल्ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणादिप्रासंगिकमुक्काप्रस्तुतमाह एवंविधैर्लक्षणैर्लक्ष्याणि २२ २३ त्रिषट्
अष्टादश २४ उपसंहरतिब्रह्मनितिमुनेर्व्यासस्यशिष्यादीनांच ब्रह्मतेजोब्र

ब्राह्मंपाद्मंवैष्णवंचशैवंलैंगंसगारुडं नारदीयंभागवतमाग्नेयंस्कां
दसंज्ञितं २२ भविष्यंब्रह्मवैवर्त्तमार्कंडेयंसवामनं वाराहंमात्स्यं
कौर्म्यंचब्रह्मांडाख्यमितित्रिषट् २४ ब्रह्मन्निदंसमाख्यातंशाखाप्र
णयनंमुनेः शिष्यशिष्यप्रशिष्याणांब्रह्मतेजोविवर्द्धनं २५ इतिश्री

श्रीभागवतेद्वादशस्कंधेसप्तमः अ० ७॥

त्मवर्द्धसंतद्विवर्द्धनंश्रोतॄणामितिशेषः २५ इतिश्रीभा०द्वा०टीकायांसप्तमोध्यायः॥७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथमेतुनपश्चर्यामार्कंडेयस्यमोहकैः कामादिभिरसंमोहोनरनारायणस्तुतिः
पुराणविभागप्रसंगेनपुराणकर्तुर्मार्कंडेयस्यचरितंप्रस्तुतमाहसूतेति त्वमे

शौनकउवाच सूतजीवचिरंसाधोवदनोवदतांवर तमस्यपारे
भ्रमतांनृणांत्वंपारदर्शनः १ आहुश्चिरायुषमृषिंमृकंडुतनयंजनाः यः कल्पांतेउर्वरितोयेनग्रस्तमिदंजगत् २ ७ ७

ववक्तुंयोग्यइत्याह तमसिसंसारे भ्रमतांपारदर्शनस्तान्निवर्तकः १ वक्तव्यमाह आहुरिति उर्वरितः अवशिष्टः येनकल्पांतेन एतत्कथंघटतइत्येकःप्रश्नः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रलयाभावादप्येतन्नघटतइत्याह सवाइति यतोभागवर्षभः कोपिप्राहृतिकोने
मित्तिकोवा ३ अन्यदप्यघटितमेवेत्याह एकएवेनितोकंबालकं ४ कौतूहलं

सवाअस्मत्कुलोत्पन्नः कल्पेस्मिन्भार्गवर्षभः नैवाधुनापिभूतानांसंप्लवः कोपि
जायते ३ एकएवार्णवेत्राम्यन्ददर्शपुरुषंकिल वटपत्रपुटेतोकंशयानंत्वेक
मद्भुतं ४ एषनःसंशयोभूयान्सूतकौतूहलंयतः तंनश्छिंधिमहायोगिन्पु
राणेष्वपिसंमतः ५ सूत उ॰ प्रश्नस्त्वयामहर्षेयंकृतोलोककल्मषापहः नाराय
णकथायत्रगीताकलिमलापहा ६ औत्सुक्यं तंसंशयं नकेवलंत्वंमहायोगि

किंतुपुराणेष्वपिज्ञातत्वेनसंमतः ५ प्रश्नमभिनंदतिहेमहर्षे अयंप्रश्नः तत्रहेतुः
नारायणेति यत्रप्रश्नविषये ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रमार्कंडेयस्तपसाभगवंतमाराध्यमायाप्रदर्शनंवव्रेततस्थ्वतेनैवभगवन्मा
ययासप्तकल्पाद्दृष्टानान्यैरित्युत्तरंवक्तुमादितआरभ्यतस्यचरितमाहप्राप्ते

प्राप्तद्विजातिसंस्कारोमार्कंडेयःपितुःक्रमात् छंदांस्यधीत्यधर्मेण
तपःस्वाध्यायसंयुतः ७ बृहद्व्रतधरःशांतोजटिलोवल्कलांबरः
बिभ्रत्कमंडलुंदंडमुपवीतंसमेखलं ८

इत्यादिना मार्कंडेयोमृत्युंजिग्यइ
तिपंचमेनान्वयः मध्यमग्रंथेनतस्यधर्मःकथ्यते प्राप्तोद्विजातिसंस्कारःउप
नयनाख्योयेनसःपितुःसकाशात्गर्भाधानादिक्रमात् छंदांसिवेदान् ७ बृहद्व्र
तधरःनैष्ठिकब्रह्मचारीसन् ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियमर्द्वयेधर्मर्द्वये अग्न्यादिषुपंचसुहरिमर्चयन् ९ भैक्ष्यंगुर्वर्थमाहृत्य

कृष्णाजिनंसाक्षसूत्रंकुशांश्चनियमर्द्वये अग्न्यर्कगुरुविप्रात्मस्वर्च
यन्संध्ययोर्हरिं ९ सायंप्रातःसगुरवेभैक्ष्यमाहृत्यवाग्यतः बुभु
जेगुर्वनुज्ञातःसकृन्नोचेदुपोषितः १० एवंतपःस्वाध्यायपरोवर्षा
णामयुतायुतं अराधयन्हृषीकेशंजिग्येमृत्युंसुदर्जयं ११ ब्रह्मा
भृगुर्भवोदक्षोब्रह्मपुत्राश्चयेपरे नृदेवपितृभूतानितेनासन्नतिवि
स्मिताः १२

तेनानुज्ञातश्चेतर्हिबुभुजेनोचेत्सकृदुपोषितोभवति १० ११ तेनमृत्युंजयेन १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वस्ताः क्लेशारागादयोयस्यतेन अंतरात्मनाप्रत्याहृतेनमनसा १३ १४ तस्यतपो
निष्ठामितिहासेनवर्णयतिएतदित्यादिना अस्मिन्ससमेमन्वंतरेतपसामत्सरंग

इत्थंबृहद्व्रतधरः स्तपः स्वाध्यायसंयमैः इध्यावधोक्षजंयोगीध्वस्त
क्लेशांतरात्मना १३ तस्यैवंयुंजतश्चित्तंमहायोगेनयोगिनः व्यतीयाय
महान्कालोमन्वंतरषडात्मकः १४ एतत्पुरंदरोज्ञात्वासप्तमेस्मिन्कि
लांतरे तपोविशंकितोब्रह्मन्नारेभेतद्विघातनं १५ गंधर्वाप्सरसःका
मंवसंतमलयानिलौ मुनयेप्रेषयामासरजस्तोकमदौतथा १६

हीष्यतीतिविशंकितः १५ मुनयेमुनिंमोहयितुंरजस्तोकं अतिप्रियमपत्यंलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१७ तदाश्रमपदं प्रविष्टो वायुर्ववाविति तत्तीयेनान्वयः पुण्यैर्द्रुमैर्लताभिश्चांचि
तं प्रकूजितं पुण्यद्विजानामृषीणां कुलैराकीर्णं पुण्याअस्यमलाज्जलाशयायास्मिन्

तेवैतदाश्रमं जग्मुर्हिमाद्रेः पार्श्वउत्तरे पुष्पभद्रानदीयत्रचित्राख्या
चशिलाविभो १७ तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितं पुण्यद्विज
कुलाकीर्णं पुण्यामलजलाशयं १८ मत्तभ्रमरसंगीतं मत्तको
किलकूजितं मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलं १९

१८ मत्तभ्रमराणां संगीतं यस्मिन् मत्तकोकिलानां कूजितं यस्मिन् मत्तबर्हिणए
वनटास्तेषामाटोपः संभ्रमो यस्मिन् मत्ताद्विजानां पाक्षिणां कुलैराकुलं व्याप्तं १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंभूतंतंनदाश्रमपदंप्रविष्टःसन्वायुर्मलयानिलोववौप्रससारतंत्तंभयन्नुद्दी
पयन्तत्ररक्षेषुप्रवेशान्मांद्यं हिमनिर्झरकणदानात्शैत्यंपुष्पपरिषंगात्सौ

वायुः प्रविश्यआदायहिमनिर्झरशीकरान् सुमनोभिः परिषक्तो
ववाउत्तंभयन्स्मरं २० उद्यच्चंद्रनिशावक्त्रः प्रवालस्तवकालि
भिः गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः २१ नमोभगवते

गंध्यंचोक्तं २० किंच उद्यच्चंद्रोयास्मिन्तान्निशावक्त्रंरजनीमुखंयास्मिन्सः प्रवा
लस्तबकानामालयःश्रेणयोयेषुतैः गुप्यंतिविटपैः सांश्लिष्यंती तिगोपाःद्रुमाः
लताश्चतेषांजालैः समूहैराविर्बभूव २१

किंचतदागीतवादित्रयूथिकैः गायकादिसमुदायिभिः गंधर्वैरन्वीयमानः तयास्त
स्त्रियोऽप्सरसस्तासांयूथस्यपतिः आत्तंचापमिषुश्चयेनसस्मरश्चतत्रादृश्यत २२

अन्वीयमानोगंधर्वैर्गीतवादित्रयूथिकैः अदृश्यतात्तचापेषुः स्व
स्त्रीयूथपतिःस्मरः २२ हुत्वाग्निंसमुपासीनंददृशुः शक्रकिंकराः
मीलिताक्षंदुराधर्षंमूर्तिमंतमिवानलं २३ ननृतुस्तस्यपुरतः स्त्रि
योयोगायकाजगुः मृदंगवीणापणवैर्वाद्यंचक्रुर्मनोरमं २४

दुराधर्षमाभिभवितुमशक्यं २४ २४ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोषणमोहनसंदीपनतापनोन्मादनाख्यानिपंचमुखानियस्यतदस्त्रंसंदधे तदै
वमधुर्वसंतः रजस्तोकश्चपुंस्त्वमार्षअन्येचेंद्रप्रस्यास्तस्यमनोव्यकंपयन् २५

संदधेस्त्रंस्वधनुषिकामः पंचमुखंतदा मधुर्मनोरजस्तोकरंद्रप्र
स्याव्यकंपयन् २५ क्रीडंत्याः पुंजिकस्थल्याः कंडकैस्तनगौरवात्
प्रशामुद्विग्नमध्यायाः केशाविस्त्रंसितस्त्रजः २६ इतस्ततोप्नमद्ध
ष्टेश्चलंसाअनुकंडकं वायुर्जहारतद्वासः सूक्ष्मंत्रुटितमेखलं २७

२६ किंचवायुर्मलयानिलः पुंजिकस्थल्याः तत्सूक्ष्मंवासोजहार २७ नमोराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वंतेषांकर्मतत्रतस्मिन्मोघंव्यर्थंअनीशस्यनिर्दैवस्य २८ मुनेरपकुर्वतःप्रति

विससर्जेनराबाणंमत्वातंस्वाजितंस्मरः सर्वंतत्राभवन्मोघमनीशस्ययथोद्यमः
तस्यमपकुर्वतोमुनेस्तत्तेजसामुने दह्यमानानिववृतुःप्रबोध्याहिमिवार्भकाः
२९ इतींद्रानुचरैर्ब्रह्मन्धर्षितोपिमहामुनिः यन्नागादहमोभावंनतच्चित्रंमहत्सु
हि ३० दृष्ट्वानिस्तेजसंकामंसगणंभगवान्स्वराट् श्रुत्वानुभावंब्रह्मर्षेर्विस्मयंस
मगात्परं ३१ तस्यैवंयुंजतश्चित्तंतपःस्वाध्यायसंयमैः अनुग्रहायाविरासीन्नरना
रायणोहरिः ३२

कृतमाचरतःहेमुने २९ अहमः अहंकारस्यभावंविकारं ३० निस्तेज
संम्लानवदनंस्वराडिंद्रः ३१ नरनारायणरूपोहरिः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावत्नुवर्णयतिद्वाभ्यां रौरवंकृष्णाजिनंवल्कलंचांबरंययोस्तौ पवित्रेपाण्योर्ययोस्तौ
त्रिरत्नत्रिगुणंनवतंतुकमितिवात्रिवद्धहिः पवमानमिसादौनवकेप्रयोगादितिनवन
तौप्रभुकृष्णौनवकंजलोचनौचतुर्भुजौरौरववल्कलांबरौ पवित्र
पाणीउपवीतकंत्रिवृत्कमंडलुंदंडमजुंचवैणवं ३३ पद्माक्षमाला
मुतजंतुमार्जनंवेदंचसाक्षात्तपएवरूपिणौ तपत्तडिद्वर्णपिशंग
रोचिषाप्रांशूदधानौविबुधर्षभार्चितौ ३४ चतंत्वादिमयं ३३ वेदंचदर्भमु
ष्टिंकिंचसाक्षात्तपएवतौतत्रहेतुः तपत्तडिद्वर्णेदेदीप्यमानविद्युत्संकाशंयत्पिशंग
रोचिस्तेनरूपिणोमूर्त्तिमंतौताहक्कृतेजोयुक्तमूर्त्तिभ्यांतपोमयत्वेनप्रकाशमानावि
त्यर्थः प्रांशुउन्नतौ ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उच्चैर्महत्ता आदरेण ३५ तयोः संदर्शनेन य आनंदस्तेन निर्वृताः उपशांता आत्मेंद्रिया

तेवै भगवतोरूपेनरनारायणावृषी दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन
दंडवत् ३५ सतत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः हृष्टरोमाश्रुपू
र्णाक्षोनसेहेतावुदीक्षितुं ३६ उत्थायप्रांजलिः प्रह्व औत्सुक्यादाश्लि
षन्निव नमोनमइतीशानौबभाषेगद्गदाक्षरः ३७ तयोरासनमा
दायपादयोरवनिज्यच अर्हणेनानुलेपेनधूपमाल्यैरपूजयत् ३८

शयादेहेंद्रियमनांसियस्य सः नसेहे नाशक्नोत् ३६ आश्लिषन् आलिंगयन्निव ३७
पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घेण ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादाभ्यांपाद्यावनम्यगरिष्ठौपूज्यतमौतौप्रति ३९ अंतर्यामिणस्तस्यैवप्राणादिप्रवर्त्त
कत्वादात्मनस्तत्स्तुतावस्वातंत्र्यंपश्यन्नाहकिमिति हेविभोतववतांकिमहंवर्णयेक

सुखमासनमासीनौप्रसादाभिमुखौमुनिः पुनरानम्यपादाभ्यांगरि
ष्ठाविदमब्रवीत् ३९ मार्कंडेयउवाच किंवर्णयेतवविभोयदुदीरितोऽसुः
संस्पंदतेतमनुवाङ्मनइंद्रियाणि स्पंदंतिवैतनुभृतामजशर्वयोश्च
स्वस्याप्यथापिभजतामसिभाववंधुः ४०

थंस्तोमियत्प्रेरितयैवउदीरितःप्रेरितोऽसुःप्राणःसस्पंदतेप्रवर्त्ततेतंतमनुचवागाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः स्यंदंति अत्रहेतुः वैअन्वयव्यतिरेकाभ्यांश्रोतस्यश्रोत्रमित्यादिश्रु
तिभिश्चतत्प्रसिद्धमित्यर्थः नकेवलंप्राकृतानांतनुभृतांकिंतुअजश
र्वयोश्च अतःस्वस्यममापितथैव एवंयद्यपिनकश्चिदपिकस्यापित्रा
तंत्र्यं अयापिदारुयंत्रवत्त्वत्प्रवर्तितैरपिवागादिभिर्भजतांपुंसांभा
वबंधुः आत्मबंधुरसि नतुपित्रादिवद्देहमात्रबंधुः अहोकृपालुता
तवेत्यर्थः ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकथामावांप्राणादिप्रवर्त्तकौधर्मपुत्रत्वादावयोरितिचेत्तत्राहमूर्तीइति हेभ
गवन्भगवतस्तवइमेमूर्त्तीत्रिलोक्याः क्षेमायपालनायतापविरमायदुःखनिवृ
त्यैमत्सुजित्यैमोक्षायचनतुत्वंकस्यापिपुत्रइत्यर्थः अत्रदृष्टांतः यथेदंविश्वम

॥७॥मूर्त्तीइमेभगवतोभगवांस्त्रिलोक्याः क्षेमायतापविरमायचमत्सु
जित्यै नानाविभर्ष्यवितुमन्यत्तनूर्यथेदंसृष्ट्वापुनर्ग्रससिसर्वमिवोर्णना
भिः ४

वितुंअन्याः तनूर्मत्स्यकूर्मादिलक्षणाःनानाअनेकप्रकाराविभर्षिनदूत् नकेवलं
पालनादिमात्रंतवकर्मकिंतुसृष्टिप्रलयावपीत्याहसृष्ट्वेति तत्राप्यन्यविरपेक्षत्वे
दृष्टांतः ऊर्णनाभिरिवेति ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मादेवंभूतस्त्वंतस्मात्तवांघ्रिमूलंभजामीत्याह तस्येति तस्यावितुःपालकस्यस्था
वरजंगमानामीश्वरस्यअंघ्रिमूलंभजामीतितृतीयश्लोकस्यानुषंगःकथंभूतमं
घ्रिमूलंयस्थंयत्रस्थितंकर्मगुणकालानांरजोमलंअन्येचपूर्वोक्ता ... ादयोन

तस्यावितुःस्थिरचरेशितुरंघ्रिमूलंयत्स्थंनकर्मगुणकालरजःस्पृशंति
यद्वैस्तुवंतिनिनमंतियजंत्यभीक्ष्णंध्यायंतिवेदहृदयामुनयस्तदाप्त्यै ४१

स्पृशंति रुजंहरंतिचापाठः यतः वेदोहृदयेयेषांतेवेदतात्पर्यविदोमुनयःयद्देवस्तुवं
तिनितरांनमंतितन् तस्याप्त्यैएवंस्तवनादिकुर्वंति ४१ नमोभगवतेकृष्णाय॥ ७२

दाप्त्यै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतः अन्यः पुरुषार्थो नास्तीत्याह नान्यमिति अंघ्र्युपनयात् श्रीमच्चरणप्राप्तेः अन्यं क्षे
मं न विद्मः परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य तदेवाह द्विपरार्द्धधिष्ण्यं स्था

नान्यं तवांघ्र्युपनयादपवर्गमूर्त्तेः क्षेमं जनस्य प
रितोभिय ईश विद्मः ब्रह्मा बिभेत्यलमतो द्विप
रार्द्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिका

नां ४३

नं यस्य सः ब्रह्मापि ते कालस्य त्वद्भ्रूविजृंभरूपात्कालादलं बिभेति अतः किमुत त
त्कृतं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ४३ नमो भगवते नमः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग·द·
७२

यस्मादेवंततस्मात्त्वपादमूलंभजामिकथंभूतस्यऋतधियःसत्यज्ञानस्वरूपस्य य
द्वाऋतासत्साधीर्यस्ययस्मिन्वातस्यआत्मगुरोर्जीवस्यनियंतुःअतःकारणात्परस्य
किंकृत्वाआत्मछदिस्वात्मावरकंअपार्थंचनिष्फलंअसच्चतुच्छंअंत्यंचनश्वरंइदंदेहा

तद्दैभजाम्यृतधियस्तवपादमूलंहित्वेदमात्मछदिचात्मगुरोःपरस्य
देहाद्यपार्थमसदंत्यमभिज्ञमात्रंविंदेततर्हिसर्वमनीषितार्थं ४४

दिहित्वादेहादिभजनंत्यक्त्वा असच्चेत्कथंप्रतीयतेतत्राह अभिज्ञमात्रंनत्वस्वतं
मसत्तू किंत्वात्ममात्रंनततःपृथगस्तीत्यर्थः नन्वपवर्गायभवतुभजनंफलांत ७२
रार्थंतन्नभजनंकार्यमेवतत्राहतर्हीतियदित्वांभजतिपुरुषःतर्हितेतवत्तएवसर्वम
नीषितमर्थंविंदेतेति ४४

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुब्रह्मरुद्रावपिममैवमूर्तीअतोमामेवकिमत्यंतमाद्रियसेतत्राहसत्वमितियद
पियद्यपितवैवमाययाकृताएतालीलाःत्वयैवधृताःतथापियासत्वमयीसैवप्र

सत्वंरजस्तमइतीशातवात्मबंधोमायामयाःस्थितिलयोदयहेतवोस्य
लीलाधृतायदपिसत्वमयीप्रशांत्यैनान्येनृणांव्यसनमोहभियश्चयाभ्यां
४५ तस्मात्तवेहभगवन्नथतावकानांशुक्लांतनुंस्वदयितांकुशलाभजंति
यत्सात्वताःपुरुषरूपमुशंतिसत्वंलोकोयतोभयमुतात्मसुखंचनान्यत्

शांत्यैमोक्षाय नकेवलमस्यप्रशांत्यभावमात्रमन्यभजनेत्वनिष्टंचकिंतदनिष्टंभवे
तत्राहव्यसनेति ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवसदाचारेणहृदयति तस्मादित्तिहेभगवन् तवसुक्लांतांतनुंश्रीनारायणाख्यां
अथत्तावकानांचशुक्लांतनुंनराख्यां यद्यस्मात्सात्वताः सत्वमेवपुरुषेश्वरस्यरूप
मुशंतिमन्यंतेनत्वन्यत्रजस्तमश्चेति अत्रहेतुः यतः सत्वात्लोकोवैकुंठाख्यः लो

तस्मैनमोभगवतेपुरुषायभूम्नेविश्वायविश्वगुरवेपरदेवतायै ना
रायणायऋषयेचनरोत्तमायहंसायसंयतगिरेनिगमेश्वराय ४७

कत्वेसत्वपसयंच भोगेसत्वप्पात्मसुखंच ४६ अतस्त्वांप्रणमतितस्मैनमरति हं
सायशुद्धायसंयतगिरेनियतवाचे अथचनिगमेश्वरायवेदमार्गप्रवर्त्तकाय ४७ ७४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदार्थसंप्रदायप्रवर्त्तनेहेतुस्त्वंवदन्स्तौतियमिति रूपदेंद्रियमार्गैः भ्रमद्धीः विक्षिप्त
बुद्धिः पुमान्स्वेंद्रियादिषु नियंतृत्वेनसंतमपियंत्वांनवेददृक्पथेषुविषयेषु बुद्धिवि

यंवैनवेदवितथाक्षपथैर्भ्रमद्धीः संतंस्वकेष्व
सुषुहृद्यपिदृक्पथेषु तन्मायायावृतमतिःस उ
एवसाक्षाद्यस्तवाखिलगुरोरुपसाद्यवेदं

क्षेपेहेतुः तन्माययातस्यतवैवमायया आवृता आत्मनिष्ठामतिर्यस्यस उ सोपिआ
द्यएवपूर्वमज्ञातेव अखिलगुरोस्तवतत्त्ववर्तितंवेदमुपसाद्यप्राप्यंतंत्वांसाक्षाद्वेद ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदेनैवत्वत्तज्ञानमित्सुपपादयन्नूप्रणमतियस्यत्वदर्शनंनिगमेभवतिकथंभूतमा
त्मनस्तवरहः रहस्यप्रकाशकं अन्यथादुर्ज्ञेयतामाह अजपराब्रह्ममुख्याः कवयो
पिसांख्ययोगादिभिर्यतमानाः यत्रत्वयिमुह्यंतिकुतइत्यत्तआह सर्वेषांसांख्यादिवा

यद्दर्शनंनिगमआत्मरहः प्रकाशंमुह्यंतियत्रकवयोजपरायतंतः तंसर्ववादवि
षयप्रतिरूपशीलंवंदेमहापुरुषमात्मनिगूढबोधं ४९ इतिश्रीभागवतेमहापुराणे
द्वादशस्कंधेमार्कंडेयोपाख्यानेनारायणस्तवोनामाष्टमोध्यायः॥ ८॥ ७ ७

दानांविषयाभेदादयस्तेषांप्रतिरूपंतत्तंनुसारिशीलंस्वभावोयस्यतंकुतः आत्मना
देहादिसंघात्तेननिगूढोबोधोयस्यतंएवंभूतंमहापुरुषंत्वांवंदे ४९ इतिअध्यायः॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवमेभगवन्मायादिदृक्षोर्दर्शनंमुकुः मायाशिशोर्लयाश्रौचमुनेर्निर्वेशनिर्गमौ १
भगवतःपरितोषपूर्वकंतदपेक्षितवरदानंकथयितुमाहसंस्तुतइत्यादिना १ आत्म

सूतउवाच संस्तुतोभगवानित्थंमार्कंडेयेनधीमता नारायणोनर
सखःप्रीतआहभृगूद्वह १ श्रीभगवानुवाच ॥ भोभोब्रह्मर्षिवर्यासिसि
द्धआत्मसमाधिना मयिभक्त्यानपायिन्यातपःस्वाध्यायसंयमैः २
वयंतेपरितुष्टाःस्मत्वद्बृहद्व्रतचर्यया वरंप्रतीच्छभद्रंतेवरदेशादभी
प्सितं ३

समाधिनाचित्तैकाग्र्येण २ वयंतेपरितुष्टाःस्मेतिबहुवचनंसर्वदेवाभिप्रा
येणवरदेशादित्येकवचनंद्वयोरैक्याभिप्रायेण प्रतीच्छगृहाण ३ नमोशिवायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७६

वरेणछंदयतात्वयाजितंत्वत्कर्षोदर्शितः ममतुवराकांक्षानास्तीत्याह वरेणेति ४
यस्यतवश्रीमत्पादाब्जदर्शनंमनसापिगृहीत्वाप्राप्यप्राकृताअपिअजादयोभवं

ऋषिरुवाच जितंतेदेवदेवेशप्रपन्नार्तिहराच्युत वरेणैतावताऽलंनो
यन्नवान्समदृश्यत ४ गृहीत्वाजादयोयस्यश्रीमत्पादाब्जदर्शनं म
नसायोगपक्वेनसभवान्मेक्षगोचरः ५ अथाप्यंबुजपत्राक्षपु
ण्यश्लोकशिखामणे द्रक्ष्येमायांययालोकःसपालोवेदसद्भिदां ६

तिसभवान्मेऽक्षगोचरोजातोऽस्तिकिमतःपरंवरेणेत्यर्थः ५ द्रक्ष्येद्रष्टुमिच्छामिलो
कपालैर्ब्रह्मादिभिःसहितोयंलोकोजनःसद्भिदांसतिवस्तुनिभिदांययेति ६ ७ ७६

तथेतिद्रक्ष्यसीतिसईश्वरः स्मयन्प्रागात् पाठांतरे क्रियाविशेषणं ७ तमेवार्थं

सूत उवाच॥ इतीडितोर्चितः काममृषिणा भगवान्मुने तथेतिसस्मयन् प्रागाद्बदर्याश्रममीश्वरः ७ तमेव चिंतयन्नर्थमृषिः स्वाश्रम एव सः वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ८ ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् क्वचित्पूजां विसस्मार भक्तिप्रसरसंप्लुतः ९ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुने उपासीनस्य संध्यायां ब्रह्मन्वायुरभून्महान्

मायादर्शनरूपं अग्न्यादिमूर्त्तिषु ८ भावद्रव्यैः मनोमयैर्द्रव्यैः क्वचित्कदाचित्प्रेम प्रसरसंप्लुतः प्रेमोद्रेकं प्राप्तः ९ मायादर्शनमाह तस्येत्यादिना १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंवायुमनुवलाहकामेघा अभवन्नाविर्बभूवुः तेच तडिद्भिः सहिताः उच्चैः स्वनंतो
गर्जंतः अक्षोरथांगंलद्दस्थविष्ठाः अभितोवर्षधारामुमुचुः ११ चतुर्दिक्षुवर्त्तमा

॥ तंचंडशब्दंसमुदीरयंतंबलाहकाश्चन्वभवन्करालाः अक्षस्थवि
ष्ठामुमुचुस्तडिद्भिः स्वनंतउच्चैरभिवर्षधाराः ११ ततोव्यदृश्यंतचतुःस
मुद्राःसमंततः क्ष्मातलमाग्रसंतः समीरवेगोर्मिभिरुग्रनक्रमहाभया
वर्तगंभीरघोषाः १२

नाः समुद्राः समीरवेगेनोर्मयस्तैः भूतलग्रसंतः उग्रानक्रायेषुमहाभया आवर्त्ताये
षुगंभीरोघोषोयेषुतेचतेच १२ श्रीकृष्णपरमात्मनेनमोनमः नमोशिवायनमः॥ ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनासहजरायुजादिचतुर्विधंजगदंतर्बहिश्चोपतापितंवीक्ष्यक्ष्मांचजलाप्लुतां
वीक्ष्यमुनिःसमत्रसत् भयंप्रापकेनोपतापितं अद्भिः कथंभूताभिःअतिक्रांता

अंतर्बहिश्चाद्भिरतिद्युभिः खरैःशतह्रदाभीरुपतापितंजगत् चतु
र्विधंवीक्ष्यसहात्मनामुनिर्जलाप्लुतांक्ष्मांविमनाःसमत्रसत् १२
तस्यैवमुद्वीक्षतस्तुर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः आपू
र्यमाणोवर्षद्भिरंबुदैःक्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः समं १४ घोराभिः खरैस्व

सूर्यरश्मिभिः वायुभिर्वेतिशेषः शतह्रदाभिश्चविद्युद्भिः दीर्घत्वमार्षंछंदोनुसारेण १३
प्रभंजनेनाघूर्णितंप्रकंपितंवाःउदकंयस्मिन्सः अप्यधात्छादयामास समंसह १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा·द
७८

सक्ष्मांतरिक्षंभूम्यंतरिक्षस्थ प्राणिसहितं सदिवंस्वर्गस्थदेवसहितं भगणाःज्यो
तिर्गणाःतैःसहितं जवाद्विक्षिप्यविकीर्य्य १५ परिभ्रमेणईषितःगतःआभ्रइत्यर्थः

सक्ष्मांतरिक्षंसदिवंसभागणंत्रैलोक्यमासीत्सहदिग्भिराप्लुतं सएकए
वोर्वरितोमहामुनिर्बभ्रामविक्षिप्यजटाजडांधवत् १५ क्षुत्तृट्परीतोम
करैस्तिमिंगिलैरुपद्रुतोवीचिनभस्वताहतः तमस्यपारेपतितोभ्रमन्दि
शोनवेदखंगांचपरिश्रमेषितः १६ क्वचिद्गतोमहावर्त्ततरलैस्ताडितःक्वचि
त् यादोभिर्भक्ष्यतेक्वापिस्वयमन्योन्यघातिभिः १७

इषुसर्पणइत्यस्मात् १६ अन्योन्यघातिभिःतद्भक्षणायपरस्परंयुध्यद्भिः १७ नमोनमः ७८

१८ विष्णुमायावृतात्मनः इतिसतथाद्दष्टवानिसर्थः १९ ककुदिउन्नतप्रदेशेन्यग्रोध मो
पोतंकोमलंवटं २० तस्यईशानदिक्शाखायांशिशुमपि २१ श्रीमतूरम्यंवदनपं

क्वचिच्छोकंक्वचिन्मोहंक्वचिद्दुःखंसुखंभयं क्वचिन्मृत्युमवाप्नोतिव्याध्यादिभिरु
तार्दितः १८ अयुतायुतवर्षाणांसहस्राणिशतानिच व्यतीयुर्भ्रमतस्तस्मिन्विष्णु
मायावृतात्मनः १९ सकदाचिद्भ्रमंस्तस्मिन्पृथिव्याःककुदिद्विजः न्यग्रोधपोतंदद्द
शेफलपल्लवशोभितं २० प्रागुत्तरस्यांशाखायांतस्यापिददृशेशिशुं शयानंपर्णपु
टकेग्रसंतंप्रभयातमः २१ महामरकतश्यामंश्रीमद्वदनपंकजं कंबुग्रीवंमहोरस्कं
सुनासंसुंदरभ्रुवं २२

कंजंयस्यतंकंबुवत्त्रिरेखा वृत्ताग्रीवायस्यतंमहोरस्कंवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी०
५

शालवक्षसंस्तुनासं शोभनं नासा यस्य तं सुंदरे भ्रुवौ यस्य तं २२ श्वासैरेजंतः कंपाय
माना अलकास्तैराभातं शोभितं कंबुवत् अंतर्वलयेन श्रीर्ययोस्तौ कंबुश्रियौ तत् योः
कर्णयोर्दाडिमपुष्पे यस्य तं विद्रुमतुल्याऽधरभासा ईषत् शोणायितं सुधातुल्यं स्मि

श्वासैजदलकाभातं कंबुश्रीकर्णदाडिमं विद्रुमाधरभासेषच्छोणायित
सुधास्मितं २३ पद्मगर्भारुणापांगं हृद्यहासावलोकनं श्वासैजद्वलिसं
विग्ननिम्ननाभिदलोदरं २४

तं यस्य तं २३ पद्मगर्भवत् आ ईषत् अरुणाव
पांगौ नेत्रांतौ यस्य तं हृद्यो हासो यस्मिन् तदवलोकनं यस्य तं श्वासैरेजंत्यश्चलंत्यो
वलयस्तिर्यक् निम्नरेखास्ताभिः संविग्ना चंचला निम्ना च गंभीरा नाभिर्यस्मिन् तत्
दलैरश्वत्थपत्रसंकाशमुदरं यस्य तं २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चारुअंगुलयोयपयोस्ताभ्यांउन्नीयआकृष्यधयंतंपिबंतं २५ हृष्टमनाश्चविलोचनांबु
जेचप्रोत्फुल्लानितानियस्यसः अद्भुतभावमसाश्चर्यरूपंतेनशंकितःसन्नपितंप्रष्टुं

॥ चार्वंगुलीभ्यांपाणिभ्यामुन्नीयचरणांबुजं मुखेनिधायविप्रेंद्रोधयं
तंवीक्ष्यविस्मितः २५ तद्दर्शनाद्धीतपरिश्रमोमुदाप्रोत्फुल्लहृन्नेत्रवि
लोचनांबुजः प्रहृष्टरोमाद्भुतभावशंकितः प्रष्टुंपुरस्तंप्रससारबाल
कं २६ तावच्छिशोर्वैश्वसितेनभार्गवःसोंतःशरीरंमशकोयथावि
शत् तत्राप्यदोन्यस्तमचष्टकृत्स्नशोयथापुरामुह्यदतीवविस्मितः

२१

पुरःप्रससारसमीपंगतः २६ अदर्श्यदंजगत्यथापुराप्रलयात्पूर्वंन्यस्तंविन्यस्तंदृष्ट्वा
चातीवविस्मितःसन्अमुह्यत् २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्स्नशोदर्शनंप्रपंचयतिखमित्यादिना ककुभोदिशः पुराणिआकरांश्वखेदान्
कर्षकग्रामान्व्रजान्गोकुलानिआश्रमांश्ववर्णांश्वतेषांवृत्तीश्चेत्यर्थः २८ नाना

खंरोदसीभगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभःसुरासुरान्
वनानिदेशान्सरितःपुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः २८ म
हांतिभूतान्यथभौतिकान्यसौकालंचनानायुगकल्पकल्पं यत्किं
चिदन्यद्व्यवहारकारणंददर्शविश्वंसदिवावभासितं २९

युगानिकल्पांश्वक
ल्पयतितैर्वाकल्प्यतइतितथातंकालंचसदिवपरमार्थइवेत्यवभासितंतेनैव २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० वटंचतोकंचवीक्ष्यतस्यप्रेम्णासुधातुल्यस्मितयुक्तेनापांगनिरीक्ष्यणेननिरीक्षि
तःसन् ३१ अथतंबालकमधोक्षजंपरिष्वक्तुमभ्ययादितिद्वयोरन्वयः कथंभूतंनेत्रा

हिमालयंपुष्पवहांचतांनदींनिजाश्रमंयत्रऋषीनपश्यत् विश्वंविपश्य-
न्श्वासितान्छिशोर्वैबहिर्निरस्तोन्यपतल्लयाब्धौ ३० तस्मिन्पृथिव्याःक
कुदिप्ररूढंवटंचतत्पत्रपुटेशयानं तोकंचतत्प्रेमसुधास्मितेननिरीक्षि
तोपांगनिरीक्षणेन ३१ अथतंबालकंवीक्ष्यनेत्राभ्यांधिष्ठितंहृदि
अभ्ययादतिसंक्लिष्टःपरिष्वक्तुमधोक्षजं अ

भ्यांहृदिधिष्ठितं ३२ नमोनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावत्परिष्वंगलाभात्पूर्वमेवऋषेस्तस्यांतर्हितोबभूव तदुद्यमवैफल्येदृष्टांतः अनी
शोनिर्दैवस्ते ननिर्मितारईहाक्रीडायथेति ३३ तमंतर्हितंभगवंतमनुवदःसलिलंलो

तावत्सभगवान्साक्षाद्योगाधीशोगुहाशयः अंतर्दधेऋषेःसद्योयथेहा
नीशानिर्मिता ३३ तमन्वथवत्सोब्रह्मन्सलिलंलोकसंप्लवः तिरोधायिसह
णात्सोपिस्वाश्रमेपूर्ववत्स्थितः ३४ इतिश्रीभागवतेमाहापुराणेद्वादशे
मायादर्शनंनामनवमोध्यायः ॥९॥

कसंप्लवश्चतिरोधायिअंतर्हितःसच
स्वाश्रमेएवयथापूर्वंस्थितइति ३४ ॥इतिश्रीभागवतेद्वादशेटिकायांनवमोध्यायः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशमेशिवआगस्समुनेस्तुष्टोवरानदात् तेनसाकमतिप्रीत्यासमात्माष्युस भाजय
त् १ ज्ञानकाशयाज्ञानवत्प्रकाशमानया त्वद्भजनं विना विद्वांसो पियस्यतवमाय

सूतउ० सएवमनुभूयेदंनारायणविनिर्मितं वैभवंयोगमायायास्त
मेवशरणंययौ १॥ मार्कंडेयउ० ॥ प्रपन्नोस्म्यंघ्रिमूलंतेप्रपन्नाभयदंहरे
यन्माययापिविबुधामुह्यंतिज्ञानकाशया २॥ सूतउ० ॥ तमेवंनिभृ
तात्मानंवृषेणदिविपर्यटन् रुद्राण्याभगवान्रुद्रोददर्शस्वगणैर्वृतः

याज्ञानिनोवयमित्यहंकारेणमुह्यंतीत्यर्थः २ श्रीनारायणएवस्वमायादर्शनश्रां
तंश्रीशिवरूपेणसांत्वयामास तदाह तमेवमित्यादिना निभृतात्मानंसमाहितचि
त्तं रुद्राण्याभवान्या ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निभृतानिश्चलाआत्मेंद्रियाशयादेहेंद्रियमनांसियस्यतं ४ निभृतंनिश्चलमुदकं
झषव्रातश्चयास्मिन्सः संसिद्धिफलंसाक्षात्कुरुप्रकटीकुरुयतोभवान्सिद्धिदः ५

अथोमातमृषिंवीक्ष्यगिरिशंसमभाषत पश्येमंभगवन्विप्रंनिभृ
तात्मेंद्रियाशयं ४ निभृतोदझषव्रातोवातापायेयथार्णवः कुर्वस्य
तपसःसाक्षात्संसिद्धिंसिद्धिदोभवान् ५ ॥श्रीभगवानु०॥ नैवेच्छत्याशि
षःक्वापिब्रह्मर्षिर्मोक्षमप्युत भक्तिंपरांभगवतिलब्धवान्पुरुषेव्यये ६
अथापिसंवदिष्यामोभवान्येतेनसाधुना अयंहिपरमोलाभोनृणां
साधुसमागमः ७

आशिषःअभ्युदयलक्षणाः ६ तस्वित् अत्रहेतुःभक्तिमिति ६
संवदिष्यामः संवादंकरिष्यामः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सात्वतांसतां गतिर्लेहेतुः ईशानइति ८ रुद्धाधियः अंतकरणस्यवृत्तंयोयेनसः

९ नकेवलंबहिरेवआत्मन्यपिप्राप्तंशिवंविचक्ष्यविस्मितःकथंप्राप्तंसहसाभ

सूतउवाच॥ इत्युक्त्वातमुपेयायभगवान्सात्वतांपतिः ईशानःसर्व

वियानामीश्वरःसर्वदेहिनां ८ तयोरागमनंसाक्षादीशयोर्जगदा

त्मनोः नवेदरुद्धधीवृत्तिरात्मानंविश्वमेवच ९ भगवांस्तदभिज्ञा

यगिरिशोयोगमायया आविशत्तद्गुहाकाशंवायुश्छिद्रमिवेश्वरः १०

आत्मन्यपिशिवंप्राप्तंतडित्पिंगजटाधरं त्र्यक्षंदशभुजंप्रांशुमुद्यं

कस्मादेवहृदिभानं कथंभूतंतडिद्वत्पिशंगाजटाधारयतीतितथातंत्रीण्यक्षीणिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वा
८३

ष्मालादिभिः सहाक्षमालादीन् बिभ्राणमित्यन्वयः अक्षमालादीनां द्वंद्वैक्यं १२ वि

व्याघ्रचर्मांबरं स्थूलधनुरिष्वसिचर्मभिः अक्षमालाडमरुककपालपर
शुं सह १२ बिभ्राणं सहसाभातं किंचस्यत् दिविस्मितः १२ किमिदंकु
तएवेतिसमाधेर्विरतोमुनिः नेत्रेउन्मील्यददृशेसगणंसोमयाग
तं १३ रुद्रंत्रिलोकैकगुरुंनमामशिरसामुनिः तस्मैसपर्यांव्यदधा
त्सगणायसहोमया १४ स्वागतासनपाद्यार्घ्यगंधस्रक्धूपदीपकैः १४

स्मयपूर्वकंबहिर्दर्शनमाह किमिदमिति सोमयाउमयासहागतंरुद्रंददृशे १२
ततोननाम १४

८३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्णकामत्वंव्यनक्तियेनत्वयाजगत्‌निर्वृत्तंभवतीति १५ निर्गुणत्वेनत्रिगुणत्वेन
चनमस्करोति नमःशिवायनिर्गुणायसत्वायसत्वाधिष्ठात्रेअतएवप्रमङ्यती

आहत्वात्मानुभावेनपूर्णकामस्यतेविभो करवामकिमीशानयेनेदं
निर्वृत्तंजगत्‌ १५ नमःशिवायशांतायसत्वायप्रमडायच रजोजुषे
ऽप्यघोरायनमस्तुभ्यंतमोजषे १६॥सू०त उ०॥एवंस्तुतःसभगवानादि
देवःसतांगतिः परितुष्टःप्रसन्नात्माप्रहसंस्तमभाषत १७ श्रीभगवानु०
वरंवृणीध्वंनःकामंवरदेशावरंत्रयः अमोघंदर्शनंयेषांमर्त्योयद्विंदते
ऽमृतं १८

तितथातस्मै १६ १७ नोस्मात्तः ये यःब्रह्मविष्णुमहेश्वराःयतयेभ्यस्ततो
वयं १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरदानादिनाभवत्स्वेवैवास्माभिःक्रियतेनत्वनुग्रहःजगद्वंद्यलाञ्छनतामितिब्राह्म
णान्स्तौतिब्राह्मणाइत्यादिनायेसाधवःसदाचाराःशांताःमत्सरादिरहिताःनिःसं

ब्राह्मणाःसाधवःशांतानिःसंगाभूतवत्सलाः एकांतभक्ताअस्मासु
निर्वैराःसमदर्शिनः १९ सलोकालोकपालास्तान्वंदंत्यर्च्चंत्युपासते
अहंचभगवान्ब्रह्मास्वयंचहरिरीश्वरः २० नतेमय्यच्युतेजेचभि
दामण्वपिचक्षते नात्मनश्चजनस्यापितद्युष्मान्वयमीमीह २१

गाःनिष्कामाः १९ नकेवलंतएवकिंचअहंचेत्यादि २० पूज्यतमत्वेहेत्वंतरमाहने
ति अण्वपिअणुमात्रमपिचक्षतेपश्यंतितत्तस्मात् एवंभूतान्युष्मान् ईमहिभजेम
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ ब्रात्मणेभ्यः ब्रात्मणान् आत्मसमाधानंचित्तैकाग्र्यं तपआलोचनं स्वाध्या
यः अध्ययनंसंयमः यागादिनियमः तैः २३ किंचप्रवणादिसादि २४ चंद्रोलला

नद्यस्मयानितीर्थानिनदेवाश्चेतनोऽस्सिताः तेपुनंत्युरुकालेनयूयंद
र्शनमात्रतः २२ ब्राह्मणेभ्योनमस्यामोयेस्मद्रूपंत्रयीमयं विभ्रत्या
त्मसमाधानतपःस्वाध्यायसंयमैः २३ श्रवणाद्दर्शनाद्वापिमहापा
तकिनोपिवः॥शुध्येरन्नंत्यजाश्चापिकिमुसंभाषणादिभिः २४॥सूत
उ०॥इतिचंद्रललामस्यधर्मगुप्तोपबृंहितं वचोमृतायनमृषिनर्मल

मोभूषणंयस्यतस्यधर्मरहस्ययुक्तंअमृतास्यदंवचः कर्णाभ्यांपिबंनातृप्यत्अल
मितिनामन्यत् कर्णयोरमृतायनमितिवान्वयः २५

शिवस्यवागेवामृतंतेनध्वस्तः क्लेशपुंजोयस्यसः २६ इयंलीलादुर्विभाव्याअवि
तर्क्यायद्ययाईशितव्यानिस्वानियम्यानिभूतानिजगदीश्वराः स्वयंनमंतिस्तुवंति

सचिरंमाययाविष्णोर्भ्रामितः कर्शितोभृशं शिववागमृतध्वस्तक्ले
शपुंजस्तमब्रवीत् २६ ॥ ऋषिरुवाच ॥ अहोईश्वरचर्य्येयंदुर्विभाव्याशरी
रिणां यंन्नमंतीशितव्यानिस्तुवंतिजगदीश्वराः २७ धर्मंग्राहयितुंप्रा
यः प्रवक्तारश्चदेहिनां आचारंत्यनुमोदंतेक्रियमाणंस्तुवंतिच २८

चेति २७ अथवालोकसंग्रहमात्रमेतदित्याहधर्ममिति प्रवक्तारोपिपरत्स्वयंदेहि
नांधर्ममाचरंति २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेतत्स्वप्रभावतिरस्कारकं कथं मयाक्रियते तत्राह नेति एतावता लोकसंग्र
हमात्रेण तैर्नमनादिभिः कथंभूतैः स्वमा यामयीवृत्तिः येषु तैः भगवतो मायि
नस्तवानुभावो न प्रदुष्येत् यतः सिद्धस्य मायिनः कुहकं कपटं यथा तथा एतानि

नैतावता भगवतः स्वमायामयवृत्तिभिः न दुष्येतानुभावस्तैर्मा
यिनः कुहकं यथा २९ सृष्टेदं मनसा विश्वमात्मनानुप्रविश्य यः गु
णैः कुर्वद्भिराभाति कर्त्तेव स्वप्नदृग्यथा ३०

नमनादीनि अंतस्य कुहके तः
रात्मानुभावो न दुष्यत इति तद्वत् न दुष्येतेति पाठे नकारस्य दृष्टांतेनुषंगः २९ मा
याचेष्टितं प्रपंचयति सृष्टेति स्वप्नदृक् यथेत्यविद्याचेष्टिते दृष्टांतः ३० ६९ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

